00044464

BOMBAY BRANCH
OF THE
ROYAL ASIATIC SOCIETY
TOWN HALL, BOMBAY.

Digitized with financial assistance from the
Government of Maharashtra
on 06 February, 2016

Kirat Arjuniya

॥ काव्यनाम ॥

॥ किरातार्ज्जुनीय ॥

44464

॥ कविनाम ॥

॥ भारवि ॥

॥ टीकानाम ॥

॥ घण्टापथ ॥

॥ टीकाकारनाम ॥

॥ मल्लिनाथ ॥

॥ १ ॥

ORI 891.21
Bha/Kir
44464

॥ अत्रकाव्येसर्गसंख्या ॥

अष्टादश १८ ॥

॥ अत्रकाव्येमूलश्लोकसंख्या ॥

एकपञ्चाशदधिकसहस्रं १०५१ ॥

॥ अत्रार्जुनस्यकाव्येनायकस्यपाशुपतास्त्रलाभःफलम् ॥ १ ॥

00044464

॥ शाकेषडग्निसप्तेन्दुसम्मितेवत्सरेशुभे ॥

॥ शाके १७३६ ॥

---

॥ चन्द्राद्रिवसुभूमानेविक्रमादित्यवत्सरे ॥

॥ संवत् १८७१ ॥

---

॥ भूयुग्मदृष्टिधरणीसंमितेयवनाब्दके ॥

॥ सन १२२१ साल ॥

---

॥ आषाढस्यसितेपक्षेतृतीयासोमवासरे ॥

---

॥ वेदभूमिवसुचन्द्रमासनईसवीप्रमान ॥

॥ माहजूनकेवाइसाकथ्योग्रन्थपरधान ॥

॥ सन् १८१४ ईसवी । ताः २२ जून ॥

नगरे कलिकत्ताख्ये श्रीमल्लाटन्दपाज्ञया । श्री
विद्याकरमिश्रेण वाबूरामेण धीमता ॥ १ ॥
सम्भूय शोधयित्वाथ काव्यं टीकासमन्वितम् । मु
द्राक्षरेण यत्नेन न्यासितं सुधियां मुदे ॥ २ ॥
विना परिश्रमं धीराः पाठयन्तु पठन्तु च । तद
र्थमङ्कितञ्चैतत्सटीकङ्काव्यमुत्तमम् ॥ ३ ॥

॥ संस्कृतयन्त्रे खिदिरपुरे श्रीमदनपालेनाङ्कितम् ॥

॥ ॐ ॥ श्रीगणेशायनमः ॥ अर्द्धाङ्गीकृततद्दाम्पत्यमपिगाढानुरागियत्। पितृभ्या
ञ्जगतस्तस्मैकस्मैचिन्महसेनमः ॥ १ ॥ आलम्बेजगदालम्बंहेरम्बचरणाम्बुज
म्। शुष्यन्तियद्रजःस्पर्शात्सद्यःप्रत्यूहवार्द्धयः ॥ २ ॥ ताद्व्यमव्ययन्धामसारस्व
तमुपास्महे। यत्प्रसादात्प्रलीयन्तेमोहान्धतमसच्छटाः ॥ ३ ॥ वाणीङ्काणभुजी
मजीगणद्वाशासीच्चवैयासकीमन्तस्तन्त्रमरंस्तपन्नगगवीगुम्फेषुचाजागरीत्।
वाचामाकलयद्रहस्यमखिलंयश्चाक्षपादस्फुरांलोकेभूद्यदुपज्ञमेवविदुषांसौज
न्यजन्यंयशः ॥ ४ ॥ मल्लिनाथकविःसोयंमन्दात्मानुजिघृक्षया। तत्किरातार्जुनी
याख्यंकाव्यंव्याख्यातुमिच्छति ॥ ५ ॥ नारिकेलफलसम्मितंवचोभारवेःसपदितद्वि
भज्यते। स्वादयन्तुरसगर्भनिर्भरंसारमस्यरसिकायथेप्सितम् ॥ ६ ॥ नानानिब
न्धविषमैकपदैर्नितान्तंसाशंकचंक्रमणखिन्नधियामशङ्कम्। कर्तुम्प्रवेशमिहभा
रविकाव्यबन्धेघण्टापथंकमपिनूतनमातनिष्ये ॥ ७ ॥ इहान्वयमुखेनैवसर्वंव्या
ख्यायतेमया। नामूलंलिख्यतेकिञ्चिन्नानपेक्षितमुच्यते ॥ ८ ॥ अथतत्रभवान्भार
विर्नामाकविःकाव्यंयशसेऽर्थकृतेव्यवहारविदेशिवेतरक्षतये। सद्यःपरनिर्वृतयेका
न्तासंमिततयोपदेशयुजेइत्याद्यालंकारिकवचनप्रामाण्यात्काव्यस्यानेकश्रेयःसाध
नतांकाव्यालापांश्चवर्जयेदितिनिषेधशास्त्रस्यासत्काव्यविषयतांचपश्यन्किरातार्जु

नीयांख्यंमहाकाव्यंचिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षण
फलसाधनत्वादाशीर्नमस्क्रियावस्तुनिर्देशोवापितन्मुखमित्याशीर्वादाद्यन्यतम
स्यप्रबन्धमुखलक्षणत्वाच्चवनेचरस्ययुधिष्ठिरप्राप्तिरूपंवस्तुनिर्दिशन्कथामुपक्षि
पति। श्रियइति। आदितःश्रीशब्दप्रयोगाद्वर्णगणादिशुद्धिरत्रोपयुज्यते। त
दुक्तंदेवतावाचकाःशब्दायेचभद्रादिवाचकाः। तेसर्वेनैवनिंद्याःस्युर्लिपितोगण
तोपिचेति। कुरूणांनिवासाःकुरवोजनपदाःतस्यनिवासइत्यण्प्रत्ययःजनपदे
लुक्। तेषामधिपस्यदुर्योधनस्यसम्बन्धिनींशेषेषष्ठी। श्रियोराज्यलक्ष्म्याः। कर्तृ
कर्मणोःकृतीतिकर्मणिषष्ठी। पाल्यतेऽनयेतिपालनीतांप्रतिष्ठापिकामित्यर्थःप्रजा
रागमूलत्वात्सम्पदइतिभावः। करणाधिकरणयोश्चेतिल्युट्करणेल्युट्टिड्ढा

श्रीगणेशायनमः॥ श्रियःकुरूणामधिपस्यपालनींप्रजासुवृत्तिंयमयुङ्क्तवे
दितुम्। सवर्णिलिङ्गीविदितःसमाययौयुधिष्ठिरंद्वैतवनेवनेचरः॥ १॥

णञित्यादिनाङीप्। प्रजासुजनेषुविषये। प्रजास्यात्सन्ततौजनइत्यमरः। वृत्तिं
व्यवहारंवेदितुंज्ञातुंयंवनेचरमयुङ्क्तनियुक्तवान्। वर्णःप्रशस्तिरस्यास्तीतिणिनिप्र
त्ययः। तदुक्तम्। स्मरणंकीर्तनंकेलिःप्रेक्षणंगुह्यभाषणम्। संकल्पोऽध्यवसाय
श्चक्रियानिर्वृत्तिरेवच॥ १॥ एतन्मैथुनमष्टांगम्प्रवदन्तिमनीषिणः। विपरी
तम्ब्रह्मचर्यमेतदेवाष्टलक्षणम्॥ २॥ एतदष्टविधमैथुनाभावःप्रशस्तिः। व
र्णीब्रह्मचारीतस्यलिङ्गंचिह्नमस्यास्तीतिवर्णिलिङ्गीब्रह्मचारिवेषवानित्यर्थःस
नियुक्तःवनेचरतीतिवनेचरःकिरातःभिल्लःकिरातशबरपुलिन्दाम्लेच्छजातयइत्यम
रः। चरेष्टइतिटप्रत्ययःतत्पुरुषेकृतिबहुलमित्यलुक्। विदितंवेदनमस्यास्ती
तिविदितःपरवृत्तान्तज्ञानवानित्यर्थः। अर्शआदिभ्योऽजित्यच्प्रत्ययःअथवाकर्तरि

कर्मधर्मोपचारात्। विदितः परवृत्तान्तो विदित इत्युच्यते उभयत्रापि पीता गावो भुक्ता ब्राह्मणा विभक्ता भ्रातर इत्यादिवत्साधुत्वं न तु कर्त्तरिक्तस्य कर्मकेभ्यस्तस्य विधाना भावात्। अत एव भाष्यकार अकारो मत्वर्थीयः विभक्तमेषामस्तीति विभक्ताः॥ पीत मेषामस्तीति पीता भुक्तमेषामस्तीति भुक्ता इति। अथवा उत्तरपदलोपोऽत्र द्रष्टव्यः विभक्तधना विभक्ताः भ्रातरः पीतोदकाः पीता भुक्तान्ना भुक्ता इति। अत्र लोपशब्दार्थमा ह कैय्यटः॥ गम्यार्थस्याप्रयोग एव लोपोऽभिमतः विभक्ता भ्रातरः इत्यत्र च धनस्य विभक्तत्वं तत्भ्रातृषूपचर्य्यते पीता गावः इत्यत्राप्युदकस्य पीतत्वं गोष्वारोप्यते भुक्ता ब्राह्मणा इत्यत्र अन्नस्य भुक्तत्वं ब्राह्मणेषूपचर्यत इति। तद्वदत्रापि। वृत्तिगतं विदितत्वं वेदितरि वनेचरे उपचर्यते। एतेन न्यायपीत प्रतिबद्धवत्सायातुन्न प्रथमं व्यव स्यति। जलं युष्मास्व पीतेषु इत्येवमादयो व्याख्याताः। अथवा विदितः वेदितवान् कर्मकादप्यविवक्षिते कर्मणि कर्त्तरि क्तः आश्रितः कर्त्तरीत्यादौ यथा कुधातोरर्थान्त रे वृत्ते धात्वर्थेनोपसंग्रहः। प्रसिद्धेरविवक्षातः कर्म्मणोऽकर्मिका क्रियेति। प्रती हारादिना ज्ञापित इति वा। द्वैतवने द्वैताख्ये तपोवने। यद्वा द्वे इते गते यस्मात्तत् द्वीतं द्वीतमेव द्वैतः तच्च तद्वनञ्च तस्मिन् शोकमोहादिरहिते इत्यर्थः युधि रणे स्थिरं यु धिष्ठिरं धर्मराजम्। हलन्तात्सप्तम्याः संज्ञायामित्यलुक्। गवियुधिभ्यां स्थिर इ ति षत्वं समाययौ सम्प्राप्तः। अत्र वने वनेचर इति द्वयोः स्वरव्यञ्जनसमुदाययोरे कदैवावृत्त्या वृत्त्यनुप्रासो नामालंकारः। अस्मिन्सर्गे वंशस्थं वृत्तं तल्लक्षणम्। ज तौ तु वंशस्थमुदीरितं जराविति॥१॥ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ *॥

सम्प्रति तत्कालोचितत्वं आदेशयन् तस्य तद्गुणसम्पन्नत्वमादर्शयन्नाह। कृतप्रणा मस्येति। कृतप्रणामस्य तत्कालोचितत्वात्कृतनमस्कारस्य सपत्नेन रिपुणा दुर्योध नेन। रिपुर्वैरिसपत्नारिद्विषद्द्वेषणदुर्हृद इत्यमरः। जितां स्वायत्तीकृतां महीं महीभुजे युधिष्ठिराय क्रियाग्रहणात्संप्रदानत्वं निवेदयिष्यतो ज्ञापयिष्यतः। स्व

टःशब्देतिशतृप्रत्ययः। तस्यवनेचरस्यमनोनविव्यथे। कथमीदृक्त्वप्रियंशंसेवि
ज्ञापयामीतिमनसिनचचालेत्यर्थः। व्यथभयचलनयोरितिधातोर्लिट्। उक्तम
र्थमर्थान्तरोपन्यासेनसमर्थयते। नहीति। हियस्माद्धितमिच्छन्तीतिहितैषिणः
स्वामिहितार्थिनःपुरुषाःमृषामिथ्याभूतम्प्रियंवक्तुन्नेच्छन्ति। अन्यथाकार्य्यविघात
कृतयास्वामिद्रोहिणःस्युरितिभावः। अमौढ्यममोघममृषाभाषित्वमभ्यूहकत्व
ञ्चेतिचारगुणाइतिनीतिवाक्यामृते ॥२॥ * * * * * * * * * * * ॥
तथापिप्रियार्हेराज्ञिकटुनिष्ठुरोक्तिर्नयुक्तेत्याशंक्यस्वाम्यनुज्ञायांनदुष्यतीत्याशयेना
ह। द्विषामिति। रहस्येकान्तेसवनेचरोद्विषांशत्रूणांकर्मणिषष्ठी। विघातायद्विषोवि

कृतप्रणामस्यमहींमहीभुजेजितांसपत्नेननिवेदयिष्यतः। नविव्य
थेतस्यमनोनहिप्रियम्प्रवक्तुमिच्छन्तिमृषाहितैषिणः ॥ २ ॥ द्वि
षांविघातायविधातुमिच्छतोरहस्यनुज्ञामधिगम्यभूभृतः। ससौष्ठ
वौदार्य्यविशेषशालिनींविनिश्चितार्थामितिवाचमाददे ॥ ३ ॥

हन्तुमित्यर्थःतुमर्थाच्चभाववचनादितिचतुर्थीभाववचनाच्चेतितुमर्थेघञ्प्रत्ययः। अ
न्नादर्थेचतुर्थ्यामपिनदोषःतथापिप्रयोगवैचित्र्यविशेषस्यालंकारत्वादेवंव्याचक्षते
। विधातुंव्यापारङ्कर्तुमिच्छतःसमानकर्तृकेषुतुमुन्द्विषोविहन्तुमुद्युक्तज्ञानस्येत्यर्थः
अतएवभूभृतोयुधिष्ठिरस्यानुज्ञामधिगम्यप्राप्यसुष्ठुभावःसौष्ठवंशब्दसामर्थ्यंसुष्ठु
शब्दादव्ययादुद्गात्रादित्वादञ्प्रत्ययःउदारस्यभावःऔदार्य्यंअर्थसम्पत्तिःतयोर्द्व
न्द्वःसौष्ठवौदार्य्ये। औदार्य्यशब्दस्याजाद्यजन्तत्वेपिलक्षणहेत्वोःक्रियायाइत्यत्रा
ल्पाच्तरस्यापिहेतुशब्दस्यपूर्वनिपातमकुर्वताऽऽचार्येणैवपूर्वनिपातशास्त्रस्यानित्यत्व
ज्ञापनान्नपूर्वनिपातः। उक्तञ्चकाशिकायाम्। अयमेवलक्षणहेत्वोरितिनिर्देशः

पूर्वनिपातव्यभिचारचिह्नमिति तत्रैव विशेषः। तयोर्वा विशेषः तेन शास्त्रतो भवतीति सौ
ष्ठवौदार्यविशेषशालिनीतान्ताच्छील्ये णिनिः विनिश्चितार्था विशेषतः प्रमाणतो निर्णी
तार्था इति वक्ष्यमाणरूपां वाचमाददे स्वीकृतवानुवाचेत्यर्थः ॥ ३ ॥ * ❁ * ॥

प्रथमन्तावदप्रियनिवेदकमात्मानम्प्रत्यक्षोभयाचते। क्रियास्विति। हे नृप क्रिया
सु कृत्यवस्तुषु युक्तैर्नियुक्तैरनुजीविभिर्भृत्यैश्चारादिभिरित्यर्थः चरन्तीति चरास्त एव
चाराः। चरेः पचाद्यच्। अजन्तात्प्रज्ञादित्वादण्प्रत्ययः त एव चक्षूंषि येषान्ते चार
चक्षुषः। गावः पश्यन्ति गन्धेन वेदैः पश्यन्ति पण्डिताः। चारैः पश्यन्ति राजानश्चक्षु
र्भ्यामितरे जना इति। स्वपरमण्डलकार्याकार्यविलोकने चाराश्चक्षूंषि क्षितिपालाना
मिति नीतिवाक्यामृते। प्रभवो निग्रहानुग्रहसमर्थाः स्वामिनो न वञ्चनीयाः न प्रतार

क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥ ४ ॥

णीयाः सत्यमेव वक्तव्या इत्यर्थः। चारपचारे चक्षुरपचारवद्राज्ञाम्पदे पदे निपात इ
ति भावः। अतोऽप्रतार्यत्वादसाध्वप्रियं साधु प्रियं वा मदुक्तमिति शेषः। वाशब्दो
ऽप्यर्थे। क्षन्तुं सोढुमर्हसि। कुतः हितम्पथ्यं मनोहारि प्रियञ्च वचो दुर्लभं अतो म
द्वचोऽपि हितत्वादप्रियमपि क्षन्तव्यमित्यर्थः ॥ ४ ॥ * ❁ * ❁ * ❁ * ❁ ॥

तर्हि तूष्णीम्भाव एव वरमित्याशङ्क्याह। स इति। यः सखा अमात्यादिरधिपं स्वामि
नं साधु हितं न शास्ति नोपदिशति। अविशासीत्यादिना शासेर्दुहादिपाठे द्विकर्मक
त्वम्। स हितानुपदेष्टा कुत्सितः सखा किंसखा दुर्मन्त्रीत्यर्थः किमः क्षेप इति समासा
न्तप्रतिषेधः। तथा यः प्रभुर्निग्रहानुग्रहसमर्थः स्वामी हितादाप्तजनाद्धितोपदे
ष्टुः सकाशात्। आख्यातोपयोगेऽपादानत्वात्पञ्चमी। न संशृणुते न शृणोति हि

॥कि०टी०॥ ढ्नश्च्चेतिशतृप्रत्ययः। तस्यवनेचरस्यमनोनविव्यथे। कथमीदृक्ष्वप्रियंराज्ञोवि

।टी०१॥ ज्ञापयामीतिमनसिनचचालेत्यर्थः। व्यथभयचलनयोरितिधातोर्लिट्। उक्तम

॥ २ ॥ र्थमर्थान्तरोपन्यासेनसमर्थयते। नहीति। हियस्माद्धितमिच्छन्तीतिहितैषिणः

स्वामिहितार्थिनःपुरुषाःमृषामिथ्याभूतम्प्रियंवक्तुन्नेच्छन्ति। अन्यथाकार्य्यविघात

कतयास्वामिद्रोहिणःस्युरितिभावः। अमौढ्यममांद्यममृषाभाषित्वमभ्यूहकत्व

ञ्चेतिचारगुणाइतिनीतिवाक्यामृते ॥ २ ॥ * ❁ * ❁ * ❁ * ❁ * ❁ * ॥

तथापिप्रियार्हैर्राज्ञिकटुनिष्ठुरोक्तिर्नयुक्तेत्याशंक्यस्वाम्यनुज्ञायांनदुष्यतीत्याशयेना

ह। द्विषामिति। रहस्येकान्तेसवनेचरोद्विषां। शत्रूणांकर्मणिषष्ठी। विघातायद्विषोवि

कृतप्रणामस्यमहीं महीभुजेजितांसपत्नेननिवेदयिष्यतः। नविव्य

थेतस्यमनोनहिप्रियम्प्रवक्तुमिच्छन्तिमृषाहितैषिणः ॥ २ ॥ द्वि

षांविघातायविधातुमिच्छतोरहस्यनुज्ञामधिगम्यभूभृतः। ससौष्ठ

वौदार्य्यविशेषशालिनींविनिश्चितार्थामितिवाचमाददे ॥ ३ ॥

हन्तुमित्यर्थःतुमर्थाच्चभाववचनादितिचतुर्थीभाववचनाच्चेतितुमर्थेघञ्प्रत्ययः। अ

त्रतादर्थ्येचतुर्थ्यामपिनदोषःतथापिप्रयोगवैचित्र्यविशेषस्यालंकारत्वादेवंव्याचक्षते

। विधातुंव्यापारङ्कर्तुमिच्छतःसमानकर्तृकेषुतुमुन्द्विषोविहन्तुमुद्युक्तज्ञानस्येत्यर्थः

अतएवभूभृतोयुधिष्ठिरस्यानुज्ञामधिगम्यप्राप्यसुष्ठुभावःसौष्ठवंशब्दसामर्थ्यंसुष्ठु

शब्दादव्ययाद्‌गात्रादित्वादञ्प्रत्ययःउदारस्यभावःऔदार्य्यंअर्थसम्पत्तिःतयोर्द्व

न्द्वःसौष्ठवौदार्यै। औदार्य्यशब्दस्याज्ञाद्यजन्तत्वेपिलक्षणहेत्वोःक्रियायाइत्यत्रा

ल्पाचतरस्यापिहेतुशब्दस्यपूर्वनिपातमकुर्वतासूत्रकृतैवपूर्वनिपातशास्त्रस्यानित्यत्व

ज्ञापनान्नपूर्वनिपातः। उक्तञ्चकाशिकायाम्। अयमेवलक्षणहेत्वोरितिनिर्देशः

पूर्वनिपातव्यभिचारचिह्नमितितएवविशेषाःतयोर्वाविशेषःतेनशालतेशोभतेइतिसौ
ष्ठुवोदार्थविशेषशालिनोतान्ताच्छील्येणिनिःविनिश्चितार्थाविशेषतःप्रमाणतोनिर्णी
तार्थाइतिवक्ष्यमाणरूपांवाचमादद्देस्वीकृतवानुवाचेत्यर्थः ॥ ३ ॥ * ० * ॥
प्रथमन्तावदप्रियनिवेदकमात्मानम्प्रत्यक्षोभंयाचते । क्रियास्विति । हेनृपक्रिया
सुकृत्यवस्तुषुयुक्तैर्नियुक्तैरनुजीविभिर्भृत्यैश्चारादिभिरित्यर्थःचरन्तीतिचराःस्तए
वचाराः । चरेःपचाद्यच् । अजन्तात्प्रज्ञादित्वादण्प्रत्ययःतएवचक्षुर्येषान्तेचार
चक्षुषः । गावःपश्यन्तिगन्धेनवेदैःपश्यन्तिपण्डिताः । चारैःपश्यन्तिराजानश्चक्षु
र्भ्यामितरेजनाइति । स्वपरमण्डलकार्याकार्यविलोकनेचाराश्चक्षूंषिक्षितिपालाना
मितिनीतिवाक्यामृते । प्रभवोनिग्रहानुग्रहसमर्थाःस्वामिनोनवञ्चनीयाःनप्रतार

क्रियासुयुक्तैर्नृपचारचक्षुषोनवञ्चनीयाःप्रभवोऽनुजीविभिः ।
अतोऽर्हसिक्षन्तुमसाधुसाधुवाहितंमनोहारिचदुर्लभंवचः ॥ ४ ॥

णीयाःसत्यमेववक्तव्याइत्यर्थः । चारापचारेचक्षुरपचारवद्राज्ञाम्पदेपदेनिपातइ
तिभावः । अतोऽप्रतार्यत्वादसाध्वप्रियंसाधुप्रियंवामदुक्तमितिशेषः । वाशब्दो
ऽप्यर्थे । क्षन्तुंसोढुमर्हसि । कुतःहितम्पथ्यंमनोहारिप्रियञ्चवचोदुर्लभंअतोम
दुक्तेऽपिहितेनाप्रियमपिक्षन्तव्यमित्यर्थः ॥ ४ ॥ * ० * ० * ० * ० ॥
तर्हितूष्णीम्भावएववरमित्याशंक्याह । सइति । यःसखाऽमात्यादिरधिपंस्वामि
नंसाधुहितंनशास्तिनोपदिशति । अविशासीत्यादिनाशासेर्दुहादिपाठेद्विकर्मक
त्वम् । सहितानुपदेष्टाकुत्सितःसखाकिंसखादुर्मन्त्रीत्यर्थःकिमःक्षेपइतिसमासा
न्तप्रतिषेधः । तथायःप्रभुर्निग्रहानुग्रहसमर्थःस्वामीहितादाप्तजनाद्धितोपदे
ष्टुःसकाशात् । आख्यातोपयोगेअपादानत्वात्पञ्चमी । नसंशृणुतेनशृणोतिहि

B

तमितिशेषः । समोगमृच्छीत्यादिनासम्पूर्वाच्छृणोतेरकार्मकादात्मनेपदम् । अ
कर्मकत्वं चैवक्षिकम् । संहितमश्रोताप्रभुःकिम्प्रभुःकुत्सितस्वामीपूर्ववत्समासःसर्व
थासचिवेनवक्तव्यंश्रोतव्यंस्वामिनाएवञ्चराजमन्त्रिणोरैकमत्यंस्यादित्यर्थः । ऐ
कमत्यस्यफलमाह । सदेति । ह्रियस्मान्नृपेषुस्वामिषु । अमासहभवाअमात्या
स्तेषुच । अव्ययात्त्यप्अनुकूलेषुपरस्परानुरक्तेषुसत्सुसर्वसम्पदःसदारतिमनु
रागंकुर्वतेकुर्वन्तिनजातुजहातीत्यर्थः । अतोमयावक्तव्यन्त्वयाचश्रोतव्यमितिभा
वः । अत्रैवंराजमन्त्रिणोर्हितानुपदेशतदश्रवणनिन्दासामर्थ्यसिद्धेरैकमत्यल
क्षणकारणस्यनिर्दिष्टस्यसर्वसम्पत्सिद्धिरूपकार्येणसमर्थनात्कार्येणकारणसम

सकिंसखासाधुनशास्तियोऽधिपंहितान्नयःसंशृणुतेसकिम्प्रभुः ।
सदानुकूलेषुहिकुर्वतेरतिंन्नृपेष्वमात्येषुचसर्वसम्पदः ॥ ५ ॥
निसर्गदुर्बोधमबोधविक्लवाःक्वभूपतीनाञ्चरितंक्वजन्तवः । तवा
नुभावोयमवेदियन्मयानिगूढतत्त्वन्नयवर्त्मविद्विषाम् ॥ ६ ॥

र्थेनरूपेऽर्थान्तरन्यासोऽलंकारः । तदुक्तंसामान्यविशेषकार्यकारणभावाभ्यांनि
र्दिष्टप्रकृतसमर्थनमर्थान्तरन्यासइति ॥ ५ ॥ * ❁ * ❁ * ❁ * ❁ * ❁ ॥
सम्प्रतिस्वाहङ्कारम्परिहरति । निसर्गेति । निसर्गदुर्बोधंस्वभावदुर्ग्रहम् । ई
षदुरित्यादिनाखल्प्रत्ययः । भूपतीनाञ्चरितंक्वावोधविक्लवाअज्ञानोपहताजन्तवो
मादृशापामरजनाःक्वेत्यर्थः । क्वापितेअयंसंघटतइत्यर्थः । तथापिनिगूढतत्त्वंसंवृ
तयाथार्थ्यंविद्विषांनयवर्त्मषाड्गुण्यप्रयोगः । सन्धिविग्रहयानानिसंस्थाप्यासनमे
वच । द्वैधीभावश्चविज्ञेयाःषड्गुणानीतिवेदिनामित्यादिरूपःयत्मयाअवेदिज्ञात
मितियावत् । विदेःकर्मणिलुङ् अयमिदंवेदनमित्यर्थः । विधेयप्राधान्यात्पुल्लिङ्ग

निर्देशः। तत्रानुभावः सामर्थ्यं अनुगतो भावोऽनुभावः राज्ञां प्रकृष्टो भाव इति घञन्ते न प्रादिसमासेन तत्पुरुषात् घञ् प्रत्ययः। श्रीणीभुवोऽनुपसर्ग इत्यनुपसर्गाद्भवते र्धातोर्घञ् विधानात्। अत एव काशिकायां कथं प्रभावो राज्ञां प्रकृष्टो भाव इति प्रादिसमास इति। दोषपरिहारौ सम्यक् ज्ञात्वैव विज्ञापयामि न तु वृथा कर्णकठोरम्प्रलपामीत्याशयः॥ ६॥ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ *॥

सम्प्रति यद्वक्तव्यन्तदाह। विशङ्कमान इति। सुखेन युध्यते ससुयोधनः। भाषायां शासियुधिदृशिधृषिमृषिभ्यो युच् वक्तव्यः। नृपासनस्थः सिंहासनस्थोपि। वनमधिवसतीति वनाधिवासिनो वनस्थात् राज्यभ्रष्टादपीत्यर्थः। भवतस्त्वत्तः। पराभवम्पराजयम्। विशङ्कमान उत्प्रेक्षमाणः सन्। दुष्टमुदरमस्येति दुरोद

विशङ्कमानो भवतः पराभवं नृपासनस्थोपि वनाधिवासिनः। दु
रोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः॥ ७॥

रं द्यूतम्। पृषोदरादित्वात्साधु। दुरोदरो द्यूतकारे पणे द्यूते दुरोदरमित्यमरः। तस्य छद्मनामिषेणार्जितां लब्धान्तु नयार्जिताम्। जगतीं महीम्। जगती त्रिष्टुपेमह्यां वास्तु च्छन्दोविशेषयोरिति वैजयन्ती। नयेन नीत्या जेतुं वशीकर्तुम्। समीहते व्याप्रियते न तु दास इत्यर्थः। बलवत्स्वामिकमविशुद्धागतञ्च धनम्भुञ्जानस्य कुतो मनःसमाधिरिति भावः। अत्र दुरोदरच्छद्मजितामिति विशेषणाङ्गारे च पदार्थम्प्रति हेतुत्वेनोपन्यासात्। द्वितीयकाव्यलिङ्गमलङ्कारः। तदुक्तम्। हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतमिति॥ ७॥ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ *॥

नयेन जेतुं जगतीं समीहत इत्युक्तन्तत्प्रकारमाह। तथापीति। तथापि सा शंकोपि जिह्मो वक्रो वञ्चक इति यावत्। स दुर्योधनो भवज्जिगीषया गुणैर्भवन्तमाक्रामितु

भिच्छयेत्यर्थः । हेताविति तृतीया । गुणसम्पदा दानदाक्षिण्यादिगुणगरिम्णा क
रणेन शुभ्रं यशः तनोति सखलो गुणो वामतो यस्मिन्नस्ति सम्पद समासात्तु तुल्यतो पि गुण
वत्तामात्मनः प्रकटयतीत्यर्थः । नन्वेवं गुणिनः सतोपि सज्जनविरोधो महांस्तु दोष इ
त्याशंक्य सोपि सत्संगलाभेन नीचसङ्गमाद्वरमुत्कर्षावहत्वादित्याह । समिति । त
थाहि । भूतिं समुन्नयन्नुत्कर्षमापादयन् । लटः शतृशानचावित्यादिना शतृप्रत्य
यः । पुनर्लिङ्गग्रहणासामर्थ्यात्प्रथमासामानाधिकरण्यम् । महात्मभिः समं सहेत्य
र्थः । साकं सत्रा समं सहेत्यमरः । अनार्यसङ्गमात् दुर्जनसंसर्गात्पञ्चमी विभक्तइ
ति पञ्चमी । विरोधोपि वरं मनाक्प्रियम् । देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीवे मनाक्प्रि
यइत्यमरः । अनार्यसङ्गापेक्षया मनाक्प्रियत्वं विरोधस्य भूतिसमुन्नयनित्यस्यपूर्व

तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः । समु
न्नयन्भूतिमनार्यसङ्गमाद्वरं विरोधोपि समं महात्मभिः ॥ ८ ॥

वाक्यान्वये समाप्तस्य वाक्यार्थस्य पुनरादानात्समाप्तपुनरात्तदोषापत्तिः । तदु
क्तम् । काव्यप्रकाशे । समाप्तपुनरादानात्समाप्तपुनरात्तमिति । नच वाक्यान्त
रमेतत् येनोक्तदोषपरिहारः स्यादर्थान्तरन्यासोऽलङ्कारः । सच भूतिसमुन्नय
नस्य पदार्थविशेषणद्वारा विरोधपरत्वम्प्रतिहेतुत्वाभिधानरूपकाव्यलिङ्गानुप्राणि
त इति ॥ ८ ॥ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ॥
ननु कातर्यैकेवलानीतिरित्याशंक्यनीतिपुत्कम्पौरुषमस्येत्याह । कृतेति । षण्णां वर्गः ष
ड्वर्गः अरीणां अन्तःशत्रूणां कामक्रोधादीनां षड्वर्गोऽरिषड्वर्गः शिवभागवत्समासः
तस्य जयः कृतो येन तेन तथोक्तेन विनीतेनेत्यर्थः । विनीताधिकारं प्रजापालनमितिभा
वः । अगम्यरूपाम्पुरुषमात्रदुःप्राप्यां मनोरिमां मानवीं मनूपदिष्टां समाचारश्रुस्स

मित्यर्थः । पदवीं प्रजापालनपद्धतिं प्रपित्सुना प्राप्तुमिच्छुना पद्यतेः सन्नन्तात् प्रत्ययः । सनि मीमेत्यादिना ऽसादेशः अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः अस्ता तन्द्रिरालस्यं यस्य तेनास्ततन्द्रिणाऽनलसेनेत्यर्थः । तन्द्रिः सौत्रो धातुः तस्माद्वंह्यादयश्चेत्यौणादिक इकारप्रत्ययः । कृदिकारादक्तिनो वा ङीष् वक्तव्य इति । तन्द्रीघटीतरीतन्द्रीति ङीबन्तोऽपीति क्षीरस्वामी । तथा रामायणप्रयोगः निस्तन्द्रिरप्रमत्तश्च स्वदोषपरदोषवदिति । तेन दुर्योधनेन । पुरुषस्य कर्म पौरुषं पुरुषकार उद्योग इति यावत् । युवादित्वादण्प्रत्ययः । पौरुषं पुरुषस्योक्तौ भावे कर्मणि तेजसीति विश्वः । नक्तं च दिवा च नक्तन्दिवं अहोरात्रमित्यर्थः । अचतुरेत्यादिना सप्तम्यर्थवृत्त्योरव्यययोर्द्वन्द्वनिपातेऽच् समासान्तः । विभज्य अस्यां वेलायामिदं कार्यमकार्य

कृतारिषड्वर्गजयेन मानवीमगम्यरूपां [illegible] । विभ
ज्य नक्तन्दिवमस्ततन्द्रिणा वितन्यते तेन [illegible] ॥ ९ ॥

मिति विभागं कृत्वा नयेन नीत्या वितन्यते विस्तार्यते ॥ ९ ॥ ० * ० * ० * ० ॥

सम्प्रति भृत्याद्यनुरागमाह । सखीनिति । गतस्मयो निरहङ्कारोऽत एव स दुर्योधनः सन्ततमनारतं साधु सम्यगकपटमित्यर्थः । अनुजीविनो भृत्यान् प्रीतियुजः स्निग्धान् सखीनिव मित्राणीव दर्शयते । लोकस्येति शेषः हेतुमति चेति णिच् । णिचश्चेत्यात्मनेपदम् । शोभनं हृदयं येषां ते सुहृदो मित्राणि च । सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातः । बन्धुभिर्भ्रात्रादिभिः समानमानांस्तुल्यसत्कारान् दर्शयते । बन्धूनां समूहो बन्धुता ग्रामजनबन्धुसहायेभ्यस्तल् । कृतमाधिपत्यं स्वाम्यं यस्यास्तां कृताधिपत्यामिव दर्शयते बन्धूनधिपतीनिव दर्शयत इत्यर्थः । यथा भृत्यादिषु सख्यादिबुद्धिर्जायते लोकस्य तथा तान् सम्भावयतीत्यर्थः । अनुजीव्यादीनां कर्तुरीप्सिततमं क

र्मेतिकर्मत्वम्। पूर्वैस्त्वस्मिन्नेवपदान्वयेवाक्यार्थमित्थंवर्णयन्ति। सराजाऽनुजीव्या दीन्सख्यादीनिवदर्शयते। सख्यादयइवतेनुवम्पश्यन्तिसख्यादिभावेनपश्यन्त तांस्तथादर्शयतेस्वयमेवेच्छन्दानुवृत्तितयातद्दर्शनन्तेभ्यःप्रयच्छतीत्यर्थः। अ त्रापिन्तस्येप्सितकर्मकत्वंअणिकर्तुरनुजीव्यादेरभिवादिदृशोरात्मनेपदमुपसंख्या नमितिपाक्षिकंकर्मत्वम्। एवञ्चात्रण्यन्तकर्मणोराज्ञोण्यन्तकर्तृत्वम्। यथारोह न्तोहस्तीस्वयमेवेत्यादिवत्। अश्रूयमाणकर्मान्तरत्वाभावान्नायंणेरणादिसूत्र स्यविषयइतिमत्वावाणिचश्चेत्यात्मनेपदम्प्रतिपेदिरे। भाष्येतुणेरणादिसूत्रवि षयत्वमप्युक्तम्। यथाह। पश्यन्तिभृत्याराजानन्दर्शयतेभृत्यान्राजादर्शय तेभृत्यैराजाअत्रात्मनेपदंसिद्धम्भवतीति। अत्राहकैय्यटः। नानुकर्मान्तरसद्भावा

सखीनिवप्रीतियु[illegible]नजी[illegible]नःप्रमानुमानान्सुहृदश्चबन्धुभिः।
ससन्ततन्दर्श[illegible] [illegible]कृताधिपत्यामिवसाधुबन्धुता॥ १०॥
गतस्मयः

दत्रात्मनेपदेनसम्भाव्यम्। उच्यते। अस्मादेवोदाहरणाद्भाष्यकारस्यायमेवाभि प्रायउन्नीयते। अण्यन्तावस्थायांयेकर्तृकर्मणीतद्व्यतिरिक्तकर्मान्तरसद्भावादात्म नेपदन्नभवति। यथारथमारोहयतिमनुष्यानितिइहत्वण्यन्तावस्थायांकर्तॄणां भृत्यानांणौकर्मत्वमितिभवत्येवात्मनेपदमिति॥ १०॥ * * * * * * ॥

नचायंत्रिवर्गात्प्रमाद्यतीत्याह। असक्तमिति। यथायथंयथास्वंविभज्यासंकीर्णरू पंविविच्येत्यर्थः। यथास्वेतुयथायथमितिनिपातनात्द्विर्भावेनपुंसकत्वञ्चह्रस्वोन पुंसकेप्रातिपदिकस्येतिह्रस्वत्वम्पक्षपातःपक्षपातआसक्तिविशेषःसमस्तुल्योयस्यां सातथातयासमपक्षपातयाभक्त्यानुरागविशेषेण। पूज्येष्वनुरागोभक्तिरित्युपदे शः। पूज्यश्चायंत्रिवर्गइत्युक्तमनासक्तमव्यसनितयेतियावत्। आराधयतःसेव

मानस्यास्यदुर्योधनस्यत्रयाणान्धर्मार्थकामानांगणस्त्रिवर्गः। त्रिवर्गोधर्मकामार्थै
श्चतुर्वर्गःसमोक्षकैरित्यमरः। गुणानुरागात्तदीयगुणेष्वनुरागाद्गुणवदाश्रयलो
भादित्यर्थः। सख्यंमैत्रीं। सख्युर्यइतियप्रत्ययःईयिवानिवोपगतमिवेत्युत्प्रेक्षा।
उपेयिवाननाश्वाननूचानश्चेतिक्वसुप्रत्ययान्तोनिपातः। नात्रोपसर्गस्तन्त्रमितिका
शिकाकारश्चाहस्म। परस्परंनबाधतेसमवर्त्तित्वादस्यधर्मार्थकामाःपरस्परानुप
मर्देनवर्द्धन्तइत्यर्थः। उक्तञ्चधर्मार्थकामाःसममेवसेव्यायोह्येकसक्तःसजनोजघ
न्यइति॥ ११॥ ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁॥
अथश्लोकत्रयेणोपायकौशल्यंदर्शयन्नादौसामदानेदर्शयति। निरत्ययमिति।

असक्तमाराधयतोयथायथंविभज्यभक्त्यासमपक्षपातया। गुणानु
रागादिवसख्यमीयिवान्नबाधतेऽस्यत्रिगणःपरस्परम् ॥ ११॥
निरत्ययंसामनदानवर्जितंनभूरिदानंवि[illegible]त्क्रियाम्। प्र
वर्त्ततेतस्यविशेषशालिनीगुणानुरोधेनविनानसत्क्रिया ॥ १२॥

तस्यदुर्योधनस्यनिरत्ययंनिर्बाधमनायिकमित्यर्थः। अन्यथाजनानान्दुर्ग्रहत्वा
दितिभावः। सामसान्त्वं। सामसान्त्वमुभेसमेइत्यमरः। दानवर्जितंनप्रवर्त्तते। अ
न्यथालुब्धानांचन्वैनसख्युक्ताप्रियैर्दाकैर्दुःकरत्वादितिभावः। उक्तञ्च। लुब्धमर्थे
नगृह्णीयात्साधुमञ्जलिकर्मणा। मूर्खञ्छन्दानुरोधेनतत्त्वार्थेनचपण्डितमिति। त
थाभूरिप्रभूतंनतुकदाचित्स्वल्पमित्यर्थः। दानन्धनत्यागः। सदित्यादरार्थेऽव्ययम्
। आदरानादरयोःसदसदीतिनिपातसंज्ञास्मरणात्। तस्याःक्रियांसत्क्रियांवि
रहय्यविहायल्यपिलघुपूर्वादित्ययादेशः। नप्रवर्त्तते। अनादरेदानवैफल्या
दितिभावः। नचैवंसर्वत्रयेनाविवेकित्वंकोशहानिश्चस्यादित्याशङ्क्याह। प्रेति।

विशेषशालिनी अतिशययोगिनी सत्क्रिया ऽऽदरक्रिया गुणानुरोधेन गुणानुसारेण विनान प्रवर्त्तते। पृथग्विनेत्यादिना तृतीया। गुणेष्वेवादरो भूरिदानञ्चेति नोक्तदोषावकाश इत्यर्थः। अत्रोत्तरोत्तरस्य पूर्वविशेषणतया स्थापनादेकावल्यलंकारः। तदुक्तङ्काव्यप्रकाशे। स्थाप्यतेऽपोह्यते वापि यथापूर्वं परस्परं। विशेषणतया वस्तु यत्र सैकावली द्विधेति॥१२॥ ○*○*○*○*○*○*○*○*○॥

अथ दण्डप्रकारमाह। वसूनीति। वशी स दुर्योधनो वसूनि धनानि वाञ्छन्न लोभान्नेत्यर्थः। वसु तोये धने मणाविति वैजयन्ती। निहन्तीति शेषः। तथा मन्युना कोपेन न च। मन्युर्दैन्ये क्रतौ क्रुधीत्यमरः। धर्मशास्त्रानुसारेण क्रोधलोभविवर्जित इति स्मरणादित्यर्थः। किन्तु निवृत्तकारणो निवृत्तलोभादिनिमित्तः सन् स्वधर्म्म

वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म्म इत्येव निवृत्तकारणः। गुरूप
दिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्म्मविप्लवम्॥ १३ ॥

इत्येव स्वस्य राज्ञः सतो ममायं धर्म्मो ममेदङ्कर्त्तव्यमित्यस्मादेव हेतोरित्यर्थः। अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन्। अयशो महदाप्नोति नरकञ्चैव गच्छतीति स्मरणादिति भावः। गुरूपदिष्टेन प्राड्विवाकोपदिष्टेन। धर्मशास्त्रम्पुरस्कृत्य प्राड्विवाकमते स्थितः। समाहितमतिः पश्येद्व्यवहाराननुक्रमादिति नारदस्मरणात्। दण्डेन दमेन शिक्षयेत्यर्थः। रिपौ सुतेऽपि वा स्थितमिति शेषः। एतेनास्य समदर्शित्वमुक्तम्। धर्मविप्लवं धर्मव्यतिक्रममधर्ममिति यावत्। निहन्ति निवारयति। दुष्ट एवास्य शत्रुः शिष्ट एव बंधुर्न तु सम्बन्धनिबन्धनः पक्षपातोऽस्तीत्यर्थः॥१३॥ *○*○*○*○*○*○*○*○*○॥

सम्प्रति भेदकौशलन्दर्शयति। विधायेति। शङ्का सञ्जातास्य शङ्कितोऽविस्रब्धः स्व

मपरितःसर्वत्रस्वपरमण्डले। परेतरानात्मीयानवञ्चकानितियावत्। यद्वापरानि
तरांयन्तिभेदेनात्मसात्कुर्वन्तीतिपरेतरान्। तत्करोतीतिण्यन्तात्कर्मण्यण्प्रत्ययः।
रक्षन्तीतिरक्षान्मन्त्रगुप्तिसमर्थानित्यर्थः। नन्दिग्रहीत्यादिनापचाद्यच्। विधा
यकृत्वानियुज्येत्यर्थः अशंकिताकारमुपैतिस्वयमविश्वस्तोपिविश्वस्तवदेवव्यवहा
रम्मारमुखैनैवपरान्भिनत्तीत्यर्थः। नचतान्रक्षानुपेक्षतेयेनतेऽपिविकुर्वीरन्नि
त्याह। क्रियेति। क्रियापवर्गेषुकर्मसमाप्तिषुअनुजीविसात्कृताभृत्याधीनाःकृता
अपरावर्तिनयादत्ताइत्यर्थः। देयेत्राचेतिसातिप्रत्ययः। सम्पदोऽस्यराज्ञःकृतज्ञता
मुपकारित्वंवदन्तिदानैरेवास्यकृतज्ञत्वम्प्रकाश्यतेनतुवाङ्मात्रेणेत्यर्थः। कृतज्ञेराज

विधायरक्षान्परितःपरेतरानशङ्किताकारमुपैतिशङ्कितः। क्रिया
प्रवर्गेष्वनुजीविसात्कृताःकृतज्ञतामस्यवदन्तिसम्पदः ॥ १४ ॥
अनारतंतेनपदेषुलम्भिताविभज्यसम्यग्विनियोगसत्क्रियाः। फ
लन्त्युपायाःपरिबृंहितायतीरुपेत्यसंघर्षमिवार्थसम्पदः ॥ १५ ॥

न्यनुजीविनोरज्यन्तेऽनुरक्ताश्चैनंरक्षन्तीतिभावः ॥ १४ ॥ * ● * ● * ● ॥
अथोपायप्रयोगस्यफलवत्तांदर्शयति। अनारतमिति। तेनराज्ञादुर्योधनेनप
देषूपायवस्तुषु। पदंव्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुष्वित्यमरः। सम्यगसङ्की
र्णमव्यस्तंविभज्यविविच्यविनियोगएवसत्क्रियाअनुग्रहःसत्कारइतियावत्। या
सान्ताःलम्भिताःस्थानेषुसम्यक्प्रयुक्ताइत्यर्थः। उपायविशेषणंवाउपायाःसामाद
यःसंघर्षम्परस्परस्पर्द्धामुपेत्येवेत्युत्प्रेक्षा। परिबृंहितायतीःप्रचितोत्तरकालाःस्थि
राइत्यर्थः। अर्थसम्पदोऽनारतमजस्रम्फलन्तिप्रसुवतइत्यर्थः ॥ १५ ॥ * ॥
अर्थसम्पदमेवाह। अनेकेति। अयुगमच्छदस्सप्तपर्णःपुष्पस्यगन्धइवगन्धोय

स्यासौअयुग्मच्छदगन्धिः । सप्तम्युपमानेत्यादिनाबहुव्रीहिरुत्तरपदलोपश्च ।
उपमानाच्चेतिसमासान्तइकारः । नृपाणामुपायनान्युपहारभूतायेदन्तिनस्तेषांम
दः । उपायनमुपग्राह्यमुपहारस्तथोपदेत्यमरः । राज्ञामपत्यानिपुमांसोराजन्याः
क्षत्रियाःराजश्वशुराद्यत्इतियत्प्रत्ययःराज्ञोऽपत्येजातिग्रहणात्साधु । रथाश्चा
श्वाश्चरथाश्वम् । सेनाङ्गत्वादेकवद्भावः । अनेकेषांराजन्यानांरथाश्वेनसंकुलं
व्याप्तन्तदीयमास्थाननिकेतनाजिरंसभामण्डपाङ्गनम् । अङ्गनंचत्वराजिरेइत्य
मरः । भृशमत्यर्थमार्द्रताम्पङ्किलत्वन्नयति । एतेनमहासमृद्धिरस्योक्ताअतएवो
दात्तालंकारः । तथाऽलङ्कारसूत्रंसमृद्धिमद्वस्तुवर्णनमुदात्तइति ॥ १६ ॥ * ॥

अनेकराजन्यरथाश्वसंकुलन्तदीयमास्थाननिकेतनाजिरे । नय
त्ययुग्मच्छदगन्धिरार्द्रताम्भृशंन्नृपोपायनदन्तिनांमदः ॥ १६ ॥
सुखेनलभ्यादधतःकृषीवलैरकृष्टपच्याइवशस्यसम्पदः । वि
तन्वतिक्षेममदेवमातृकाश्चिरायतस्मिन्कुरवश्चकासते ॥ १७ ॥

सम्प्रतिजनपदक्षेमकरत्वमाह । सुखेनेति । चिरायतस्मिन्दुर्योधनेक्षेमंवितं
न्वतिक्षेमङ्करेसति । देवःपर्जन्यएवमातायेषान्तेदेवमातृकाः । वृष्ट्यम्बुजीविनो
देशास्तेनभवन्तीत्यदेवमातृकानदीमातृकाइत्यर्थः । देशोनद्यम्बुवृष्ट्यम्बुसम्पन्नव्री
हिपालितः । स्यान्नदीमातृकोदेवमातृकश्चयथाक्रममित्यमरः । एतेनास्यकुल्या
दिपूर्तप्रवर्तकत्वमुक्तम् । कुरूणांनिवासाःकुरवोजनपदविशेषाः । कृष्टेनप
च्यन्तइतिकृष्टपच्याः । राजसूयेत्यादिनाकर्मकर्तरिक्यप्प्रत्ययान्तोनिपातः । तद्वि
परीताअकृष्टपच्याइव । कृषिरेषामस्तीतिकृषीवलैःकर्षकैरित्यर्थः । रजःकृष्या
दिनावलच्प्रत्ययःवलइतिदीर्घः । सुखेनाक्लेशेनलभ्यालब्धुंशक्याः । शस्यसम्प

दुःदधतोधारयन्तःनाभ्यस्ताच्छतुरितिनुमागमप्रतिषेधः। चकासतेसर्वोत्कर्षेण
वर्ततेइत्यर्थः। अदभ्यस्तादितिझेरदादेशःजक्षित्यादयःषडित्यभ्यस्तसंज्ञा। स
म्पन्नजनपदत्वादसन्तापकरत्वाच्चदुःसाध्योयमितिभावः ॥ १७ ॥ * ❁ * ❁ ॥

नन्वेवञ्जनपदानुवर्तिनःकथमर्थलाभइत्यतआह। उदारेति। उदारकीर्तेर्म
हायशसः। उदारोदातृमहतोरित्यमरः। दयावतःपरदुःखप्रहरणेच्छोःअतए
वप्रशान्तबाधम्प्रशमितोपद्रवंयथास्यात्तथाइतिक्रियाविशेषणम्। उदयवि
शेषणंवादान्तशान्तेत्यादिनाशमिधातोर्ण्यन्तान्निष्ठान्तोनिपातः। अभिरक्षया
सर्वतस्त्राणेनोदयंवृद्धिन्दिशतःसम्पादयतः। वसूपमानस्यकुबेरोपमस्य।
वसुर्मयूखाग्निधनाधिपेष्वितिविश्वः। अस्यदुर्योधनस्यगुणैर्दयादाक्षिण्यादिभि

उदारकीर्तेरुदयन्दयावतःप्रशान्तबाधंदिशतोभिरक्षया। स्वय
म्प्रदुग्धेऽस्यगुणैरुपस्नुतावसूपमानस्यवसूनिमेदिनी ॥ १८ ॥

रुपस्नुताद्राविताःमेदिनीवसूनिधनानि। वसुतोयेधनेमणावितिवैजयन्ती।
स्वयम्प्रदुग्धेऽक्लेशेनदुह्यतइत्यर्थः। दुहेःकर्मकर्तरिलिट्। नदुहस्नुनमांय
क्चिणावितियक्प्रतिषेधःयथाकेनचिद्विदग्धेननवप्रसूतारक्षिताचगौःस्वयम्प्र
दुग्धेइतिभावः। अलङ्कारस्तुविशेषमात्रसाम्यादप्रस्तुतस्यगम्यत्वेसमासोक्तिरि
तिसर्वस्वकारः। अत्रप्रतीयमानयागवासहप्रकृतायामेदिन्याभेदेऽभेदलक्ष
णातिशयोक्तिवशाद्द्योत्यत्वेनोक्तिरितिसंक्षेपः ॥ १८ ॥ ❁ * ❁ * ❁ * ❁ ॥

वीरानुकूल्यमाह। महौजसइति। महौजसोमहाबलाः। अन्यथादुर्बलानाम
नुपकारित्वादितिभावः। मानःकुलशीलाद्यभिमानएवधनंयेषान्तेमानधनाः।
अन्यथाकदाचिद्बलदर्पाद्विकुर्वीरन्नितिभावः। धनार्चिताःधनैरर्चिताःसत्कृताः

अन्यथादाग्रिणादेनजह्युरितिभावः । संयतिसंग्रामेलब्धकीर्त्तयोबद्धयशसइत्यर्थः । अन्यथाकदाचिन्मुह्येयुरितिभावः । संहताःमिथःसङ्गताःस्वार्थानिष्टानभवन्तीतिनसंहताःनञर्थस्यनशब्दस्यसुप्सुपेतिसमासःभिन्नवृत्तयोमिथोविरोधात् । स्वामिकार्यकरानभवन्तीतिविभिन्नवृत्तयःपूर्ववत्समासः । अन्यथास्वामिकार्यविघातकत्वात्स्वामिद्रोहिणःस्युरित्युभयत्रापितात्पर्यार्थः । धनुर्भृतोधानुष्काः । आयुधीयमात्रोपलक्षणमेतत् । प्राणायाञ्चनुर्य्यहस्थानन्तस्यदुर्योधनस्यासुभिःप्राणैःप्रियाणिसमीहितुंकर्तुंवाञ्छन्ति । आत्मप्राणैःप्राणान्दातुमिच्छन्तीत्यर्थः । अन्यथादोषस्मरणादिरितिभावः । अत्रमहौजसादिपदार्थानाम्प्राणदानकर्त्तव्यताम्प्रतिवि

महौजसोमानधनाधनार्चिताधनुर्भृतःसंयतिलब्धकीर्त्तयः । नसंह
तास्तस्यनभिन्नवृत्तयःप्रियाणिवाञ्छन्त्यसुभिःसमीहितुम् ॥ १९ ॥
महीभृतांसच्चरितैश्चरैःक्रियाःसवेदनिःशेषमशेषितक्रियः । म
होदयैस्तस्यहितानुबन्धिभिःप्रतीयतेधातुरिवेहितम्फलैः ॥ २० ॥

शेषणगत्याहेतुत्वाभिधानात्काव्यलिङ्गमलङ्कारः । लक्षणन्तूक्तम् । तथास्वामिप्रायविशेषणात्परिकरालङ्कारइति । द्वयोस्तिलतण्डुलवद्विभक्ततयास्फुरणात्संसृष्टिः ॥ १९ ॥

सम्प्रतिस्वराष्ट्रपरराष्ट्रवृत्तान्तमपिवेत्तीत्याह । महीभृतामिति । अशेषितक्रियः समापितकृत्यःआपातोदयकर्मेत्यर्थः । सदुर्योधनःसच्चरितैःशुद्धचरित्रैरवञ्चकैरित्यर्थः । चरन्तीतिचरास्तैश्चरैःप्रणिधिभिः । पचाद्यच् । महीभृतांक्रियाःप्रारम्भान्निःशेषंवेदवेत्ति । विदोलटोवेतिणलादेशःस्वरहस्यन्तुनकश्चिद्वेदेत्याह । महोदयैरिति । धातुरिवतस्यदुर्योधनस्येहितमुद्योगोमहोदयैर्महद्भिर्वृद्धिभिर्हितमनु

बध्नन्त्यनुरुन्धन्तीतिहितानुबन्धिभिस्तैरित्यर्थः। फलैःकार्यसिद्धिभिःप्रतीयन्तेज्ञा
यन्तेफलानुमेयास्तस्यप्रारम्भाइत्यर्थः ॥ २० ॥ * ० * ० * ० * ० * ॥

मित्रवत्समाह। नेति। तेनराज्ञाक्वचित्कुत्रापिसहज्यया मौर्व्यासज्यं। मौर्वीज्याशिञ्जि
नीगुणइत्यमरः। तेनसहेतितुल्ययोगइतिबहुव्रीहिःधनुर्नोद्यतंनोद्धीकृतमान
नंवाकोपविजिह्मंकोपकुटिलन्नकृतंयस्यकोपएवनोदेतिकुतस्तत्प्रयुक्तप्रसक्तिरि
तिभावः। कथन्तर्हिझंकारयतिराज्यमित्यत्राह। गुणेति। गुणेषुदयादाक्षिण्या
दिषुअनुरागेणप्रेम्णामाल्यपक्षेसूत्रानुषंगेणयद्वासौरभ्यगुणलोभेननराधिपैरन्य
भूपालैरस्यशासनमाज्ञामालेवमाल्यमादिव। चातुर्वर्ण्यादित्वात्स्वार्थेष्यञ्इतिक्षी

न तेन सज्यं क्वचिदुद्यतन्धनुः कृतन्नवाकोपविजिह्ममानने। गुणा
नुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्यशासनम् ॥ २१ ॥

स यौवराज्ये नवयौवनोद्धतन्निधाय दुःशासनमिद्धशासनः। मखेष्व
खिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम् ॥ २२ ॥

रस्वामी शिरोभिरुह्यतेधार्यते। वचिस्वपियजादीनांकितीतियकिसम्प्रसारणं।
अत्रोपमास्फुटैव ॥ २१ ॥ * ० * ० * ० * ० * ० * ० * ० * ० ॥

सम्प्रत्यस्यधार्मिकत्वमाह। सइति। इद्धशासनोऽप्रतिहताज्ञःसदुर्योधनोनवयौव
नोद्धतम्प्रगल्भन्धुरन्धरमित्यर्थः। दुःखेनशास्यतइतिदुःशासनस्तम्भाषायांशासि
युधीत्यादिनाखलर्थेयुच्प्रत्ययःयौवराज्येयुवराजकर्मणि। ब्राह्मणादित्वात्ष्यञ्
निधायनियुज्येत्यर्थः। पुरोधसापुरोहितेनानुमतोऽनुज्ञातस्तस्मिन्याजकेसतीत्य
र्थः। तदुल्लङ्घनेदोषस्मरणादितिभावःनिष्ठेतिभूतार्थेक्तः। ननुमतिबुद्धीत्यादि
नावर्तमानार्थेऽन्यथापुरोधसेत्यत्रक्तस्यचवर्तमानइतिषष्ठीस्यात्। अखिन्नोऽन

लसोमखेषु क्रतुषु हव्येन हिरण्यरेतोऽयस्यतं हिरण्यरेतसं अनिलसखिनोऽतिप्रीण यति प्रीणनार्थाञ्च्छिनुकरुणोरवेयुप्रत्ययः। अकारस्यान्तादेशः ॥ २२ ॥ * ॥
एवं चेत्तादृशस्योद्योगी तर्हि अस्माभिर्न निरुद्योगैर्भाव्यमित्याशंक्याशान्दर्शयति। प्र लीनेति। स दुर्योधनः प्रलीनभूपालं निःसपत्नमित्यर्थः। स्थिरायति चिरस्थायीत्य र्थः। भुवो मण्डलं आवारिधिभ्यः आवारिधि। आङ्मर्यादाभिविध्योरित्यव्ययीभावः। प्रशासदाज्ञापयन्नपि। यक्षित्यादयः षडित्यभ्यस्तसंज्ञानाभ्यस्तात्क्षतुरिति नुमाग मप्रतिषेधः। त्वत्तः एष्यतीरागमिष्यतीरागामिनीः धातूनामनेकार्थत्वादुक्तार्थसि द्धिः अथवाङ्पूर्वः पाठः एष्ठेध्यूटस्विति वृद्धिः ल्टः सद्वेति शतृप्रत्ययः उगितश्चे ति ङीप्। आच्छीनद्योर्नुमिति विकल्पान्नुमभावः। भियो भयहेतून्विपद इत्यर्थः

प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलम्भुवः। स
चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥ २३ ॥

। चिन्तयति आलोचयत्येव। स एवाह। अहो बलवद्विरोधिता दुरन्ता दुष्टावसा ना। सार्वभौमस्यापि प्रबलैः सपत्नैः सह वैरमनर्थपर्यवसाय्येवेति तात्पर्य्यम्। सा मान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥ २३ ॥ * ❁ * ❁ ❁ ॥
ननु गूढाकारेङ्गितस्य तस्य भयं त्वया कथं निरधारीत्यत्राह। कथेति। कथाप्रसङ्गे न गोष्ठीवचनेन। जनैः तत्रत्यैरित्यर्थः। अन्यत्र कथाप्रसङ्गेन विषवैद्येन। कथा प्रसङ्गो वार्त्तायां विषवैद्येऽपि वाच्यवदिति विश्वः। एकवचनस्यात न्त्रत्वाज्जनविशेष णम्। यद्वा कथाप्रसङ्गे इति आस्ते जनाः इत्येकम्पदम्। उदाहृतादुच्चारितान्नवा भिधानान्नामधेयान्नामधेयस्मरणाद्धेतोः हेताविति पञ्चमी। आख्याह्वे अभिधान ञ्च नामधेयञ्च नाम चेत्यमरः। अन्यत्र तदाभिधानात्। नामैकदेशे नाममात्रग्र

दृशमितिन्यायात् । तस्यैवश्वेतवैनतार्क्ष्यवासुकीतयोरभिधानंयस्मिन्पदेतस्मात् । अनुस्मृताखण्डलसूनुविक्रमःस्मृतार्जुनपराक्रमःसन् । महादतिदुःसहान्मन्त्रपदान्मन्त्रशब्दात्सारकाद्वेतोराखण्डलसूनुरिन्द्रानुजउपेन्द्रोविष्णुरितियावत् । सूनुःपुत्रेऽनुजेरवावितिविश्वः । तस्यविःपक्षीगरुडइत्यर्थः । तस्यक्रमःपादविक्षेपःसोऽनुस्मृतोयेनसतथोक्तः । स्मृतगरुडमहिमाउरगइवनताननःसन् । उरगःपन्नगोभोगीत्यमरः । व्यथतेदुःखायते । पीडाबाधाव्यथादुःखमित्यमरः । अत्युत्कटभयंदोषादिविकारादुर्वारइतिभावः । सर्वत्रजयमन्विच्छेत्पुत्रादिच्छेत्पराजयमितिन्यायादर्जुनोत्कर्षकथनंयुधिष्ठिरस्यभूषणमेवेतिसर्वमवदा

कथाप्रसङ्गेनजनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः । तवा
भिधानाद्व्यथतेनताननःसदुःसहान्मन्त्रपदादिवोरगः ॥ २४ ॥
तदाशुकर्तुंत्वयिजिह्ममुद्यतेविधीयतांतत्रविधेयमुत्तरम् । पर
प्रणीतानिवचांसिचिन्वतांप्रवृत्तिसाराःखलुमादृशांगिरः ॥ २५ ॥

तम् ॥ २४ ॥ ॥

निगमयति । तदिति । तत्तस्मात्कारणात्त्वयिजिह्मंकपटंकर्तुमुद्यतेत्वाञ्जिघांसावित्यर्थः । तत्रतस्मिन्नर्थेआधनेविधेयंकर्तव्यमुत्तरम्प्रतिक्रियाआशुविधीयतांक्रियताम् । ननुकर्तव्यमपित्वयैवोच्यतामितिचेत्तत्राह । परेति । परप्रणीतानिपरोक्तानिवचांसिचिन्वतांगवेषयतांमादृशांवार्त्ताहारिणामित्यर्थः । गिरःप्रवृत्तिसाराःवार्त्तामात्रसाराः । वार्त्ताप्रवृत्तिर्वृत्तान्तइत्यमरः । वार्त्तामात्रवादिनोवयंनतुकर्तव्यार्थोपदेशसमर्थाः । अतस्त्वयैवनिर्द्धार्यकार्यमितिभावः । सामान्येनविशेषसमर्थनादर्थान्तरन्यासः ॥ २५ ॥

इतीति। वनसन्निवासिनाम्पत्यौ वनेचराधिपे इति गिरमीरयित्वा उक्त्वा आत्तसत्क्रिये गृहीतमपारितोषिके गते सति। तुष्टिदानमेव चाराणां हि वेतनन्ते हि तल्लोभात्स्वामिकार्येष्वतीव त्वरयन्त इति नीतिवाक्यामृते। अथ महीभुजा राज्ञा कृष्णासदनं द्रौपदीभवनम्प्रविश्यानुजसन्निधौ तद्वनेचरोक्तम्वाक्यमाचचक्षे आख्यातं अथवा कृष्णेति पदच्छेदः। सदनम्प्रविश्यानुजसन्निधौ तद्वचः कृष्णा आचचक्षे आख्याता चक्षिङो दुहादेर्द्विकर्मकत्वादप्रधाने कर्मणि लिट्॥ २६॥ * * * * * * *॥

निशम्येति। अथ द्रुपदात्मजा द्रौपदी द्विषतां सिद्धिं वृद्धिरूपान्निशम्य ततस्तदन-

इतीरयित्वा गिरमात्तसत्क्रिये गते थ पत्यौ वनसन्निवासिनाम्। प्रवि-
श्य कृष्णासदनम्महीभुजा तदाचचक्षेऽनुजसन्निधौ वचः॥ २६॥
निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियन्तुमक्षमा। नृप-
स्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः॥ २७॥
भवादृशेषु प्रमदाजनोदितम्भवत्यधिक्षेप इवानुशासनम्। तथा-
पि वक्तुं व्यवसाययन्ति मान्निरस्तनारीसमया दुराधयः॥ २८॥

न्तरन्ततो द्विषद्भ्य आगतास्ततस्त्याः। अव्ययात्त्यबिति त्यप्। अपाकृतीर्विकारान्नियन्तुन्निरोद्धुं अक्षमा सती नृपस्य युधिष्ठिरस्य मन्युव्यवसाययोः क्रोधोद्योगयोः दीपिनीः सम्वर्द्धिनीर्गिरो वाक्यान्युदाजहार जगादेत्यर्थः॥ २७॥ * * * * *॥

भवादृशेष्विति। भवादृशा भवद्विधाः पण्डिता इत्यर्थः। तेषु विषयेषु त्यदादिष्वित्यादिना कञ्। आ सर्वनाम्न इत्याकारादेशः। प्रमदाजनोदितं स्त्रीजनोक्तम्। वदेः क्तः वचिस्वपीत्यादिना सम्प्रसारणम्। अनुशासनं नियोगवचनमधिक्षेपः तिरस्कार इव भवति। अतो न युक्तं वक्तुमित्यर्थः। तथापि वक्तुमनुचितेऽपि। निरस्तनारीसमया त्याजितस्त्री-

लीनतारूपस्त्रीसमाचाराः । समयाःशपथाचारकालसिद्धान्तसंविद इत्यमरः । दु
ष्टधियःसमयोल्लङ्घनहेतुत्वात्दुष्टामनोव्यथाः । पुंस्याधिर्मानसीव्यथेत्यमरः ।
मांवक्तुंव्यवसापयन्तिप्रेरयन्ति । नकिञ्चिदयुक्तन्दुःखिनामितिभावः ॥ २८ ॥
अखण्डमिति । आखण्डलतुल्यधामभिरिन्द्रतुल्यःप्रभावैः । धामरश्मौगृहेदेहे
स्थानेजन्मप्रभावयोरितिहेमः । स्ववंशजैःभूपतिभिर्भरतादिभिश्चिरमखण्डम
विच्छिन्नन्धृतामहीत्वयामदंच्योततीतिमदच्युत् । क्विप् । तेनमदस्राविणामतङ्ग
जेनस्रगिवात्महस्तेनस्वकरेणस्वचापल्येनेत्यर्थः । अपवर्जितापरिहृतात्यक्ता । स्व
दोषादेवायमनर्थागमइत्यर्थः ॥ २९ ॥

अखण्डमाखण्डलतुल्यधामभिश्चिरन्धृताभूपतिभिःस्ववंशजैः । त्व
यात्महस्तेनमहीमदच्युतामतङ्गजेनस्रगिवापवर्जिता ॥ २९ ॥
व्रजन्तितेमूढधियःपराभवम्भवन्तिमायाविषुयेनमायिनः । प्रवि
श्यहिघ्नन्तिशठास्तथाविधानसंवृताङ्गान्निशिताइवेषवः ॥ ३० ॥

स्वदोषादेवायमनर्थागमइत्युक्तंसचदोषःकुटिलेष्वकौटिल्यमेवेत्याह । व्रजन्ती
ति । मूढधियोनिर्विवेकबुद्धयस्तेपराभवम्व्रजन्ति । येमायाविषुमायावत्सुविषये
अस्मायामेधेत्यादिनाविनिप्रत्ययः । मायिनोमायावन्तःव्रीह्यादित्वादिनिप्रत्ययः
नभवन्ति । अत्रैवार्थान्तरंन्यस्यति । प्रविश्येति । शठाःअपकारिणोधूर्तास्तथावि
धानकुटिलानसंवृताङ्गाननवर्मितशरीरान्निशिताइषवइवप्रविश्यप्रवेशंकृत्वाआत्मी
याभूत्वाघ्नन्तिहि । आर्जवंहिकुटिलेषुननीतिरितिभावः ॥ ३० ॥
स्वापेक्षादोषमूलत्वादित्याशयेनाह । गुणे
नचलक्ष्मीचाचल्यादयमनर्थागमः
ति । अनुरक्तसाधनोऽनुकूलसहायवान् । उक्तञ्चकामन्दकीये । उद्योगादनि

वृत्तस्य सुसहायस्य धीमतः । छायेवानुगता तस्य नित्यं श्रीः सहचारिणीति । कुला
भिमानी क्षत्रियत्वाभिमानी कुलीनत्वाभिमानी च त्वदन्यस्त्वत्तोऽन्यः अन्यारादित्यादि
ना पञ्चमी को नराधिपो गुणैः संध्यादिभिः सौन्दर्यादिभिश्चानुरक्तां सानुरागिणीं कुल
जां कुलक्रमादागतां कुलीनां च मनोरमां श्रियमात्मवधूमिव स्वभार्यामिव । वधूर्जाया
स्नुषा चेत्यमरः । परैः शत्रुभिरपहारयेत्स्वयमेवापहारं कारयेदित्यर्थः । कलत्रा
पहारवल्लक्ष्म्यपहारोऽपि राज्ञामानहानिकरत्वादनुपेक्षणीय इति भावः ॥ ३१ ॥ *
अथ दशभिः कोपोद्दीपनं करोति । भवन्तमिति । हे नरदेव नरेन्द्र । एतर्हि इदा
नीं मनस्विन आपत्कालेऽपीत्यर्थः । एतर्हि सम्प्रतीदानीमधुना सांप्रतं तथेत्यमरः । इ

गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः । परै
स्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥ ३१ ॥
भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि । कथं न म
न्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥ ३२ ॥

दमो र्हिल्निर्हिल्प्रत्ययः । एतेतौ रथोरित्येतादेशः । आपदमेवाह । मनस्विग
र्हिते शूरजुगुप्सिते वर्त्मनि मार्गे वर्तमानं शत्रुकृतां दुर्दशामनुभवन्तमित्यर्थः । भव
न्तं त्वामुदीरित उद्दीपितो मन्युः क्रोधः शुष्कान्नीरसं शुषेः क इति निष्ठातकारस्य क
कारः शमी चासौ तरुश्चेति विशेषणसमासः शमीग्रहणं शीघ्रज्वलनस्वभावत्वात् उच्छि
ख उद्गतज्वालः । घृणिज्वाले अपि शिखे इत्यमरः । वह्निरिव कथं न ज्वलयति ज्व
लयितुमुचितमित्यर्थः । मितां ह्रस्व इति ह्रस्वः ॥ ३२ ॥ * ॥
नन्वन्तः शत्रुत्वादयं क्रोधस्त्याज्य एवेत्याशंक्याह । अवन्ध्येति । अवन्ध्यः कोपो यस्य
तस्य अवन्ध्यकोपस्यात एवापदां विहन्तुर्निग्रहानुग्रहसमर्थस्येत्यर्थः पुंस इति शेषः

। देहिनोजन्तवःस्वयमेववश्यावश्यंगताभवन्ति । वशंगतइतियत्प्रत्ययः । अतःकोपिनाभवितव्यमित्यर्थः । व्यतिरेकेत्वनिष्टमाहे । अमर्षशून्येननिःकोपेनजन्तुना । कन्ययाशोकइतिवत्हेताविनितृतीया । हृदयस्यकर्महार्दंस्नेहः । प्रेमानाप्रियताहार्दंप्रेमस्नेहइत्यमरः । युवादित्वादण् । हृदयस्यहृल्लेखपदण्लेष्वितिहृदादेशः जातहार्देनजातस्नेहेनसताजनस्यादरोनविद्विषाद्विषताचसतादरोन । अमर्षहीनस्यरागद्वेषावकिंचित्करत्वादगण्यावित्यर्थः । अथवाविद्विषासतादरोभयन्न । दरोऽस्त्रियांभयेश्वभ्रइत्यमरः । एतस्मिन्नेवप्रयोगेसन्धिवशात्द्विधापदच्छेदःपुम्वाक्येपुनर्दोषःअतःस्थानेकोपःकार्यस्त्याज्यस्त्वस्थानेकोपइतिभावः ॥ ३३ ॥

अवंध्यकोपस्यविहन्तुरापदाम्भवन्तिवश्याःस्वयमेवदेहिनः । अ
मर्षशून्येनजनस्यजन्तुनानजातहार्देनचविद्विषादरः ॥ ३३ ॥
परिभ्रमँल्लोहितचन्दनोचितःपदातिरन्तर्गिरिरेणुरूषितः । म
हारथःसत्यधनस्यमानसन्दुनोतिनोकच्चिदयंवृकोदरः ॥ ३४ ॥

परिभ्रमन्निति । लोहितचन्दनोचितःउचितलोहितचन्दनःवाहिताग्न्यादिष्वितिसाधु । अभ्यस्तरक्तचन्दनइत्यर्थः । अभ्यस्तेऽप्युचितंन्याय्यमितियादवः । महारथोरथचारी । उभयत्रापिप्रागितिशेषःअद्यतुरेणुरूषितोधूलिच्छुरितःपद्भ्यामततिगच्छतीतिपदातिःपादचारीअज्यतिभ्यांचेत्यनुवृत्तौपादेचेत्यौणादिकइन्प्रत्ययः । पादस्यपदाज्यातिगोपहतेष्वितिपदादेशःअन्तर्गिरिगिरीष्वन्तःविभक्त्यर्थेऽव्ययीभावः । गिरेश्चैत्येकस्येतिविकल्पात्समासान्ताभावः । परिभ्रमन्नयंवृकोदरोभीमःसत्यधनस्येतिसोल्लुण्ठवचनं । अद्यापिसत्यमेवरक्ष्यतेनतुभ्रातरइतिभावः । नवेतिशेषः । मानसंनोदुनोति । स्वान्तंहृन्मानसंमनइत्यमरः । कच्चिन्नपरितापयति । किञ्चि

त्कामप्रवेदनइत्यमरः । स्वाभिप्रायाविष्करणंकामप्रवेदनम् ॥ ३४ ॥ ● ● ॥
विजित्येति । वासवइन्द्रउपमानंयस्यसवासवोपमइन्द्रतुल्योयोधनञ्जयःउत्त
राकुरून्मेरोरुत्तरान्मानुषान्देशविशेषान्विजित्यप्राज्यम्प्रभूतम् । प्रभूतम्प्रचुरप्रा
ज्यमित्यमरः । कुप्यादन्यदकुप्यंहेमरूप्यात्मकम् । स्यात्कोशश्चहिरण्यञ्चहेम
रूप्येकृताकृते । ताभ्यांयदन्यत्तत्कुप्यमित्यमरः । वसुधनमयच्छद्दत्तवान्पाघ्रेत्या
दिनादाणोयच्छादेशः । सधनञ्जयतीधनञ्जयोऽर्जुनः । संज्ञायांभृतृवृजीत्यादि
नाखच्प्रत्ययः । अरुर्द्विषदित्यादिनामुमागमः अधुनास्मिन्कालेअधुनेतिनिपातना
त्साधुः । तववल्कवासांस्याहरन्कथन्नतमन्युंक्रोधन्दुःखंवानकरोति ॥ ३५ ॥ ●

विजित्ययःप्राज्यमयच्छदुत्तरान्कुरूनकुप्यंवसुवासवोपमः । स व
ल्कवासांसितवाधुनाहरन्करोतिमन्युन्नकथन्धनञ्जयः ॥ ३५ ॥
वनान्तशय्याकठिनीकृताकृतीकचाचितौविष्वगिवागजौगजौ । क
थन्त्वमेतौधृतिसंयमौयमौविलोकयन्नुत्सहसेनबाधितुम् ॥ ३६ ॥

वनान्तेति । वनान्तोवनभूमिरेवशय्यातयाकठिनीकृताकृतीकठिनीकृतदेहौ ।
आकारोदेहआकृतिरितिवैजयन्ती । विष्वक्समन्तात् । समन्ततस्तुपरितःस
र्वतोविष्वगित्यपीत्यमरः । कचाचितौकचव्याप्तौविकीर्णकेशावित्यर्थः । अतएवा
गजौगिरिसम्भवौगजाविवस्थितौ । एतौयमौयुग्मजातौमाद्रीपुत्रावित्यर्थः । य
मोदण्डधरेध्वाङ्क्षेसंयमेयमजेपिचेतिविश्वः । विलोकयंस्त्वङ्कथंधृतिसंयमौसन्तो
षनियमौ । धृतिर्योगान्तरेधैर्यधारणाध्वारतुष्टिष्वितिविश्वः । बाधितुमोत्सहसे
नप्रवर्तसे । शकधृषेत्यादिनातुमुन् । अहोतेमहद्धैर्यमितिभावः ॥ ३६ ॥ *
अथराज्ञोदुर्दशान्दर्शयितुमुपोद्घातमाह । प्रकृत्यर्थंवर्णयितुमर्थान्तरवर्णनमुपो

ह्यातः। इमामिति। इमां वर्तमानेनान्तर्वर्तमानां तावकीं त्वदीयां। तस्येदमित्यण्प्रत्य
यः। तवकममकावेकवचन इति तवकादेशः। धियं त्वदापद्विषयां चित्तवृत्तिमहं न
वेद न वेद्मि। परबुद्धेरप्रत्यक्षत्वादिति भावः। विदो लटो वेति णलादेशः। न चा
प्यदृष्टान्तेनापन्नत्वात् दुःखितत्वमनुमातुं शक्यते धीरादिष्वनैकान्तिकत्वादित्या
शयेनाह। चित्तवृत्तयो विचित्ररूपाः। धीराधीरा ह्यनेकप्रकाराः खलु किन्तु परामुत्कृ
ष्टां भवदापदं विचिन्तयन्त्या मम चेतश्चित्तं आधयो मनोव्यथाः। उपसर्गे घोः कि
रिति किप्रत्ययः। प्रसभं प्रसह्य रुजन्ति विभजन्ति। रुजो भङ्ग इति धातोर्लट्। प
श्यन्तामपि दुःसहाद् दुःखजननीत्वद्विपत्तिरनुभवितारं त्वां नाविष्करोतीति महच्चित्र

इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः। वि
चिन्तयन्त्या भवदापदं परं रुजन्ति चेतः प्रसभं ममाधयः॥ ३७॥
पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः। अद
भ्रदर्भामधिशय्य सं स्थलीं जहासि निद्रामशिवैः शिवारुतैः॥ ३८॥

मित्यर्थः। चेत इति रुजार्थानां भाववचनानामज्वर इति षष्ठी न भवति तत्र शेषाधि
काराच्छेषत्वस्याविवक्षितत्वादिति॥ ३७॥ * * * * * * ॥
तदापदमेव श्लोकत्रयेणाह। पुरेति। यस्त्वं महाधनं बहुमूल्यं श्रेष्ठम्। महाध
नं महामूल्य इति विश्वः। शयनं शय्यामधिरूढः सन् स्तुतयो गीतयश्च ता एव मङ्गला
नि तैः। करणभूतैः पुरा विबोध्यसे वैतालिकैरिति शेषः पूर्वं बोधित इत्यर्थः। पुरालुङ्
स्मेति भूतार्थे लट्। स त्वमदभ्रदर्भां बहुकुशाम्। अस्त्री कुशं कुशो दर्भः। अदभ्रं बहु
लं बहु चोभयत्राप्यमरः। स्थलीमकृत्रिमभूमिं जानपदेत्यादिना ऽकृत्रिमार्थे ङीप्। ए
तेन दुःसहस्पर्शत्वमुक्तम्। अधिशीङ्स्थासां कर्मेति कर्मत्वं अधिशय्य शयित्वा। अ

यद्यपि कितीत्ययङ्गादेशः अशिवैरमङ्गलैः शिवारुतैः । क्रोष्टुवासितैः शिवा हरितकी क्रोष्टाशमीनद्यामलक्युभेइतिवैजयन्ती । निरस्तानुहासि अस्तीतिशेषः ॥ ३८ ॥ *

पुरेति । हेन्टप यदेतत्पुरो वर्नि वपुः पुरा द्विजातिशेषेण द्विजभुक्तावशिष्टेनान्धसान्नेन । भिस्साखीभक्तमन्धोन्नमित्यमरः । द्वेजातीयेवान्तेद्विजातयः । तदुक्तम् । जन्मनाजायतेशूद्रः संस्कारैर्द्विजउच्यतइति । दन्तविप्राण्डजाद्विजाइत्यमरः । रमणीयस्यभावेरामणीयकंमनोहरत्वमुपनीतम्प्रापितम् । नयतेर्द्विकर्मकत्वात्प्रधानेकर्मणिक्तः । प्रधानकर्मण्याख्येयेलादीनाङ्गद्विकर्मणाइतिवचनात् । अद्य वन्यफलाशिनस्तेतवतद्वपुर्यशसासमम्परमतिमात्रंकार्श्यम्परैतिप्राप्नोतिउभय

पुरोपनीतंनृपरामणीयकंद्विजातिशेषेणयदेतदन्धसा । तद
द्यतेवन्यफलाशिनःपरम्परैतिकार्श्यंयशसासमंवपुः ॥ ३९ ॥
अनारतंयौमणिपीठशायिनावरञ्जयद्राजशिरःस्रजांरजः । नि
षीदतस्तौचरणौवनेषुतेमृगद्विजालूनशिखेषुबर्हिषाम् ॥ ४० ॥

मपिक्षीयतइत्यर्थः । अत्रसहोक्तिरलंकारः । तदुक्तङ्काव्यप्रकाशे । ससहोक्तिः सहार्थस्यबलादेकार्थवाचकमिति ॥ ३९ ॥

अनारतमिति । अनारतमजस्रंमणिपीठशायिनौमणिमयपीठस्थितौयौचरणौराजशिरःस्रजांनमद्भूपालमौलिस्रजांरजःपरागोऽरञ्जयत् । तौतेचरणौमृगैर्द्विजैश्चतपस्विभिरालूनशिखेषुछिन्नाग्रेषुबर्हिषांकुशानाम् । बर्हिःकुशहुताशयोरितिविश्वः । वनेषुनिषीदतस्तिष्ठतः ॥ ४० ॥

ननुसर्वप्राणिसाधारण्यामापदिकापरिवेदनेत्यत्राह । द्विषदिति । यद्यन्तःक्रारणादियन्दशाअवस्था । दशावर्त्तावस्थायामितिविश्वः । द्विषन्निमित्तंयस्याः

हाद्विषोनिमित्ताद्इतिशतृप्रत्ययेः। अतोमेमनःसमूलन्निःशेषंउन्मूलयतीवोत्पा
टयतीवदैविकीत्वापन्नदुःखमित्याह। परैरिति। परैःशत्रुभिरपर्यासिताऽपर्या
वर्त्तितावीर्यसम्पद्येषान्तेषांमानिनाम्पराभवोविपदुत्सवएवेतिवैधर्म्येणार्थान्तरन्या
सःमानहानिर्दुःसहानत्वापदितिभावः॥ ४१॥ * ❁ * ❁ * ❁ * ❁ * ❁ ॥
विहायेति। हेनृपशान्तिंशमंविहायतत्प्रसिद्धन्धामतेजोविद्विषाम्बधायपुनःस
न्धेहिअङ्गीकुरुप्रसीद। प्रार्थनायांलेट्। ननुशमेनकार्य्यसिद्धौकिंक्रोधेनेत्यत्राह
। व्रजन्तीति। निःस्पृहाःमुनयः। शत्रून्कामादीन्विधूयनिर्जित्यशमेनक्रोधवर्जि

द्विषन्निमित्तायदियन्दशाततःसमूलमुन्मूलयतीवमेमनः। परैर
पर्य्यासितवीर्य्यसम्पदाम्पराभवोऽप्युत्सवएवमानिनाम्॥ ४१॥
विहायशान्तिन्नृपधामतत्पुनःप्रसीदसन्धेहिवधायविद्विषाम्। व्र
जन्तिशत्रूनवधूयनिःस्पृहाःशमेनसिद्धिंमुनयोनभूभृतः॥ ४२॥
पुरःसराधामवतांयशोधनाःसुदुःसहम्प्राप्यनिकारमीदृशम्। भ
वादृशाश्चेदधिकुर्वतेरतिन्निराश्रयाहन्तहतामनस्विता॥ ४३॥

तेनसिद्धिंमोक्षाख्याम्व्रजन्तिभूभृतस्तुनकैवल्यकार्येवद्राजकार्येनशान्तिसाध्यमित्य
र्थः॥ ४२॥ * ❁ * ❁ * ❁ * ❁ * ❁ * ॥
पुरइति। किन्तुधामवतान्तेजस्विनाम्परापकारासहिष्णुनामित्यर्थः। पुरःसरन्तीति
पुरःसराःअग्रेसराः। पुरोऽग्रतोऽग्रेषुसर्त्तेरितिटप्रत्ययः। यशोधनाभवादृशाःसुदुःसह
मतिदुःसहमीदृशमुक्तप्रकारन्निकारम्पराभवम्प्राप्यरतिंसन्तोषमधिकुर्वतेस्वीकुर्व
न्तेचेत्तर्हिहन्तइतिखेदेमनस्विताऽभिमानितानिराश्रयासतीहता। तेजस्विजनैक
शरणत्वान्मनस्वितायाइत्यर्थः। अतःपराक्रमितव्यमितिभावः। यद्यप्यत्रप्रसहन

स्यात्। वहतेरधिपूर्वात्करोतेरधेःप्रसहनेइत्यात्मनेपदन्नभवतिप्रसहनम्परिभवइ
निकाशिका। तथाप्यस्याःकर्त्रभिप्रायविवक्षायामेवप्रयोजकत्वात्कर्त्रभिप्रायेस्वरि
तइत्यात्मनेपदम्प्रसिद्धम् ॥ ४३ ॥ ॥

अथेति। अथपक्षान्तरेनिरस्तविक्रमःसन्चिरायचिरकालेनापिक्षमांक्षान्तिमेव क्षितिक्षान्त्योःक्षमेत्यमरः। सुखस्यसाधनम्पर्य्येषिअवगच्छतितर्हिलक्ष्मीपतिलक्ष्मराजचिह्नङ्कार्मुकंविहायधरतीतिधरःपचाद्यच्जटानान्धरोजटाधरः। सन्निहवनेपावकञ्जुहुधिपावकेहोमंकुर्वित्यर्थः। अधिकरणेकर्मत्वोपचारः। विरक्तस्यकिन्धनुषेत्यर्थः। हुझल्भ्योर्हेर्धिः ॥ ४४ ॥ ॥

अथक्षमामेवनिरस्तविक्रमःचिरायपर्य्येषिसुखस्यसाधनम्। विहा
यलक्ष्मीपतिलक्ष्मकार्मुकञ्जटाधरःसञ्जुहुधीहपावकम् ॥ ४४ ॥
नसमयपरिरक्षणंक्षमन्तेनिकृतिपरेषुपरेषुभूरिधाम्नः। अरिषु
हिविजयार्थिनःक्षितीशाविदधतिसोपधिसन्धिदूषणानि ॥ ४५ ॥

अथसमयोल्लंघनाद्बिभेषितदपिनकिञ्चिदित्याह। नेति। परेषुशत्रुषुनिकृतिःशाठ्यम्परंप्रधानंयेषुतेषुयथोक्तेषुअपकारतत्परेषुसत्सुभूरिधाम्नोमहौजसःप्रतीकारक्षमस्यतेनचसमयस्त्रयोदशसंवत्सरान्वनेवत्स्यामीत्येवंरूपासंवित्। समयाःशपथाचारकालसिद्धान्तसंविदइत्यमरः। तस्यपरिरक्षणम्प्रतीक्षणंक्षमंनयुक्तं। युक्तेक्षमंसत्त्वहितेत्रिष्वित्यमरः। कस्माद्विजयार्थिनोविजिगीषवःक्षितीशाअरिषुविषयेसोपधिसकपटंयथातथा। कपटोऽस्त्रीव्याजदम्भोपधयःछद्मकैतवेइत्यमरः। सन्धिदूषणानिविदधति। केनचिद्व्याजेनदोषमापाद्यसन्धिन्दूषयन्तिविघट्टयन्तीत्यर्थः। अतस्यहिविजिगीषोःसर्वथाकार्यसाधनंप्रधानमन्यत्सम

यरक्षणादिकमशक्तस्येतिभावः । अर्थान्तरन्यासोऽलङ्कारः । पुष्पितायावृत्तम् ॥ ४५ ॥ ॥

उक्तमर्थमाशीर्वादपूर्वकमुपसंहरति । विधीति । विधिर्दैवम् । विधिर्विधाने दैवेचेत्यमरः । समयःकालस्तयोर्नियोगान्नियमनाद्धेतोस्तयोर्दुरतिक्रमत्वादिति भावः । अगाधेदुस्तरे आपत्पयोधिरिवेत्युपमितसमासः । दिनकृतमिवेतिवक्ष्यमाणानुसारात्तस्मिन्नापत्पयोधौमग्नम् । सूर्योऽपिसायंसागरेमज्जतिपरेद्युरुन्मज्जतीत्यागमः । दीप्तिःप्रतापश्चातपश्चतस्याःसंहारेणजिह्ममप्रसन्नंशिथिलवसुंशिथिलधनमन्यत्रशिथिलरश्मिं । वसुर्देवेऽग्नौरश्मौचवसुतोयेधनेमणावितिवैजयन्ती । शिथिलबलमितिपाठेतूभयत्रापिशिथिलशक्तिकमित्यर्थः । रिपुस्तिमि

विधिसमयनियोगाद्दीप्तिसंहारजिह्मंशिथिलवसुम
गाधेमग्नमापत्पयोधौ । रिपुतिमिरमुदस्योदीयमानन्दि
नादौदिनकृतमिवलक्ष्मीस्त्वांसमभ्येतुभूयः ॥ ४६ ॥

रमिवेतिरिपुतिमिरमुदस्यनिरस्योदीयमानमुद्यन्तं इङ् गताविति धातोर्दैवादिकाच्छानच् । त्वान्दिनादौदिनकृतमिवलक्ष्मीःभूयःसमभ्येतुभजतु । आशिषि लिङ्लोटाविति लोट् । चमत्कारकारितयामङ्गलाचरणरूपतयाचसर्गान्त्यश्लोके लक्ष्मीशब्दप्रयोगः । यथाहभगवान्भाष्यकारः । मङ्गलादीनिमङ्गलमध्यानि मङ्गलान्तानिचशास्त्राणिप्रथन्तेवीरपुरुषाण्यायुष्मत्पुरुषाणिचभवन्त्यध्येतारश्च प्रवक्तारोभवन्ति । पूर्णोपमेयम् । मालिनीवृत्तम् । सर्गान्तत्वाद्वृत्तभेदः । यथाह दण्डी । सर्गैरनतिविस्तीर्णैःश्राव्यवृत्तैःसुधीरितम् । सर्वत्रलोकवृत्तान्तैरुपेतं लोकरञ्जनमिति ॥ ४६ ॥ ॥

अथ कविः काव्यवर्णनामाख्यानपूर्वकं सर्गपरिसमाप्तिं कथयति । इतीति । इतिश
ब्दः सर्गसमाप्तौ भारविकृताविति कविनामकथनम् । महाकाव्य इति महच्छब्देन लक्ष
णसम्पत्तिः सूचिता । किरातार्जुनीय इति काव्यवर्णयोः कथनम् । प्रथमः सर्गः समा
प्त इति शेषः । एवमुत्तरत्रापि द्रष्टव्यम् । किरातार्जुनीयावधिकृत्य कृतो यं ग्रन्थः कि
रातार्जुनीयं । शिशुक्रन्द इति द्वंद्वाच्छ प्रत्ययः । राघवपाण्डवीयशब्दवत् । तथाहि
। अर्जुन एवात्र नायकः किरातस्तु तदुत्कर्षाय प्रतिभटतया वर्णितः । यथाह दण्डी

इति श्रीभारविकृतौ किरातार्जुनीये महाकाव्ये प्रथमः सर्गः ॥ १ ॥

। वंशवीर्यप्रतापानि वर्णयित्वा रिपोरपि । यज्जयान्नायकोत्कर्षकृते नु वर्णयन्ति हि
। अथायं संग्रहश्लोकः । नेता मध्यमपाण्डवो भगवतो नारायणस्यांशजस्तस्योत्कर्षकृते
नु वर्ण्यचरितो दिव्यः किरातः पुनः । शृङ्गारादिरसो यमत्र विजयी वीरप्रधानो रसः शै
लाद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलमिति ॥ इति श्रीमहोपाध्यायको
लाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घण्टापथसमाख्यायां प्र
थमः सर्गः समाप्तः ॥ १ ॥ ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ॥

विहितामिति । अथवृकोदरोभीमःप्रिययाद्रौपद्याप्रियाग्रहणंअस्याहितोपदे
शत्वसूचनार्थम् । विहितामभिहितामित्यर्थः । विपूर्वस्यदधातेःक्रियासामान्यवा
चितयायोग्यविशेषपर्यवसानात् । मनःप्रियामभिमतार्थयोगान्मनोहरांविशेषण
द्वयेनापिगिरोग्राह्यत्वमुक्तम् । गिरङ्गरीयसींसारवत्तरान्निश्चित्यन्नृपन्धर्मराज
म् । उपपत्तिमत् युक्तियुक्तंऊर्जिताश्रयमुदारार्थंवचनमूचेउक्तवान् । कर्तरि
लिट् । ब्रुवोवचिरादेशः । ब्रुविशासीत्यादिनाद्विकर्मकत्वंअकथितञ्चेतिन्नृप
स्यकर्मत्वम् ॥ १ ॥ * ॥
किन्तद्वचनन्तदाह । यदिति । मानिनीक्षत्रियकुलाभिमानवतीद्रौपदीस्नेहमये

विहितांप्रिययामनःप्रियामथनिश्चित्यगिरङ्गरीयसीम् ।
उपपत्तिमदूर्जिताश्रयंन्नृपमूचेवचनंवृकोदरः ॥ १ ॥
यदवोचदवेक्ष्यमानिनीपरितःस्नेहमयेनचक्षुषा । अ
पिवागधिपस्यदुर्वचंवचनन्तद्विदधीतविस्मयम् ॥ २ ॥

नस्नेहप्रचुरेणतत्प्रकृतवचनेमयट् । चक्षुषाज्ञानचक्षुषा । एतेनाप्तत्वमुक्तम् । प
रितोवीक्ष्य । समन्ताद्विविच्ययद्वचनमवोचत् । ब्रुवोवचेर्वालुङ्वचउमितिउमा
गमःवागधिपस्यबृहस्पतेरपिदुर्वचंवक्तुमशक्यंशेषषष्ठीयंनकद्योगलक्षणा । अ
तोनलोकेत्यादिनाषष्ठीनिषेधोनास्ति । तद्वचनंविस्मयंविदधीत । सर्वस्यापीति
शेषः । अथवावागधिपस्यापिविस्मयंविदधीतेतिसम्बन्धः । दुर्वचंकेनापीतिशे
षः । यत्स्त्रीणामपिशास्त्रंअनुरूपञ्हितंचानुबध्नाति । अतोविस्मयकरंग्राह्यं
चैतद्वचनमितितात्पर्य्यार्थः ॥ २ ॥ * ॥
विस्मयकरत्वेहेतुमाह । विषमइति । विषमोपिदुर्बोधोपि । अन्यत्रदुःप्रवेशो

पिनयोनीतिशास्त्रम्पयसामाशयो ह्रद इव । कृततीर्थःकृताभ्यासादुपायःसन्
। तीर्थंशास्त्रेऽध्वरेक्षेत्रोपायोपाध्यायमन्त्रिषु । अनौजलावतरेषुमन्त्राद्युपादश
स्वपीतिविश्वः । अन्यत्रकृतजलावतारःसन् । तीर्थंयोनौजलावतारेचेतिहला
युधः । विगाह्यतेविगृह्यतेप्रविश्यतेच । किन्तुतत्रनयेसतादृशः । पुरुषोविशेष
दुर्लभःयःकृत्यंसन्धिविग्रहादिकार्य्यंस्नानादिकञ्चतस्यवर्त्मसत्साधुदेशकालाद्यवि
रुद्धंयथार्थमित्यर्थः । अन्यत्रचगर्तग्राहपाषाणादिरहितम् । उपन्यस्यतिउदा
हरति । उपन्यासस्तुवाङ्मुखम् । उपोद्धातउदाहारइत्यमरः । यथाकेचित्
कृततीर्थेपयसिगम्भीरेपिप्रवेष्टारःसन्तितीर्थकरस्तुविरलः । तद्वन्नीतावपिनि

विषमोऽपिविगाह्यतेनयःकृततीर्थःपयसामिवाशयः । सतु
तत्रविशेषदुर्लभःसदुपन्यस्यतिकृत्यवर्त्मयः ॥ ३ ॥ प
रिणामसुखेगरीयसिव्यथकेस्मिन्वचसिक्षतौजसाम् । अ
तिवीर्य्यवतीवभेषजेबहुरल्पीयसिदृश्यतेगुणः ॥ ४ ॥

गूढमपितत्त्वंसतिवक्तरिबोद्धारःसन्ति । वक्तातुनसुलभः । इयञ्चसाधुवक्तीतियु
ज्यतेविस्मयइतितात्पर्यार्थः ॥ ३ ॥ * ० * ० * ० * ० * ० * ० * ॥
अथग्राह्यत्वेहेतुमाह । परिणामेति । परिणामः । फलकालःपरिपाकावस्थाचतत्र
सुखेहिते । शस्तंचाथत्रिषुद्रव्येपापम्पुण्यंसुखादिचेत्यमरः । सुखशब्दस्यवि
शेष्यलिङ्गत्वम् । गरीयसिगुर्वर्थप्रतिपादकेऽर्थभूयिष्ठेश्रेष्ठेचक्षतौजसांउभय
त्रापिक्षीणशक्तीनांव्यथकेयुद्धोपोद्बलकत्वाद्भयङ्करे । अन्यत्रादौसन्तापादिदुः
खजनकेअल्पीयस्यल्पाक्षरेअल्पमात्रेच । उक्तञ्च । स्वल्पाचमात्राबहुलोगुण
श्चेति । अस्मिंश्चवचसिअतिवीर्यवत्यत्यन्तसामर्थ्यवतिभेषजेऔषधेइव । भेषजौषध

भैषज्यमित्यमरः। वक्तुरधिकोगुणःमानत्राणराज्यलाभादिसरोऽप्यवलखितिद्धिस्वहं
स्तते। अतोग्राह्यमस्यावचनमितिभावः॥ ४ ॥ * * * * * * * ॥
ननुमेवमप्रियंनरोचतेकिङ्करोमीत्यतआह। इयमिति। रुचिरार्थाहितार्थसम्पन्नेति
रुचिरत्वेहेतूक्तिः। इयम्भारतीद्रौपदीवाक्यंइष्टगुणायअभिमतगुणायगुणग्रा
हिणइत्यर्थः। भवतेतुभ्यम्। रुच्यर्थानाम्प्रीयमाणइतिसम्प्रदानाच्चतुर्थी। रोच
तांस्वदताम्। विध्यर्थेलोट्। हितवचनेबलादपीच्छांकुर्यादौषधवदितिभावः।
तथापिस्त्रैणेवचसिप्रत्ययःकथमित्यतआह। नन्विति। गुणानांगृह्णागुणगृह्याःगुणपक्ष
पातिनइत्यर्थः। पदास्वैरिवाह्यपक्ष्येषुचेतिग्रहेक्यप्। विपश्चितोविद्वांसः। वि

इयमिष्टगुणायरोचतांरुचिरार्थाभवतेऽपिभारती। ननु
वक्तृविशेषनिःस्पृहागुणगृह्यावचनेविपश्चितः॥ ५ ॥
चतसृष्वपितेविवेकिनीनृपविद्यासुनिरूढिमागता। कथ
मेत्यमतिर्विपर्ययंकरिणीपङ्कमिवावसीदति॥ ६ ॥

द्वान्विपश्चिद्दोषज्ञइत्यमरः। वचनेविषयेवक्तृविशेषेस्त्रीपुंसादिलक्षणेनिस्पृहाः
ननुनिरालम्बाःखलु। बालादपिसुभाषितंग्राह्यमितिभावः॥ ५ ॥ * * * * ॥
सम्प्रतिस्तुतिमुपालभते। चतसृष्विति। हेनृपचतसृष्वपिविद्यासुआन्वीक्षिक्या
दिषु। आन्वीक्षिकीत्रयीवार्तादण्डनीतिश्चशाश्वती। विद्याह्येताश्चतस्रस्तुलोकसं
स्थितिहेतवइतिकामन्दकः। निरूढिमागताप्रसिद्धिङ्गताअतएवविवेकिनीसदस
द्विवेकवती। यथाहमनुः। आन्वीक्षिक्यान्तुविज्ञानन्धर्माधर्मौत्रयीस्थितौ। अर्था
नर्थौवार्तायान्दण्डनीत्यान्नयानयाविति। तेमतिःकथङ्करिणीपङ्कमिवविपर्ययं
वैपरीत्यंअविवेकरूपमेत्यअवसीदतिनश्यति। नयुक्तमितिभावः॥ ६ ॥ * ॥

कि० व्या०॥ दिग्भ्रष्टनमित्यर्थो विनतमनुनासनं व्याह। विधुरमिति। त्वयिपरैस्सनुभिर्हि

॥ सर्ग २॥ मामीदृशीं अवगीतांगर्हिताम्। अवगीतस्यानिर्वादेमुक्तदुष्टेचगर्हितेइतिवि

॥ १७ ॥ श्वः। दशामितिप्रापितेसति। सुरैरपिसम्भावितवृत्तिवर्त्तमानव्यापारम्। अप

वादनिष्ठितसद्भावन्पौरुषम्पुरुषकारः। युवादित्वादण्प्रत्ययः अवसीदतिनश्यति

। अतःपरंयतोन्यत्। अधिकङ्किंविधुरङ्किंकष्टंकिञ्चिदित्यर्थः। विधुरं

प्रत्यवायेसाकल्यविश्लेषयोरपीतिवैजयन्ती। अस्तीतिशेषः। अस्तिर्भवन्तीपरः

प्रथमःपुरुषःप्रयुज्यमानोप्रयुक्तोतिभाष्यकारः। भवन्तीतिलटःपूर्वाचार्यसंज्ञा

। यत्पुरुषाधिकारादुर्दशासाचत्वनुतताइतिमहत्कष्टंनाचलयोपेक्षतइत्युपत

विधुरंकिमतःपरम्परैरवगीतांगमितेदशामिमान्। अव
सीदतियत्सुरैरपिचयिसम्भावितवृत्तिपौरुषम्॥ ७ ॥
द्विषतामुदयःसुमेधसागुरुरस्वन्ततरःसुमर्षणः। नम
हानपिभूतिमिच्छताफलसम्पत्प्रवणःपरिक्षयः॥ ८ ॥

लभ्यतइत्यर्थः॥ ७ ॥ * * * ॥

अथोपेक्षाकालत्वादियमुपेक्षेत्याशंक्यनायमुपेक्षाकालइतिदक्षुत्तदेवतावत्श्लोक

द्वयेनविविनक्ति। द्विषतामिति। भूतिमुदयमिच्छताशोभनामेधायस्यतेनसुमे

धसा। सुधियोनित्यमसिच्प्रजामेधयोरित्यसिच्। गुरुर्महानपिअस्वन्ततरः

। अत्यन्तादुरन्तःक्षयोन्मुखइत्यर्थः। द्विषतामुदयःसुखेनमृष्यतइतिसुमर्ष

णःसुसहःउपेक्ष्यतइत्यर्थः। स्वतस्यदुर्मर्षणइतिभावः। भव्यायांशास्वीत्यादिना

खलर्थेयुच्। महानपिफलसम्पत्प्रवणःफलसिद्ध्युन्मुखः। प्रागिरन्तरित्यादिना

द्विषाम्परिक्षयोनसुमर्षणःनोपेक्ष्यइत्यर्थः। अन्यथात्मोपेक्ष्यइतिभावः। नन्वर

धस्त्वप्रतीकार्यः । न च क्षय एवोपेक्ष्य इत्यर्थः । किन्तु स्वस्य तावत्क्षयाभ्युदयाभ्यामुभा
वपि प्रतीकार्यौ उपेक्ष्यौ च भवत इत्यर्थः ॥ ८ ॥ * * * * ॥

अथोभयोरपि मध्ये एकतरस्योदयक्षययोर्निमित्तयोरिदानीं युगपत् परीक्षया
गमनेगतिमाह । अचिरेणेति । कृतमनेनेति कृती कुशल इत्यर्थः । इष्टादिभ्यश्चे
तीइन्प्रत्ययः । परस्य शत्रोः क्षययुक्तिं क्षयप्रयोगं अचिरेणाशुभाविनीं भूयसीं दुरन्ता
म् तथात्मनः । क्षययुक्तिं विपरीतां चिरभाविनीम् । अल्पीयसीं स्वल्पां च विग
णय्य विचार्य । ल्यपि लघुपूर्वादित्ययादेशः । उपेक्षते अन्यथा उक्तवैपरीत्ये पर
स्यायुक्तौ अल्पीयस्यां स्वस्य भूयस्यामित्यर्थः । तत्प्रतिकारं तत्क्षययुक्तेः प्रती

अचिरेण परस्य भूयसीं विपरीतां विगणय्य चात्मनः ।
क्षययुक्तिमुपेक्षते कृती कुरुते तत्प्रतिकारमन्यथा ॥ ९ ॥
अनुपालयतामुदेष्यतीं प्रभुशक्तिं द्विषतामनीहया ।
अपयान्त्यचिरान्महीभुजां जननिर्वादभयादिव श्रियः ॥ १० ॥

कारं अचिरेणाशु कुरुते । एवं सति यदा शत्रोरभ्युदयः स्वस्य चातिपरीक्षयोऽव
था आक्रान्तदा किं वक्तव्यमित्यर्थः । सद्यः प्रतिकारं कुरुत इत्यर्थात्सिद्धमनुसन्धे
यम् ॥ ९ ॥ * * * * ॥

तथाप्युपेक्षायामनिष्टमाचष्टे । अनुपालयतामिति । उदेष्यतीं वर्द्धिष्यमाणाम् आ
च्छीनद्योर्नुमिति विकल्पान्नुमभावः । द्विषतां प्रभुशक्तिं कोषदण्डजन्तेजः । स
प्रभावः प्रतापश्च यत्तेजः कोषदण्डजमिति । अनीहया निरुत्साहेन अनुपालयतां
उपेक्षमाणानां महीभुजां श्रियः सम्पदो जननिर्वादभयात् निकृष्टपुरुषानुरागात्
लोकापवादभयादिति हेतूत्प्रेक्षा । अचिरात् अपयान्ति अपसरन्ति । यथाह कामन्द

कः । स्त्रीभिःषण्ढइवश्रीभिरलसःपरिभूयतइति । अतःपराक्रमितव्यमितिभा
वः ॥ १० ॥ * * * * * * * * * * ॥

ननुपरिक्षीणःकथम्प्रबलेनाभियुज्यतइत्यत्राह । क्षयेति । क्षययुक्तमपितथाक्षी
णमपिसन्तंस्वभावजंशिवंसर्वलोकाह्लादकम् । धामक्षात्रन्तेजःप्रकाशन्दधतं
समृद्धयेवृद्ध्यर्थंउत्थितमुद्युक्तंउत्साहमानमितियावत् । अन्यत्रउत्थितमुदितं अ
तएवअनपायमविनाशिनंवर्द्धिष्यन्तमित्यर्थः । नृपम्प्रजाःप्रतिपच्चन्द्रंद्वितीया
चन्द्रमिवेत्यर्थः । प्रतिपच्छब्देनद्वितीयाग्रहणमिति । प्रतिपदितस्यादृश्यत्वादि
ति । प्रणमन्तिप्रह्वीभावेनवर्त्तन्तइतिभावः । चन्द्रन्तुनमस्कुर्वन्तिक्षीणस्याप्युत्सा
हकार्य्यसिद्धेर्निदानत्वमित्यर्थः । अयंहिसततोत्साहीदुर्बलोपिसमश्नुतेइतिका

क्षययुक्तमपिस्वभावजन्दधतन्धामशिवंसमृद्धये । प्रण
मन्त्यनपायमुत्थितम्प्रतिपच्चन्द्रमिवप्रजान्नृपम् ॥ ११ ॥

मन्दकः ॥ ११ ॥ * * * * * ॥

ननुप्रभुशक्तिशून्यस्योत्साहःकुत्रोपयुज्यतइत्यत्राह । प्रभवइति । कर्म्मणामारम्भो
पायःपुरुषद्रव्यसम्पत्देशकालविभागःविनिपातप्रतीकारःकार्य्यसिद्धिश्चेतिपञ्चाङ्गा
नि । यथाहकामन्दकः । सहायाःसाधनोपायाविभागोदेशकालयोः । विनिपात
प्रतीकारःसिद्धिःपञ्चाङ्गइष्यते । इतिपञ्चानामङ्गानांविनिर्णयः । तद्धितार्थेत्या
दिनाउत्तरपदसमासः । कृतःपञ्चाङ्गविनिर्णयोयस्यसतथोक्तःनयोनीतिशास्त्रमि
तियावत् । कोषोऽर्थराशिः । कोषोस्त्रीकुड्मलेखड्गपिधानेर्थौघदिव्ययोरित्यमरः
। दण्डश्चतुरङ्गसैन्यम् । दण्डोऽस्त्रीशासनेराज्ञांहिंसायांलगुडेयमे । यात्राज्ञायां
सैन्यभेदेइतिवैजयन्ती । तयोःकोषदण्डयोःप्रभुशक्तेरित्यर्थः । प्रभवत्यस्मादिति

प्रभवः । कारणम् । ऋदोरप् । स नयः नीतिशास्त्रं विधेयपदेषु कार्यवस्तुषु । प
दं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुष्वित्यमरः । दक्षतां क्षिप्रकारित्वमुत्साह इत्य
र्थः । लोकः कृष्यादिप्रवृत्तो जनः नियतिं दैवमिव । नियतिर्नियमे दैवे इति विश्वः ।
अनुरुध्यते अनुसरति । रुधेर्दैवादिकात् कर्तरि लट् । मन्त्रस्यापि मूलमुत्साहस्त
न्मूलतायाः प्रभुशक्तेः मूलमिति किमु वक्तव्यम् । अतः स एवाश्रयणीयः यतो नक्तन्दिवम
यतः तस्यापि प्रभोर्निरुत्साहस्य न किंचित् सिध्यतीति ॥ १२ ॥ ❋ ❋ ❋ ❋ ❋ ॥
अथ यदि दैवात् स्वयमेव दुर्योधनः सम्पदो दास्यति तथापि न कथं रोचयेमहीत्याह ।
द्विषतेति । अथवा द्विषता दुर्योधनेन विहितं समर्पितमित्यर्थः । आत्मनः पदं राज्यं पु

प्रभवः खलु कोशदण्डयोः कृतपञ्चाङ्गविनिर्णयो नयः । स
विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते ॥ १२ ॥
द्विषता विहितं त्वयाथवा यदि लब्धा पुनरात्मनः पदम् । ज
ननाथ तवानुजन्मनां कृतमाविष्कृतपौरुषैर्भुजैः ॥ १३ ॥

नरपि त्वया लब्धा लप्स्यते यदि लभेः कर्मणि लुट् । हे जननाथ तवानुजन्मनां अनुजानां
आविष्कृतपौरुषैः प्रकटितपराक्रमैः भुजैः कृतमलं व्यर्थमिति यावत् । अस्मद्भुजैर्न कि
ञ्चित्साध्यमित्यर्थः । राज्यदानादानयोर्द्विषतामेव स्वातन्त्र्ये अस्मद्भुजैः फल्यात् ।
क्षत्रियस्य विजितत्वमिति शास्त्रात् । क्षात्रेणैव राज्यं ग्राह्यमिति भावः । कृतमिति प्रति
षेधार्थमव्ययं स्वरादिषु पठ्यते । कृतमिति निवारणनिषेधयोरिति गणव्याख्याने भुजै
रिति गम्यमानसाधनक्रियापेक्षया करणत्वात् तृतीया । उक्तं च न्यासोद्द्योतेन । के
वलं श्रूयमाणैव क्रिया निमित्तं कारकभावस्यापि तु गम्यमानस्यापीति ॥ १३ ॥ ❋ ॥
ननु सोत्साहस्याप्यनुपायस्य कथमर्थसिद्धिरित्यत आह । अभिमान इति । अभिमान

वतः मानधनस्य प्रियमिष्टमुच्चैरुन्नतम्पदं स्थानं राज्यादिकमारुरुक्षतः । आरोढुमि
च्छतः प्राप्तुकामस्य । मनस्विनो धीरस्यात्मपौरुषं स्वपुरुषकार एव विनिपातनिव
र्तनक्षमम् । अनर्थप्रतीकारसमर्थमालम्बनसहकारि । तमं इष्टतमम् । यथा
कस्यचित्तुरङ्गमारोहयतः किञ्चित्पतनप्रतिबन्धकानुचरहस्तादिकमालम्बनन्तद्व
दिति ध्वनिः किम्पौरुषादन्यैः सहायैः पूरणामिति भावः ॥ १४ ॥ ○ ○ ○ ○ ○ ॥

पौरुषानङ्गीकारे दोषमाह । विपद इति । अविक्रमम्पौरुषहीनं विपदोऽभिभ
वन्ति तिरस्कुर्वन्ति । आपदुपेतं विपन्नं आयतिः उत्तरकालः । उत्तरङ्काल आ
यतिरित्यमरः । रहयति त्यजति । निरायतेरुत्तरक्षयस्येत्यर्थः । लघुताऽगौर

अभिमानवतो मनस्विनः प्रियमुच्चैः पदमारुरुक्षतः । वि
निपातनिवर्तनक्षमन्तममालम्बनमात्मपौरुषम् ॥ १४ ॥
विपदोभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः । नि
यता लघुता निरायतेरगरीयान्न पदं न्नृपश्रियः ॥ १५ ॥

वं नियता अवश्यम्भाविनी न कश्चिदेनमाद्रीयत इत्यर्थः । अगरीयान् लघीयान्
नृपश्रियः पदं राजलक्ष्म्याः आस्पदं न भवति । यद्वा न्नृपेति पदच्छेदः । तस्मात्पौ
रुषङ्कर्तव्यमेवेत्यर्थः । अत्र पूर्वपूर्वस्याविक्रमत्वादुत्तरोत्तरं विपदादिकम्प्रतिकार
णत्वात्कारणमालाख्योऽलङ्कारः । यथासूत्रम् । पूर्वपूर्वस्योत्तरोत्तरहेतुत्वे कार
णमालेति ॥ १५ ॥ ○ * ○ * ○ * ○ * ○ * ○ * ○ * ○ * ○ * ॥

फलितमाह । तदिति । तत्तस्मादुपेक्षायान्दोषसम्भवादित्यर्थः । उन्नतेरभ्युदय
स्याप्रतिपक्षमन्तरायम् । व्यवसायवंध्यतां उद्योगशून्यतामवलंब्य अलं उद्योग
शून्यतावलम्बनेनालमित्यर्थः । अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वेति क्त्वाप्रत्ययः । त

स्त्यवादेशः । तथाहिपराक्रमःआश्रयःकारणंयासान्तास्तथोक्ताःसमृद्धयःसम्प
दःविषादेनसमं अनुत्साहेनसहननिवसन्तिपौरुषसाध्याःसम्पदोनानुद्योगसा
ध्यास्तुभयोःसहावस्थानविरोधादित्यर्थः । वैधर्म्येणकार्य्यकारणरूपोऽर्थान्तर
न्यासः ॥ १६ ॥ * * * * * *
ननुसमयःप्रतीक्ष्यतेइत्यत्राह । अथेति । अथावधिःकालःप्रतीक्ष्यतेचेत् । अवधि
स्त्ववधानेस्यात्सीम्निकालेबलेपिचेतिविश्वः । आविष्कृतजिह्मवृत्तिनाप्रकटितकप
टव्यवहारेणधृतराष्ट्रसुतेनदुर्योधनेननरेन्द्रसम्पदोराज्यसम्पदः । नरेन्द्रेतिवाप

तदलम्प्रतिपक्षमुन्नतेरवलंब्यव्यवसायवंध्यताम् । निव
सन्तिपराक्रमाश्रयानविषादेनसमंसमृद्धयः ॥ १६ ॥
अथचेदवधिःप्रतीक्ष्यतेकथमाविष्कृतजिह्मवृत्तिना । धृत
राष्ट्रसुतेनसुत्यजाश्चिरमास्वाद्यनरेन्द्रसम्पदः ॥ १७ ॥
मदसिक्तमुखैर्मृगाधिपःकरिभिर्वर्तयतेस्वयंहतैः । लघ
यन्खलुतेजसाजगन्नमहानिच्छतिभूतिमन्यतः ॥ १८ ॥

दच्छेदःचिरञ्चतुर्दशवर्षाण्यास्वाद्यानुभूयकथंसुत्यजाःज्ञातस्वादेनतेनपश्चादपि
सम्पदोयुद्धक्लेशंविनानत्यक्ष्यतएवेत्यवधिप्रतीक्षणंव्यर्थमित्यर्थः ॥ १७ ॥ * ॥
ननुसाम्नैवकार्य्यसिद्धौकिंक्षात्रेण । यथाहमनुः । साम्नादानेनभेदेनसमस्तैरथवा
पृथक् । विजेतुम्प्रयतेतारीन्नयुद्धेनकदाचनेतितत्क्रमयहरोणेत्याह । मदेति ।
मृगाधिपःसिंहोमदसिक्तमुखैःमदवर्षिभिरित्यर्थः । स्वयंस्वेनैवहतैःकरिभिर्वर्तय
तेवृत्तिङ्करोतितेरेवजीवतीत्यर्थः । चौरादिकात् वृतेर्णिच् । भौवादिकस्यतु । अ
णावकर्मकाच्चित्तवत्कर्तृकादितिपरस्मैपदनियमादिति । तथाहितेजसाप्रभावेण

॥ किं० व० ॥ । तेजोविशेषप्रभावे च तेजो तिग्मरुचि रेतसीति वैजयन्ती । नागमत् नाधयत् । लघू
॥ सर्ग २ ॥ कुर्वन् महानप्यतोऽन्यस्मात्पुरुषात् । भूतिं वृद्धिं नेच्छति । स तु न हि तेजस्विनः
॥ २० ॥ परायत्तवृत्तित्वं युक्तं । मन्तुं च जनस्तु सुस्थुर विषयमिति भावः । विशेषेण सावयवस्यनाग
सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ १८ ॥ * ॥

ननु युद्धात्प्राणिकेऽलक्ष्मीलाभः उपायान्तरैस्तु न तथेत्याशंक्याह । अभिमान इति । अभिमानधनस्य गैरनिर्ध्यातनमेवधनं यस्येत्यर्थः । अनस्वगत्वरैः गमनशीलैः अस्थिरैः । गत्वरश्चेति करवन्तो निपातः असुभिः प्राणैः । करणैः । पुंसि भूम्न्यसवः प्राणा इत्यमरः । स्थास्नुं स्थिरं यशः चिचीषतः । चेतुं संग्रहीतुमिच्छतः । ग्लाजिस्थश्च ग्स्नुरिति ग्स्नुप्रत्ययः चिनोतेः सन्नन्तात् उप्रत्ययः । अचिरं अंशवो यस्याः सा अचिरां

अभिमानधनस्य गत्वरैरसुभिः स्थास्नु यशश्चिचीषतः । अचि
रांशुविलासचञ्चला ननु लक्ष्मीः फलमानुषङ्गिकम् ॥ १९ ॥

शुर्विद्युत् तस्याः विलासः स्फुरणं तद्वच्चञ्चला अस्थिरा इत्यर्थः । लक्ष्मीः सम्पत् अनुषङ्गादागतं आनुषङ्गिकं अन्वाचयशिष्टम् फलं ननु । मानवतां यशः स एव मुख्यफलं अस्थिरं च तु लक्ष्मीरिति मानिनां मतं स एव श्लाघ्य इत्यर्थः । अत्रास्थिरप्राणत्यागेन स्थिरयशः स्वीकाराभिधानात् न्यूनाधिकविनिमयात्मा परिवृत्त्यलङ्कारः । उक्तं च काव्यप्रकाशे । परिवृत्तिर्विनिमयो योऽर्थानां स्यात्समासमैरिति ॥ १९ ॥ * ॥

नन्वल्पस्य मानस्य हेतोः कथं प्राणव्ययान्तं उच्यते कर्तुं यतो जीवन्नरो भद्राणि पश्यती-त्याशंक्याह । ज्वलितमिति । जनो भस्मनाच्छन्नमास्कन्दति पादादिना आक्रमति । अदाहकत्वादिति भावः । ज्वलितं ज्वलन्तं हुतैरितः मतिबुद्धीत्यादि सूत्रे चकाराद्वर्तमानार्थत्वं हिरण्यं रेतो यस्य तं हिरण्यरेतसं अग्निं न आस्कन्दति । दाहकत्वा

दिति भावः । अतो हेतोर्मानिनः । अभिभूतिभयात्पराभवभयेन तेजःत्यागे परिभ
वो भविष्यतीति भयादसूनेव सुखमक्लिष्टं । उज्झन्ति त्यजन्ति धाम तेजस्तु नोज्झ
न्ति मानहानिकराज्जीवनात्स्वतेजसा मरणमेव वरमित्यर्थः । पूर्वोत्तरश्लोकवत्
अर्थान्तरन्यासः ॥ २० ॥ ॥

अथवा किमत्र प्रयोजनचिन्तया । किन्तु तेजस्विनामेवायं स्वभावो यज्जिगीषुत्व
मित्याह । किमिति । मृगाधिपः सिंहः किम्फलम्प्रयोजनम् । अपेक्ष्य ध्वनतो गर्ज
तः । धरन्तीति धराः पचाद्यच् । पयसो धरान् पयोधरान् मेघान् प्रार्थयते । अभिया
ति । याच्ञायामभिमाने च प्रार्थना कथ्यते बुधैरिति केशवः । [illegible]

ज्वलितन्न हिरण्यरेतसञ्चयमास्कन्दति भस्मनाञ्जनः । अ
भिभूतिभयादसूनतः सुखमुज्झन्ति न धाममानिनः ॥ २० ॥
किमपेक्ष्य फलम्पयोधरान्ध्वनतः प्रार्थयते मृगाधिपः । प्र
कृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥ २१ ॥

र्थः । प्रार्थयते इति अभियाञ्चावरोधयोरित्यभिधानात् महीयसो महत्तरस्य सा प्रकृ
तिः खलु यया प्रकृत्या अन्यसमुन्नतिम्परवृद्धिं न सहते । महतः परभञ्जनमेव पुरु
षार्थ इत्यर्थः । पूर्ववदलङ्कारः ॥ २१ ॥ ॥

उक्तप्रयोजनं निगमयति । कुरु तदिति । हे नृप तत्तस्मात् । उक्तरीत्या पराक्रमा
दपरत्वाद्धेतोः । यस्मादुतः ततो हेतोः इत्यमरः । प्रमादजन्मनो मोहं निर्धूय नि
रस्य विक्रमे पौरुषे एवं मतिं कुरु विक्रममेवाङ्गीकुरु न तु उपायान्तरमित्यर्थः । न च
विक्रमवैफल्यमित्याह । ध्रुवमिति । विद्विषां विपत्तयः त्वदनुत्साहहताः । तवानु
त्साहेन अव्यवसायेन हताः प्रतिबद्धाः । अन्यथा प्रागेव विपद्येरन्निति भावः । इत्येत

त् ध्रुवं निश्चितं अवेहि विद्धि । ध्रुवं नित्ये निश्चिते चेति शाश्वतः ॥ २२ ॥ * * ॥
न च नः पराजयशङ्का कार्येत्याह । द्विरदानिति । दिग्विभावितान् दिक्षु प्रसिद्धा
न् तानायतः आगच्छतः । आङ् पूर्वादिणधातोः शतृप्रत्ययः । चतुरो द्विरदान् दिग्
गजान् इव तथोक्तविशेषणान् । चतुरस्तोयनिधीनिव रणे आयतः । दिग्विभा
वितान् शतमन्युतेजसः इन्द्रविक्रमान् । चतुरस्तवानुजान् द्विषतां मध्ये कः प्रस
हेत सोढुं शक्नुयादित्यर्थः । शकिन्निङ् चेति शक्यर्थे लिङ् अतो निःशंकं प्रवर्तस्वेति
भावः ॥ २३ ॥ * * * * ॥

कुरु तन्मतिमेव विक्रमे नृप निर्धूय तमः प्रमादजम् । ध्रुव
मेतदवेहि विद्विषां त्वदनुत्साहहता विपत्तयः ॥ २२ ॥
द्विरदानिव दिग्विभावितांश्चतुरस्तोयनिधीनिवायतः । प्र
सहेत रणे तवानुजान् द्विषतां कः शतमन्युतेजसः ॥ २३ ॥
ज्वलतस्तव जातवेदसः सततं वैरिकृतस्य चेतसि । विद
धातु शमं शिवेतरा रिपुनारीनयनाम्बुसन्ततिः ॥ २४ ॥

आशीर्वादव्याजेन फलितमाह । ज्वलत इति । तव चेतसि सततं ज्वलतो वैरिकृत
स्य जातवेदसः क्रोधाग्नेरित्यर्थः । शिवेतरा अशिवा इत्यर्थः । अमङ्गला वैधव्यदुःख
जनकत्वादिति भावः । रिपुनारीनयनांबुसन्ततिः । वैरिवनिताश्रुप्रवाहः शमम्वि
दधातु । वैरिकृतस्यास्य वैरिवधमन्तरेण शान्त्यसम्भवादवश्यं तद्वधस्त्वया कर्त
व्य इत्यर्थः । क्रोधस्य विषयनिगरणेन विषयिणो जातवेदस एवोपनिबन्धनादति
शयोक्तिरलङ्कारः । तदुक्तम् । विषयस्यानुपादानाद्विषय्युपनिबध्यते । यत्र सा
तिशयोक्तिः स्यात् कवेः प्रौढोक्तिजीवितेति । तत्रापि क्रोधस्य जातवेदसाभेदेप्यभेदा

ध्यवसायात् । भेदेऽभेदरूपात्तत एवाम्बुनिर्वाप्यत्वोक्तिस्सङ्घटते । तथाच । यथा म्बुसिक्तेनाग्निःसम्यक्शाम्यति तथाशत्रुवधेनक्रोधइत्यौपम्यंगम्यते ॥ २४ ॥ ● ॥

इतीति । इत्युक्तरीत्यादर्शिताविक्रियाकोपविकारोऽनागारम्भात्मकोयेनतंकोपपरीतमानसंकोपाक्रान्तचित्तंइदंविशेषणद्वयंद्विरदेपियोज्यम् । मरुतःसुतम्भीमंमहीपतिर्युधिष्ठिरोदुष्टंद्विरदमिवएतेनास्यशौर्यमेवनबुद्धिरस्तीतिगम्यते । उपसान्त्वयितुंअनुनेतुमुपचक्रमेप्रवृत्तः प्रोपाभ्यांसमर्थाभ्यामित्यात्मनेपदम् । राज्ञाभ्युपकारविशेषापेक्षयाकथंचिदवश्योजनःशनैःशनैर्द्विरदवद्वशीकरणीयोनतुत्याज्यइतिभावः ॥ २५ ॥ * ● * * ● * * ● * ॥

इतिदर्शितविक्रियंसुतंमरुतःकोपपरीतमानसम् । उप
सान्त्वयितुम्महीपतिर्द्विरदन्दुष्टमिवोपचक्रमे ॥ २५ ॥
अपवर्ज्जितविप्लवेशुचौहृदयग्राहिणिमङ्गलास्पदे । वि
मलातवविस्तरेगिराम्मतिरादर्शइवाभिदृश्यते ॥ २६ ॥

अथमन्त्रावत्तुत्यादिभिःप्रसादयति । अपवर्जितेति । विप्लवःप्रमाणबाधःअन्यत्रवाह्यमलसंक्रमः । सोपवर्जितोयस्यतस्मिन्नपवर्ज्जितविप्लवेशुचौशुचिःशुद्धसौक्ष्यंलोहशुद्धिश्चतद्वति । अतएवहृदयग्राहिणिमनोरमेमङ्गलास्पदेसकलहितार्थप्रतिपादकत्वादन्यत्रमङ्गलवस्तुत्वाचश्रेयस्करे । रोचनञ्चन्दनंहेममृदङ्गन्दर्पणंमणिम् । गुरूनग्निंतथासूर्यंप्रातःपश्येत्सदाबुधइतिपुराणवचनात् । तवगिरांविस्तरेवाक्प्रपञ्चेप्रथनेवावशब्दइतिघञ्प्रतिषेधात्ऋदोरबित्यप् । अनएवविस्तारोविग्रहोव्यासःसतुशब्दस्यविस्तरइत्यमरः । मतिर्बुद्धिरादर्शेदर्पणेइव । दर्पणेमुकुरादर्शावित्यमरः । अमलोविशदाअभिदृश्यते वाक्यैषद्वा

द्देवमत्रिवैषद्यमनुमीयते । तत्पूर्वकात्तस्येत्यर्थः ॥ २६ ॥ ✿ * ✿ * ✿ * ✿ ॥

अथगुणमेनाह । स्फुटतेति । उपपत्तिरितिच । पदैःसुप्तिङन्तशब्दैःस्फुटता
विशदार्थता अनपाकृतानत्यक्ता अर्थगौरवं अर्थभूयस्त्वंदानचनस्वीकृतं स्वीकृतमेवे
त्यर्थः । वैषद्यप्रसक्तार्थगौरवाभावनिवर्तनार्थं नञ्द्वयं सम्भाव्यनिषेधनिवर्तनेद्वौ
प्रतिषेधाविति वामनः । गिरांपदानां अवान्तरवाक्यानाञ्च पृथगर्थता भिन्नार्थता अ
पुनरुक्तार्थतेति यावत् । रचिता कृता । तथा क्वचिदपि सामर्थ्यं गिरां अन्योन्यसामर्थ्यं
साकांक्षत्वं नापोहितं नैव वर्जितम् । अन्यथा दशदाडिमादिशब्दवदेकवाक्यतान
स्यात् । यथाहुः अर्थैकत्वादेकवाक्यं साकांक्षं चेद्विभागे स्यादिति । ननु अर्थगौर
वमित्यत्र कथं षष्ठीसमासः पूरणगुणेत्यादिना प्रतिषेधान्नैषदोषः । ये शुक्लादयः

स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् । रचि
ता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित् ॥ २७ ॥

शब्दाः गुणे गुणिनि च वर्तन्ते यथा पटस्य शुक्लः शुक्लः पटः इति च । तेषामेवात्र निषेधात्
ये च सदा गुणमात्रवचनाः । यथा गौरवम्प्राधान्यं रसो गन्धः स्पर्श इत्येवमादयस्ते
षामनिषेधात् । तत्स्थैश्च गुणैः षष्ठी समस्यत इति वचनात् । बकुलमभियुक्तप्रयो
गदर्शनाच्च बलाकायाः शौक्ल्यमित्यादौ तु भाष्यकारवचनादसमासः । अत एवाह वा
मनः । अपीतिमादिषु गुणवचनसमासो बलीयानिति ॥ २७ ॥ ✿ ✿ ॥

उपपत्तिरिति । किञ्च । बलात्स्वबलमाश्रित्य कर्मणि ल्यप्लोपे पञ्चमी वक्तव्या ।
उपपत्तिर्युक्तिः उदाहृता पराक्रमपक्ष एव श्रेयानिति युक्तिरुक्तेत्यर्थः । उचितत्वं तेन
महावीरस्येति भावः । तथा अनुमानेन युक्त्या आगमः शास्त्रं न क्षतो न हतः । किन्त्वा
गमाविरुद्धमेवोक्तं । अन्यथा तद्विरोधादनुमानस्यैवाप्रामाण्यप्रसङ्गादिति भावः ।

ईदृक्इत्थशास्त्रयुक्तमिदंवचनं। अविद्यमानईदृक्इत्थंशास्त्रयुक्तोभिप्रायोयस्यस
अनीदृगाशयः। अभिप्रायश्छन्दआशयइत्यमरः। कःप्रसभंहठात्वक्तुमुपक्र
मेतनकोपीत्यर्थः। इत्थंवक्तुमुपक्रमितैवनास्तिवक्तातुदूरपास्तएवेतिभावः। के
चित्तुएतत्श्लोकत्रयंनिन्दापरत्वेनापियोजयन्ति। तदसत्हितोपदेशमात्रतत्परस्या
तिवत्सलस्यराज्ञोमन्त्रिरमद्यमहावीरेभ्रातरिविधेयेसर्वानर्थमूलभूतनिन्दातात्प
र्यकल्पनानौचित्यादिति ॥ २८ ॥ * * * ॥
यदिसाधूक्तन्तर्हितथैवक्रियतामित्याशंक्याह। अवितृप्ततयेति। तथापित्वयास
म्यक्निर्णीतेपिमेहृदयमवितृप्ततयाअसन्तुष्टतयाअद्यापिसंशयगतत्वेनेत्यर्थः।

उपपत्तिरुदाहृताबलादनुमानेननचागमःक्षतः। इ
दमीदृगनीदृगाशयःप्रसभंवक्तुमुपक्रमेतकः॥ २८॥
अवितृप्ततयातथापिमेहृदयन्निर्णयमेवधावति। अव
सायायितुंक्षमाःसुखन्नविधेयेषुविशेषसम्पदः॥ २९॥

निर्णयमेवधावत्यनुसरतिअपेक्षतइतियावत्। अद्यापिनिर्णयस्यअनुदयादितिभा
वः। निर्णयानुदयेहेतुमाह। अवेति। विधेयेषुसन्धिविग्रहादिकर्तव्यार्थेषुयावि
शेषसम्पदःअवान्तरभेदसमृद्धयोबाहुल्यानिताः। सुखमक्लेशेनावसाययितुम्प
रूपान्अर्थ्यानुकूल्येनस्वस्वरूपंस्वयमेवशीघ्रम्प्रत्याययितुमित्यर्थः। स्यतेर्ण्यन्तादणि
कर्मकर्तृकात्तुमुन्। णेरनादिष्टत्वस्यायंविशेषः। क्षमन्तइतिक्षमाःशक्तानभवन्ति
। क्षमंशक्तेहितेत्रिषुइत्यमरः। विधेयमात्रस्यसुगमत्वेपितद्विशेषाणांसौक्ष्म्यात्बा
हुल्याच्चदुर्ज्ञेयत्वादद्यापिनिर्णयाकांक्षेतितात्पर्यार्थः। अत्रनिर्णयधावनस्यउत्त
रवाक्यार्थस्यहेतुत्वाभिधानात्। वाक्यार्थहेतुकन्नाम्काव्यलिङ्गमलङ्कारः। तदुक्तम्। हे

तोविवाक्यपदार्थविवेकाख्यलिङ्गमुपाहृतमिति ॥ २९ ॥ * ❁ * ❁ * ❁ * ❁ ॥
वस्तुविशेषावधारणमन्तरेणैवप्रवृत्तिरित्याशंक्याह । सहसेति । क्रियतइतिक्रि
याकार्य्यंसहसाअविमृश्येत्यर्थः । सहसेत्याकस्मिकाविमर्शयोरितिगणव्याख्यानेस्वरा
दिपाठादव्ययम् । नविदधीत । कुतःअविवेकःअविमृश्यकारित्वम्परमत्यन्तमाप
दाम्पदंस्थानंविपत्तिकारणमित्यर्थः । व्यतिरेकेणोक्तमर्थमन्वयेनाह । वृणुतइति ।
गुणलुब्धागुणगृह्यागुणगृह्नवइतिस्वयंवरणहेतून्निःसम्पदःश्रियःविमृश्यकरोतीति
विमृश्यकारीउपपदमतिङितिसमासः । तंस्वयमेववृणुतेभजन्ते । वृङ्सम्भ
क्ताविति धातुःतस्माद्विमृश्यैवप्रवर्तितव्यमित्यर्थः । अत्रसहसाविधाननिषेधलक्ष

सहसाविदधीतनक्रियामविवेकःपरमापदाम्पदम् । वृ
णुतेहिविमृश्यकारिणंगुणलुब्धाःस्वयमेवसम्पदः ॥ ३० ॥
अभिवर्षतियोनुपालयन्विधिबीजानिविवेकवारिणा । स
सदाफलशालिनींक्रियांशरदंलोकइवाधितिष्ठति ॥ ३१ ॥

विमृश्यकारित्वरूपकारणस्यापद्रूपव्यतिरेककार्य्येणसमर्थनाद्वैधर्म्येणार्थान्तर
न्यासः । द्वितीयार्द्धेनचसएवसाधर्म्येणेतिज्ञेयम् ॥ ३० ॥ ❁ * ❁ * ❁ * ॥
ननुसाहसिकस्यापिफलसिद्धिर्दृश्यतएवनक्रियाविवेकेनेत्यत्राह । अभीति । यःपु
मान्विधीयन्तइतिविधयःकार्यवस्तूनिवीजानीवेत्युपमितसमासः । शरदंलोक
इवेतिवाक्यगतोपमानुसारात् । तानिविधिबीजानिविवेकोवारीवविवेकवारितेन
विवेकवारिणापूर्ववत्समासः । अनुपालयन्प्रतीक्ष्यमाणःसंरक्षन्यःअभिवर्षति
सिञ्चतिसपुमान्फलंसाधननिष्पाद्योर्थःसस्यञ्च । फलंहेतुकृतेसस्यइत्युभयत्रा
प्यमरः । तच्छालिनींक्रियांकर्मलोकोजनः । लोकस्तुभुवनेजनइत्यमरः । श

रहमिवसदाधितिष्ठतिसदाक्रियाफलप्राप्तौव्यैवनकदाचिद्व्यभिचरणीयार्थः । सा
हसिकस्यकाकतालीयासिद्धिःविवेकिनस्तुनियतेतिभावः । अत्रफलशब्देनतस्य
हेतुत्वतयोरर्थयोरभेदाध्यवसायात् । श्लेषमूलातिशयोक्तिःतदनुगृहीताचोपमे
त्यनुसन्धेयम् ॥ ३१ ॥ * * * * * ॥

नियताविवेकिनःफलसिद्धिरित्युक्तंसम्प्रतितामेवसुच्चयेस्तौति । शुचीति । शुचि
सम्प्रदायशुद्धं । श्रुतंशास्त्रश्रवणजन्त्रंवपुर्भूषयतिअन्यथाश्रुतिशून्यपुरुषःशोच्य
इतिभावः । तस्यश्रुतस्यप्रशमःक्रोधोपशान्तिःअलंक्रियाभूषणम्भवति । अन्यथा
श्रुतवैफल्यादितिभावः । पराक्रमःसत्यवसरेशौर्य्यंप्रशमस्याभरणम्भवति । अ
न्यथासर्वैःपरिभूयतइतिभावः । सपराक्रमःनयापादितानीतिसम्पादिताविवेकपू

शुचिभूषयतिश्रुतंवपुःप्रशमस्तस्यभवत्यलंक्रिया । प्रश
माभरणम्पराक्रमःसनयापादितसिद्धिभूषणः ॥ ३२ ॥

र्विकेतियावत् । साचासौसिद्धिश्चसैवभूषणंयस्यसतथोक्तः अन्यथासाहसिकस्य
सिद्धेःकाकतालीयत्वेनपक्षेपराक्रमवैयर्थ्यादितिभावः । वपुषोभूष्यत्वेवात्रसिद्धेर्भू
षणत्वेवत् । उभयंमध्यमानांतुश्रुतपूर्वोत्तरपक्षयोरितिविवेकः । एवंविशिष्ट
सिद्धेरनन्यभूषितायाएवभूषणत्वोक्त्यासर्वाभरणतयास्तुतिर्गम्यते अत्रोत्तरोत्तरस्य
पूर्वपूर्वविशेषणत्वादेकावल्यलंकारः । तदुक्तं । एकावल्यांयत्रविशेषणभावम्पू
र्वम्पूर्वम्प्रतिक्रमेणैवभजन्तिपरम्परमेषालंकृतिरेकावलीकथितेति ॥ ३२ ॥ *
विमृश्यकुर्य्यादितिस्थितन्तत्रविमर्शोपायःकः इत्युक्तेशास्त्रमेवेत्याह । मतीति । म
तिभेदःकार्य्यविप्रतिपत्तिःमतिभेदस्तमइवेत्युपमितसमासः । दीपइवेत्युपमाना
नुसारात्तेनतिरोहितेऽतएवगहनेदुरवगाहेकृत्यविधौकार्य्यानुष्ठानेविवेकिनांसु

कृतःसद्भ्यस्तः अतएवपरिशुद्धो निश्चितोऽन्यथास्तु विहितःप्रमादादिदोषरहितःआ
गमःशास्त्रम्। आगमःशास्त्रमाम्नातइतिविश्वः। दीपइवार्थदर्शनंकार्य्यज्ञानंवस्तु
प्रतिभासनञ्चकुरुते॥ ३३॥ *✿*✿*✿*✿*✿*✿*✿॥

एवंविमृश्यकुर्वतोदैवादर्थनाशेऽपिनकश्चिदपराधइत्याह। स्पृहणीयेति। स्पृ
हणीयगुणैर्लोकश्लाघ्यगुणैःमहात्मभिःसज्जनैः। चरितेअनुष्ठितेवर्त्मनिआचा
रे मनोयच्छतान्निदधतांसन्मार्गेणव्यवहरतामित्यर्थः। विधिहेतुर्दैवनिमित्त
कः। विधिर्विधानेदैवेचेत्यमरः। अतएवागसांअपराधानामहेतुः। विनिपातो
ऽपिदैविकानर्थोऽपि। विनिपातोऽवपातेस्याद्दैवादिव्यसनेपिचेतिविश्वः। समुन्न

मतिभेदतमस्तिरोहितेगहनेकृत्यविधौविवेकिनाम्। सु
कृतःपरिशुद्धआगमःकुरुतेदीपइवार्थदर्शनम्॥ ३३॥
स्पृहणीयगुणैर्महात्मभिश्चरितेवर्त्मनियच्छतांमनः। वि
धिहेतुरहेतुरागसांविनिपातोऽपिसमःसमुन्नतेः॥ ३४॥

तेरभिवृद्धेःसमःतुल्यः। दैविकेपुरुषस्यानुपालम्भ्यत्वादितिभावः। यथाहका
मन्दकः। यत्तुसम्यगुपक्रान्तङ्कार्यमेतिविपर्ययम्। पुमाँस्तत्रानुपालभ्योदैवा
न्तरितपौरुषइति॥ ३४॥ ✿~✿*✿~✿*✿~✿*✿~✿॥

सम्प्रतियद्विमृश्यन्तदाह। शिवमिति। जिगीषवोजयेच्छवोनृपाःविजितक्रोध
रयाविजितक्रोधवेगाःसन्तोगरीयसींप्रभूतांआदूवितायतौं अक्षतोन्नरकालांस्वन्ता
मित्यर्थः। फलनिष्पत्तिम्फलसिद्धिंविगतव्यफलवत्वंनिश्चित्येत्यर्थः। पौरुषंपु
रुषकारंशिवमनुकूलंऔपयिकंउपायं। विनयादित्वात्स्वार्थेठक्। उपायात
त्र्यत्स्वभावन्वन्तिप्रापयन्तिपौरुषमुपायेनयोजयन्तीत्यर्थः। नानिश्चितफलंकर्म

कुर्वीतेतिभावः। यथाहकामन्दकः। निःफलंक्लेशबहुलंसन्दिग्धफलमेवच। न कर्मकुर्य्यान्मतिमान्सुदावैरानुबन्धिचेति। नयतिःप्रापणार्थेद्विकर्मकः। अत्रपौरु षस्यकर्तृस्थकर्मत्वेप्युपायस्यातथात्वात्क्रोधंविनयतइत्यादिवत्। कर्तृस्थेवाशरीरे कर्मणीत्यात्मनेपदम्भवति ॥ ३५ ॥ * * * * * * * ॥

यदुक्तंविजितक्रोधरयाइतितदावश्यकमाह। अपनेयमिति। उदेतुमभ्युदेतुमि च्छतापुरुषेणपुरःप्रथमंरोषमयंरोषादागतंमयड्वेतिमयट्तिमिरमज्ञानन्धियाबु द्ध्याकरणेनापनेयमपनोद्युम्। तथाहि। अंशुमतापिकर्त्राप्रभयातेजसाकरणे

शिवमौपयिकङ्गरीयसींफलनिष्पत्तिमदूषितायतीम्। विग
णय्यनयन्तिपौरुषंविजितक्रोधरयाजिगीषवः ॥ ३५ ॥
अपनेयमुदेतुमिच्छतातिमिरंरोषमयन्धियापुरः। अवि
भिद्यनिशाकृतन्तमःप्रभयानांशुमताप्युदीयते ॥ ६६ ॥
बलवानपिकोपजन्मनस्तमसोनाभिभवंरुणद्धियः। क्षय
पक्षइवैन्दवीःकलाःसकलाहन्तिसशक्तिसम्पदः ॥ ३७ ॥

नानिशाकृतन्तमोध्वान्तमविभिद्यनोदीयतेकिन्तुविभिद्यैवेत्यर्थः। सूर्य्यस्यापीव किमुतान्येषामित्यपिशब्दार्थः। इणोभावेलिट् ॥ ३६ ॥ * ॥
ननुदुर्बलस्यैवमस्तुबलीयसस्तुक्रोधादेवकार्य्यसिद्धिरित्यतआह। बलवानिति। बलवान्शूरोपियःकोपाज्जन्मयस्यतस्यकोपजन्मनः। अपवर्ग्यौवकुब्रीहिर्व्यधिक रणोजन्माद्युत्तरपदइतिवामनः। तमसोमोहस्यहद्योगात्कर्मणिषष्ठी अभिभव माक्रान्तिंनरुणद्धि। सन्तपः। क्षयस्यपक्षःक्षयपक्षःकृष्णपक्षःऐन्दवीःइन्दुसम्ब न्धिनीःकलाइव। कलातुषोडशोभागइत्यमरः। सकलाःशक्तिसम्पदःप्रभुमन्त्रोत्सा

हर्षं क्रियः स्त्रियोऽपि हन्ति नाशयन्ति । अन्धस्य जन्धावत्वमिव क्रोधान्धस्य लोकोत्तरमपि सामर्थ्यं व्यर्थमेवेत्यर्थः । अत्र कालस्य सर्वकारणत्वात् । क्षयपक्षस्य कलाक्षयकारित्वमस्त्येव तमसस्तु तत्कालविजृम्भणात्तथा व्यपदेशः ॥ ३७ ॥ ❁ * ❁ * ❁ ॥

विमृश्य कुर्वतः क्रियाप्रकारमाह । समेति । यः समानातिमृदुर्नत्वतितिग्मा वृत्तिर्यस्य स समवृत्तिः सन्समये सत्यवसरे मार्दवं मृदुवृत्तित्वमुपैति । तिग्मतां तीक्ष्णवृत्तित्वञ्च तनोति । स मेदिनीपतिर्विवस्वानिव ओजसा तेजसा लोकमधितिष्ठत्याक्रमति । सूर्य्येऽपि भेदेन प्राप्तकालादिना समवृत्तिरित्यादि योज्यम् ॥ ३८ ॥ ❁ ❁ ॥

उक्तान्यथाकरणेऽनिष्टमाह । क्वेति । श्रियां सम्पदां चिराय बहुकालम्परिग्रहः

समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम् । अधि
तिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः ॥ ३८ ॥
क्वचिराय परिग्रहं श्रियां क्व च दुष्टेन्द्रियवाजिवश्यता । शर
दभ्रचलाश्चलेन्द्रियैरसुरक्षा हि बहुच्छलाः श्रियः ॥ ३९ ॥

स्वायत्तीकरणं क्व इन्द्रियाण्येव वाजिन इवेत्युपमितसमासः । दुष्टानाममार्गधाविनाम् इन्द्रियवाजिनां वश्यो वशङ्गतस्तस्य भावस्तत्ता क्व । नोभयमेकत्र तिष्ठतीत्यर्थः । कुतः हि यस्मात् शरदभ्रवच्चला अस्थिराः किञ्च बहुच्छलाः बहुव्याजा बहुरन्ध्रा इति यावत् । छलन्तु स्खलिते व्याज इत्यमरः । श्रियः लक्ष्मीः । चलेन्द्रियैरजितेन्द्रियैरित्यर्थः । असुरक्षा रक्षितुमशक्याः कथञ्चित्प्राप्ता अपि श्रियो नाविनीतेषु तिष्ठन्तीत्यर्थः । वाक्यार्थहेतुकङ्काव्यलिङ्गमलङ्कारः ॥ ३९ ॥ ❁ ❁ * ❁ ❁ * ❁ ❁

क्रोधस्य दुष्टतामुक्त्वा तस्य त्यागमुपदिशति । किमिति । उपान्तरं हसः प्राप्तत्वरस्य मनसः समयोऽस्य प्राप्तः सामयिकः । समयस्तदस्य प्राप्तमिति ठक् । सनभयतो

असामयिकमप्राप्तकालं क्षोभं वितन्वता भवता धीरतया धैर्यगुणेन । मनसो निर्विकारत्वं धैर्यं सत्स्वपि हेतुष्विति रसिकाः । अधरीकृतः तिरस्कृतः प्रागिति शेषः । अपाम्पतिरपि किङ्किमर्थमुच्चकैरधिकः क्रियते । न पराजितम्पुनरुच्चकैः कुर्यादिति भावः । अत्र वितन्वतेति भीमविशेषणत्वन्न पदार्थस्योच्चैःकरणे हेतुत्वात्काव्यलिङ्गमलंकारः ॥ ४० ॥

श्रुतमिति । किञ्च । ये श्रुतं शास्त्रमधिगम्यापि शरीरजन्मनः शरीरप्रभवान् रिपून्कामक्रोधलोभमोहमदमात्सर्यादीन्न विनयन्ते न नियच्छन्ति । कर्तृस्थे चाशरीरे

किमसामयिकं वितन्वता मनसः क्षोभमुपात्तरंहसः । क्रि
यते पतिरुच्चकैरपां भवता धीरतयाऽधरीकृतः ॥ ४० ॥
श्रुतमप्यधिगम्य ये रिपून्विनयन्ते न शरीरजन्मनः । ज
नयन्त्यचिराय सम्पदामयशस्ते खलु चापलाश्रयम् ॥ ४१ ॥
अतिपातितकालसाधना स्वशरीरेन्द्रियवर्गतापिनी । ज
नवन्न भवन्तमक्षमा नयसिद्धेरपनेतुमर्हति ॥ ४२ ॥

कर्मणीत्यात्मनेपदम् । ते खल्वचिराय शीघ्रमिति सम्पदां श्रियश्चापलाश्रयमस्थैर्यनिबन्धनमयशो दुष्कीर्तिं जनयन्ति । आश्रयदोषादस्थैर्यं सम्पदान्न स्वदोषादित्यर्थः । अजितारिषड्वर्गस्य कुतः सम्पदिति भावः ॥ ४१ ॥

तथापि क्रोधात्कार्यहानिरित्याशयेनाह । अतिपातितेति । अतिपातितान्यतिक्रान्तानि कालः समयो नन्तरूपः साधनानि सहायादीनि यया सा तथोक्ता तापयतीति तापिनी । कर्तरिल्युट्टित्वान्ङीप् । स्वस्य यच्छरीरमिन्द्रियवर्गश्च तयोस्तापिनी । अक्षमा क्रोधो भवन्तं जनवत् पृथग्जनमिव । तेन तुल्यमिति वतिप्रत्ययः तेनेवार्थो न

ध्यते । तङ्किंनच्यास्वर्वविभक्तिरित्यव्ययम् । नयसिद्धेर्नयसाध्यफलादपनेतुम्पृथ
क्तेर्नार्हति । असमयक्रोधस्यात्मसन्तापातिरिक्तम्फलन्नास्तीत्यर्थः ॥ ४२ ॥ ● ॥
दुष्टःक्रोधइत्युक्तमथक्षमायागुणानाह । उपकारकमिति । आयतेरुत्तरकालस्य
भृशमत्यंतमुपकारकंस्थिरफलहेतुरित्यर्थः । भूरिणःप्रभूतस्यकर्म्मफलस्यप्रसू
यतेऽनेनेतिप्रसवःकारणम् । अपायोनभवतीत्यनपायिस्वयमविनश्यदेवद्विषां
निवर्हणंविनाशकंएवंगुणकंसाधनन्तितिक्षासमंक्षमातुल्यंनास्ति । क्षान्तिःक्षमा
तितिक्षाचेत्यमरः । तिजनिशानइतिधातोर्गुप्तिज्किद्भ्यःसन्नितिक्षमार्थेसन्प्रत्ययः
। तितिक्षासममित्यनुक्तोपमागमाऽन्यूनाश्चार्थीलुप्तोपमाभृशमनपायिशब्दैःसाध

उपकारकमायतेर्भृशम्प्रसवःकर्मफलस्यभूरिणः । अन
पायिनिवर्हणंद्विषांनतितिक्षासममस्तिसाधनम् ॥ ४३ ॥
प्रणतिप्रवणान्विहायनःसहजप्रेमनिवद्धचेतसः । प्र
णमन्तिसदासुयोधनम्प्रथममानभृतांनवृष्णयः ॥ ४४ ॥

नान्तरवैलक्षण्यात्व्यतिरेकश्चव्यज्यते । भेदप्राधान्येउपमानादुपमेयतुल्याधिक्ये
विपर्य्ययेव्यतिरेकः ॥ ४३ ॥ * ० * ० * ० * ० * ० * ० * ॥
ननुतितिक्षायाःकालक्षेपेदुर्योधनःसर्वान्राज्ञोवशीकुर्यादित्यत्राह । प्रणतीति
। सहजस्नेहेनाकृत्रिमप्रेम्णानिबद्धचेतसोऽस्मासुगाढंलग्नचित्ताः । सुयोध
नेतुनतथेतिभावः । किन्त्वमानभृतांअहङ्कारिणाम्प्रथमंअग्रेसराःसुयोधनस्तुनत
थेतिभावः । वृष्णयःयादवाः । प्रणतिप्रवणान्प्रणामपरान्सुयोधनस्तुनतथेति
भावः । नोस्मान्विहायसुयोधनंसदानप्रणमन्तिननमन्तिअनुसरन्ति । कि
न्त्वात्म्येकात्म्यध्यन्त्येवेत्यर्थः । सतियादवविग्रहेनकिञ्चिदस्माकमसाध्यमभवे

दितिभावः। अनेकपदार्थहेतुकत्वात्काव्यलिङ्गमलङ्कारः॥ ४४ ॥ * ० * ० * ॥
किञ्चकारणान्तरमाह। सुहृदइति। किञ्चैषांवृष्णीनांयेसहजाःसहजाताः।
सहजामातृपितृपक्षाइत्यर्थः। अन्येष्वपिदृश्यतइतिडप्रत्ययः। सुहृदोमित्रा
णि। तथाइतरेकृत्रिमसुहृदश्चएषांमतंवृष्णिपक्षंनलङ्घयन्तिनातिक्रामन्ति
। तेद्वयेपिनृपाःदुर्योधनोपजीविनोपीतिभावः। आत्मसिद्धयेआत्मजीवनार्थं
धृतराष्ट्रात्मजंदुर्योधनंविनयादानुकूल्यादिवयापयन्तिकालङ्गमयन्ति। का
र्यकालेहिवृष्णिपक्षप्रवेशिनइत्यर्थः। यातेर्ण्यन्ताल्लट्। अर्त्तिह्रीत्यादिनापुगा
गमः ॥ ४५ ॥ * ० * ० * ० * ० * ० * ० * ० * ० * ॥

सुहृदःसहजास्तथेतरेमतमेषांनविलङ्घयन्तिये। विन
यादिवयापयन्तितेधृतराष्ट्रात्मजमात्मसिद्धये ॥ ४५ ॥
अभियोगइमान्महीभुजोभवतातस्यततःकृतावधेः। प्रवि
घाटयितासमुत्पतन्हरिदश्वःकमलाकरानिव ॥ ४६ ॥

किन्तुनायमभियोगकालइत्याशयेनाह। अभियोगइति। कृतावधेःपरिभावित
कालस्य। अवधिस्त्ववसानेस्यात्सीम्निकालेबिलेपिचेतिविश्वः। तस्यसुयोधनस्य
कर्मणिषष्ठीभवताकृतः। अवधिरितिशेषः। अभियोगःआहवःअभिमानइतिया
वत्। अभियोगस्तुस्पर्धेस्यादाहवपराभवयोरितिविश्वः। इमान्पूर्वोक्तान्महीभुजो
हरिदश्वः। उष्णरश्मिःकमलाकरानिवसमुत्पतन्नुद्यन्नेवप्रविघाटयिताभेत्स्यति।
घटेश्चौरादिकाल्लृट्। मित्वादिकस्यतुमितांह्रस्वइतिह्रस्वत्वंस्यात् ॥ ४६ ॥ * ॥
अथनयेवृष्णिपक्षास्तान्प्रत्याह। उपजापेति। मदोद्धतःसदुर्योधनोनृपतीन
न्यान्नृपान्विलंघयन्मदादवमानयन्सहन्तइतिसहाःपचाद्यच्। उपजापस

स्थानभेद[illegible]स्थाने। भेदोपजाप[illegible]इत्यमरः। विधाताविधास्यति। विपूर्वस्यदधाते
र्लुट्[illegible]अभिमानिनोजनःसुभेद्याइतिभावः। नचतेउपेक्ष्याइत्याह। प्राकृतोपिजनः
। अधःक्रियामपमानंनसहतेलोकाधिकधामलोकोत्तरप्रतापंराजकंराजसमूहः।
गोत्रोक्षेत्यादिनावुञ्प्रत्ययः। किमुसहतेऽपितुनेतिकिमुवक्तव्यमित्यर्थः। तथा
च। कृत्स्नमेवराजमण्डलमस्मानेवावलम्बिष्यतेइतिभावः॥ ४७ ॥ ❁ * ❁ ॥
ननुसखीनिवेत्यादिवनेचरोक्त्यातस्यमदसम्भावनापिकथमित्यत्राह। असमा
पितेति। असमापितकृत्यसम्पदामकृतकृत्यानांकुरः। अभिमानशालिनामहंका

उपजापसहान्विलङ्घयन्सविधातान्नृपतीन्मदोद्धतः। स
हतेनजनोप्यधःक्रियांकिमुलोकाधिकधामराजकम्॥ ४७ ॥
असमापितकृत्यसम्पदांहतवेगंविनयेनतावता। प्रभव
न्त्यभिमानशालिनांमदमुत्तम्भयितुंविभूतयः॥ ४८ ॥
मदमानसमुद्धतंनृपंनवियुङ्क्तेनियमेनमूढता। अतिमू
ढउदस्यतेनयान्नयहीनादपरज्यतेजनः॥ ४९ ॥

रिणांविभूतयःसम्पदएव। तावता[illegible]स्वल्पेनविनयेनकार्य्यवशा[illegible]रोपितेनेतिशेषः
। हतवेगम्प्रतिबद्धवेगन्ननुस्वरूपतोहतंमदमुत्तम्भयितुंवर्द्धयितुम्प्रभवन्तिसर्वे
थादुर्जनसम्पदोविकारयन्तीतिभावः॥ ४८ ॥ ❁ * ~ * ❁ * ~ * ❁ ॥
अथमदस्यानर्थहेतुतांयुग्मेनाह। मदेति। अपरागेतिच। मदमानाभ्यांदर्पाहं
काराभ्यांसमुद्धतंनृपंमूढताऽकार्य्यपरिज्ञानञ्चनियमेनावश्यन्नवियुङ्क्तेनविमुञ्चति
। अतिमूढोनयान्नीतिमार्गादुदस्यतेउत्क्षिप्यते। कर्मकर्त्तरिलट्। नयहीनाज्ज
नोलोकोपरज्यतेऽपरक्तोभवति। स्वरितत्वादात्मनेपदम्॥ ४९ ॥ ❁ * ❁ * ॥

अपरागेति । अपरागोऽप्रीतिर्द्वेष इतियावत् । समीरणइवतेनेरितश्चोदितः । अ
तएवक्रमेणशीर्णाशीर्णीभूता आकुलाचलाचमूलसन्ततिःप्रकृत्यादिस्वजनवर्गो यि
स्यासंघातस्त्वयस्यसतथोक्तः । मूलंवंशोत्तनेस्वीयेमित्रपातारान्तिकादिष्विति वैज
यन्ती । रिपुर्महानपि तरुर्वृक्ष इव सहिष्णुना क्षमावतां उन्मूलयितुमुद्धर्तुं सुक
रः सुसाध्यः सुकरोन्मूलन इत्यर्थः । अत्र मदादेः पूर्वपूर्वस्य तरोत्तरम्प्रतिकारण
त्वात्कारणमालातरुवदित्युपमा चेति द्वयोः संसृष्टिः ॥ ५० ॥ * * ॥
नन्वन्तर्भेदमात्रेण कथं सुसाध्यस्तत्राह । अणुरिति । अणुरल्पोप्यन्तःप्रकृतिप्रको

अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसन्ततिः । सुक
रस्तरुवत्सहिष्णुना रिपुरुन्मूलयितुम्महानपि ॥ ५० ॥
अणुरप्युपहन्ति विग्रहः प्रभुमन्तःप्रकृतिप्रकोपजः । अखि
लं हि हिनस्ति भूधरन्तरुशाखान्तनिघर्षजोनलः ॥ ५१ ॥
मतिमान्विनयप्रमाथिनः समुपेक्षेत समुन्नतिं द्विषः । सुज
यः खलु तादृगन्तरे विपदन्ता ह्यविनीतसम्पदः ॥ ५२ ॥

पजोन्तरङ्गामात्याद्यपरागसमुत्थः । प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे । छ
न्दःकारणगुह्योश्चामात्यादिकेष्वपीति वैजयन्ती । विग्रहो वैरम्प्रभुमुपहन्ति
नाशयति । अत्र दृष्टान्तमाह । तरुशाखान्तानांनिघर्षो घर्षणन्तज्जोऽनलोऽ
ग्निः । भूधरङ्गिरिमखिलं साकल्येन हिनस्ति हि दहतीत्यर्थः । अत्रोपमानोपमेय
समानधर्माणां बिम्बतया निर्देशेन दृष्टान्तालङ्कारः ॥ ५१ ॥ * * ॥
तथापि कथम्वर्द्धमानं शत्रुमुपेक्षेत इत्याशंक्य दुर्विनीतत्वादित्याह । मतिमानिति
। मतिमान्प्राज्ञो विनयम्प्रमथ्नाति त्यजतीति विनयप्रमाथिनो दुर्विनीतस्य द्विषः समुन्न

तिंवृद्धिं [illegible]क्षत । उपेक्षायां [illegible]माह । तादृगविनीतान्तरेकश्चिद्रन्ध्रेषु जयः सु
[illegible]नानुशक्यः । खलु हि यस्माद्विनीतसम्पदः विपदन्ताः अनयोदर्काः ॥ ५२ ॥ *
कथं दुर्विनीतस्य शत्रोः सुजयत्वमित्याशंक्य भेदजर्जरितत्वादित्याह । लघ्विति
। लघुवृत्तितया खलस्य दुर्वृत्तरूपतया वहिर्मित्रादिजनपदेषु अन्तरमात्यादिषु च
भिदां भेदं गतं षिद्भिदादिभ्योऽङिति अङ् प्रत्ययः । नृपस्य मण्डलं राष्ट्रमनन्तरः
सन्निहितो जिगीषुरापगारयो नदीवेगः । शिथिलमन्तर्भेदजर्जरं कूलमिवाभिभू
यानाग्यहरति ॥ ५३ ॥ * * * * ॥

लघुवृत्तितया भिदां गतं बहिरन्तश्च नृपस्य मण्डलम् । अ
भिभूय हरत्यनन्तरः शिथिलं कूलमिवापगारयः ॥ ५३ ॥
अनुशासतमित्यनाकुलं नयवर्त्माकुलमर्जुनाग्रजम् । स्वय
मर्थ इवाभिवाञ्छितस्तमभीयाय पराशरात्मजः ॥ ५४ ॥
मधुरैरवशानि लम्भयन्नपि तिर्यञ्चि शमं निरीक्षितैः । प
रितः पटु बिभ्रदेनसां दहनं धाम विलोकनक्षमम् ॥ ५५ ॥

अन्विति । इतीत्थमनाकुलं अरि[illegible]रणात्क्षुभितमर्जुनाग्रजं भीमसेनं नयव
र्त्मनीतिमार्गमनाकुलमसंकीर्णं यथा तथा अनुशासतं उपदिशन्तं जक्षित्यादयः ष
डित्यभ्यस्तान्नुमभावः । तं युधिष्ठिरं पराशरात्मजो वेदव्यासः । स्वयमभिवाञ्छि
तोऽर्थ इव साक्षान्मनोरथ इवेत्युत्प्रेक्षा । अभीयाय प्राप्तः ॥ ५४ ॥ ○ ○ ○ ○ ॥
अथ युग्मेनाह । मधुरैरिति । मधुरैः शान्तैर्निरीक्षितैरवलोकनैः । नपुंसके भावे
क्तः । न विद्यते वशं आयत्तत्वं येषां तानि अवशानि प्रतिकूलानि । वश आयत्ततायाम् इ
ति विश्वः । तिर्यञ्चि मृगपक्ष्यादीनि शमं शान्तिं लम्भयन् प्रापयन् । लभेश्चेतिनु

मागमः। गत्यर्थेत्यादिनाद्विकर्मकत्वम्परितःपटुं उज्ज्वलंसुन्दरंस्नाम्। दहतिअनेने तिदहनंनिवर्त्तकन्तथापिविलोकनक्षमन्दर्शनीयंवह्न्यादिविलक्षणमितिभावः।
धामतेजोविभ्रत्॥ ५५॥ * ० * ० * ० * ० * ० * ० * ० * ०॥
सहसेति। पुनःसहसोपगतःअकस्मादागतःतपसांसूतिःप्रभवःआपदांअसूतिः अप्रभवःनिवर्त्तकइतियावत्। समुनिर्व्यासःवपुष्मानदेहधारीपुण्यसञ्चयःपुण्य राशिरिवेत्युत्प्रेक्षाजगतीभुजाराज्ञा सविस्मयन्ददृशेदृष्टः॥ ५६॥ ० * ० *॥
अथेति। अथदर्शनानन्तरम्। उच्चकैरुन्नतात्परार्घ्याच्छ्रेष्ठात्। अर्घ्यांत्वपरावरा

सहसोपगतःसविस्मयन्तपसांसूतिरसूतिरापदाम्। द
दृशेजगतीभुजामुनिस्सवपुष्मानिवपुण्यसञ्चयः॥ ५६॥
अथोच्चकैरासनतःपरार्घ्यादुद्यन्सधूतारुणवल्कलाग्रः। रराज
कीर्णाकपिशांशुजालःशृङ्गात्सुमेरोरिवतिग्मरश्मिः॥ ५७॥
अवहितहृदयोविधायसोर्हामृषिवदृषिप्रवरेगुरूपदिष्टाम्।
तदनुमतमलंचकारपश्चात्प्रशमइवश्रुतमासनन्नरेन्द्रः॥ ५८॥

श्चमोन्नमपूर्वाच्चेतियत्प्रत्ययः। आसनतःविष्टरासनादुद्यन्नुत्तिष्ठन्अतएवधूतानि कम्पितान्यरुणानिवल्कलाग्राणियस्यसतथोक्तः। सम्टपःकीर्णविसृतमाकपिश मंशुजालंयस्यसतथोक्तःसुमेरोःशृङ्गादुद्यन्तिग्मरश्मिरिवरराज॥ ५७॥ ०॥
अवहितेति। सनरेन्द्रोऽवहितहृदयोऽप्रमत्तचित्तःसन्। चित्तन्तुचेतोहृदयंस्वा न्तंहृन्मानसंमनइत्यमरः। ऋषिप्रवरेमुनिश्रेष्ठे। ऋषिवदृष्यर्हाम्। अर्हत्यर्थे वतिप्रत्ययः। गुरूपदिष्टांशास्त्रीयामित्यर्थः। अर्हाम्पूजां। गुरोश्चहलइत्यकार प्रत्ययः। विधायपश्चादनन्तरन्तदनुमतन्तेनानुज्ञातमासनम्प्रशमःशान्तिःश्रु

तंशास्त्रकृ[illegible]णामिदानञ्चकार। उक्तञ्च पूर्वम्। प्रशमस्तस्य भवत्यलंक्रियेति। मु-
न्याज्ञयोपविष्टवानित्यर्थः ॥ ५८ ॥ ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ ॥
व्यक्तेति। व्यक्तोदितैःपुष्टोद्गतैःस्मितमयूखैर्विभासितावोष्ठौयस्यसतथोक्तः। वि
कीर्णधाम्नोविस्तृततेजसोमुनेरभिमुखंतिष्ठन्सन्नृपः इद्धंसमृद्धन्दीप्तमितियाव
त्। अंशुजालन्तन्वन्तंगुरुंगीष्पतिम्। गुरूगीष्पतिपित्राद्याविव्यमरः। अभितः
परितइत्यादिनाद्वितीया। अभितोऽभिमुखंतिष्ठतः इतिशेषः। सकलस्यसम्पूर्ण

व्यक्तोदितस्मितमयूखविभासितोष्ठस्तिष्ठन्मुनेरभिमुखंसविकीर्णधाम्नः।
तन्वन्तमिद्धमभितोगुरुमंशुजालंलक्ष्मीमुवाहसकलस्यशशाङ्कमूर्तेः ॥ ५९ ॥
॥ इतिश्रीभारविकृतौकिरातार्जुनीयेमहाकाव्येद्वितीयःसर्गः ॥ २ ॥

स्यशशांकामूर्त्तिर्यस्यतस्येन्दोर्लक्ष्मीमुवाहवहतिस्म। अत्रोपमेयस्यराज्ञःउपमा
नेन्दुधर्म्मेण लक्ष्याःसाक्षात्सम्बन्धासम्भवात्सदृशीं लक्ष्मीमिवेतिप्रतिबिम्बकर
णाक्षेपादसम्भवद्वस्तुसम्बन्धात्पदार्थवृत्तिर्निदर्शनालंकारः। तदुक्तम्प्रतिबिम्बस्य
करणंसम्भवतियत्रवस्तुयोगेनागम्यमसम्भवितानिदर्शनाभिधानिमतेति ॥ ५९ ॥
इतिश्रीमहोपाध्यायमल्लिनाथसूरिविरचितायांकिरातार्जुनीयव्याख्यायांघण्टा
पथसमाख्यायांद्वितीयःसर्गः ॥ २ ॥ ❁ * ❁ * ❁ * ❁ * ❁ ॥

अथ त्रिभिर्मुनिं विशिनष्टि । चतुर्भिः कलापकमाह । तदुक्तम् । द्वाभ्यां युग्ममिति प्रो
क्तं त्रिभिः श्लोकैर्विशेषकम् । कालापकं चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृतमिति । तत
इति । ततस्तपवेशनानन्तरं शरच्चन्द्रकराभिरामैराह्लादकैरित्यर्थः । उत्सर्पिभि
रूर्ध्वप्रसारिभिः अंशुजालैः प्रभापटलैः प्रांशुमुन्नतमिवस्थितमित्युत्प्रेक्षा । पुनः आ
नीलरुचं कृष्णवर्णम्पिशङ्गीः पिङ्गलवर्णाः गौरादित्वात् ङीष् । जटाः बिभ्राणन्धारय
न्तमतएव तडित्वन्तं विद्युद्युक्तमम्बुवाहमिवस्थितमित्युत्प्रेक्षा । धर्मात्मजो युधिष्ठि
रः एतादृशं मुनिमाबभाषे इति चतुर्थश्लोकेनान्वयः ॥ १ ॥ * ❁ * ❁ * ❁ ॥
प्रसादेति । पुनः समग्रां सम्पूर्णां प्रसादः सौम्यता तस्य लक्ष्मीं सम्पदन्दधतम् । अ

ततः शरच्चन्द्रकराभिरामैरुत्सर्पिभिः प्रांशुमिवांशुजालैः । बिभ्रा
णमानीलरुचम्पिशङ्गीर्जटास्तडित्वन्तमिवाम्बुवाहम् ॥ १ ॥
प्रसादलक्ष्मीन्दधतं समग्रां वपुःप्रकर्षेण जनातिगेन । प्रस
ह्य चेतःसु समासजन्तमसंस्तुतानामपि भावमार्द्रम् ॥ २ ॥

तएव जनमतिगच्छतीति जनातिगेन लोकातिशयिना अन्यत्रापि दृश्यत इति डप्रत्य
यः वपुःप्रकर्षेण आकारसम्पदा असंस्तुतानाम् अपरिचितानामपिध्यासीयमित्यजा
नतामित्यर्थः । संस्तवः स्यात्परिचय इत्यमरः । चेतःसु चित्तेष्वार्द्रम्भावं स्नेहार्द्रभा
वमभिप्रायम्प्रसह्य बलात् समासजन्तं लगयन्तमितियावत् । दंशसञ्जस्वञ्जां श
पीत्युपधालोपः । प्रसन्नाकारेषु सर्वोपि विश्वसितीति भावः ॥ २ ॥ * ❁ ~ ❁ * ॥
अन्विति । पुनरनुद्धताकारतया शान्ताकारत्वेन लिङ्गेनान्तःकरणस्य वृत्तिं विविक्ता
म्पूतां शान्तामितियावत् । विविक्तौ पूतविजनावित्यमरः । तन्वन्तम्प्रकटयन्तमाकृ
तिरेवास्य चित्तशुद्धिं कथयतीत्यर्थः । पुनः माधुर्ये निसर्गसौम्यतां विस्रम्भो विश्वासः

। समौ विस्रम्भविश्वासावित्यमरः । तयोर्विशेषमतिशयम्भजतीति तथोक्तेनेक्षिते
न दर्शनेनैव कृताउपसम्भाषा सम्भाषणंयेन तमिवेत्युत्प्रेक्षा दृष्टिविशेषेणैवोपस
म्भाषणमिव स्थितमित्यर्थः । काशिकायांउपसम्भाषणंउपसान्त्वनमितिभासना
दिसूत्रेण ॥ ३ ॥ ✿ ✿ ✿ * ✿ ✿ * ✿ ✿ ✿ ✿ ॥

धर्म्मेति । पुनःधर्म्मंनिबध्नन्तीति धर्म्मनिबन्धिनीनामग्निहोत्रादिधर्म्मप्रतिपादिका
नामेनःप्रणुदाम घच्छिदांक्विप् श्रुतीनांवेदानां । श्रुतिःस्त्री वेद आम्नाय इत्यमरः
। प्रसूतिम्प्रभवं सुखेनोपविष्टं मुनिन्तदभ्यागमने तस्य मुनेरागमने हेतुङ्कारण

अनुद्धताकारतया विविक्तान्तन्वन्तमन्तःकरणस्य वृत्तिम् । माधु
र्य्यविस्रम्भविशेषभाजा कृतोपसम्भाषमिवेक्षितेन ॥ ३ ॥ ध
र्म्मात्मजो धर्म्मनिबन्धिनीनाम्प्रसूतिमेनःप्रणुदं श्रुतीनाम् । हेतु
न्तदभ्यागमने परीप्सुः सुखोपविष्टं मुनिमाबभाषे ॥ ४ ॥ चतु
र्भिःकलापम् ॥ अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्द्धूतरजाः सवि
त्री । तुल्याभवद्दर्शनसंपदेषा वृष्टेर्दिवो वीतवलाहकायाः ॥ ५ ॥

म्परीप्सुर्जिज्ञासुः आप्नोतेः सन्नन्तादुप्रत्ययः । आप्ज्ञधामादितीकारः । अत्र लोपो
भ्यासस्येत्यभ्यासलोपः आबभाषेऽवाच ॥ ४ ॥ * ✿ * ✿ * ✿ * ✿ * ✿ ॥

अनाप्तेति । अनाप्तपुण्योपचयैरकृतपुण्यसंचयैर्दुरापादुर्लभा फलस्य सवित्री श्रे
यस्करीत्यर्थः । निर्द्धूतरजाः हतरजोगुणा । एकत्र रजो धूलिरन्यत्र गुणः । र
जो रजोगुणे धूलौ परागार्त्तवयोरपीति विश्वः । एषा भवद्दर्शनसम्पत्सम्पत्तिर्लाभ
इति यावत्सम्पदादिभ्यः क्विपो भावार्थत्वात् । वीतवलाहकायागतमेघाया दिवः आ
काशस्य सम्बन्धिन्याः वृष्टेस्तुल्येत्युपमालङ्कारः । अनभ्रवृष्टिवदतर्कितोपपन्न

पदर्शनंसर्वथाकस्यचिच्छ्रेयसोनिदानमित्यर्थः । वारिवहतीतिवलाहकःपृषो दरादित्वात्साधुः ॥ ५ ॥ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ *१३ * ॥

अद्येति । अद्यक्रतूनांक्रियाःअनुष्ठानानिकामान्दुहन्तीतिकामदुघाःफलदा इत्यर्थः । दुहेःकप्घश्चेतिकप्प्रत्ययःघादेशश्च । सम्प्रत्यद्यभूमिदेवाब्राह्मणाः । द्विजात्यग्रजन्मभूदेववाडवाः । विप्रश्चब्राह्मणइत्यमरः । सत्याशिषोजाताःब्राह्म णाशिषोऽद्यफलिताइत्यर्थः । यद्यतःकारणात्त्वय्यागतेसतित्वदागमनेननिमि त्तेनेत्यर्थः । अस्मिअहमित्यर्थाव्ययम् । अस्मीत्यस्मदर्थानुवादेत्वमर्थेपीतिगणव्या ख्याने । दासेकृतागसिभवत्युचितःप्रभूणाम्पादप्रहारइतिसुन्दरिनास्मिदूयेइ

अद्यक्रियाःकामदुघाःक्रतूनांसत्याशिषःसम्प्रतिभूमिदेवाः । आ
संहृतेरस्मिजगत्सुजातस्त्वय्यागतेयद्बहुमानपात्रम् ॥ ६ ॥
श्रियंविकर्षत्यपहन्त्यघानिश्रेयःपरिस्नौतितनोतिकीर्तिम् ।
सन्दर्शनंलोकगुरोरमोघन्तवात्मयोनेरिवकिन्नधत्ते ॥ ७ ॥

तिप्रयोगात् । आसंहृतेरासंसारात् । आसंसारमित्यर्थः । अभिविधावाङ्विकल्पा दसमासःजगत्सुबहुमानपात्रम्बहुयोग्यताभाजनञ्जातः । सकलसत्कर्मफलभूत त्वदागमनंयेनमेजगन्मान्यतेतिभावः ॥ ६ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ॥

श्रियमिति । आत्मयोनेर्ब्रह्मणइवलोकगुरोस्तवअमोघमविफलंसन्दर्शनंश्रियंवि कर्षतिआकृष्यददाति । अघानिदुःखान्यपहन्ति । अंहोदुःखव्यसनेष्वघमित्य मरः । श्रेयःपुरुषार्थम्परिस्नौतिस्रवतिधातूनामनेकार्थत्वात्परिस्नौतीतिपाठे सएवार्थः । कीर्तिन्तनोति । किंबहुनाकिन्नधत्तेकिञ्चिन्नकरोतिसर्वङ्करोतीत्यर्थः ॥ ७ ॥ * ❁ ❁ * ❁ ❁ * ❁ ❁ * ❁ ❁ * ❁ ❁ * ॥

श्च्योतदिति। हेभगवन्श्च्योतन्मयूखेसुधास्राविकरेहिमद्युताविन्दावपिविषयेन निर्वृतंश्वनिर्वृतम्। नञर्थस्यनञ्शब्दस्यसुप्सुपेतिसमासः मेचक्षुस्तत्सन्निधौनिर्वृतिंसुखमेति। तथाचेतश्चसमुज्झितज्ञातिवियोगखेदन्त्यक्तबन्धुविरहदुःखंसमुच्छ्वसतीवअनुरोधेनप्राणितीवेत्युत्प्रेक्षा। पूर्वार्द्धेतुनिकारणेसत्यपिइन्दावनिर्वृतिकथनाद्विशेषोक्तिः। तदुक्तम्। तत्सामग्र्यामनिवृत्तिर्विशेषोक्तिर्निगद्यतइति॥ ८ ॥*●*●*●*●*●*●*●*●*●*॥

निरास्पदमिति। प्रश्नकुतूहलित्वंनिरास्पदं आगमनप्रयोजनप्रश्नोनिरास्पदइत्यर्थः। आस्पदंप्रतिष्ठायामितिनिपातः। प्रश्नानवकाशेहेतुमाह। निःस्पृहाणांयुष्मा

श्च्योतन्मयूखेपिहिमद्युतौमेननिर्वृतंनिर्वृतिमेतिचक्षुः। समु
ज्झितज्ञातिवियोगखेदन्त्वत्संनिधावुच्छ्वसतीवचेतः॥ ८ ॥
निरास्पदम्प्रश्नकुतूहलित्वमस्मास्वधीनङ्किमुनिःस्पृहाणाम्।
तथापिकल्याणकरीङ्गिरन्तेमांश्रोतुमिच्छामुखरीकरोति॥ ९ ॥

दृशामित्यर्थः। अस्मास्वधीनमायत्तङ्किमुनकिञ्चिदस्मत्तोलभ्यमित्यर्थः। आधारत्वविवक्षायांसप्तमी। तथापिकल्याणकरीमस्मदिष्टैकहेतुमित्यर्थः। निस्पृहवृत्तेःपारार्थ्यादितिभावः। कृञोहेत्विति टच्प्रत्ययेङीप्। अतस्तेगिरंश्रोतुमिच्छामांमुखंवागस्यास्तीतिमुखरोनिरन्तरभाषी। मुखकुञ्जेभ्योरोवक्तव्यइतिरः। दुर्मुखेमुखरावद्धमुखावित्यमरः। ततश्चिप्रत्ययःमुखरीकरोतिव्यापारयतीत्यर्थः। निःस्पृहस्यापितेवाक्यमस्मदिष्टकरत्वाच्छ्रोतव्यमितिभावः॥ ९ ॥*●—●*॥

इतीति। इतीत्थमुक्तिविशेषरम्यमुक्तिवैचित्र्यचारुयथातथोक्तवान्। उदारचेतामहामनानरेन्द्रोद्वैपायनेनव्यासेनद्वीपमयनंस्थानञ्जन्मभूमिर्यस्यसद्वीपाय

नःसएवद्वैपायनःप्रज्ञादिभ्यःस्वार्थेऽण्प्रत्ययः । नापत्यार्थेनडादिभ्यःफक्कृतेष्वेव पाठात्बाधितार्थत्वाच्च । जयोपपत्तौमनःसमाधायजयसिद्धिमपेक्ष्येत्यर्थः । इति वक्ष्यमाणप्रकारांमुदारामर्थवतीङ्गिरमभिदधेउक्तःदुहादित्वादप्रधानेकर्मणिलिट् । प्रधानकर्मण्याख्येयेलादीनाहुर्द्विकर्मणा । अप्रधानेदुहादीनांण्यन्तेकर्तुश्च कर्मणइतिवचनात् ॥ १० ॥ * ❂ * ❂ * ❂ * ❂ * ❂ * ❂ * ❂ * ॥

आदौतावत्तस्यमाध्यस्थ्यतामङ्गदोषंयुग्मेनपरिहरति । चिकीर्षतामिति । अलघ्वींगुर्वींवेतोगुणवचनादितिङीप्यशोवतंसाङ्कीर्तिभूषणांउभयत्रचइहचामु

इत्युक्तवानुक्तिविशेषरम्यंमनःसमाधायजयोपपत्तौ । उदार
चेतागिरमित्युदारांद्वैपायनेनाभिदधेनरेन्द्रः ॥ १० ॥ चिकी
र्षताञ्जन्मवतामलघ्वीयशोवतंसामुभयत्रभूतिम् । अभ्यर्हिता
बन्धुषुतुल्यरूपावृत्तिर्विशेषेणतपोधनानाम् ॥ ११ ॥ तथापि
निघ्नंनृपतावकीनैःप्रह्लादनंमेहृदयंगुणौघैः । वीतस्पृहाणा
मपिमुक्तिभाजाम्भवन्तिभव्येषुहिपक्षपाताः ॥ १२ ॥ युग्मम् ॥

त्रचभूतिंश्रेयश्चिकीर्षतांसञ्चेतुंसंग्रहीतुमिच्छतांचिनोतेस्सन्नन्ताच्छतृप्रत्ययः । जन्मवतांशरीरिणाम्बन्धुषुविषयेतुल्यरूपाएकविधावृत्तिर्व्यवहारोऽभ्यर्हितोउचिता । तपोधनानान्तस्मात्सदृशांविशेषेणनियमेनाभ्यर्हिता ॥ ११ ॥ ❂ ❂ ॥

तथापीति । तथापितुल्यवृत्तौचिकीर्षितेपिहेनृपतावकीनैस्त्वदीयैःयुष्मदस्मदोरन्यतरस्यांखञ्चेतिखञ्प्रत्ययः । तवकममकावेकवचनइतितवकादेशः गुणौघैःप्रह्लादनमावर्ज्जितंमेहृदयन्निघ्नंवशायत्तम् । अधीनोनिघ्नआयत्तइत्यमरः । ननुनिःस्पृहस्यकोयम्पक्षपातइत्यत्राह । वीतेति । वीतस्पृहाणांविरक्तानांमुक्तिभाजांमुमु

क्षूणामपीत्यर्थः। भवन्तीतिभाव्याःसाधवःभव्यगेयेत्यादिनाकर्त्तरिनिपातः। तेषु
पक्षपातःस्नेहाभवन्तिनतुसाध्वनुग्रहोमहतांमाध्यस्थ्यभङ्गकृदितिभावः॥ १२॥
अथतत्पक्षगुणवत्तांप्रकटयितुंधृतराष्ट्रस्यदुश्चेष्टामुद्घाटयति। सुताइति।
यूयंतस्यराज्ञोसुतानकिमुधृतराष्ट्रस्यपुत्रानकिमुसुताएवेत्यर्थः। गुणैःशान्तिदा
नदाक्षिण्यादिभिःसुयोधनन्नातीतानातिक्रान्तावाअतीताएवेत्यर्थःकर्त्तरिक्तः। अ
सुतत्वमगुणत्वञ्चत्यागेहेतुःयुष्मासुनास्तीत्यर्थः। उपालम्भकारणमाह। य
इति। यःधृतराष्ट्रोवोयुष्मान्वृथानिष्कारणमेवत्यक्तवान्यदिवयंसुताःगुणाधि
काश्चतर्हिकथमत्याक्षीत्तत्राह। बलादिति। सविषयाभिलाषोभोगतृष्णाबलाद्ब

सुतानयूयंकिमुतस्यराज्ञःसुयोधनंवानगुणैरतीताः। यस्त्य
क्तवान्वःसवृथाबलाद्वामोहंविधत्तेविषयाभिलाषः॥ १३॥
जहातुनैनङ्कथमर्थसिद्धिःसंशय्यकर्णादिषुतिष्ठतेयः। असा
धुयोगाहिजयान्तरायाःप्रमाथिनीनांविपदाम्पदानि॥ १४॥

लात्कारादिव। वास्याद्विकल्पोपमयोरिवार्थेपिसमुच्चयेइतिविश्वः। मोहमविवेकं
विधत्तेविषयाभिलाषातिरिक्तोनकश्चिद्युष्मत्त्यागहेतुरस्तीत्यर्थः। अत्रकार्यकारण
समर्थनरूपोऽर्थान्तरन्यासः॥ १३॥ ॥
अथराज्ञउत्साहवर्द्धनायशत्रोर्हानिंसूचयति। जहात्विति। एनंधृतराष्ट्रमर्थ
सिद्धिःकथंनजहातुजह्यादेवेत्यर्थः। प्रैषातिसर्गप्राप्तकालेषुकृत्याश्चेतिप्राप्तकाले
लोट्अस्यहानिकालःप्राप्तइत्यर्थः। कुतःयोधृतराष्ट्रःसंशय्यसन्दिह्यकर्णादिषुति
ष्ठतेकर्णादीन्दुर्मन्त्रिणःसन्दिग्धार्थनिर्णेतृत्वेनावलम्बतइत्यर्थः। प्रकाशनस्थेया
ख्ययोश्चेतिस्थेयाख्यायामात्मनेपदम्प्रकाशनस्थेयाख्ययोश्चेतितङ्तिष्ठतेस्मिन्नितिस्थे

योविवादपदनिर्णेता । तथाहि असाधुयोगात् दुर्जनसंसर्गात् जयान्तरायाः जयवि
घातकाः । किंच प्रमाथिनीनाम् उन्मूलनशीलानां विपदाम् पदानि स्थानानि । पदं
व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुष्वित्यमरः । त्वं केवलं जयपातिनः विघ्नानर्थका
रिणश्छेत्यर्थः । धृतराष्ट्रोऽपि दुर्जनविधेयत्वाद्धिनस्त्येवेति भावः ॥ १४ ॥ ✿✿ ॥
एवं भ्रातुरनर्थं सूचयित्वा राज्ञोऽर्थसिद्धिं सूचयति । पथ्य इति । रिपूणां समितौ
सभायां । सभासमितिसंसद इत्यमरः । पथ्यच्युतायां मार्गभ्रष्टायां न्यायानोदुः
शासनस्य स्त्रीग्रहणसाहसमङ्गीकृतवत्यामित्यर्थः । चिराय धर्म्यां धर्मादनपेतां ध
र्मपथ्यर्थन्यायादनपेत इति यत्प्रत्ययः । धुरं भारं दधानेन त्वयापि धर्मादचल

पथ्यच्युतायां समितौ रिपूणां धर्म्यां दधानेन धुरं चिराय । त्व
या विपत्स्वप्यविपत्तिरम्यमाविष्कृतं प्रेम परं गुणेषु ॥ १५ ॥
विधाय विध्वंसमनात्मनीनं शमैकवृत्तेर्भवतश्छलेन । प्रका
शितत्वन्मतिशीलसाराः कृतोपकारा इव विद्विषस्ते ॥ १६ ॥

तेत्यर्थः । त्वया विपत्स्वपि अविपत्तिः अविनाशित्वं तत एव रम्यं गुणेषु विपदमुत्कृष्ट
प्रेम आविष्कृतं प्रकटीकृतं दुःसहमपि सोढवता त्वया साधुकृतमिति भावः ॥ १५ ॥ ✿
विधायेति । किंच शमस्य एकामुख्या वृत्तिर्यस्य तस्य अपरोपतापिन इत्यर्थः । भव
तः छलेन कपटेन आत्मने हितः आत्मनीनः स न भवतीत्यनात्मनीनः स्वस्यैवानर्थहेतु
रित्यर्थः । तं आत्मन्विश्वजनभोगोत्तरपदात्ख इति खप्रत्ययः । विध्वंसम् अपकारं वि
धाय प्रकाशितः प्रख्यापितः त्वन्मतिशीलयोस्तव प्रज्ञास्वभावयोः सारः प्रकर्षो यैस्ते त
थोक्ताः ते तव विद्विषः कृतोपकाराः इव जाता इति श्लेषः अपकारोऽप्युपकारायैव संवृत्तः यद
सौ दौर्जन्यमन्यदौजन्यं च जगति सुव्यक्तमासीदित्यर्थः । विद्यमानस्यापि गुजनस्य च

न्त्रनदासगाइवगुणाःपरिभवेएवप्रचुराभवन्तीतिभावः ॥ १६ ॥ * ० * ० ॥

अथप्रयोजनान्तरमाह । लभ्येति । तवलयेत्यर्थः । कृत्यानांकर्तरिचेतिषष्ठी । धरित्रीविक्रमेणलभ्याप्राप्यातत्त्वस्तुलभ्याइत्याह । विपक्षश्शत्रुरपिवीर्येशौर्य्ये अस्त्राण्याग्नेयादीनिबलानिसैन्यानितैर्ज्यायान्प्रशस्यतरः अधिकतरइतियावत् । ज्येष्ठस्यज्यादेशः अतःप्रकर्षायाधिकायविधिरुपायोविधेयःकर्तव्यःहियस्मात्गुणेजयश्रीःप्रकर्षतन्त्राप्रकर्षप्रधानाउत्कर्षायत्तेत्यर्थः । तन्त्रंप्रधानेसिद्धान्तइत्यमरः । बलिनएवजयोनतुदुर्बलस्येतिभावः ॥ १७ ॥ * ० ~ ० * ० ~ ० * ॥

अथत्रिरित्यादिनाश्लोकचतुष्टयेनविपक्षज्यायस्त्वंवर्णयति । त्रिःसप्तेति । त्रिरा

लभ्याधरित्रीतवविक्रमेणज्यायांश्चवीर्यास्त्रबलैर्विपक्षः । अ
तःप्रकर्षायविधिर्विधेयःप्रकर्षतन्त्राहिरणेजयश्रीः ॥ १७ ॥
त्रिःसप्तकृत्वोजगतीपतीनांहन्तागुरुर्यस्यसजामदग्न्यः ।
वीर्यावधूतःस्मतदाविवेदप्रकर्षमाधारवशंगुणानाम् ॥ १८ ॥

वृत्तान्सप्तत्रिःसप्तवारान्त्रिःसप्तकृत्वःएकविंशतिकृत्वइत्यर्थः । त्रिसप्तशब्दयोःसुसुपेतिसमासःसंख्यायाःक्रियाभ्यावृत्तिगणनेकृत्वसुजितिकृत्वसुच्प्रत्ययःजगतीपतीनांमहीपतीनांहन्तागुरुरस्त्रवेदोपदेष्टासप्रसिद्धइत्यर्थः । अतएवयच्छब्दानपेक्षत्वनात्तच्छब्दप्रकाशे । अप्रसिद्धानुभूतार्थविषयस्तच्छब्दोयच्छब्दोपादानंनापेक्षतइति । जमदग्नेरपत्यंपुमान्जामदग्न्यःगर्गादिभ्योयञितियञ्प्रत्ययः । यस्यभीष्मस्यवीर्य्यावधूतोविक्रमाभिभूतःअम्बिकालयस्यरेइत्यर्थः । तदाभङ्गसमयेगुणानांशौर्य्यादीनाम्प्रकर्षमतिशयंवीर्य्यातिशयम् । आधारवशमाश्रयाधीनंविवेदजज्ञेस्वविद्यायाःस्वशिष्येभीष्मेस्मादपिप्रकर्षाधानदर्शनाद्

तिभावः । स्मेतिपादपूरणेभूतेर्थेचेतिविश्वः ॥ १८ ॥ * * ॥
यस्मिन्निति । यस्मिन्भीष्मे विषये अनीश्वरस्य भावोऽनैश्वर्य्यमसामर्थ्यंतन्नञःशुची
श्वरक्षेत्रज्ञकुशलनिपुणानामितिविकल्पान्नञःपूर्वपदवृद्ध्यभावः । तेनकृतव्य
लीकोऽजनितवैलक्ष्यः । दुःखेवैलक्ष्येव्यलीकमितियादवः । अन्तकोपियमोपराभव
म्प्राप्नइवभीष्मस्येच्छामरणत्वादन्तकोपिपराजितइवास्तेकिमुतान्यइतिभावः ।
सभीष्मोरणेधनुर्धुन्वन्कस्यमनोभयैकप्रवणम्भयेएकप्रवणमेकोन्मुखंशिवभा
गवतवत्सभावः । नकुर्यात्सर्वस्यापिमनसिभयंकुर्य्यादेवेत्यर्थः ॥ १९ ॥ ॥
स्रजन्तमिति । आजौरणेइषुसंहतीर्बाणसंघान्स्रजन्तंवर्षन्तंकोपज्वलितमतए

यस्मिन्ननैश्वर्य्यकृतव्यलीकःपराभवम्प्राप्नइवान्तकोपि । धुन्व
न्धनुःकस्यरणेनकुर्य्यान्मनोभयैकप्रवणंसभीष्मः ॥ १९ ॥
स्रजन्तमाजाविषुसंहतीर्वःसहेतकोपज्वलितंगुरुङ्कः । परि
स्फुरल्लोलशिखाग्रजिह्वञ्जगज्जिघत्सन्तमिवान्तवह्निं ॥ २० ॥

वपरिस्फुरन्त्योलोलाश्चशिखायाएवजिह्वायस्यतन्तथोक्तञ्जगत्लोकञ्जिघत्सन्त
मत्तुमिच्छन्तम् । अदेःसन्नन्ताच्छतृप्रत्ययःलुङ्सनोर्घस्लृइतिघस्लादेशःअन्तव
ह्निंकालाग्निमिवस्थितंगुरुंद्रोणंवोयुष्माकमध्येकःसहेतसोढुंशक्नुयात् । नकोपी
त्यर्थः । शकिलिङ्चेतिशक्यर्थेलिङ् ॥ २० ॥ * * * * * * * * * * ॥
निरीक्ष्येति । संरम्भेणकोपेननिरस्यत्याजितन्धैर्य्यंनिर्विकारचित्तत्वंयेनतन्तथो
क्तम् । आकारेणैवपरधैर्य्यापहारिणमित्यर्थः । आराधितजामदग्न्यंशुश्रूषित
भार्गवंजामदग्न्यादधिगतास्त्ररहस्यमित्यर्थः । राधेयंराधासुतंकर्णम् । स्त्रीभ्योढ
क्निरीक्ष्यभृत्योरप्यसंस्तुतेषुअपरिचितेषु । संस्तवःस्यात्परिचयइत्यमरः । भ

येषु प्रसभमन्दपातः परिचयो जायेत । मृत्युरप्यस्म[?]भीय जिमु गाम्य इति भा
वः । सम्भावनायां लिङ् । अत्र जनक्रियापेक्षया समानकर्तृकत्वाभावात्स्नातनि
सापेक्षया तत्सम्भवान्निरीक्ष्ये ल्यप्निर्देशः सनयनीय प्रधानोपसर्जनभावस्तुप्र
योजकाङ्कित्याभिविवेककारः अत्र भयसम्बन्धरहितस्य मृत्योर्भयसम्बन्धाभिधाना
दसम्बन्धे सम्बन्धरूपातिशयोक्तिरलङ्कारः ॥ २१ ॥ * ✿ * ✿ * ✿ * ✿ ॥
अथानन्तरङ्करणीयमागमनप्रयोजनन्तु युग्मेनाह । यथेत्यादि । यया विद्यया
कारणेन सुदुश्चरामतिदुस्तरान्तपस्यां तपश्चर्यां धर्मेणाक्षोभयितपोऽभ्यावर्तिचरे
रितिक्यप् । अप्रत्ययादिति स्त्रियामप्रत्ययः । आचरता पशुपतिं प्रति तपः कुर्वतेत्य

निराम्नवं रम्भानरसध्यसाध्यमाराधयतज्जामदग्न्यम् ।
असंस्तुतेषु प्रसभं भयेषु जायेत मृत्योरपि पक्षपातः ॥ २१ ॥
यया समासादितसाधनेन सुदुश्चरामाचरता तपस्याम् । ए
ते दुरापं समवाप्य वीर्यमुन्मूलितारः कपिकेतनेन ॥ २२ ॥

र्थः । अत एव समासादितं साधनमस्त्राप्तुपतास्त्ररूपं येन तेन । कपिर्हनुमान्केतनं
चिह्नं यस्य तेनार्जुनेनेत्यर्थः । दुरापमन्यस्य दुर्लभं वीर्यन्तेजः समवाप्य एते पूर्वोक्ता
भीष्मादयः उन्मूलितारः उन्मूलयिष्यन्ते । उन्मूलयतेर्ण्यन्तात्कर्मणि लुट् ।
अत्र चिण्वदिडागमे णित्वाभिवृद्धिवद्भावादि असिद्धत्वात् णेरनिटि इति णि
लोपः तन्निमित्तस्यैवानिटीति निषेधात् । उङ्कश्चिण्वद्विडिलुक् । वहतेश्च न वृ
दीर्घश्चाकारो यो निमित्तो वा चिण्णीतोक्याशिदि [?] नलुप्यते णेर्नित्यश्चायं वलिमिने
विद्यतीति ॥ २२ ॥ ✿ * ~ * ✿ * ~ * ✿ * ~ * ✿ * ~ * ✿ ॥
महत्वेति । इन्द्रपमहत्त्वयोगाय प्रार्थनाभाय महामहिम्नां महानुभावानां देवता

मामिन्द्रादीनामाराध्यतेऽनयेत्याराधनीं तत्प्रसादयित्रीमित्यर्थः । करणे ल्युट् ङीप् । भूरिधाम्नीं महाप्रभावां । धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोरिति विश्वः । अन उपधालोपिनोऽन्यतरस्यामिति वा ङीप् । विद्यामैन्द्रमन्त्ररूपां सिद्धिं साक्षात्कार्यसिद्धिमिवेति विद्याया अमोघत्वोक्तिः । हे प्रदानोचित दानपात्र प्रभूतफलभोक्तृत्वाद्दस्य पात्रत्वोक्तिः । दानमुपागतोऽस्मि ॥ २३ ॥ ** ◦ ** ॥

इतीति । इत्युक्तवन्तं प्रसेदिवांसं प्रसन्नं भाषायां सदवसश्रुव इति क्वसुः । तं मुनिं जिष्णुर्जयनशीलोऽर्जुनः ग्लाजिस्थश्च ग्स्नुरिति ग्स्नुप्रत्ययः । व्रज साधयानुतिष्ठेत्येवंरूपं अ

सुहृद्योगाय म[illegible]तनुभृ
दानोचितां भूरिधाम्नीमुपागतः सिद्धिमिवास्मि विद्याम् ॥ २३ ॥ यु
ग्मम् ॥ इत्युक्तवन्तं व्रज साधयेति प्रमाणयन्वाक्यमजातशत्रोः ।
प्रसेदिवांसं तमुपाससाद वसन्निवान्ते विनयेन जिष्णुः ॥ २४ ॥
निर्याय विद्याथ दिनादिरम्याद्बिम्बादिवार्कस्य मुखान्महर्षेः ।
पार्थाननं वह्निकणावदाता दीप्तिः स्फुरत्पद्ममिवाभिपेदे ॥ २५ ॥

जातशत्रोर्धर्मराजस्य स्वयमविद्वेषणशीलत्वादियं संज्ञा । वाक्यं प्रमाणयन् तदादिष्टः सन्नित्यर्थः । अन्ते वसन् छात्र इव । छात्रान्तेवासिनौ शिष्ये इत्यमरः । विनयेनानौद्धत्येनोपाससाद समीपम्प्राप ॥ २४ ॥ ◦◦◦◦◦◦◦◦◦◦ ॥

निर्यायेति । अथ वह्निकणावदाता स्फुलिङ्गवदुज्ज्वला देवतासान्निध्यादिति भावः । विद्या ऐन्द्रमन्त्ररूपा । दिनादिरम्यात्प्रभातभास्करस्य बिम्बादिव महर्षेर्व्यासस्य मुखान्निर्याय निर्गत्य समासेनञ्पूर्वे क्त्वो ल्यप् । दीप्तिरर्कदीप्तिरर्कदीधितिः स्फुरद्विकसत्पद्ममिव पार्थाननमर्जुनस्य मुखमभिपेदे प्रविष्टा ॥ २५ ॥ ◦◦◦ ॥

योगञ्चेति । सयोग्यतमायअर्हतमायतस्मैपार्थायतंवक्ष्यमाणमहिमानंयोगंध्यानंविधिञ्च । योगःसंहननोपायध्यानसङ्गतियुक्तिष्वित्यमरः । तपःप्रभावात्सद्योविततारददौचिरकालसाध्यमपीतिभावः । येनयोगेनतत्त्वेषुप्रकृतिमहदादिषु । तथाच । मूलप्रकृतिर्महानहंकारोमनश्चपञ्चतन्मात्राणिपञ्चबुद्धीन्द्रियाणिपञ्चकर्मेन्द्रियाणिपञ्चमहाभूतानीतिचतुर्विंशतितत्त्वानि तत्रावभासेसाक्षात्कारेकृतेसतिअस्यार्जुनस्यचक्षुरक्षिचिरायसमुन्मिमीलेवोन्मीलितमिवेत्युत्प्रेक्षा । तदातस्यकोपिमहानखिलाज्ञानभञ्जनस्तत्त्वावभासश्चिरादन्धस्यदृष्टिलाभइवाभवदितिभावः ॥ २६ ॥ ❀ ❀ ❀ ॥

योगञ्चतंयोग्यतमायतस्मैतपःप्रभावाद्विततारसद्यः । येनास्यतत्त्वेषुकृतेऽवभासेसमुन्मिमीलेवचिरायचक्षुः ॥ २६ ॥
आकारमाशंसितभूरिलाभन्दधानमन्तःकरणानुरूपम् । नियोजयिष्यन्विजयोदयेतन्तपःसमाधौमुनिरित्युवाच ॥ २७ ॥

आकारमिति । आशंसितआख्यातोभूरिलाभोऽनेकश्रेयःप्राप्तिर्येनतन्तथोक्तंमहाभाग्यसूचकमित्यर्थः । अन्तःकरणशब्देनतद्धर्मिरुत्साहोलक्ष्यते । तदनुरूपन्तदनुकूलमुत्साहानुगुणव्यापारक्षममित्यर्थः । आकारम्मूर्त्तिन्दधानन्तामर्ज्जुनंमुनिर्विजयोदयेविजयफलकेतपःसमाधौतपोनियमे । समाधिर्नियमेध्यानेमौनेचैवसमर्थनइतिविश्वः । नियोजयिष्यन्नियोजयितुमिच्छन्नित्यर्थः । लृट्शेषेचेतिलृट् । लृटःसद्वेतिसत्प्रत्ययःइतिवक्ष्यमाणमुवाच ॥ २७ ॥ ❀ ॥
अनेनेति । अनेनमयोपदिष्टेनेत्यर्थः । योगेनविवृद्धतेजाःनिजाम्पदवीम्परस्मैअयच्छन्परस्यप्रवेशमायच्छन्नित्यर्थः । उपात्तशस्त्रोनिगृहीतायुधःसन्हेअर्जुनज

पोपवासाभिषवैः स्वाध्यायानशनस्नानैर्मुनीनामाचारं समाचरन्ननुतिष्ठ ॥ २८ ॥ ०

क्षेत्रविशेषे तपःसिद्धिरित्याशयेन तन्निदर्शयन्नाह । करिष्यस इति । यत्र शिलो च्चये गोत्रभिद इन्द्रस्य प्रसत्तये प्रसादाय सुदुश्चराणि तपांसि करिष्यसे चारुशिलोच्चयं रम्यशिखरं तं शिलोच्चयं गिरिं इन्द्रकीलम् । अद्रिगोत्रगिरिग्रावाचलशैलशि लोच्चया इत्यमरः । त्वामेष गुह्यको यक्षः अनन्तरमेवास्य पुरःप्रादुर्भावादेष इति निर्देशः क्षणान्नेष्यति प्रापयिष्यति ॥ २९ ॥ ० * ० * ० * ० * ० * ० ॥

इतीति । इतीत्थं महेन्द्रसूनुमर्जुनं ब्रुवाणेनोक्तवतेत्यर्थः । वर्तमानसामीप्य इति भूते

…योगे… [illegible] । स
…चिराचार… पात्तशस्त्रो जपोपवासाभिषवैर्मुनीनाम् ॥ २८ ॥
करिष्यसे य… सुदुश्चराणि प्रसत्तये गोत्रभिदस्तपांसि । शिलो
च्चयं चारुशि… लोच्चयं तमेष क्षणान्नेष्यति गुह्यकस्त्वां ॥ २९ ॥
इति ब्रुवाणेन महेन्द्रसूनुम्महर्षिणा तेन तिरोबभूवे । तं राज
राजाऽनुचरोऽस्य साक्षात्प्रदेशमादेशमिवाधितस्थौ ॥ ३० ॥

वर्तमानवत्प्रत्ययस्तिरोधानस्याविलम्बसूचनार्थः । तेन महर्षिणा व्यासेन तिरोबभू वेऽन्तर्दधे । भावे लिट् । राजराजो यक्षराजः । राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियराज योरिति विश्वः । तस्यानुचरः पूर्वोक्तो यक्षोऽस्य मुनेरादेशं साक्षादिव प्रदेशमर्जुनाधि ष्ठितस्थानमधितस्थौ प्राप्त इत्यर्थः । स्थादिष्वभ्यासेन चाभ्यासस्येति षत्वम् ॥ ३० ॥ ०

कृतेति । स पुण्यजनो यक्षः कृतानतिः कृतप्रणामः । जातस्पृहो जातस्पृहाकाङ्क्षा यस्य स तथा सन् व्याहृतः उक्तः सान्त्ववादः प्रियवचनं येन तस्मिन् जिष्णावर्जुने स ख्यौ सुहृदीव । अथ मित्रं सखा सुहृदित्यमरः । सम्प्रसादं विश्रम्भमियाय प्राप । त

य हि । सतां साधूनां योगः सङ्गतिरस्य विश्वासयति विश्वासं जनयति । सामान्ये
न विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ३१ ॥ * ० * ० * ० * ॥
अथेति । अथोऽघनभासासुहृयेणोदयाय पुनरुद्गमाय विहीयमानान्त्यज्यमानानि
तिनमः प्राप्तिकारणोक्तिः । वृहद्द्युतीन्सौवर्णत्वाद्दीप्यमानानित्यर्थः । इति तमसः
शब्दो चकारणोक्तिः सुमेरुकुञ्जानिव । अत्र सुमेरुग्रहणं कुञ्जानां सौवर्णत्वद्योतना
र्थन्तेनार्जुनेनोदयाय श्रेयसे विहीयमानान् वृहद्द्युतीननेकविधप्रकाशान् पूर्व
पद्विशेषणद्वयस्य प्रयोजनमनुसन्धेयम् । पाण्डुसुतान् चतुर इति शेषः दुःखेन
कृच्छ्रेण कृततदुपादितः आत्मलाभ उत्पत्तिर्यस्य तत्तथोक्तम् । तेषां विवेकित्वात् त[illegible]

कृतानतिर्व्याहृतसान्त्ववादे जातस्पृहः पुण्यजनः [illegible]जिष्णौ । इ-
याय सख्याविव सम्प्रसादं विश्वासयत्याशु सतां हि योगः ॥ ३१ ॥
अथोघ्नभासेव सुमेरुकुञ्जान्विहीयमानानुदयाय तेन । वृहद्-
द्युतीन्दुःखकृतात्मलाभं तमः शनैः पाण्डुसुतान्प्रपेदे ॥ ३२ ॥

ञ्चित्विलम्बोदयमित्यर्थः तमः शोकोऽन्धकारश्च । तमोऽन्धकारे स्वर्भानौ तमः शो-
के गुणान्तरे इत्युभयत्रापि विश्वः । शनैर्मन्दम्प्रपेदे तेषां विवेकित्वाद्भीतभीतमिवेति
भावः । अत्र तमःशब्दस्य श्लिष्टत्वात् श्लेषानुप्राणितेयमुपमा ॥ ३२ ॥ ० * ० ॥
असंशयेति । असंशयमसन्दिग्धं यथा तथा आलोचितं विवेचितं यत् कार्यं तेन नुन्नो
निरस्तः इति लघुत्वहेतूक्तिः । नुदविदोन्दत्राघ्राभ्योऽन्यतरस्यामिति निष्ठानत्वम् ।
कार्यगौरवमालोच्य निरस्त इत्यर्थः । तथापि प्रेम्णा भ्रातृवात्सल्येन कर्त्रा समानीय
पुनराकृष्य विभज्यमानः । समशोकभागीक्रियमाणः तुल्येन प्रेम्णा तुल्यदुःखत्वमा-
पतीति भावः । सपूर्वाक्तो दुःखमेवातिभारोऽप्यतिभारभूतमपि दुःखमित्यर्थः । तन्मनो

भिन्नेषाञ्चतुर्णाम्पार्थानाम्मनोभिन्नत्वाद्विभागादिवपूर्वोक्ताद्ग्रेमकृतात्समविभागा
दिवेत्यर्थः । वस्तुतस्तुविवेकादेवेतिभावःपुनर्विभागग्रहणन्तस्यहेतुत्वोत्प्रेक्षार्थ
मनुवादाददोषः । लघुर्मेनेऽमन्यानि । यथाएकोनेकंधाविभज्यबहुभिरुह्यमा
नोमहानपिभारोलघुर्मन्यतेतद्वदित्यर्थः ॥ ३३ ॥ ○ ○ ○ ○ ○ ○ ○ ॥
अथैवम्प्रेम्णाभ्रातृणामाशामपिशोकंविवेकेनिर्जिगायेत्याह । धैर्येणेति । धैर्येण
तेषांनिसर्गतोनिर्विकारचित्तत्वेन । तथामहर्षेर्व्यासस्यप्रवर्त्तकस्येतिशेषःविश्वास्य
तयाश्रद्धेयवचनत्वेनेत्यर्थः । अरातिप्रभवादरातिहेतुकात्तीव्रात्दुःसहान्मन्योः

असंशयालोचितकार्यनुन्नःप्रेम्णासमानीयविभज्यमानः । तु
[illegible]भागैरिवतैर्मनोभिर्दुःखातिभारोपिलघुःसमेने ॥३३॥
धैर्येणविश्वास्यतयामहर्षेस्तीव्रादरातिप्रभवाच्चमन्योः । वी
र्यञ्चविद्वत्सुसुतेमघोनःसतेषुनस्थानमवापशोकः ॥ ३४ ॥
तानभूरिधाम्नश्चतुरोपिदूरंविहाययामानिववासरस्य । ए
कौघभूतन्तदशर्मकृष्णांविभावरीन्ध्वान्तमिवप्रपेदे ॥ ३५ ॥

क्रोधाद्धेतोस्तथाचार्जुनप्रभावपरिज्ञानाच्चेतिहेत्वन्तरंविशेषणमुखेनाह । म
घोनःसुतेऽर्जुनेवीर्यम् । नलोकेत्यादिनाषष्ठीप्रतिषेधःविद्वत्सुज्ञानवत्स्वितिया
वत्विदेःशतुर्वसुरितिवैकल्पिकोवस्वादेशः । तेषुपार्थेषुसशोकःअवस्थितिं
नावापनप्राप ॥ ३४ ॥ * ~ * ○ * ~ * ○ * ~ * ○ * ~ * ॥
तानिति । तत्पार्थत्यागवत्शर्मसुखं । शर्मशातसुखानिचेत्यमरः ॥ तद्विरुद्धम
शर्मदुःखन्तन्निमित्तन्नसमासःभूरिधाम्नस्तेजस्विनइतिहानिहेतुत्वोक्तिःचतुरस्ता
न्पार्थान्वासरस्यभूरिधाम्नश्चतुरोयामान्प्रहरानिवविहायत्यक्त्वाएकौघभूतमेकराशि

भूतंसत्। अण्यादयः कृतादिभिरित्यर्थे कर्मधारयः श्रेण्यादिराकृतिगणइतिशाकटा नः। कृष्णांत्रिभावरींकृष्णपक्षरात्रिंध्वान्तमिवकृष्णान्द्रौपदींप्रपेदेप्राप॥ ३५॥ ❁ तुषारेति। साद्रौपदीविलोकनेऽर्जुनावलोकनेऽगूढभावाप्यगूढाभिप्रायापिस्फुटा भिलाषिणीतियावत्) भावोलीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुष्वितिवैजयन्ती। मङ्गलभङ्गभीरुर्मङ्गलहानेर्भीतासतीपर्य्यश्रुणीपरिगताश्रुकेवाष्पावृतेइत्यर्थः। अतएवतुषारलेखाकुलितोत्पलाभेहिमबिन्दुसहितेन्दीवरसन्निभेइत्युपमालङ्कारः। लोचनेनिमीलयितुन्नविषेहेनशशाकअश्रुणोदृष्टावरकत्वेपितन्निपातस्यामङ्गलत्वात्तन्निवर्तकंनिमीलनंसानचकारेत्यर्थः॥ ३६॥ * ❁ * ❁ * ॥

तुषारलेखाकुलितोत्पलाभेपर्य्यश्रुणीमङ्गलभङ्गभीरुः।
ढभावापिविलोकनेसानलोचनेमीलयितुंविषेहे॥ ३६॥
अकृत्रिमप्रेमरसाभिरामंरामार्पितंदृष्टिविलोभिदृष्टम्। मनः
प्रसादाञ्जलिनानिकामञ्जग्राहपाथेयमिवेन्द्रसूनुः॥ ३७॥

अकृत्रिमेति। इन्द्रसूनुरर्जुनःक्रिययानिर्वृत्तःकृत्रिमःड्वितःक्त्रिरितिक्त्रिःक्त्रेर्मम् नित्यमितिमप्प्रत्ययःतद्धितःप्रेमैवरसः। अकृत्रिमप्रेमरसेनाभिरामम्। अन्य त्रप्रेमरसेनमधुरादिनाचाभिरामम्। रामयारमण्यार्पितं। दृष्टिंविलोभयतिइति दृष्टिविलोभिदृष्टिप्रियमित्यर्थः। दृष्टंदर्शनम्। नपुंसकेभावेक्तः मनःप्रसादः प्रसन्नमनइत्यर्थः। सोऽञ्जलिरिवेत्युपमितसमासः। तेनमनःप्रसादाञ्जलिनाप थिसाधुपाथेयंशम्बलमिव। पथ्यतिथिवसतिस्वपतेर्ढञ्। निकाममतिशयेनज ग्राहस्वमार्पितम्पाथेयम्पथिक्षेमायभवतीत्यागमः॥ ३७॥ ❁ * ❁ * ❁ * ॥ धैर्य्येति। वन्यद्विपेनवन्यगजेनशमुत्कृष्टलवङ्गोतनार्थेनिदाघसिन्धुर्ग्रीष्मनदीव

न्निदाघग्रहणान्तौ वैलक्ष्यद्योतनार्थं । धैर्यावसादेन धैर्यभ्रंशेन कर्त्रा हृतप्रसादा क्षोभ ङ्गमितेत्यर्थः । राजपुत्री क्षत्रियसुता द्रौपदी अतः क्षात्रयुक्तमेव वक्ष्यतीति भावः । निरु द्धबाष्पोदयं संरुद्धरोदनं सन्नकण्ठं हीनकण्ठस्वरं यथा तयोरुभयोः कृतबहुव्रीह्योः क्रियाविशेषणयोर्विशेषणसमासः कृच्छ्रात्कष्टादिति वक्ष्यमाणमुवाच ॥ ३८ ॥ * मग्नामिति । पङ्कभूते पंकोपमिते । भूतं क्ष्मादौ पिशाचादौ न्याय्ये सत्योपमानयोरिति विश्वः । द्विषच्छद्मनि शत्रुकपटे मग्नां दुरुद्धरामित्यर्थः । सम्भावनां योग्यतां गौर वमिति यावत् । भूतिं सम्पदमिव । भूतिर्भस्मनि सम्पदीत्यमरः । उद्धरिष्यन् उ द्धारकस्त्वमेवेति शेषः । आधिद्विषां दुःखच्छिदां तपसां आप्रसिद्धेः सम्यक्सिद्धि

[illegible] प्रसादेन हृतप्रसादा वन्यद्विपेनेव निदाघसिन्धुः । निरु
द्धबाष्पोद[illegible]सन्नकण्ठमुवाच कृच्छ्रादिति राजपुत्री ॥ ३८ ॥
मग्नां द्विषच्छद्मनि पङ्कभूते सम्भावनां भूतिमिवोद्धरिष्यन् । आ
[illegible]पसां प्रसिद्धेरस्मद्विना मा भृशमुन्मनीभूः ॥ ३९ ॥

पर्यन्तमस्मद्विना अस्माभिर्विनेत्यर्थः । पृथग्विनेत्यादिना विकल्पात्पञ्चमी भृशं मा उन्मनीभूः अस्मद्विरहात् दुर्मना माभूरित्यर्थः । दौर्मनस्यस्य तपःपरिपन्थि त्वादिति भावः । माङीत्याशीरर्थे लुङ् न माङ्योग इत्यडागमप्रतिषेधः अनुन्मना उ न्मनाः सम्पद्यमान उन्मनी । अभूततद्भावे च्विः अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्चेति सकारलोपः अस्य च्वाविति ईकारः ॥ ३९ ॥ * * * * * * * ॥ अथानौत्सुक्यदार्ढ्यार्थं तस्य सर्वार्थसिद्धिनिदानत्वमाह । यश इति । यशोऽधिग न्तुं कीर्तिं लब्धुमित्यर्थः । सुखस्य लिप्सया लब्धुमिच्छया वा मनुष्यसंख्यां मनुष्यगण नामतिवर्तितुं मतिक्रमितुं अमानुषकर्म कर्तुमिवेत्यर्थः । अभियोगभाजामभिनिवे

भवः केनाऽकर्षणरूपः स्मर्त्तुं न शक्यः अधिकर्त्तुमनुभवितुं किमुत । यस्य स्मरणमपि दुःसहमनुभवस्तु नितरां दुःसह इति किमु वक्तव्यमित्यर्थः । स निकारस्त्वद्विनात्व याविना । पृथग्विनेत्यादिना पञ्चमी चार्द्रः सन् । कुतश्चिदभिभूतात्मगुणप्रहार इव त्वद्विरहदुःखात्पुनर्नवीकरिष्यति नवीभविष्यतीत्यर्थः । उपशुष्यत्त्वयापि शुष्कमिति भावः । दुःखस्तम्भनं शोषः पदार्थः मे हृदयं नवीकरिष्यति आर्द्रीकरिष्यति व्रणमिवेति भावः । दुःखितस्य पुनर्दुःखोपचयः शोषप्रायमपि दुःखहेतुम्पुनरुद्घाटयतीत्यर्थः । अत्र शोषादिविशेषणसामानव्रणाद्यप्रस्तुतार्थप्रतीतेः समासोक्तिरलंकारः ॥ ४४ ॥ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿

प्रसह्य योऽस्मासु परैः प्रयुक्तः स्मर्त्तुं न शक्यः किमुताधिकर्त्तुम् ।
नवीकरिष्यत्युपशुष्यदार्द्रः स त्वद्विना मे हृदयं निकारः ॥ ४४ ॥
प्राप्तोऽभिमानव्यसनादसह्यं दन्तीव दन्तव्यसनाद्विकारम् ।
द्विषत्प्रतापान्तरितोरुतेजाः शरद्घनाकीर्ण इवादिरह्नः ॥ ४५ ॥

पुनः प्रकारान्तरेण मन्युमुद्दीपयति । प्राप्त इत्यादिभिस्त्रिभिः । तत्र त्वय्यमाणप्रत्यभिज्ञानहेतुभिर्द्वेनद्वयं विशिनष्टि । अभिमानस्य व्यसनात् भ्रंशात् । व्यसनं विपदि भ्रंशे दोषे कामजकोपज इत्यमरः । दन्तव्यसनाद्दन्तभङ्गाद्दन्तीवासह्यं विकारं वैरूप्यम्प्राप्तः । अतो न प्रत्यभिज्ञायत इति भावः । एवमुत्तरत्रापि अनुसन्धेयम् । पुनश्च द्विषत्प्रतापेन शत्रुतेजसान्तरितन्तिरस्कृतं उरु तेजः प्रतापो यस्य स तथोक्तः अत एव शरद्घनाकीर्णः शरन्मेघच्छन्नोऽह्न आदिः प्रत्यूष इव स्थितः । तद्वदेवाप्रत्यभिज्ञायमान इत्यर्थः । मध्याह्नस्तु मेघावरणेऽपि कथञ्चित्प्रत्यभिज्ञायत एवेत्यादेयेनोक्तमादिरिति ॥ ४५ ॥ *∽∽∽* ✿ ✿ ✿ *∽∽∽* ॥

सव्रीडेति । पुनश्च निःक्रियत्वादर्थक्रियाशून्यत्वात्सव्रीडमन्दैरिव स[illegible]न एव मन्दैरपटुभिरिव स्थितैरित्युत्प्रेक्षा । मूढाल्पापटुनिर्भाग्या इत्यमरः । अस्त्रैरत्यर्थं नावभासमानः न प्रकाशमानः पूर्वं तु नैवमिति भावः । किन्तु यशःक्षयाद्धेतोः क्षीणजलो योऽर्णवस्तदाभस्तत्सदृशस्त्वमन्यमाकारमभिपन्नः प्राप्त इव स्थित इत्युत्प्रेक्षा तत्र यशःक्षीणजलार्णवाभ इत्युपमासंसृष्टिः ॥ ४९ ॥ * * * * ॥

दुःशासनेति । पुनश्च दुःशासनस्य कर्तुः कर्षणेनाकर्षणेन रज एव रजो धूलिः । मालिन्यहेतुत्वादिति भावः । तेन विकीर्णैर्विक्षिप्तैरत एव विनाथैरिव स्थितैस्तवतां युष्माकमसत्त्वप्रायत्वादनाथैरवस्थितैरित्युत्प्रेक्षा अन्यथा कथमियन्तं दैन्यमिति भा-

> सव्रीडमन्दैरिव निःक्रियत्वान्नात्यर्थमस्त्रैरवभासमानः । यशःक्षयक्षीणजलार्णवाभस्त्वमन्यमाकारमिवाभिपन्नः ॥ ४९ ॥ दुःशासनाकर्षरजोविकीर्णैरेभिर्विनाथैरिव भाग्यनाथैः । केशैः कदर्थीकृतवीर्यसारः कच्चित्स एवासि धनञ्जयस्त्वम् ॥ ५० ॥ कलापकम् ॥

वः । किन्तु भाग्यनाथैर्दैवमात्रशरणैः अन्यथास्य रूपमनिष्पत्तेरिति भावः । एभिः परिदृश्यमानैरसंयमितैरिति भावः । केशैः शिरोरुहैः कुत्सितोऽर्थो वस्तु कदर्थः । अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः । कोः कत्तत्पुरुषेऽचेति कुशब्दस्य कदादेशः कदर्थीकृतो गर्ह्यार्थीकृतो वीर्यसारो शौर्यबलं यस्य स तथोक्तः । इत्थं पूर्वविलक्षणस्त्वं स एव धनञ्जयोऽसि कच्चित् । कच्चित्कामप्रवेदन इत्यमरः । सम्यवचेत्तन्नैवमस्मानुपेक्षसे इति भावः ॥ ५१ ॥ * * * * * * * * * ॥

अथाप्युपेक्षणे दोषमाह । सइति । क्षतात्त्रायत इति क्षत्त्रं क्षत्रियकुलम् । सुपीति योगविभागात्कप्रत्ययः । पृषोदरादित्वात्पूर्वपदस्याकारलोपः । अथवा क्षदि

तिङ्क्वर्त्तिपपदाज्जैप्रत्ययः । क्षत्रे जातः क्षत्रियः क्षत्राद् घ इति घप्रत्ययः । कर्म्मणि
भवतीति कार्मुकं कर्मण उकञ् इत्युकञ्प्रत्ययः । एवं स्थिते वाक्यार्थः कथ्यते यस्तं तासा
धूनां सह तन्निपचारूपचाभ्युच्च । दःत्राणस्य सहस्राणस्तोरक्षणक्षमः स एव क्ष
त्रियशब्दवाच्यः । तथा यत्कार्मुकस्य कर्म गुरणक्रियासु शक्तिः सत्वी तिशेषः । त
देव कार्मुकशब्दवाच्यं । अत्रैवैतौ शब्दौ मुख्यौ नान्यत्रेत्यर्थः । एवं स्थिते द्वयीं द्विवि
धामुक्तिं ... निमौ क्षत्रियकार्मुकशब्दावित्यर्थः । अफले पूर्वोक्तावयवार्थशून्य इत्यर्थः
। अर्थजाते स्वाभिधेयसामान्यजातिमात्र इत्यर्थः । जातग्राह्योरजातोस्तिति वि
ग्रहः । वहन्वर्त्तयन्संस्कारहतामव्युत्पत्तिदूषितामिव करोतीत्युत्प्रेक्षा । तस्मात्तन्

निशेषकं ॥ सक्षत्रियस्त्राणसहः सतां यस्तत्कार्मुकं कर्म्मसु यस्य शक्तिः
। वहन्द्वयीं यद्यफलेऽर्थजाते करोत्यसंस्कारहतामिवोक्तिं ॥ ४८ ॥
वीतौजसः सन्निधिमात्रशेषा भवत्कृतां भूतिमपेक्षमाणाः । समा
नदुःखा इव नस्त्वदीयाः सरूपतां पार्थ गुणा भजन्ते ॥ ४९ ॥

सद्भक्षणेनोक्तदोषादानितं नोपपन्नत्वेत्यर्थः ॥ ४८ ॥ ❁ ❁ * ❁ ❁ ॥
अथ त्वद्गुणा अपि नोऽस्माकं वपुरित्याह । वीतेति । हे पार्थ वीतौजसो निःप्रभाः सन्नि
धिमात्रशेषाः सत्तामात्रावशिष्टाः भवत्कृतां भवता करिष्यमाणां आशंसायां भूतव
च्चेति भूतवत्प्रत्ययः । भूतिमभ्युदयमपेक्षमाणास्त्वदीया गुणाः समानदुःखाः समदुः
खभाज इव नोऽस्माकं सरूपतां वीतौजस्त्वादिसाधर्म्यं भजन्त इत्युपमांशे च समानदुः
खा इवेत्युत्प्रेक्षया वीतौजस्त्वादिसम्भाविकयानुप्राणितेत्यनुसन्धेयम् ॥ ४९ ॥ *
तथापि ममैव कोऽयम्भार इत्यत आह । आक्षिप्येति । प्रमादात्प्रज्ञाहानित्वात्तु दै
वेत्याद्विति भावः । रिपुभिराक्षिप्यमाणामधिक्षिप्यमाणामत एव प्रमादाल्लाग्गैर्गौः

। ग्रहेभाहिगजानागाइतिवैजयन्ती। आलूनसटमाक्षिप्तकेसरम्। सटाजटा
केसरयोरितिविश्वः। मृगेन्द्रंसिंहमिवस्थितन्त्वामियन्धूःकार्यभारस्तिग्मरश्मिं
सूर्यंदीप्तादिनश्रीरिवयोग्यतयानिर्वाहकतयेत्यर्थः। अधिरूढाआरूढवती।
कृत्तेरितः। त्वदधीनेत्यर्थः॥ ५०॥ * ○ * ○ * ○ * ○ * ○ * ○ * ॥
पूर्वंनिर्व्यवसायस्यसर्वश्रियइत्यादिनादोषउक्तःसम्प्रतिव्यवसायिनोगुणमाह।
करोतीति। यःपुमानशेषजनादितरजनादतिरिक्तामधिकांसर्वातिशायिनीमि
त्यर्थः। सम्भावनांयोग्यतांक्रियाभिश्चरितैरर्थवतींसफलाङ्करोति। तंपुमांसंसंस

आक्षिप्यमाणंरिपुभिःप्रमादान्नागैरिवालूनसटंमृगेन्द्रं। त्वान्धू
रियंयोग्यतयाधिरूढादीप्तादिनश्रीरिवतिग्मरश्मिम्॥ ५०॥
करोतियःसर्वजनातिरिक्तांसम्भावनामर्थवतींक्रियाभिः।
संसत्सुजातेपुरुषाधिकारेनपूरणीतंसमुपैतिसंख्या॥ ५१॥
प्रियेषुयैःपार्थविनोपपत्तेर्विचिन्त्यमानैःक्लममेतिचेतः। तव
प्रयातस्यजयायतेषांक्रियादघानांमघवाविघातम्॥ ५२॥

त्सुसभासु। सभासमितिसंसदइत्यमरः। पुरुषाधिकारेयोग्यपुरुषगणनाप्र
स्तावेजातेसतिपूर्यतेऽनेनेतिपूरणीसंख्याद्वित्वादिसंख्यानसमुपैतिनगच्छति। अ
द्वितीयोभवतीत्यर्थः। तस्मादसाधारणलाभायत्वयापिमहानुत्साहआस्थेयइ
तिभावः॥ ५१॥ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ॥
अथद्वाभ्यांसुरभविपक्षस्यप्रोषितस्यार्जुनस्यकर्तव्यमुपदिशति। प्रियेष्विति।
हेपार्थप्रियेष्वस्मासुविषयेऽनुपपत्तेःकारणाद्विनैवविचिन्त्यमानैरकस्मादेवाशङ्क्य
मानैर्यैरघैश्चेतःक्लममङ्गुदमेतिजयायप्रयातस्यतवसम्बन्धिनान्तेषामघानांव्यसना

नाम् । दुःखेनो व्यसनेष्वघमित्यमरः । मघवा इन्द्रः योऽस्माभिरुपास्यत इति भावः विघातं निवारणं क्रियात् करोतु आशिषि लिङ् । तस्मादस्मच्चिन्तया न चेतः खेदयितव्यमर्थिनाम् अन्यथा तदसंभवादिति भावः ॥ ५२ ॥ ० ० ० ० ० ॥

मागा इति । असंबाधेऽसङ्कटे विजन इत्यर्थः । सङ्कटं नानु संबाध इत्यमरः । शिवो निर्बाधः द्वयोरन्यतरस्य विशेष्यत्वाविवक्षायां विशेषण समासः । अस्मिन्नसंबाधशिवेपि देशे चिराय चिरं एकचरः एको वसन् प्रमादं दौर्बल्यं मागाः इणो गा लुङीति गादेशः । ननु निःस्पृहस्य मम किञ्चित्करः प्रमाद इति वाच्यमित्याशंक्याह । मात्सर्येति । मत्सर एव मात्सर्यं द्वेषः रागः स्नेहः ताभ्यां उपहतात्मनां रागद्वेषदूषितस्व

मागाश्चिरायैकचरः प्रमादं वसन्नसंबाधशिवेपि देशे । मात्स
र्यरागोपहतात्मनां हि स्खलन्ति साधुष्वपि मानसानि ॥ ५३ ॥
तदाशु कुर्वन्वचनं महर्षेर्मनोरथान्नः सफलीकुरुष्व । प्रत्या
गतन्त्वास्मि कृतार्थमेव स्तनोपपीडम्परिरब्धुकामा ॥ ५४ ॥

भावानां मानसानि मनांसि साधुषु सज्जनेषु अपि विषये स्खलन्ति विकुर्वन्ते । अत्र प्रमादनिषेधलक्ष्या प्रमादरूपकारणेनार्थप्राप्तिरूपकार्यस्य व्यतिरेककारणसमर्थनात् द्वैधर्म्येण कार्यकारणसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५३ ॥ ० * ~ * ० ॥

निगमयति । तदिति । तत् तस्मात्कारणात् । आशु शीघ्रं महर्षेर्वचनं कुर्वन् तपस्यन्नित्यर्थः । नोऽस्माकं मनोरथान् सफलीकुरुष्व अरिनिर्यातनेनास्मान् प्रतिष्ठापयेत्यर्थः । प्रार्थनायां लोट् । किञ्च कृतार्थं कृतकृत्यं प्रत्यागतमेव त्वां त्वाम् । त्वामौ द्वितीयाया इति त्वादेशः । स्तनयोरुपपीड्य इति स्तनोपपीडम् । सप्तम्यां चोपपीडरुधकर्ष इति णमुल् । परिरब्धुं कामो यस्याः सा परिरब्धुकामाऽस्मि । आलिङ्गि

नुमिच्छामीत्यर्थः । तुङ्काममनसोरपीति मकारलोपः । प्राकाम्यसिद्धेः प्रासादाद्या
लिङ्गनमपि न प्रीतिदमिति भावः ॥ ५४ ॥
उदीरितामिति । सोऽर्जुनः इतीत्थं यज्ञसेनस्यापत्येन स्त्रिया द्रौपद्या उदीरितामु
क्ताम् । नवीकृतः पुनरुद्घाटनेन प्रख्यापितः अत एव उद्ग्राहितो मनसि निधापितश्च
विप्रकारः परिभवो यया सा तां वाचमासाद्याकर्ण्येत्यर्थः । उदीचीं काष्ठां दिशम् ।
दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ता इत्यमरः । तिग्मरश्मिरिव भृशं दिदी
पे जज्वाल चुक्रोधेत्यर्थः ॥ ५५ ॥
अथेति । अथ विद्विषः शत्रून् पुरोऽभिपश्यन्निव स्थितः तथा पुरोधसा धौम्येनारोपिता म

उदीरितान्तामिति याज्ञसेन्या नवीकृतोद्ग्राहितविप्रकाराम् । आ
साद्य वाचं स भृशं दिदीपे काष्ठामुदीचीमिव तिग्मरश्मिः ॥ ५५ ॥
अथाभिपश्यन्निव विद्विषः पुरः पुरोधसारोपितहेतिसंहतिः । बभार र
म्योपि वपुः स भीषणं गतः क्रियां मन्त्र इवाभिचारिकीम् ॥ ५६ ॥

मन्त्रसमाहिता हेतिसंहतिरायुधकलापो यस्य स तथोक्तः । हेतिर्ज्वालाङ्कुरायुधइति
वैजयन्ती । सोऽर्जुनो रम्यः सौम्यः सन्नपि अभिचारः परहिंसा प्रयोजनं यस्याः सा
आभिचारिकी तदस्य प्रयोजनमिति ठक् । तां क्रियां गतः अभिचारकर्मणि नियुक्त
इत्यर्थः । मन्त्र इव रम्यः प्रकृत्या रमणीयः भीषयत इति भीषणम् । नन्द्यादित्वात्
ल्युप्रत्ययः । वपुर्बभार प्रशान्तो मन्त्रः प्रयोगभेदादिव सोऽप्यवस्थाभेदाद्भीषणो ब
भूवेत्यर्थः ॥ ५६ ॥
उक्तमायुधारोपणं विवृण्वन्नस्त्रस्थानमाह त्रिभिः । अविलंघ्येति । शत्रुभिः अविलं
घ्यमनतिक्रमणीयं विकर्षणं यस्य तत् । अमोघाकर्षणमित्यर्थः । जिष्णु । प्रथितो

ज्यारवे गुणध्वनिः कर्म बाणमोक्षणादिकं यस्य तत्कार्मुकञ्चोद्वहन्नित्यन्वयः। तथाऽरीणां दृष्टिगोचरं दृष्टिपथमगतौ आहवेष्वनिवर्त्तित्वादस्थैर्येतिभावः। निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः। डप्रत्यये संख्यायास्तत्पुरुषस्योपसंख्यानात्समासान्तः तेन शितेन तीक्ष्णेन युक्तौ इति शितनिस्त्रिंशयुजौ। सत्सूद्विषेत्यादिना क्विप्। महेषुधी महान्तौ निषङ्गौ इषवो धीयन्तेऽनयोरिति विग्रहः कर्मण्यधिकरणे चेति किप्रत्ययः। तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः। तूण्यां खड्गे तु निस्त्रिंश चन्द्रहासासिरिष्टय इत्यमरः ॥ ५७ ॥ ॥

अविलङ्घ्यविकर्षणम्परैः प्रथितज्यारवकर्म कार्मुकम्। अगतावरिदृष्टिगोचरं शितनिस्त्रिंशयुजौ महेषुधी ॥ ५७ ॥ यशसेव तिरोदधन्मुहुर्महसा गोत्रभिदायुधक्षतीः। कवचञ्च सरत्नमुद्वहन्ज्वलितज्योतिरिवान्तरन्दिवः ॥ ५८ ॥ अलकाधिपभृत्यदर्शितं शिवमुर्वीधरवर्त्म सम्प्रयात्। हृदयानि समाविवेश स क्षणमुद्बाष्पदृशान्तपोभृताम् ॥ ५९ ॥ त्रिभिर्विशेषकम् ॥

यशसेति। किञ्च। गोत्रभिद इन्द्रस्यायुधक्षतीः वज्रप्रहाररन्ध्राणि खाण्डवदाहसम्भवादिति भावः। महसा स्वकान्त्या यशसेव मूर्त्तया कीर्त्येव मुहुस्तिरोदधत्। आच्छादयत्। सरत्नं रत्नसहितं अत एव ज्वलितज्योतिर्दीप्ततारकम्। ज्योतिस्तारा अग्निभा ज्वाला दृक्पुत्रार्थधरास्विति वैजयन्ती। दिवोऽन्तरं नभोमध्यमिव स्थितम्। अन्तरं परिधानीये बाह्ये स्वीयेऽन्तरात्मनि। क्लीबे तु मध्ये प्रकाशे इति वैजयन्ती। कवचं सोद्वहन् ॥ ५८ ॥ ॥

अलकेति। सोऽर्जुनोऽलकाधिपभृत्येन यक्षेण दर्शितमतः। शिवं निर्बाधमुर्वीधर

यत्र हिमवन्मार्गे प्रति सम्प्रयात् प्रगच्छमानः । क्षणमुद्वाष्पदृशां वियोगदुःखात्सा श्रुनेत्राणान्तेषां भूतानां द्वैतवननिवासिनां तपस्विनां हृदयानि सेमा विवेश खेदयामा सेत्यर्थः । सम्पूर्वस्य विशतेः खेदार्थत्वमवसेयम् ॥ ५९ ॥ ० * * ० ॥

अनुजगुरिति । अथाशादिशः दिविभवन्दिव्यन्दिगादिभ्यो यत् । दुन्दुभिध्वानमनुजगुः दध्वनुः अनुगायतेर्लिट् । व्योम्नि सुरकुसुमनिपातैर्लक्ष्मीर्वितेने । पुष्पवृष्टिश्चाजनिष्टेत्यर्थः । किञ्च । अनिभृताश्चञ्चला वेलायां कूले यावीचयस्ता एव बाहवो यस्य सतथोक्तः । वेलाकूलविकारयोरिति शाश्वतः । पयोधिः स्फुरन्तीमुल्लसन्तीं हर्षात्स्पन्दमानाञ्च भुवम्प्रियमिष्टं भारवतारिणरूपङ्कथयिष्यन्निव । कथयितुमिवेत्यर्थः । लृट् शेषे चेति चकारात्क्रियार्थायां क्रियायां लृट् । आलिलिङ्ग

अनुजगुरथ दिव्यन्दुन्दुभिध्वानमाशाः सुरकुसुमनिपातैर्व्योम्नि लक्ष्मीर्वितेने । प्रियमिव कथयिष्यन्नालिलिङ्ग स्फुरन्तीं भुवमनिभृतवेलावीचिबाहुः पयोधिः ॥ ६० ॥ इति श्रीभारविकृतौ किरातार्जुनीये महाकाव्ये तृतीयः सर्गः ॥ ३ ॥

सर्वेञ्चेदन्दैवकार्यप्रवृत्तत्वादस्येति भावः । अत्र विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वात्समासोक्तिरलङ्कारः । तत्र चाप्रकृतयोर्भूमिसमुद्रयोः प्रतिपन्नाभ्यां नायकाभ्यामभेदे लक्षणातिशयोक्तिवशादालिङ्गनोक्तिरिति रहस्यम् । एवमतिशयोक्त्यनुप्राणिता समासोक्तिः प्रियकथनात्स्नेहवज्जीवयति तदङ्गभावम्भजत इत्युभयोरङ्गाङ्गिभावेन सङ्कर इति विवेचनीयम् ॥ ६० ॥ ० ॥ इति श्रीमहोपाध्याय कोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घण्टापथसमाख्यायां तृतीयः सर्गः ॥ ३ ॥ * ० * ० * ० * ० * ० * ० * ० * ॥

ततइति। ततःप्रस्थानानन्तरञ्जनप्रियःसोऽर्जुनःकलहंसाःमेखलाइवेत्युपमित
समासः। अन्यत्र कलहंसाइवताइतिविशेषणसमासः। कूजन्तोकलहंसमेखला
यस्यास्ताम्। सहपाकेनवर्त्ततइतिसपाकानिसस्यानितैःसस्यैःसहितःसम्पादितः।
पाण्डुतैवगुणोयस्यास्ताम्भुवमासादितयैवनाम्प्रियामिवोपजनञ्जनसमीपेऽन्यत्रस
खीसमक्षंसमीपार्थेऽव्ययीभावः। उपाससादोपगतवानुपमालंकारः॥१॥ *
विनम्रेति। सोऽर्जुनःविनम्रशालिनीःप्रसवौघशालिफलस्तोमशोभिनीरपेतप
ङ्काःनिःपङ्काःससरोरुहाण्यम्भांसियासुतास्तथोक्ताः। उपायनीभूताअर्जुनम्प्रत्यु
पहारीभूताःशरद्गुणश्रियःपूर्वोक्तशरद्धर्मसम्पदःयासुताःउपसीमग्रामसीमा·

ततःसकूजत्कलहंसमेखलांसपाकसस्याहितपाण्डुतागुणाम्। उपा
ससादोपजनञ्जनप्रियःप्रियामिवासादितयौवनाम्भुवम्॥१॥
विनम्रशालिप्रसवौघशालिनीरपेतपङ्काःससरोरुहाम्भसः। नन
न्दपश्यन्नुपसीमसस्थलीरुपायनीभूतशरद्गुणश्रियः॥२॥

सुविभक्त्यर्थेऽव्ययीभावः। समासान्तविधेरनित्यत्वाट्टजेतिसमासान्तोनभव
ति। केचित्तुअन्येषांकठिनवपुषांदुर्गमेग्रामसीम्नीइत्यादिनपुंसकप्रयोगदर्शना
न्नपुंसकादन्यतरस्यामितिविकल्पात्साधुरित्याहुः। स्थालीरकृत्रिमाभुवः। जान
पदेत्यादिनाअकृत्रिमार्थेङीप्। पश्यन्ननन्द। अत्रशरद्गुणेषुतादात्म्येनारोप्य
माणस्योपायनस्यप्रकृतेर्नन्दनक्रियोपयोगित्वात्परिणामालङ्कारः॥२॥ * * ॥
निरीक्ष्यमाणाइति। विस्मयाकुलैराश्चर्यरसाविष्टैरतएवोन्मीलितानिपद्मान्ये
वलोचनानियेषान्तैःसरोभिर्निरीक्ष्यमाणाइवस्थिताः। हृतःप्रियादृष्टिविलासा
नांविभ्रमःशोभायाभिस्तास्तथोक्ताइतिमनोहरणत्वहेतूक्तिः। विभ्रमःसंशयेभ्रा

न्तीशोभायाङ्गीतिवेजयन्ती । शफरीविवृत्तयोमत्स्यीस्फुरितान्यस्यार्जुनस्यमनो
जह्रुः ॥ ३ ॥ ❁ *~~~~* ❁ *~~~~* ❁ ॥

तुतोषेति । सोऽर्जुनःसवारिजेवारिणिकलमस्यशालिविशेषस्य । शालयःकल
मादृशाश्चयष्टिकाद्याश्चपुंस्यमीत्यमरः । रमणीयस्यभावोरमणीयकम् । योप
धाद्गुरूपोत्तमाद्वुञ् । तत्पश्यन्नधिकन्तुतोष । अनुरूपसङ्गमत्वादितिभावः । त
थाहि । सुदुर्लभेऽनुरूपसङ्गमेयोग्यसमागमेलब्धेसतीतिशेषः । प्रकर्षलक्ष्मीं
योग्यसमागमनिमित्तामुत्कर्षसम्पदमभिनन्दितुंस्तोतुङ्कोनार्हतिसर्वोऽप्यभिनन्द

निरीक्ष्यमाणाइवविस्मयाकुलैःसरोभिरुन्मीलितपद्मलोचनैः । हृ
तप्रियादृष्टिविलासविभ्रमामनोऽस्यजह्रुःशफरीविवृत्तयः ॥ ३ ॥
तुतोषपश्यन्कलमस्यसोधिकंसवारिजेवारिणिरमणीयकम् । सु
दुर्लभेनार्हतिकोभिनन्दितुम्प्रकर्षलक्ष्मीमनुरूपसङ्गमे ॥ ४ ॥
नुनोदतस्यस्थलपद्मिनीगतंवितर्कमाविष्कृतफेनसन्तति । अ
वाप्तकिञ्जल्कविभेदमुच्चकैर्विवृत्तपाठीनपराहतम्पयः ॥ ५ ॥

ति । सामान्येनविशेषणसमर्थनरूपोऽर्थान्तरन्यासः ॥ ४ ॥ ❁ *~* ❁ ॥

नुनोदेति । आविःकृताप्रकटीकृताफेनसन्ततिर्यस्यतत्तथोक्तम् । अवाप्तःकिञ्ज
ल्कविभेदःकेसरापगमोयेनतत्तथोक्तम् । कुतःउच्चकैरुच्चकंयथातथाविवृत्तेनलुठि
तेनपाठीनेनमत्स्यविशेषेणपराहतन्ताडितं । सहस्रदंष्ट्रःपाठीनइत्यमरः । प
यःकर्तृतस्यार्जुनस्यस्थलपद्मिनीगतन्तद्गोचरमित्यर्थः । वितर्कसंशयंनुनोदचिच्छे
द । पाठीनपराहत्याकिञ्जल्कापायेनजलदर्शनात्स्थलपद्मिनीशंकानिवृत्तेत्यर्थः ।
अत्रनिश्चयोत्तरसन्देहालंकारः ॥ ५ ॥ ❁~❁ * ❁~❁ * ❁~❁ ॥

हृतेति । सोऽर्जुनः शिथिलत्वमायताऽगच्छतादिनेदिने क्षीयमाणेत्यर्थः । अत एव शनैःशनैःशान्तरयेण । अन्यथोर्मिरेखानुदयादिति भावः । वारिणा हृताऽऊर्मयःतरङ्गाएवरेखाराजयोयस्यतत्तथोक्तम्तरंगाश्चस्य सञ्जातास्तरङ्गितम्भङ्गिमत् । तदस्यसंयातमितीइतच् । क्षौमन्दुकूलन्तद्वद्विपाण्डुशुभ्रमित्युपमालङ्कारः । समुद्रयोषितान्नदीनांसिकताऽस्यास्तीतिसैकतम्पुलिनंसिकताशर्कराभ्याञ्चेत्यण्प्रत्ययः । तोयोत्थितन्तत्पुलिनंसैकतंसिकतामयमित्यमरः । निरीक्ष्यरेमेतुतोष ॥ ६ ॥ *
लतन्त्रिभिःशालिगोपीर्वर्णयति । मनोरममिति । अणुनासूक्ष्मेणकेसरेषुकिञ्ज

हृतोर्मिरेखंशिथिलत्वमायताशनैःशनैःशान्तरयेणवारिणा । निरीक्ष्यरेमेससमुद्रयोषितान्तरङ्गितंक्षौमविपाण्डुसैकतम् ॥ ६ ॥
मनोरमम्प्रापितमन्तरम्भुवोरलंकृतंकेसररेणुनाणुना । अलक्तताम्राधरपल्लवश्रियासमानयन्तीमिवबन्धुजीवकम् ॥ ७ ॥
नवातपालोहितमाहितंमुहुर्महानिवेशौपरितःपयोधरौ । चकासयन्तीमरविन्दजंरजःपरिश्रमाम्भःपुलकेनसर्पिता ॥ ८ ॥

ल्केषु । किञ्जल्कःकेसरोऽस्त्रियामित्यमरः । योरेणुःपरागस्तेनालंकृतमत एवमनोरमयतीतिमनोरमङ्कर्मण्यणीत्यण् भ्रुवोरन्तरंप्रापितंभ्रूमध्येनिवेशितम्बन्धुजीवकं । बन्धूकोजीवकमित्यमरः । अलक्तताम्रस्यलाक्षारागरक्तस्यअधरपल्लवस्यश्रियाशोभयासमानयन्तीसमीकुर्वन्तीमिवसाम्यपरीक्षांकुर्वन्तीमिवेत्यर्थः । उत्प्रेक्षालङ्कारः ॥ ७ ॥ * * ० * * ० * * ० ॥
नवेति । महान्निवेशःस्थानंययोस्तौमहानिवेशौपीवरावित्यर्थः । पायोधरौपरितस्तनयोःसमन्तादित्यर्थः । अभितःपरितःसमयानिकषाहातिप्रतियोगेचदृश्यतइतिद्वि

णीया। मुकुरचित्तन्निःक्षिप्तंनवातपालोहितंवालातपताम्रमरविन्दजंरजःपरागस्तस्यपे
शोप्रखरतापरिश्रमाम्भःपुलकेनस्वेदोद्भवेनपुलकेनचकासयन्तीशोभयन्तीचका
सेरण्यन्ताच्छतरिङीप्। अलंकरणमप्यलंकुर्वतीनत्वापिविकृततेतिभावः॥ ८॥ *
कपोलेति। पुनःकपोलसंश्लेषियद्वतंसकोत्पलङ्कर्णोत्पलन्तद्विलोचनत्विषाभूष
यन्तीमाभरणस्यापिआभरणमितिभावः। कलमस्यगोपायतीतिगोपिकांशालि
गोप्त्रींण्वुल्प्रत्ययः। निरीक्ष्यपाण्डोःसुतेनार्जुनेनशरदःकृतार्थस्यभावःकृतार्थता
साफल्यम्। मतवोगुणवचनस्यपुम्वद्भावोवक्तव्यःमेनेऽमानिमन्यतेःकर्मणिलिट्
। शरदःस्वगुणसम्पदर्पितनियोगलाभादितिभावः॥ ९॥ * ० * ० * ०॥

कपोलसंश्लेषिविलोचनत्विषाविभूषयन्तीमवतंसकोत्पलम्। सुतेनपा
ण्डोःकलमस्यगोपिकांनिरीक्ष्यमेनेशरदःकृतार्थता॥ ९ ॥ विशेष
कम्॥ उपारताःपश्चिमरात्रिगोचरादपारयन्तःपतितुञ्जवेनगाम्।
तमुत्सुकाश्चक्रुरवेक्षणोत्सुकंगवांगणाःप्रस्नुतपीवरोधसः॥ १० ॥

उपारताइति। पश्चिमाचासौरात्रिश्चेतिविशेषणसमासःअपररात्रइत्यर्थः। पूर्वा
दिक्पश्चिमंनभइत्यादिवत्एकदेशिशब्दस्यैकदेशशब्दसामानाधिकरण्यादेकदे
शिपर्य्यवसानन्नतुपश्चिमरात्रेरित्येकदेशिसमासः। तद्विधायकेपूर्वापरादिसूत्रेप
श्चिमशब्दस्याग्रहणादतएवाह। पूर्वैकदेशेत्यादिनासमासान्तोपितस्यापिपूर्वापरादि
सूत्रोक्तसमासविषयत्वादितिप्रकाशवर्षस्त्वेकदेशिसमासमेवाश्रित्यसमासान्तमा
हतन्मृग्यम्। गावश्चरन्त्यत्रेतिगोचरोगवाङ्घ्रिस्थानंवनम्पश्चिमरात्रौयोगोचर
स्तस्मादुपारताःसन्निवृत्ताःजवेनगांभुवम्पतितुन्धावितुमपारयन्तोऽशक्नुवन्तः।
प्रस्नुतपीवरोधसोवत्सस्मरणात्स्नुतक्षीराः। ऊधस्तुक्लीबमापीनमित्यमरः। ऊ

थसोम ङितिस्त्रीग्रहणाङ्कन्तव्यमितिनियमाल्लानङादेशः। उत्सुकाःवत्सेषूत्क
ण्ठितागवांगणास्तमर्ज्जुनमवेक्षणोत्सुकन्दर्शनलालसञ्चक्रुः। स्वर्गेषुपशुवाग्वज्र
दिङ्नेत्रघृणिभूजले। लक्ष्यदृष्ट्यास्त्रियाम्पुंसिगौरित्युभयत्राप्यमरः। अत्रस्वभावो
क्तिरलङ्कारः। स्वभावोक्तिरलङ्कारोयथावद्वस्तुवर्णनमितिलक्षणात्॥ १०॥ *

परीतमिति। सोऽर्ज्जुनः उक्षापजयेउक्षान्तरभङ्गेसति। जयश्रियापरीतंवेष्टि
तमुच्चैर्नदन्तंक्षतसिन्धुरोधसमरुणसरित्तटंशरदिभवांशारदींपुष्टिमवयवोपच
यन्दधन्तंगवामधिपंमहोक्षंसविग्रहंमूर्त्तिमन्तम्। कायोदेहःक्लीवपुंसोःशरीरंव
र्ष्मविग्रहइत्यमरः। दर्पमिवेत्युत्प्रेक्षा। ददर्श॥ ११॥ ❀ *⁓* ❀ ||

परीतमुक्षापजयेजयश्रियानदन्तमुच्चैःक्षतसिन्धुरोधसम्। दद
र्शपुष्टिन्दधतंसशारदींसविग्रहन्दर्पमिवाधिपङ्गवाम्॥ ११॥
विमुच्यमानैरपितस्यमन्थरङ्गवांहिमानीविशदैःकदम्बकैः। शर
न्नदीनाम्पुलिनैःकुतूहलङ्गलद्दुकूलैर्ज्जघनैरिवादधे॥ १२॥

विमुच्यमानैरिति। हिमानीविशदैर्हिमसंघातशुभ्रैः। हिमानीहिमसंहतिरित्य
मरः। इन्द्रवरुणेत्यादिनाङीप्। तत्संनियोगादानुगागमश्च। गवांकदम्बकैः
कर्तृभिः। कदम्बकंसमूहेनीपफलेपुष्पविशेषकेइत्यमरः। मन्थरंमन्दंविमुच्यमा
नैरपिकिमुताविमुच्यमानैरितिभावः। शरन्नदीनांसम्बन्धीभिः। शरद्ग्रहणम्प्रावृड्
निवृत्त्यर्थन्तत्रपुलिनादर्शनादितिभावः॥ पुलिनैःकर्तृभिर्गलद्दुकूलैर्ज्जघनैरिव
तस्यार्ज्जुनस्यकुतूहलङ्कौतुकमादधेआहितम्॥ १२॥ ❀ ❀ ❀ ❀ ❀ ❀ ||
गतानिति। पाण्डवोऽर्ज्जुनःपशूनाङ्गवांसहजन्मयेषांतेसहजन्मानःसोदरातएव
बन्धवस्तेषाम्भावस्तत्तातान्तान्पशुषुसोदराभिमानवतइत्यर्थः। गृह्याश्रयंगृहवि

चयम्प्रेमवनेषुबिभ्रतः वनेषुगृहाभिमानिनइत्यर्थः। आर्जवे [illegible]गुणे विधेयत्वे गोभिः पशुभिःकृतानुकाराननुकृतार्जवस्थितानित्युत्प्रेक्षा। ततोविधेयानित्यर्थः। गाःपान्तीति गोपाःगोपालकाः। आतोनुपसर्गेकइतिकप्रत्ययः। तानुपधेनुधेनुसमीपे। समीपार्थेऽव्ययीभावः। ददर्शअत्रोत्प्रेक्षानुप्राणितेतिस्वभावोक्तिरलङ्कारः ॥ १३ ॥ ❁

अथचतुर्भिर्वल्लवीनर्तकीसाम्येनवर्णयति। परिभ्रमदिति। मूर्द्धजाःषट्पदाइवेत्युपमितसमासः सरोजचारुभिरित्युपमानुसारात्। परिभ्रमद्भिश्चलद्भिर्मूर्द्धजैःषट्पदैराकुलानितैः दन्ताःकेसराइवेतिपूर्ववत्समासः। स्मितोदयेनादर्शिताईषत्प्र

गतान्यपूर्णांसहजन्मबन्धुतांगृहाश्रयम्प्रेमवनेषुबिभ्रतः। ददर्श
गोपानुपधेनुपाण्डवःकृतानुकारानिवगोभिरार्जवे ॥ १३ ॥
परिभ्रमन्मूर्द्धजषट्पदाकुलैःस्मितोदयादर्शितदन्तकेसरैः।
मुखैश्चलत्कुण्डलरश्मिरञ्जितैर्नवातपामृष्टसरोजचारुभिः ॥ १४ ॥
निबद्धनिःश्वासविकम्पिताधरालताइवप्रस्फुरितैकपल्लवाः। व्यपो
ढपार्श्वैरपवर्त्तितत्रिकाविकर्षणैःपाणिविहारहारिभिः ॥ १५ ॥

काशिताःदन्तकेसरायेषान्तैस्तथोक्तैश्चलत्कुण्डलरश्मिरञ्जितैश्चञ्चलकनककर्णवेष्टनप्रभानुलिप्तैरतएवनवातपामृष्टम्बालातपस्पृष्टंयत्सरोजन्तद्वच्चारुभिर्मुखैरुपलक्षिताः ॥ १४ ॥ ❁ ✻ ✻ ❁ ✻ ✻ ❁ ॥

निबद्धेति। निबद्धेनानुरुद्धेननिःश्वासेनविकम्पिताअधरायासान्तास्तथोक्ताः अतएवप्रस्फुरितैकपल्लवाः प्रचलितैकपल्लवाइत्यर्थः। क्वचित्संख्याशब्दस्यवृत्तिविषयेवीप्सार्थत्वंसप्तपर्णादिवदितिकैय्यटः। लताइवस्थिताःदैवादेकपल्लवस्फुरणस्यापिलोकेसम्भवादुपमैवेयंनोत्प्रेक्षाकिञ्चव्यपोढानिविपरीतानिपार्श्वानियेषु

नैः पाणिविहारहारिभिः पाणिविक्षेपमनोहरैः । अङ्गहारोऽङ्गविक्षेप इत्यमरः । विकर्षणैर्मन्थगुणस्याकर्षणैरपवर्त्तितत्रिकाः स्खलितनितम्बाः । यद्यपि पृष्ठवंशाधरे त्रिकमित्यमरे तथाप्यत्र नितम्बो लक्ष्यते तन्नैकट्यादिति भावः ॥ १५ ॥ * ॥

व्रजेति । व्रजाजिरेषु गोष्ठप्राङ्गणेष्वधिकरणे सप्तमी । व्रजो गोष्ठाध्ववृन्देष्वित्यमरः । अम्बुदनादशंकिनीर्गर्जितभ्रमवतीरिति भ्रान्तिमदलंकारः । शिखण्डिनां योषितो मयूरीः योषिद्ग्रहणमौग्ध्यातिशयात् । उन्मदयत्सु उन्मदाः कुर्वत्सु तत्करोतीति णिजन्ताच्छतृप्रत्ययः । मथां मन्थनदण्डानां । वैशाखमन्थमन्थानमन्थानो मन्थदण्डक इत्यमरः । विवर्त्तनैः परिभ्रमणैः मुहुः प्रणुन्नेषु कम्पितेष्विति स्वभावोक्तिः ।

व्रजाजिरेष्वम्बुदनादशंकिनीः शिखण्डिनामुन्मदयत्सु योषितः । मुहुः प्रणुन्नेषु मथां विवर्त्तनैर्नदत्सु कुम्भेषु मृदङ्गमन्थरम् ॥ १६ ॥ समन्थरवलितपीवरस्तनीः परिश्रमक्लान्तविलोचनोत्पलाः । निरीक्षितुं नोपरराम वल्लवीरभिप्रनृत्ता इव वारयोषितः ॥ १७ ॥ कलापकम् ॥

कुम्भेषु कलशेषु मृदङ्गवन्मन्थरं ईषन्नदत्सु स्वनवत्सु सत्सु इति नादस्य साम्योक्तिः । भावलक्षणे सप्तमीयम् ॥ १६ ॥ * * * ॥

सइति । मन्थरं मन्दमावलिताश्चञ्चलाः पीवराः स्तना यासां तास्तथोक्ताः । स्वाङ्गाच्चोपसर्जनादसंयोगोपधादिति ङीष् । परिश्रमेणाक्रान्तानि ग्लानानि विलोचनोत्पलानि यासां तास्तथोक्ताः वल्लवीर्गोपीः । गोपे गोपालगोसंख्यगोधुगाभीरवल्लवा इत्यमरः । अभिप्रनृत्ता नर्त्तनी गत्यर्थादकर्मकेत्यादिना कर्त्तरि क्तः । गतिबुद्धिपूजार्थेभ्यश्चेति चकाराद्वर्त्तमानार्थत्वम् । वारयोषितो वेश्या इव । वारस्त्री गणिका वेश्या इत्यमरः । सोऽर्जुनो निरीक्षितुं नोपरराम न विरमति स्म । उपाच्च विभाषाक

ऽकादितिपरस्मैपदंईक्षतेस्तुमुन् । अत्रचतुःश्लोक्यामुपमास्वभावोक्त्योःसंसृ
ष्टिः ॥ १७ ॥

पपातेति । सोऽर्ज्जुनःपूर्वांप्रावृषेण्यांविजिह्मतांवक्रतांजहतस्त्यजतः । शरदिनि
ष्पङ्कत्वेनसमरेखयैवसुगमत्वादितिभावः । जहातेःशतृप्रत्ययःवृषोपभुक्तान्ति
कसस्यसम्पदःवृषभचर्वितप्रान्तसस्यसमृद्धिनः । सुक्तनेवृषभेवृषइत्यमरः । सीम
न्ताइवसीमन्ताश्चक्राङ्गपङ्क्तयःसीमन्तवन्तःकृताःसीमन्तितामत्वन्तात्तत्करोती
तिणिचिकृतेणाविष्टवद्भावान्मतुपोलुक् । रथाङ्गैश्चक्रैःसीमन्तिताःसान्द्रकर्दमाघनी
भूताःपंकायेषुतान्प्रसक्तसम्पातेनसन्ततसञ्चारेणपृथक्कृतान्पथोमार्गान्पपातजगा

पपातपूर्वांजहतोविजिह्मतांवृषोपभुक्तान्तिकसस्यसम्पदः । र
थाङ्गसीमन्तितसान्द्रकर्द्दमान्प्रसक्तसम्पातपृथक्कृतान्पथः ॥ १८ ॥
जनैरुपग्राममनिंद्यकर्म्मभिर्विविक्तभावेऽङ्गितभूषणैर्वृताः । भृशं
ददर्शाश्रममण्डपोपमाःसपुष्पहासाःसनिवेशवीरुधः ॥ १९ ॥

मेतिस्वभावोक्तिः ॥ १८ ॥

जनैरिति । सोऽर्ज्जुनःउपग्रामंग्रामेषुविभक्त्यर्थेऽव्ययीभावः । अनिंद्यकर्मभिरनि
षिद्धवृत्तिभिःवृत्तिश्चैकत्रकृष्यादिरन्यत्रशिलोञ्छादिःविविक्तान्येकाग्राणिभावोऽ
भिप्रायःइङ्गितञ्चेष्टाभूषणमलङ्कारश्चयेषान्तैस्तथोक्तैर्जनैर्वृताअधिष्ठिताइत्य
र्थः । अतएवाश्रमेषुमुनिस्थानेषुयेमण्डपाःतदुपमाः । मण्डपोऽस्त्रीजनाश्रयइ
त्यमरः । सपुष्पहासाःपुष्पविकाससहिताःतेनसहेत्यादिनाबहुव्रीहीःनिवेशवी
रुधोगृहगुल्मिनीः । वीरुधोवल्लिगुल्मिन्यावितिवैजयन्ती । भृशंसादरन्ददर्श ।
उपमालङ्कारः ॥ १९ ॥

ततइति। ततःसपूर्वोक्तोयक्षःशरद्गुणश्रियंसम्प्रेक्ष्यदर्शनीयांवर्णनीयाञ्चविचा
र्य्येत्यर्थः। शरद्गुणालोकनेलोलंचक्षुर्यस्यसतृष्णदृष्टिं। लोलश्चलसतृष्णयोरित्यमरः
। तमर्जुनमनोदितोप्यपृष्टोपिगांवाचमुवाच। तथाहिइङ्गितज्ञोभावज्ञः। इङ्गितं
हृद्गतोभावइत्यमरः। अवसरेउक्तियोग्येकालेनावसीदतिनवाचंयच्छति। नापृ
ष्टःकस्यचिद्ब्रूयादितिनिषेधस्त्वनाकांक्षितोक्तिविषयइतिभावः। सामान्येनविशे
षसमर्थनरूपोऽर्थान्तरन्यासः॥ २०॥ ॥
इयमिति। हेपार्थशिवायाःकल्याणकारिण्याःनियतेः। दैवन्दिष्टम्भागधेयंभाग्यं

ततःससम्प्रेक्ष्यशरद्गुणश्रियंशरद्गुणालोकनलोलचक्षुषम्। उ
वाचयक्षस्तमनोदितोपिगान्नेङ्गितज्ञोऽवसरेऽवसीदति॥ २०॥
इयंशिवायानियतेरिवायतिःकृतार्थयन्तीजगतःफलैःक्रिया। ज
यश्रियम्पार्थपृथूकरोतुतेशरत्प्रसन्नाम्बुरनम्बुवारिदा॥ २१॥
उपैतिसस्यम्परिणामरम्यतान्नदीरनौद्धत्यमपङ्कतामहीम्। न
वैर्गुणैःसम्प्रतिसंस्तवस्थिरन्तिरोहितम्प्रेमघनागमश्रियः॥ २२॥

स्त्रीनियतिर्विधिरित्यमरः। शुभावहदैवस्यायतिःफलदानकालः। सैवजगतः
क्रियाःकृष्यादिकर्म्माणिफलैर्लाभैः। लाभनिष्पत्तियोगेषुबीजभावेधनेफलमिति
वैजयन्ती। कृतार्थयन्तीसफलयन्तीप्रसन्नाम्बुर्निर्मलोदकाअनंबुवारिदानि
र्जलमेघाअनेनविशेषणद्वयेनद्यावापृथिव्योरानुकूल्यंसूचयति। इयंशरत्तेज
यश्रियम्पृथूकरोतु। आशीरर्थेलोट्॥ २१॥ ॥ *** ॥ ॥
उपैतीति। सस्यंव्रीह्यादिकम्परिणामेनपरिपाकेनरम्यतामुपैति। नदीरनौद्ध
त्यंगम्यरूपत्वमुपैति। महीमपङ्कतानिष्पङ्कत्वमुपैति। तथाहि। सम्प्रतिनवैः

गुणैः पूर्वोक्तैः शरद्धर्मैः संस्तवेन परिचयेन स्थिरं दृढमपि घनागमश्रियः प्रावृड्ल
क्ष्म्याः सम्बन्धि तद्विषयमित्यर्थः । प्रेम तिरोहितं निरर्थकं कृतमित्यर्थः । गुणा तद्धाः
प्रेमाणो न परिचयतन्त्रा इति भावः । वास्तवालंकारः ॥ २२ ॥ * * ॥
पतन्तीति । अस्मिन्नभसि विशदाः पतत्रिणो बलाका न पतन्ति न प्रसरन्ति धृतेन्द्रचा
पाः पयोदपङ्क्तयश्च न पतन्ति । तथापि श्रीकारणाभावेपि नभः परां श्रियं शोभां पु
ष्णाति । तथाहि रम्यं स्वभावसुन्दरं वस्तु आहार्य्यमारोप्यमाणं गुणान्नापेक्षते । त
त्स्वभावस्यैव समर्थत्वादिति भावः । अत्रार्थान्तरन्यासः ॥ २३ ॥ * * ॥
विपाण्डुभिरिति । कदम्बानिलशब्देन वर्षर्तुरुपलक्ष्यते । स एव भर्त्ता तस्यात्यये विर

पतन्ति नास्मिन् विशदाः पतत्रिणो धृतेन्द्रचापा न पयोदपंक्तयः । त
थापि पुष्णाति नभः श्रियम्परां न रम्यमाहार्यमपेक्षते गुणम् ॥ २३ ॥
विपाण्डुभिर्म्लानतया पयोधरैश्च्युताऽचिराभागुणहेमदामभिः ।
इयं कदम्बानिलभर्तुरत्यये न दिग्वधूनां कृशता न राजते ॥ २४ ॥

हेम्लानतया निर्ज्जलतया दुर्बलतया च विपाण्डुभिः । च्युतानि अचिराभा विद्युत्त
स्या गुणा एव हेमदामानि सुवर्णसूत्राभरणानि येभ्यस्तैः पयोधरैरम्भोदैरन्य
त्र स्तनैरुपलक्षितानां । स्तनाम्भोदौ पयोधराविति वैजयन्ती । दिश एव वध्वस्ता
सामियं कृशता न राजत इति न किन्तु राजत एव विमुक्तत्वात् । आर्त्तार्त्ते मुदिते हृष्टा
प्रोषिते मलिना कृशेति स्मरणाच्चेति भावः । सामान्यतः प्रसक्तमरंजनं संकार्श्यन्तस्यै
केन नञा नूद्य द्वितीयेन निषेधति । यथाह वामनः । सम्भाव्यनिषेधनिवर्तने द्वौ प्र
तिषेधाविति । अत्र रूपकालंकारः स्फुट एव ॥ २४ ॥ * * ॥
विहायेति । मदात्ययात् मदक्षयाद् रक्तकण्ठस्य श्राव्यस्वरस्य कण्ठशब्देनाक्ष

 मदूनतःस्वरोलक्ष्यतेशिखण्डिनोमयूरस्यसम्बन्धिनिउदितेउच्चैस्सरेरुतेकूजितेवा
 ञ्छांविहायश्रुतिःश्रोत्रम् । कर्णशब्दग्रहौश्रोत्रंश्रुतिःस्त्रीश्रवणंश्रवइत्यमरः ।
 उन्मदहंसनिःस्वनंमत्तमरालकूजितंश्रयतिभजते । नन्वकाण्डेपरिचितपरिहा
रेणापरिचितेकथंप्रीत्युदयइत्याशंक्यार्थान्तरंन्यस्यति । गुणइति । प्रीणातीति
प्रियः । इगुपधज्ञाप्रीकिरःकइतिकप्रत्ययः । प्रियत्वेप्रीतिकरणेगुणाअधिकृता
नियुक्ताःसंस्तवःपरिचयेनाधिकृतःनसमर्थःप्रेमाधानेगुणवत्त्वम्प्रयोजकन्नपरिचय
इत्यर्थः ॥ २५ ॥ ❀❀ **~~** ❀❀ **~~** ❀❀ ॥
अमीति । अमीपृथून्स्तम्बान्गुच्छान्बिभ्रतीतिपृथुस्तम्बभृतः । स्तम्बोगुच्छस्तृणा

विहायवाञ्छामुदितेमदात्ययादरक्तकण्ठस्यरुतेशिखण्डिनः । श्रु
तिःश्रयत्युन्मदहंसनिःस्वनंगुणाःप्रियत्वेऽधिकृतानसंस्तवः ॥ २५ ॥
अमीपृथुस्तम्बभृतःपिशङ्गतांगताविपाकेनफलस्यशालयः । वि
कासिवप्राम्भसिगन्धसूचितन्नमन्तिनिघ्रातुमिवासितोत्पलम् ॥ २६ ॥

दिनइत्यमरः । फलस्यप्रसवस्यविपाकेनपरिणामेनपिशङ्गतांगताःशालयोव्री
हिविशेषाः । वप्राम्भसिकेदारोदके । पुन्नपुंसकयोर्वप्रःकेदारःक्षेत्रइत्यमरः ।
विकसतीतिविकासिविकसितंगन्धेनसूचितंज्ञापितमसितोत्पलन्निघ्रातुमिवनम
न्ति । निध्यातुमिवेतिपाठेद्रष्टुमित्यर्थः । निर्वर्णयितुंवा । निर्वर्णनन्तुनिध्यानन्द
र्शनालोचनेक्षणमित्यमरः । अवफलभारनमितस्यनमनस्यनिघ्राणफलमुत्प्रेक्ष्य
तइतिफलोत्प्रेक्षा ॥ २६ ॥ ❀*❀ *~* ❀*❀ *~* ❀*❀ ॥
अथचतुर्भिःकलापकमाह । मृणालिनीनामिति । मृणालिनीनाम्पद्मलतानान्त्वि
षाहरितवर्णेनअनुरञ्जितन्तद्वर्णतामापादितमित्यर्थः । तथाऽम्भोजपलाशशोभ

यापद्मदलकान्त्या आरुण्येनेत्यर्थः । विभिन्नं मिश्रितम् । तथा स्फुरच्छालिशिखा
पिशङ्गितं स्फुरद्भिः कलमाग्रैः पिङ्गलीकृतमित्यर्थः नानावर्णत्वात् द्रुतं विगलितमहिवि
द्विषो वृत्रशत्रोरिन्द्रस्य । सर्पे वृत्रासुरेऽप्यहिरिति वैजयन्ती । धनुःखण्डमिव
स्थितन्नित्यसमासेऽनुत्तरपदस्थस्येति विसर्जनीयस्येति सस्य षत्वम् । पयोवप्राम्भः
अपदिश्य व्याजीकृत्य धावतामित्यागामिना सम्बन्धः अत्र धनुःखण्डस्य द्रुतस्य लोकेऽ
प्रसिद्धत्वादुत्प्रेक्षेयं नोपमा ॥ २७ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥
विपाण्ड्विति । विपाण्डु शुभ्रम् अनिलोद्धतम् अनिलोत्क्षिप्तं सप्तसप्तपलाशानि पत्राणि पर्वसु
येषान्ते वृक्षाः सप्तपलाशाः क्वचित्संख्याशब्दस्य वृत्तिविषये वीप्सार्थत्वं सप्तपर्णादिवदि

मृणालिनीनामनुरञ्जितं त्विषा विभिन्नमम्भोजपलाशशोभया । पयःस्फु
रच्छालिशिखापिशङ्गितं द्रुतं धनुःखण्डमिवाहिविद्विषः ॥ २७ ॥
विपाण्डु संव्यानमिवानिलोद्धतं निरुन्धतीः सप्तपलाशजं रजः । अना
विलोन्मीलितबाणचक्षुषः सपुष्पहासा वनराजियोषितः ॥ २८ ॥

ष्युक्तम् । तेषां पुष्पाणि सप्तपलाशानि । द्विहीनं प्रसवे सर्वमित्यमरः । फले लुगित्य
णो लुक् । तेषु जातं सप्तपलाशजं रजः परागः । संव्यानमुत्तरीयमिव । संव्यानमुत्त
रीयञ्चेत्यमरः । निरुन्धतीर्निवारयन्तीः प्रावृतवतीरिति यावत् । अनाविलान्य
कलुषाणि उन्मीलितानि च बाणानि नीलसैरेयकाणि चक्षूंषि यासान्तास्तथोक्ताः । नी
लस्त्वर्थगलो दासी बाणश्चोदनपाक्यपीति धन्वन्तरिः । पुष्पाणि हासा इव तैः स
ह वर्तन्त इति सपुष्पहासाः वनराजयो योषित इव वनराजियोषितः ता अपदिश्येत्य
न्वयः । अत्र संव्यानमिवेत्युपमैव अन्यत्रोपमितसमासेति लिङ्गम् । यथा काचित्के
नचित्कामुकेनाक्षिप्तं स्तनांशुकं निरुन्धते तद्वदिति भावः ॥ २८ ॥ * * ॥

अदीपितमिति। वैद्युतजातवेदसा वैद्युताग्निना अदीपितमप्रकाशितं विद्युत्प्रकाशस्य दृष्टिविघातकत्वात्तद्ग्राहित्वं गुण इति भावः। सिताम्बुदानां छेदैः खण्डैः तिरोहितातपम्। न दृष्टिबाधो नाप्यातपबाध इति भावः। सान्तरवारिशीकरैः विरलाम्बुकणैः ततान्तरं व्याप्तमध्यं सरोजवायुभिः शिवं रम्यं नभोवर्त्म चापदिश्येति स्वभावोक्तिरलंकारः ॥ २९ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥

सितेति। अपदिश्य धावतामिति पूर्वश्लोकत्रयोक्तम् पयःप्रभृतिकमुद्दिश्य धावताममीषां सितच्छदानां पतत्रिणां हंसानाम्। हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकस

अदीपितं वैद्युतजातवेदसा सिताम्बुदच्छेदतिरोहितातपम्। तता
न्तरं सान्तरवारिशीकरैः शिवं नभोवर्त्म सरोजवायुभिः ॥ २९ ॥
सितच्छदानामपदिश्य धावतां रुतैरमीषां ग्रथिताः पतत्रिणाम्। प्र
कुर्वते वारिदरोधनिर्गताः परस्परालापमिवामला दिशः ॥ ३० ॥ कला
पकम् ॥ विहारभूमेरभिघोषमुत्सुकाः शरीरजेभ्यश्च्युतयूथपङ्क्तयः।
असक्तमूधांसि पयः क्षरन्त्यमूरुपायनानीव नयन्ति धेनवः ॥ ३१ ॥

इत्यमरः। रुतैः शब्दैर्ग्रथिता दृब्धाः। ग्रथितं गुम्फितं दृब्धमित्यमरः। वारिदरोधनिर्गता मेघोपरोधनिर्मुक्ता अत एवामलाः प्रसन्ना दिशः परस्परालापं प्रकुर्वत इव दिष्ट्या मेघोपरोधनिर्मुक्ताश्चिरादुच्छ्वसिता इति हंसकूजितव्याजेन परस्परमालपन्तीत्युत्प्रेक्षा ॥ ३० ॥ ✻ ❁ ❁ ✻ ❁ ❁ ✻ ❁ ❁ ✻ ॥

विहारेति। विहारभूमेः परराष्ट्रगोचरादित्यर्थः। आगच्छन्त्य इति शेषः। अभिघोषमुत्सुकाः अत्यन्तमुत्कण्ठिताः वत्सप्रेम्णेति भावः। घोष आभीरपल्ली स्यादित्यमरः। च्युतास्त्रुटिता यूथानां कुलानां पङ्क्तिः श्रेणीर्बन्धो यासां तास्तथोक्ताः। स्वजाती

यैः कुलं यूथमित्यमरः । अमूः धेनवोऽसकृत् अप्रतिबन्धं पयः क्षीरं क्षरन्ति स्रवन्ति वत्स
स्मरणात् प्रस्रवन्तीत्यर्थः । क्षरतेः शतृप्रत्ययः । ऊधांसि शरीरजेभ्योऽपत्येभ्यश्च
पायनानीवाप्तिसाधकारीणीवेत्युत्प्रेक्षा नयन्ति प्रापयन्ति । या पालोके कुतश्चित्प्र
वासादेत्य मातरं किञ्चिद्वाद्यमानयन्ति तद्वदिति भावः ॥ ३१ ॥ *—* ✿ ॥
जगदिति । जगत्प्रसूतिर्जगत्कारणमाज्यादिहविर्द्वारेणेति भावः । जगतामेक
पावनी मुख्यशोधनी व्रजोपकण्ठं गोष्ठान्तिकम् । दूरान्तिकार्थेभ्यो द्वितीया चेति द्विती
या । उपकण्ठान्तिकाभ्यर्णान्यमरः । तनयैर्वत्सैरुपेयुषी सङ्गता । उपेयिवाननाश्वाननूचानश्चेति क्वसुप्रत्ययान्तो निपातः । उगितश्चेति ङीप् । अथो गवां समितिः

> जगत्प्रसूतिर्जगदेकपावनी व्रजोपकण्ठं तनयैरुपेयुषी । द्युतिं
> समग्रां समितिर्गवामसावुपैति मन्त्रैरिव संहिताहुतिः ॥ ३२ ॥
> कृतावधानं जितबर्हिणध्वनौ सुरक्तगोपीजनगीतनिःस्वने । इद
> ञ्जिघत्सामपहाय भूयसीं न सस्यमभ्येति मृगीकदम्बकम् ॥ ३३ ॥

संहतिः । मन्त्रैरृग्यजुषादिभिः । मन्त्रो ह्यृगादिगृह्योक्तिरिति वैजयन्ती । संहि
तायोजिता आहुतिरिव समग्रां द्युतिमुपैति । आहुतिरपि जगत्प्रसूतिर्जगदेकपा
वनी च । अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेर
न्नं ततः प्रजा इति स्मरणादिति भावः ॥ ३२ ॥ *—* ✿*✿ *—* ॥
कृतेति । जितबर्हिणध्वनौ केकानुकारिणीत्यर्थः । एतेन खड्गस्वरप्रायं गायतीति
गम्यते । यथाह मातङ्गः । षड्जं मयूरो वदतीति । गाः पान्तीति गोपास्तेषां भार्या गो
प्यः आतोऽनुपसर्गे क इति कप्रत्ययः । पुंयोगादाख्यायामिति ङीप् । ता एव जनः सु
रक्तो मधुरकण्ठो यो गोपीजनो वल्लवीजनस्तस्य गीतनिःस्वने गाने कृतावधानमेका

घ्रचिन्तमिदम्पुरोवर्त्तिमृगीकदम्बकङ्कर्तृभूयसीमतिमहतीञ्जिघत्सामत्तुमिच्छाम् । अदेःसन्नन्तादुप्रत्ययःलुङ्सनोर्घस्लितिघसादेशःअपहायहित्वासस्यंनाभ्येतिनोपैति । गीतासक्त्याक्षुधामपिनगणयतीत्यर्थः ॥ ३३ ॥ * * ॥ * * ॥

असाविति । शिरसाग्रेणमूर्ध्नाऽवनमन्त्र्यामन्नपिअनास्थापरयाऽनादरपरया सरोरुहिण्या अवधीरितोऽवज्ञातः अम्भसासहचरभूतेनेतिभावः । शुष्यन्नसौकलमःशालिविशेषो मनोभुवातप्तइवकामार्त्तइवाभिपाण्डुतामुपैति । अत्रानास्थापरयेतिप्रकृतसरोरुहिणीविशेषणसामर्थ्यादप्रस्तुतनायिकाप्रतीतेस्समासोक्तिरुत्तिष्ठमानायासरोरुहिण्याःप्रतीयमानयानायिकयासहभेदेप्यभेदलक्षणातिशयोक्ति

असावनास्थापरयावधीरितःसरोरुहिण्याशिरसानमन्नपि । उ
पैतिशुष्यन्कलमःसहाम्भसामनोभुवातप्तइवाभिपाण्डुताम् ॥ ३४ ॥
अमीसमुद्धूतसरोजरेणुनाहृताहृतासारकणेनवायुना । उपा
गमेदुश्चरिताइवापदाङ्गतिन्ननिश्चेतुमलंशिलीमुखाः ॥ ३५ ॥

महिम्नाऽवधीरणक्रियासम्बन्धनिर्वहतीतिमनोभुवातप्तइवेत्युत्प्रेक्षानिर्वाहिकेत्यतिशयोक्त्यनुप्राणितसमासोक्त्युपमयोरङ्गाङ्गिभावेनसङ्करः ॥ ३४ ॥ * * ॥

अमीति । समुद्धूतसरोजरेणुनेतिसौरभ्योक्तिःहृतासारकणेनोपात्ताम्बुकणेनेतिशैत्योक्तिः । धारासम्पातआसारइत्यमरः । वायुनाहृताआकृष्टाअमीशिलीमुखाभृङ्गाआपदामुपागमेराजादिभयागमेदुश्चरितादुष्टकर्माणश्चौरादयइवगम्यतइति । गतिङ्गमनम् । गन्तव्यदेशोपायगमेगतिरितिवैजयन्ती । निश्चेतुञ्ज्ञातुन्नसमर्थः । एकत्रवायोःसार्वत्रिकत्वेनोपादानादनिश्चयादन्यत्रभयान्धत्वादितिभावः ॥ ३५ ॥ * * ॥ * * ॥ * * ॥ * * ॥ * * ॥

मुखैरिति । विद्रुमभङ्गलोहितैर्मुखैः पिशङ्गीः पिशङ्गवर्णाः कलमस्य शिखाः शालस्य
ग्राणि विभ्रती व्यक्तशिरीषकोमला विकसितशिरीषसवर्णाऽसौ शुकावलिर्गोत्रभिद
इन्द्रस्य धनुषः श्रियमनुगच्छत्यनुकरोति नानावर्णत्वादिन्द्रधनुरिवाभातीत्युपमा
लङ्कारः ॥ ३६ ॥ ❁✱❁ ॥ ❁✱❁ ॥ ❁✱❁ ॥ ❁✱❁ ॥ ❁✱❁ ॥ ❁✱❁ ॥
इतीति । अथ तत्र तस्मिन्पूर्वोक्तयक्षे इतीत्थं कथयति सति नातिदूरादनतिदूराद्
पह्वर इत्यर्थः । नञर्थस्य नशब्दस्य सुप्सुपेति समासः । पिहितोष्णरश्मिविम्बस्ति
रोहितार्कमण्डल इत्यौन्नत्योक्तिः । नगाधिराजो हिमाद्रिः विगलितो जलभारो येषा
न्ते तथोक्ताः । अत एव शुक्लभासः द्वयोरन्यतरस्य विशेष्यत्वाविवक्षायां विशेषणस

मुखैरसौ विद्रुमभङ्गलोहितैः शिखाः पिशङ्गीः कलमस्य विभ्रती । शु
कावलिर्व्यक्तशिरीषकोमला धनुःश्रियं गोत्रभिदोऽनुगच्छति ॥ ३६ ॥
इति कथयति तत्र नातिदूरादथ ददृशे पिहितोष्णरश्मिविम्बः । वि
गलितजलभारशुक्लभासां निचय इवाम्बुमुचां नगाधिराजः ॥ ३७ ॥

मासः । तेषां विगलितजलभारशुक्लभासां शुभ्राणामम्बुमुचां निचय इव मेघवृन्द इ
व ददृशे दृष्टम् ॥ ३७ ॥ ❁∽❁ ✱ ❁∽❁ ✱ ❁∽❁ ✱ ❁∽❁ ॥
तमिति । जिष्णुरर्जुनोऽतनुभिर्महतीभिर्वनराजिभिः श्यामिताः श्यामलता उपत्यका
न्ता आसन्नभूमिप्रदेशाः यस्य तं तथोक्तम् । उपत्यकाऽद्रेरासन्ना भूमिरूर्ध्वमधित्यके
त्यमरः । उपाधिभ्यां त्यकन्नासन्नारूढयोरिति त्यकन्प्रत्ययः । उपरि हिमानीभिर्हि
मसंघातैः गौरं शुभ्रं नगं हिमाद्रिमासाद्यापगतो निवृत्तो मदरागो यस्य तस्य । असि
तं नीलमधरं वासः उत्तरीयं बिभ्रतो धृतवतः सीरं हलं पाणौ यस्य तस्य सीरपाणे
र्हलायुधस्य । हलायुधः । नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली । सङ्कर्षणः

सीरपाणिरित्यमरः। सप्तम्युपमानपूर्वपदस्येति बहुव्रीहिः प्रहरणार्थेभ्यः परे
निष्ठासप्तम्यौ स्त इति सप्तम्याम्परनिपातः लक्ष्मीं शोभामनुसस्मार स्मृतवान्। अत्र
सदृशदर्शनेन सदृशान्तरस्य स्मरणात्स्मरणालङ्कारः। सदृशं सदृशानुभवाद्

तमतनुवनराजिश्यामितोपत्यकान्तं नगमुपरि हिमानीगौरमासाद्य जिष्णुः। व्य
पगतमदरागस्यानुसस्मार लक्ष्मीमसितमधरवासो विभ्रतः सीरपाणेः ॥ ३८ ॥
इति श्रीभारविकृतौ किरातार्जुनीये महाकाव्ये शरद्वर्णनो नाम चतुर्थः सर्गः ॥ ४ ॥

यत्स्मर्य्यते तेन तत्स्मरणमिति विद्याधरः ॥ ३८ ॥ * ॥ इति श्रीमहोपाध्यायकोला
चलमल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घण्टापथसमाख्यायां च
तुर्थस्सर्गः ॥ ४ ॥

अथ हिमवद्दर्शनमारभते तत्र पञ्चदशभिः कुलकमाह । अथेति । अथानन्तरं सोऽर्जुनः मेरुमहीभृतो हेमाद्रेर्जयाय नु जयार्थं वा । नु शब्दोऽत्र वितर्के । नु पृच्छायां वितर्के चेत्यमरः । रभसो वेगः । रभसो वेगहर्षयोरिति वैजयन्ती । तद्वत्या रभसया अतीवोत्कटतयेति यावत् । अर्श आदित्वादच् प्रत्ययः । दिगन्तानां दिदृक्षया नु द्रष्टुमिच्छया वा नभोऽन्तरिक्षं विलङ्घयितुं अतिक्रमितुं वा समुदितं समुत्पतितमिव स्थितमित्यर्थः । कुतः उच्छ्रितमुन्नतं हिमस्याचलं हिमाचलमभिययौ अत्राभिद्योतितानेकफलविशिष्टोऽन्यगुणनिमित्ता उत्तानाक्रियोत्प्रेक्षा सा च व्यञ्जकाप्रयोगात्प्रतीयमानेति संक्षेपः । द्रुतं विलम्बितं वृत्तम् । द्रुतविलम्बितमाह नभभराविति लक्षणात् ॥ १ ॥

अथ जयाय नु मेरुमहीभृतो रभसया नु दिगन्तदिदृक्षया । अ-
भिययौ स हिमाचलमुच्छ्रितं समुदितं नु विलङ्घयितुं नभः ॥ १ ॥
तपनमण्डलदीपितमेकतः सततनैशतमोवृतमन्यतः । हसि-
तभिन्नतमिस्रचयं पुरः शिवमिवानुगतं गजचर्मणा ॥ २ ॥

तपनेति । एकतः एकस्मिन् भागे सार्वविभक्तिकस्तसिः तपनमण्डलेन दीपितं प्रकाशितं अन्यतोऽन्यस्मिन् भागे सततेन निबिडेन नैशेन निशाभवेन तमसा आवृतं एकत्राह्ना रात्र्या चान्यत्र सङ्गतमित्यर्थः । अत एव पुरोऽग्रे हसितेनाट्टहासेन विभिन्नतमिस्रचयं निरस्ततमस्तोमं तथा गजचर्मणा अनुगतं पश्चाद्व्याप्तं । पश्चात्सादृश्ययोरन्वित्यमरः । शिवमिव स्थितम् । तपनतेजःप्रसारोऽप्यस्य कारणमिव कुत्रचित्परिसमाप्यत इति महत्त्वातिशयोक्तिः ॥ २ ॥

क्षितीति । परस्परे अन्योन्ये कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यत्वात्परस्प

ह्रस्वाद्विभावः । समासवच्चवक्तव्यं यदा समासवत्प्रथमैकवचनन्तदा पूर्वपदस्येति
वक्तव्यत्वात्प्रथमैकवचनम् । सुट्कस्कादित्वाद्विसर्ज्जनीयस्य सत्वम्बहुवचन
स्यान्योन्यशब्दवत् । यथा माघे अन्योन्येषां पुष्करैरामृशन्त इति । अदृष्टाः परस्प
रं यैस्ते अदृष्टपरस्परास्तैस्तथोक्तैः । क्षितौ नभसि सुरलोके च निवसन्तीति तैस्तथो
क्तैः भूर्भुवःस्वर्लोकवासिभिरित्यर्थः । कृतनिकेतं कृतास्पदं अत एव शम्भुना विभुतां
स्वसामर्थ्यम्प्रथयितुं अभिनिर्मितञ्जगतां प्रतिनिधिम्प्रकृतिमिव स्थितमित्युत्प्रेक्षा ।
प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यादित्यमरः । त्रैलोक्यश्लाघ्योपमाप

क्षितिनभस्सुरलोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैः । प्रथ
यितुम्विभुतामभिनिर्मितम्प्रतिनिधिञ्जगतामिव शम्भुना ॥ ३ ॥
भुजगराजसितेन नभःश्रिता कनकराजिविराजितसानुना । समु
दितन्निचयेन तडित्वतीं लघयता शरदम्बुदसंहतिम् ॥ ४ ॥
मणिमयूखचयांशुकभासुराः सुरवधूपरिभुक्तलतागृहाः । द
धतमुच्चशिलान्तरगोपुराः पुर इवोदितपुष्पवना भुवः ॥ ५ ॥

रिच्छेद्यश्चेति भावः ॥ ३ ॥ *०* ॥ *०* ॥ *०* ॥ *०* ॥
भुजगेति । पुनश्च भुजगराजसितेन शेषाहिधवलेन नभःश्रिता गगनस्पृशा कनकस्य
राजिभिः रेखाभिः विराजिताः सानवो यस्य तेन तथोक्तेन अत एव तडित्वतीं शरदम्बु
दसंहतिं लघयता लघूकुर्वता तत्तुल्येनेत्यर्थः । अत एवोपमालंकारः । निचयेन
शिखरसमुच्चयेन समुदितं समुन्नतम् ॥ ४ ॥ *~* ॥ ० ॥ *~* ॥
मणीति । पुनर्मणिमयूखचया एव अंशुकानि पटस्थवस्त्राणीव तैर्भासुराः सुरवधूभिः
परिभुक्ता लताः गृहाणीव यासु तास्तथोक्ताः । उच्चानि शिलान्तराणि गोपुराणि इव

वशिलोत्तराणिशिलामयानियासुताःउदितान्यूर्जितानिपुण्यानांवनानियासु
ताःअतएवपुराइवनगराणीवस्थिताभुवोदधतम् ॥ ५ ॥ ॥
अविरतेति । पुनश्चअविरतंअविच्छिन्नंउज्झितंवारियैस्तेऽविरतोज्झितवारयोवृ
ष्टिवन्तइत्यर्थः । अतएवविपाण्डवश्चतैरविरतोज्झितवारिविपाण्डुभिः । अतो
हिमवत्पक्षत्वंसम्भवतीतिभावः । अचिरद्युतितेजसाविरहितैः । आरतनिःस्वनैः
प्रशान्तगर्ज्जितैश्चअन्यथापक्षविहानिःस्यादितिभावः । पृथुनितम्बविलम्बिभिःम
हाकटकसङ्गिभिः । कटकोऽस्त्रीनितम्बोद्रेरित्यमरः । अम्बुदैरुदितपक्षंसञ्जात
पक्षमिवस्थितम्प्राक्छिन्नपक्षस्यापिहिमाद्रेर्धवलाम्बुदसम्बन्धात्पुनःपक्षोत्थानमुत्प्रे

अविरतोज्झितवारिविपाण्डुभिर्विरहितैरचिरद्युतितेजसा । उ
दितपक्षमिवारतनिःस्वनैःपृथुनितम्बविलम्बिभिरम्बुदैः ॥ ६ ॥
दधतमाकरिभिःकरिभिःक्षतैस्समवतारसमैरसमैस्तटैः । विवि
धकामहितामहिताम्भसःस्फुटसरोजवनाजवनानदीः ॥ ७ ॥

क्षते ॥ ६ ॥
दधतमिति । पुनश्चआकरःखनिरेषामस्तीतियोनित्येनेत्याकरिभिराकरजैः । ख
निःस्त्रियामाकरःस्यादित्यमरः । करिभिर्गजैःकर्तृभिःक्षतैर्व्रणैःसमवतारेषुतीर्थे
षुसमैरविषमैःअसमैरसदृशैरनादृशैरनुपमैरित्यमर्थः । तटैरुपलक्षिताःत
थामहिताम्भसःश्लाघ्योदकाःअतएवविविधेभ्यःकामेभ्यःअवगाहनाद्युपभोगेभ्यो
हिताःअनुकूलाः । चतुर्थीतदर्थेत्यादिनासमासःस्फुटानिविकसितानिसरो
जवनानियासुताःजवनावेगवतीःजुचंक्रम्येत्यादिनायुच् । नदीर्दधतम् । यमक
वृत्त्यनुप्रासभेदत्वाद्द्वयमेवालंकारः । अर्थालङ्कारस्त्वभ्युच्चयःतस्यातिदुष्करत्वाद्

संयोयोपिनाद्रियते। तदुक्तम्प्रायेणायमकेचित्रेरसवृद्धिर्नमृग्यते ॥ ७ ॥ * ॥

नवेति। पुनश्चनवानिविनिद्राणिचयानिजपाकुसुमानिताम्रपुष्पिकाकुसुमानि तेषांत्विषइवत्विषोयेषान्तेषाम्। श्रोड्रपुष्पञ्जपापुष्पं रूपिकाताम्रपुष्पिकाचेतिवा ग्भट्टः। तेषांद्युतिमतांमहाश्मनांमणीनांपद्मरागाणांइत्यर्थः। विशेषणसाम थ्यान्निकरेणसमूहेनहेतुनाक्वचित्निचिताःसंघट्टिताः। काञ्चनभित्तयोयेषुतेषुसा नुषुविहिताःसांध्याःसंध्यायाम्भवाः। मयूखायस्मिन्तेनिर्वस्थिनङ्काञ्चनभित्तिषु पद्मरागप्रभाप्रसरात्। उदितसंध्यारागइवभातीत्युत्प्रेक्षा ॥ ८ ॥ ❁ ॥

पृथ्विति। पुनश्चपृथुभिःकदम्बकदम्बकैःनीपकुसुमसमूहैःस्तवकैराजितं। कद

नवविनिद्रजपांकुसुमत्विषांद्युतिमतांनिकरेणमहाश्मनाम्। वि
हितसांध्यमयूखमिवक्वचिन्निचितकाञ्चनभित्तिषुसानुषु ॥ ८ ॥
पृथुकदम्बकदम्बकराजितंग्रथितमालतमालवनाकुलम्। लघु
तुषारतुषारजलश्च्युतन्धृतसदानसदाननदन्तिनम् ॥ ९ ॥

म्बमाङ्कःसिद्धार्थेनीपेचनिकुरंबकइत्युभयत्रापिविश्वः। ग्रथितमालैःबद्धपंक्तिभिः तमालवनैस्तापिच्छवनैराकुलमाकीर्णम्। कालस्कधस्तमालःस्यात्तापिच्छोपीत्य मरः। लघुतुषारंस्वल्पसीकरंयत्तुषारजलंहिमोदकन्तत्। च्योततिवर्षतित नायोक्तम्। तुषारैर्हिमसीकराविति शाश्वतः। अन्येभ्योपिदृश्यतइतिक्विप्सदानाः समदाःसदानेनाःशोभनाननाश्चयेदन्तिनःतेधृतायेनतन्तथोक्तम् ॥ ९ ॥ * ॥

रहितेति। पुनश्चरहितरत्नचयान्रत्नराशिरहितान्शिलोच्चयान्शिखराणिनद धतंअपलताभवनाःलतागृहरहिताःदरीभुवोगुहाप्रदेशान्नदधतम्। दरीतुक न्दरोवास्त्रीदेवखातबिलेगुहेत्यमरः। विगतानिपुलिनानिअम्बुरुहाणिचयासान्ताः

सरितोवध्वइवताःसरिद्वधूर्नदधतं। अत्रसरितांवध्वौपम्यात्पुलिनाम्बुरुहाणांव
दनजघनौपम्यंगम्यते। अकुसुमान्महीरुहोवृक्षान्नदधतंकिन्तुरत्नादिसम्पन्ना
न्शिलोच्चयान्दधतमित्यर्थः। महाविभाषयात्रनञ्समासः॥ १० ॥ ॥
व्यथितेति। पुनश्चानीरसनैश्चनिर्मेखलैःसरसनैरित्यर्थः। घनैर्निबिडैःअमर
लोकवधूजघनैःशनैर्मन्दंमन्दंव्यथितसिन्धुःक्षोभितनदीकंअयंअपरःस्वर्ग इति
भावः। दयिताःप्रियारम्यालतावीरुधोवकुलाःकेसराश्चयेषांतैःतथोक्तैः। वि
शारदोमधगन्धोवकुलःसर्वकेसरइतिवैद्यके। फणभृतांकुलैरभितस्ततंव्याप्तन्त

रहितरत्नचयान्नशिलोच्चयानपलताभवनानदरीभुवः। विपु
लिनाम्बुरुहानसरिद्वधूरकुसुमान्दधतन्नमहीरुहः॥ १० ॥
व्यथितसिन्धुमनीरसनैःशनैरमरलोकवधूजघनैर्घनैः। फण
भृतामभितोविततन्ततन्दयितरम्यलतावकुलैःकुलैः॥ ११ ॥
ससुरचापमनेकमणिप्रभैरपपयोविशदंहिमपाण्डुभिः। अवि
चलंशिखरैरुपविभ्रतंध्वनितसूचितमम्बुमुचाञ्चयम्॥ १२ ॥

थाविततंविस्तृतम्॥ ११॥ ॥ ॥ ॥ ॥
ससुरेति। अनेकाविचित्रामणिप्रभायेषांतैस्तथोक्तैःहिमेनपाण्डुभिःशिखरैःससु
रचापंसेन्द्रचापंअपपयोनिर्जलःअतएवविशदःअतमपपयोविशदंअविचलंदै
वान्निश्चलञ्चअन्तःशिखरसङ्गाऽस्याभूदित्यर्थः। किन्तुध्वनितेनगर्ज्जितेनसूचि
तंज्ञापितंअम्बुमुचाञ्चयमुपविभ्रतंअत्रकविकल्पितसादृश्यात्। शिखरैर्मेघसन्दे
हेमेघनिश्चयात्सन्देहालङ्कारः॥ १२॥ ॥
विकचेति। पुनश्चविकचवारिरुहंनित्यविकसितारविन्दमित्यर्थः। वृत्तिसामर्थ्या

त्कलहंसगणैःसहवर्त्ततइतिसकलहंसगणम्। कादम्बःकलहंसःस्यादित्यमरः। यद्वा। सकलाःसर्वेहंसगणायस्मिन्तत्तथोक्तम्। शुचिनित्यंनिर्मलंमनःसमानसख्यंसरोदधतङ्किञ्चित्कृतेर्ष्ययाकुतश्चिन्निमित्तात्कुपितयेत्यर्थः। अगात्मजयापार्वत्यासकलहंसविवादंसगणंसप्रमथम्। गणाःप्रमथसंख्यौघाइतिवैजयन्ती। शुचिमानसम्। अविद्याविनिर्मुक्तचित्तंशिवञ्चदधतम्। सुमेनसकलशैलवैलक्षण्यमस्योक्तम् ॥ १३ ॥

अहेति। दिवमभितोदिवोभितःअभितःपरितइत्यादिनाद्वितीया। ग्राहाश्चन्द्रादयोविमानानिदेवयानानि। व्योमयानंविमानोस्त्रीइत्यमरः। तेषाङ्गणान्ज्व

त्रिकचवारिरुहंन्दधतंसरःसकलहंसगणंशुचिमानसम्। शिव
मगात्मजयाचकृतेर्ष्ययासकलहंसगणंशुचिमानसम् ॥ १३ ॥
ग्रहविमानगणानभितोदिवंज्वलयतौषधिजेनकृशानुना। मुहु
रनुस्मरयन्तमनुक्षपन्त्रिपुरदाहमुमापतिसेविनः ॥ १४ ॥

ज्वलयताप्रदीपयतामितांह्रस्वः। औषधिजेनतृणविशेषजन्येनकृशानुनाअनुक्षपम्प्रतिक्षपम्वीप्सायामव्ययीभावः। उमापतिसेविनः। प्रमथादीन्गतिबुद्धीत्यादिनाद्विकर्मत्वम्। त्रयाणाम्पुराणांसमाहारस्त्रिपुरन्तद्धितार्थेत्यादिनासमासः। पात्रादिभ्यःप्रतिषेधोवक्तव्यइतिस्त्रीलिङ्गप्रतिषेधः। तस्यदाहस्त्रिपुरदाहंमुहुरनुस्मरयन्तम्। नन्वधीगर्थेत्यादिनादाहमित्यत्रषष्ठीकिन्नस्यात्। तस्याःशेषार्थेविधानात्शेषस्यविवक्षितत्वात्। अत्रकविसंमतसादृश्यात्स्मृतिरितिस्मरणालङ्कारः ॥ १४ ॥

विततेति। विततशीकरराशिभिःविस्तृतशीकरपुञ्जैरुच्छ्रितैरुत्पतितैःकुतः। उप

लरोधेषु विवर्त्तिभिरंबुभिर्हेतुभिः धूतसितव्यजनामिवगृहीतामलचामरामिवस्थिता मित्युत्प्रेक्षा । उन्नतसानुषुसमुद्धतांवहन्तीं जाह्नवींगङ्गान्दधतम् ॥ १५ ॥ ⊛ ॥
अनुचरेणेति । अथोऽनन्तरं । मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथेत्यमरः । धनाधिपतेरनुचरेण यक्षेणनगविलोकनविस्मितमानसः सोऽर्जुनः । आदरा त्प्रियंवचनञ्जगदेगदितः । गदतेर्गत्यर्थस्यदुहादित्वात्प्रधानेकर्म्मणिलिट् । अ पृष्टपरिभाषणदोषंपरिहरति । मुखरतावाचालत्वंअपृष्टपरिभाभायित्वमिति यावत् । अवसरेश्रोतुराकांक्षासमयेविराजतेहि । आकांक्षितमपृष्टोपिब्रूयादि

विततशीकरराशिभिरुच्छ्रितैरुपलरोधविवर्त्तिभिरम्बुभिः । द
धतमुन्नतसानुसमुद्धतान्धृतसितव्यजनामिवजाह्नवीम् ॥ १५ ॥
कुलकम् ॥ अनुचरेणधनाधिपतेरथोनगविलोकनविस्मितमान
सः । सजगदेवचनम्प्रियमादरान्मुखरतावसरेहिविराजते ॥ १६
॥ अलमेषविलोकितःप्रजानांसहसासंहतिमंहसांविहन्तुम् । घ
नवर्त्मसहस्रधेवकुर्वन्हिमगौरैरचलाधिपःशिरोभिः ॥ १७ ॥

तिभावः [illegible] ॥ ॥
अलमिति । हिमेनगौरैःशुभ्रैःशिरोभिःशिखरैःघनवर्त्मखंसहस्रधाकुर्वन्वि पाटयन्निवेत्युत्प्रेक्षा । एषोऽचलाधिपोहिमवान् विलोकितोदृष्टमात्रएवप्रजा नामंहसांसन्ततिम्पापसंघातंसहसाविहन्तुम् । अलंसमर्थः । पर्याप्तिवचनेष्व लमर्थेषुइतितुमुन् । औपच्छन्दसिकंवृत्तं । ससजागौपूर्वतःससजभाइतिलक्षणा त् । अन्तेयैस्तथैवशेषन्त्वौपच्छन्दसिकंसुधीभिरुक्तमितिस्मरणात् ॥ १७ ॥ *
इहेति । इहास्मिन्पर्वतेसुतरंनभवतीत्यसुतरंदुस्तरमित्यर्थः । तरतेःखल्प्रत्य

॥कि०स०॥ यः । अन्तरं मध्यभागं पुरुषे चान्तरन्तत्त्वं दुरधिगमैः दुर्ग्रहैः दुःखेनाधिगन्तुमशक्यैः
॥सर्ग ५॥ आगमैः पुराणादिभिः किञ्चिदेव सततं वर्णयन्ति । ननु कदाचिदप्ययत्नेनापि निः
॥ ५५ ॥ शेषमशक्यत्वादिति भावः । किन्तु अतिविपिनमतिगहनं दिग्व्यापिनममुं गिरिम्प
रम्पुरुषम्परमात्मानमिव परं केवलम् । परमव्ययमिच्छन्ति केवल इति विश्वः ।
पद्मयोनिर्ब्रह्मैव वेद नान्य इत्यर्थः । विटोलटौ वे... श्लेषः । अत्रोपमायम
कयोः संसृष्टिः । क्ष्मावृत्तनुरगसयतिर्नौभरौगः क्षमा ॥ १८ ॥ *—* ॥
रुचिरपल्लवेति । अयं गिरिः । रुचिराणि पल्लवानि पुष्पाणि च येषान्ते तथाभूता ल
तागृहा ये पुतैस्तथोक्तैरुपलसज्जलजैर्जलराशिभिः सरोभिः करणैः उपकान्तात्का

इह दुरधिगमैः किञ्चिदेवागमैः सततमसुतरं वर्णयन्त्यन्तरम् । अमु
मतिविपिनं वेद दिग्व्यापिनं पुरुषमिव परं पद्मयोनिः परम् ॥ १८ ॥
रुचिरपल्लवपुष्पलतागृहैरुपलसज्जलजैर्जलराशिभिः । नय
ति सन्ततमुत्सुकतामयं धृतिमतीरुपकान्तमपि स्त्रियः ॥ १९ ॥

न्तसमीपे धृतिमतीर्धैर्यवतीरपि समीपस्थानपि प्रियान्नगणयन्तीः मानिनीरित्यर्थः
। स्त्रियः सन्ततं उत्सुकतां नयति तासां मनग्रन्थिं शिथिलयतीत्यर्थः । ... उपका
न्तं धृतमतीस्तुष्टिमतीरपि सुरतेन तृप्ता अपि पुनरुत्सुकतां नयतीत्यर्थः । उभयत्रा
प्युद्दीपकत्वातिशयोक्तिः । वृत्तमुक्तम् ॥ १९ ॥ * ✿ * ✿ * ✿ * ॥
सुलभैरिति । नयवता नातिमता अयवता भाग्यवता च सदा सुलभैर्नान्यैरित्यर्थः ।
अयः शुभावहो विधिरित्यमरः । निधीनां महापद्मादीनां गुह्यकानां चाधिपं कुबेरं
रमयन्तीति तथोक्तैः कर्मलक्षणपरमैः उत्कृष्टैः धनैः करणैरमुनाश्रितभृता हेतुनाश्र
ितभृता पूर्णा सती जगती मही जगतीस्वर्गपातालजोकावतीत्यभाति । अमानुषैरपि

दुर्लभाः संपदो न सम्भवन्तीति भावः । अनघनातिभृतेति पदार्थः । अविशेषणगत्या
जगदतिक्रमणहेतुत्वेनास्याकाव्यलिङ्गं तस्य यमकेन संसृष्टिः । प्रमिताक्षरावृत्तं ।
प्रमि[illegible]सजोजयाविति लक्षणात् ॥ २० ॥ * * ॥
अखिलमिति । अमुष्य गौरीगुरोर्हिमवत इदमखिलं त्रयाणां भुवनानां समाहा
रस्त्रिभुवनमपि तद्धितार्थेत्यादिना समासः । पात्रादित्वात्स्त्रीत्वप्रतिषेधः । तुलां सा
म्यं नैतीति मन्ये । यत् यतो जनैरविदितविभवोऽज्ञातमहिमा भवानीपतिः सदास्
नं गिरिमधिवसति । अस्मिन्वसतीत्यर्थः । उपान्वध्याङ्वस इति कर्मत्वं अतो यस्य
मैश्वर्यमिति भावः । प्रभावृत्तं । स्वरशरविरतिर्न्नरौ प्रभेति लक्षणात् ॥ २१ ॥ ॥

सुलभैः सदा नयवताऽयवता निधिगुह्यकाधिपरमैः परमैः । अमु
नाधनैः क्षितिभृताऽतिभृता समतीत्य भाति जगती जगती ॥ २० ॥
अखिलमिदममुष्य गौरीगुरोस्त्रिभुवनमपि नैति मन्ये तुलाम् । अ
धिवसति सदा यदेनं जनैरविदितविभवो भवानीपतिः ॥ २१ ॥

वीतेति । वीते निवृत्ते जन्मजरसी यस्य तद्वीतजन्मजरसं जरया जरसन्यतरस्या
मिति ज[illegible] अ[illegible]दन्तविधेरिष्टत्वात्परत्वेन स्यादेशबाधकत्वाच्च । तथाहि
। टाङसिङसामिनात्स्या इति [illegible]देशबाधनात् । परत्वाज्जरसादेशं बभाषे भाष्य
कृत्स्वयम् । सूत्रकारमतेऽप्यनुज्ञापकात्परबाधनम् । म[illegible]दपि टाङस्ये नेपुनर्ङी
लिसम्भवेत् । मतद्वयेपि तत्तुल्यं ङसि यत्पूर्वबाधनम् । पर[illegible]ज्जरसादेशः स्या
त्स्यादेशबाधनात् । ज्ञापकत्वात्तु टाङसोर्यावादेशौ विनादिति । इकारदीर्घयोस्तु
त्वैयर्थ्यं तत्तु तौ विना । एत्वे सवर्णदीर्घे च रूपसिद्धिर्भवेद्यतः । व्यर्थं सूत्राक्षर
ग्रहणात्तेन तज्ज्ञापकं [illegible] । मतं त्वाज्जरसादेशे जगौ पूर्वस्य बाधनात् । समर्थन

इपञ्चस्तुभाष्यकैयटयोःस्फुटम् । एवञ्चयदत्रजरसइतिकेषांचित्पाठान्तरक
ल्पनन्तदज्ञानविजृम्भितमेव । ब्रह्मणःपरमात्मनःसम्बधिपरंमुक्तिपदञ्चनिष्क
लङ्कम्पदञ्चनइतिपदंस्थानत्राणव्यलक्षणम् । मुक्तिरित्यर्थः । [illegible]मुमि
च्छतांमुमुक्षूणांआगमात्शास्त्रादिवतमोपहन्तिइतितमोपहात्[illegible]विद्यानिवर्त्तकत्वा
त् । अपेक्लेशतमसोरितिडप्रत्ययः । इतोऽस्माद्गिरेःभवं[illegible]छिंदन्तीतिभवच्छि
दःसंसारनिवर्त्तकाःसुत्स्वद्विषेत्यादिनाक्विप् । मतयःतत्त्वज्ञानानिसम्भवन्ति ।
क्षेत्रविशेषस्यापिज्ञानोपपादकत्वादित्याशयः । नचकेवलम्भोगभूमिःकिन्तुमुक्ति
क्षेत्रमपीतितात्पर्यार्थः । रथोद्धतावृत्तम् ॥ २२ ॥ ✿ ✿ ** ✿ ✿ ॥

वीतजन्मजरसम्परंशुचिब्रह्मणःपदमुपैतुमिच्छताम् । आगमा
दिवतमोपहादितःसम्भवन्तिमतयोभवच्छिदः ॥ २२ ॥ दिव्य
स्त्रीणांसचरणलाक्षारागारागायातेनिपतितपुष्पापीडाः । पीडाभा
जःकुसुमचिताःसाशंसंशंसन्त्यस्मिन्सुरतविशेषंशय्याः ॥ २३ ॥

दिव्येति । अस्मिन्गिरौचरणलाक्षारागैस्सहवर्त्तन्तेताःतथोक्ताः । धेनुकपुरुषायि
तादिबन्धेषुस्त्रियःपादतलस्पर्शात्तद्रागाङ्कितइत्यर्थः । [illegible]रणेस्त्री
णामधोमुखत्वात्भ्रष्टाःपुष्पापीडाःकुसुमशेखरायासुतास्तथोक्ताः । शिखास्वापी
डशेखरावित्यमरः । पी[illegible]भाजोविमर्द्दभाजोभङ्गमयइत्यर्थः । भ्रमरप्रेंखोलिता
दौसर्वतःकटिपरिभ्र[illegible]सम्भवादितिभावः । कुसुमैश्चिताःकुसुमचिताः । इभ
मार्ज्जारादिकरणेषुस्तनभुजाद्यवयवानांशय्यातलस्थायित्वान्मार्द्दवायकुसुमचि
ताःकुसुमास्तृताइत्यर्थः । दिव्यस्त्रीणांसम्बन्धिन्यःशेरतेअस्यांइतिशय्याःतल्पानि
संज्ञायांसमजनिपदेत्यादिनाक्यप् । रागायातेरागोद्रेकेसतियस्याशंसःसतृष्णः ।

सुरतविशेषसंज्ञातायेकवचनंसुरतविशेषानित्यर्थः। शंसन्तिसूचयन्तीत्यर्थः। अत्रजात्यनुप्रासादिपदार्थानांसुरतविशेषशंसनंप्रतिविशेषणगत्याहेतुत्वोक्त्याकाव्यलिङ्गमलङ्कारःयमकेनसंसृज्यते। जलधरमालावृत्तम्। मभ्सौमःस्याज्जलधरमालेतिलक्षणात्। धेनुकादिबन्धलक्षणन्तुरतिरहस्ये। न्यस्तहस्तयुगलानिजेपदेयोषिदेतिकामिरूढवल्लभा। अयतोयदिशनैरधोमुखीधेनुकंवृषवदुन्नतेप्रिये॥१॥ स्वेच्छयाभ्रमतिवल्लभेपियायोषिदाचरतिवल्लभायितम्। आनतंरतमिदंयदिप्रियास्यादधोमुखचतुष्पदाकृतिः॥२॥ तत्कटिंसमधिरुह्यवल्लभःस्याद्वृषादिपशुसंस्थितिस्थितः। चक्रवद्भ्रमतिकुञ्चितत्रिकाभ्रामरंनिगदितंसमुद्धतम्॥३॥ सर्वतःकटिपरिभ्रमोयदिप्रेंखपूर्वमिदमुक्तमारतम्। भूगतस्त

गुणसम्पदासमधिगम्यपरंमहिमानमत्रमहितेजगताम्। नय
शालिनिश्रियइवाधिपतौविरमन्तिनज्वलितुमौषधयः॥२४॥

नमुत्थास्यमस्तकायुन्नतांस्वयमधोमुखींस्त्रियम्॥४॥ कामतिस्वकरकृष्टमेहनेवल्लभेकरिरतन्तदुच्यते॥ प्रसारितेपाणिपादेशय्यास्पर्शिमुखोरसि। उन्नतायाःस्त्रियाःकुर्यान्मार्जारकरणंविदुरितिग्रन्थान्तरे॥२३॥ * * * * ॥

गुणेति। जगतांमहितेजगद्भिःपूजितेपूज्यमाने। गतिबुद्ध्यादिनावर्तमानेक्तःक्तस्यचवर्तमानइतिषष्ठी। अत्रहिमवतिऔषधयस्तृणज्योतींषिनयशालिनिअधिपतौनीतिसम्पन्नेराज्ञिश्रियःसम्पदइवगुणसम्पदाश्लेषेनगुणसम्पत्त्याअन्यत्रसंध्यादिगुणसम्पदापरंमहिमानंउभयत्रापिप्रकाशसामर्थ्यंसमधिगम्यज्वलितुम्प्रकाशितुन्नविरमन्तिअविरतंज्वलन्तीत्यर्थः। अन्यत्ररात्रावेवेतिभावः॥२४॥*

कुररीति। इहाद्रौकुररीगणःउत्क्रोशसंघः। उत्क्रोशकुररौसमावित्यमरः।

कि० ह०॥ कृतरवः कृतारवः नतरवः कुसुमैरानताः कमलं जलं सकमलं सपद्मम्। कोमलञ्च
स० ५॥ लपद्मयोरिति विश्वः। वरणाः द्रुमाः आवरणं यासान्ता वरणावरणाः। वरणाव
५७॥ रणाः सेतुस्तिक्तशाकः कुमारक इत्यमरः। सनलदाः सोशीराः। मूलेऽस्योशीरमस्त्रि
याम्। अभयन्नलदं सेव्यमित्यमरः। अनलं सन्तापं घ्नन्ति खण्डयन्ति शमयन्तीति
त्यनलदाः सनलदाश्च ता अनलदाः सिन्धवो नद्यः करिणां मुदे भवन्तीति शेषः। न
कुत्राप्युक्तवैपरीत्यमिति भावः॥ २५॥ ॥

सादृश्यमिति। एतस्मिन्वने अपनिद्रचूतगन्धैः सादृश्यङ्गतं फुल्लाम्रपुष्पसदृशं मदजलसेकजमामोदं परिमलं दधानो बिभ्राणः। अत एव लीनालिः सन्यक्तभृङ्गः

कुररीगणः कृतरवस्तरवः कुसुमानताः सकमलं कमलम्। इह
सिन्धवश्च वरणावरणाः करिणां मुदे सनलदानलदाः॥ २५॥
सादृश्यङ्गतमपनिद्रचूतगन्धैरामोदं मदजलसेकजं दधानः। एतस्मि
न्मदयति कोकिलानकाले लीनालिः सुरकरिणां कपोलकाषः॥ २६॥

सुरकरिणां कष्यते अनेनेति काषः। कपोलानां काषः कषणस्थानं द्रुमस्कन्धादि। अकाले वसन्तातिरिक्तकालेऽपि कोकिलान्मदयति। मित्तार्हंसः। अत्र वसन्तरूपकारणाभावेऽपि मदाख्यकार्योत्पत्तिकथनाद्विभावनालङ्कारः। तदुक्तम्। कारणेन विनाकार्य्यस्योत्पत्तिः स्याद्विभावनेति। चूतगन्धैः सादृश्यं इत्युपमया वा। आमोदं दधान इति पदार्थहेतुककाव्यलिङ्गेन चाङ्गाङ्गिभावेन संकीर्य्यते। किञ्च। कोकिलानां मदगन्धकृतनूतनगन्धभ्रान्त्या भ्रान्तिमदलङ्कारो व्यज्यते। प्रहर्षिणीवृत्तम्। म्नौ ज्रगौ विजिलक्षणात्॥ २६॥ ॥

सनाकेति। पुनश्च सनाकवनितं साप्सरस्कान्नितम्बैः कटकैः रुचिरम्। सुनिनदैः

सुधोनैर्नदैःप्रवाहैःवृतंअमुंगिरिमित्यर्थः । उपान्वध्याङ्वस इतिकर्मत्वम् । अव
नःअधोलोकरक्षकस्यफणवतोनागराजस्यमताइष्टा । गतिबुद्ध्यादिनावर्त्त
मानेक्तः । तद्योगात्षष्ठी । रसेनपरोत्कृष्टा । परांस्तवसुधाव्यक्तभूलोकासुधाअ
मृतंचिरमधिवसति । अतोन्यत्रभूमण्डलेकुत्रापिसुधानास्तीत्यर्थः । मेरुप्रभा
वोयंगिरिरितिभावः । अत्रप्रस्तुतविशेषणसामर्थ्यादप्रस्तुतमेरुप्रतीतेःसमासो
क्तिरलङ्कारःसच्चमनेकेनसंसृज्यते । रथोद्धतावृत्तम् । रन्नौरसाविति लक्षणा
त् ॥ २७ ॥ * * ** * * ॥
श्रीमदिति । अस्मिन्नद्रौश्रीमन्तमृद्धिमन्तंलतास्तवकभवनम् । ओषधयस्तृणज्यो

अनाकवनितंनितम्बरुचिरंचिरंसुनिनदैर्नदैर्वृतममुम् । मताफण
वतोवतोरसपरापरास्तवसुधासुधाधिवसति ॥ २७ ॥ श्रीमल्लताभ
वनमोषधयःप्रदीपाःशय्यानवानिहरिचन्दनपल्लवानि । अस्मिन्रतिश्र
मनुदश्चसरोजवाताःस्मर्तुंदिशन्तिनदिवःसुरसुंदरीभ्यः ॥ २८ ॥

तींष्येवप्रदीपाःनवानिहरिचन्दनपल्लवानिसुरतरुकिसलयान्येवशय्याः । ह
रिचन्दनमाख्यातंगोशीर्षेसुरपादपइतिविश्वः । रतिश्रमनुदःसुरतश्रमहारिणः
सरोजवाताश्चसुरसुन्दरीभ्यःक्रियाग्रहणाच्चतुर्थी । दिवोदिवम् । अधिगर्थेत्या
दिनाषष्ठीस्मर्तुंनदिशन्ति । विस्मारयन्तीत्यर्थः । स्वर्गादप्यतिरिच्यतेऽसावि
तिभावः । अत्रपूर्वार्द्धेरूपकत्रयंस्फुटमेव ॥ २८ ॥ * * ॥
ईशार्थमिति । ईशायइतिईशार्थंयथातथेतिक्रियाविशेषणम् । अर्थेनसहनित्य
समासः । सर्वलिङ्गताचवक्तव्या । चिरायचिरमभ्यसितपञ्चरन्ध्राव्रतएवयादोवि
लंघनविलोलविलोचनायाःजलजन्तुविघट्टितचलेक्षणायाःतपसोप्यधिकमुत्कलित

याविलोभयान्त्याइतिभावः। यादांसिजलजन्तवइत्यमरः। भवान्याःभव[illegible]ःप्र-
योगकालापेक्षोयंनिर्देशः। इन्द्रवरुणभवेत्यादिनाङीष्यानुगागमश्च। करैकदे-
शस्यापिकरत्वादयश्चासौकरश्चेतिसमानाधिकरणेसमासः। अतएववामनः। ह-
स्तायहस्तादयोगुणगुणिनोरभेदादिति। तमयकरम्भवःशिवःश्च्योतन्निदाघस-
लिलाङ्गुलिनास्ववस्वेदांगुलिनेतिसाभिकोक्तिः। करेणात्तगिरिवालंवत्तगृहीतवान्।
अत्राङ्गुनातीतवृत्तान्तस्यप्रत्यक्षवदभिधानाद्भाविकालङ्कारः। अतीतानागतेयत्रप्र-
त्यक्षवदलक्षिते। अत्यद्भुतार्थकार्यत्वाद्भाविकन्तदुदाहृतमितिलक्षणात्। वसन्त-
तिलकावृत्तम्॥ २९॥ *~* ॥ ○○○ ॥ *~* ॥ ○○○ ॥ *~* ॥

ईशार्थमम्भसिचिरायतपश्चरन्त्यायादोविलङ्घनविलोलविलोचनायाः। आ-
लम्बताग्रकरमत्रभवोभवान्याःश्च्योतन्निदाघसलिलाङ्गुलिनाकरेण॥२९॥
येनापविद्धसलिलःस्फुटनागसद्मादेवासुरैरमृतमम्बुनिधिर्ममन्थे। व्या-
वर्त्तनैरहिपतेरयमाहिताङ्कःखंव्यालिखन्निवविभातिसमन्दराद्रिः॥ ३०॥

येनेति। देवाश्चासुराश्चतैर्देवासुरैःयेषांचविरोधःशाश्वतिकइतिनैकवद्भावः।
एषांयतःकार्यतएवविरोधोनगोव्याघ्रादिवच्छाश्वतिकइत्याहुः। येनमन्दराद्रि-
णामन्थदण्डीकृतेनेतिभावः। अपविद्धसलिलःक्षिप्तजलःअतएवस्फुटंनागसद्म
पातालंयस्मिन्सोऽम्बुनिधिरमृतंममन्थेमथितम्। मथ्नातेर्द्विकर्मकत्वात्दुहा-
दित्वात्प्रधानेकर्मणिलिट्। अहिपतेर्मन्थगुणीकृतस्यवासुकेरित्यर्थः। मन्थानंम-
न्दरंकृत्वानेत्रंकृत्वानुवासुकिमितिभारतवचनात्। व्यावर्त्तनैर्वेष्टनैराहिताङ्कःकृ-
तचिह्नःसोयंमन्दराद्रिःखंआकाशंव्यालिखन्व्यापाटयन्निवविभाति। अत्रैतन्नत्यानु-
पादानेनैवखलेखनेनोत्प्रेक्षणादनुपात्तगुणनिमित्ताक्रियास्वरूपोत्प्रेक्षा॥३०॥*

नीतेति। इहाद्राविशिशिररश्मेरुष्णांशोरुस्रैर्मयूखैः संक्रान्तैरितिभावः। नीतोच्छायं। उच्छ्रायन्नीताविस्तारितेत्यर्थः। तथाऽऽनीलाभैरसितप्रभैरत्नैरिन्द्रनीलैर्विरचितपरभागा तत्सन्निधानाल्लब्धोत्कर्षैत्यर्थः। हंसइवश्येनी श्वेतवर्णा विशदश्येतपाण्डुराइत्यमरः। वर्णादनुदात्तात्तोपधात्तोनइति श्येतशब्दात् ङीप्। तकारस्य च नकारः। स्फटिकानां रजतानाञ्च भित्तयस्तासाञ्छाया कान्तिः अह्नामध्ये मध्याह्नेपीत्यर्थः। मुहुर्ज्यौत्स्नाशङ्काम्वितरति। ज्योत्स्नाकृतेभ्रान्तिञ्जनयतीति भ्रान्तिमदलङ्कारः॥ ३१॥ * * * ॥

नीतोच्छायंमुहुरशिशिररश्मेरुस्रैरानीलाभैर्विरचितपरभागारत्नैः। ज्योत्स्नाशङ्कामिहवितरतिहंसश्येनीमध्येप्यह्नःस्फटिकरजतभित्तिच्छाया॥ ३१॥ दधतइवविलासशालिनृत्यंमृदुपततापवनेनकम्पितानि। इहललितविलासिनीजनभ्रूगतिकुटिलेषुपयःसुपङ्कजानि॥ ३२॥ अस्मिन्नगृह्यतपिनाकभृतासलीलमाबद्धवेपथुरधीरविलोचनायाः। विन्यस्तमङ्गलमहौषधिरीश्वरायाःस्रस्तोरगप्रतिसरेणकरेणपाणिः॥ ३३॥

दधतइति। इहाद्रौमृदुपतता मन्दंवहतापवनेनकम्पितानिपङ्कजानि। ललितविलासिनीजनस्यभ्रूगतिवत् कुटिलेषुईषत्तरङ्गितेष्वित्यर्थः। पयस्सुविलासशालिनृत्यंदधतइव सविलासंनृत्यन्तीवेत्युत्प्रेक्षा। पुष्पिताग्रावृत्तम्॥ ३२॥ ❁ अस्मिन्निति। अस्मिन्नद्रौ पिनाकभृता शिवेनाधीरविलोचनायाश्चकितदृष्टेरुरगदर्शनादितिभावः। ईश्वरायागौर्याः। स्थेशभासेत्यादिनावरच्। पुंयोगविवक्षाभावान्नङीप्। आबद्धवेपथुः प्राप्तकम्पाइति सात्त्विकोक्तिः। ट्वितोऽथुजित्यथुच्प्रत्ययः। विन्यस्तामङ्गलमहौषधिर्यवाङ्कुरादिर्यस्मिन्सपाणिःस्रस्तोगलितःउरगएवप्रति

॥१०म०॥ सुरः कौतुकसूत्रं यस्य तेन । आङ्कुः प्रतिसरं हस्तसूत्रे मूल्ये च मण्डने इति विश्वः ।
॥सर्गः ५॥ करेण सलीलमगृह्णातेति देवस्य पार्वतीपरिणयनवर्णनम् । ईशार्थमित्यत्र चानुग्रह
॥ ५० ॥ मात्रे क्रिरित्यपौनरुक्त्यम् । भाविकमेवालङ्कारः ॥ ३३ ॥ ❁ * ❁ ~ ❁ * ❁ ॥

क्रामद्भिरिति । इहाद्रौ घनपदवीमाकाशं क्रामद्भिर्व्याप्नुवानैरनेकसंख्यैः परस्सहस्रैरित्यर्थः । क्वचिदनेकवर्णैरिति प्रामादिकः पाठ इति वैयर्थ्यात् व्याघाताच्चेति । शुचिमणिभ्यः स्फटिकेभ्यो जन्म येषान्तैः । जन्माद्युत्तरपदो बहुव्रीहिर्व्यधिकरणोपीष्यत इति वामनः । तेजोभिर्विभिन्नो विमिश्रः अत एव पर्यस्यन्प्रसर्पन्सप्तसप्तेस्सवितुरुस्राणां किरणानान्निचयो निकरः । सहस्रमिति संख्या सहस्रसंख्या तां स्वा

क्रामद्भिर्घनपदवीमनेकसंख्यैस्तेजोभिः शुचिमणिजन्मभिर्विभिन्नः ।
उस्राणां व्यभिचरतीव सप्तसप्तेः पर्यस्यन्निह निचयः सहस्रसंख्याम्
॥ ३४ ॥ अध्वन्यस्मिन्पुरमुच्चगोपुरम्पुरां विजेतुर्धृतये धनाधिपः ।
स एष कैलास उपान्तसर्पिणः करोत्यकालास्तमयं विवस्वतः ॥ ३५ ॥

नियतामिति शेषः । व्यभिचरति अतिक्रामतीवेत्युत्प्रेक्षा ॥ ३४ ॥ ❁ ❁ ❁ ❁ ॥

अधन्वेति । यस्मिन् कैलासे धनाधिपः कुबेरः पुरां विजेतुः शिवस्य धृतये सन्तोषायोच्चगोपुरमुन्नतपुरद्वारम् । पुरद्वारन्तु गोपुरमित्यमरः । पुरमलकाख्याम्पुरीं व्यधत्त निर्मितवान् तस्मिंस्त्वादिति भावः । स एष कैलास उपान्तसर्पिणः प्रान्तचारिणो विवस्वतोऽकाले प्रसिद्धेतरकाले अस्तमयं करोतीवेत्युत्प्रेक्षा । वस्तुतस्तु तत्कारणाभावाद्व्यञ्जकाप्रयोगाद्गम्योत्प्रेक्षा । सा चोपान्तवर्तितयाऽसम्बन्धे सम्बन्धलक्षणातिशयोक्त्युत्थापितेति विवेकः । अस्तमिति मकारान्तमव्ययम् । तस्य पचाद्यजन्तेनायशब्देन षष्ठीसमासः । वंशस्थं वृत्तमुक्तम् ॥ ३५ ॥ ❁ * ❁ * ❁ * ॥

नानेति । अमुष्मिन्कैलासेऽन्तःसानु सानुष्वित्यर्थः । विभक्त्यर्थेऽव्ययीभावः । नानारत्नज्योतिषां सन्निपातैर्व्यतिकरैश्छन्नेषु छादितेषु । वादान्तशान्तेत्यादिना निपातः । वप्रान्तरेषु कटकान्तरेषु बह्वाम्बह्वाम भीक्ष्णं बह्वां दृष्टोत्पादितामित्यर्थः । नित्यवीप्सयोरिति नित्यार्थे द्विर्भावः नित्यमभीक्ष्ण्यमिति काशिकायाम् । एकपदञ्चैतत् । भित्तिशङ्काम्भित्तिरिति सन्देहं भावानावानभीक्ष्ण्यमापतन् । आङ्पूर्वाद्धाधातोःशतृप्रत्ययः द्विर्भावादि पूर्ववत् । मातरिश्वा अन्तरिक्षे श्वयति गच्छति मातरिश्वा वायुः इति प्रत्ययः । तत्पुरुषे कृति बहुलमित्यलुक् । निहन्ति निवर्त्तयति वायुस्पर्शाद्भित्त्यभावोऽवधार्यत इत्यर्थः । अतो निश्चयान्तः सन्देहालङ्कारः । शालिनी

नानारत्नज्योतिषां संनिपातैश्छन्नेष्वन्तःसानु वप्रान्तरेषु । बद्धां बद्धां भित्तिशङ्काममुष्मिन्नावानावान्मातरिश्वा निहन्ति ॥ ३६ ॥ रम्या नवद्युतिरपैति न शाद्वलेभ्यः श्यामीभवन्त्यनुदिनं नलिनीवनानि । अस्मिन्विचित्रकुसुमस्तवकाचितानां शाखाभृताम्परिणमन्ति न पल्लवानि ॥ ३७ ॥

वृत्तम् ॥ ३६ ॥ ○○○○○○○○○○○○○○○○○○○○ ॥

रम्येति । अस्मिन्नद्रौ शादाः शष्पाणि सन्त्येष्विति शाद्वलास्तेभ्यः । शाद्वलः शादहरित इत्यमरः । नडशादाड्ड्वलच् । रम्या नवद्युतिर्नापैति किन्तु नित्येत्यर्थः । नलिनीवनान्यनुदिनं सर्वदा श्यामीभवन्ति न कदाचित्पाण्डरीभवन्तीत्यर्थः । विचित्रकुसुमस्तवकैराचितानां व्याप्तानां शाखाभृतान्तरूणाम् । पल्लवानि न परिणमन्ति । न जीर्णानि भवन्तीत्यर्थः सर्वदा नूतनान्येवेत्यर्थः । अत्र प्रस्तुतस्यैव तद्वस्तुगतकान्तिस्थैर्यरूपकार्यस्य वर्णनात् । प्रस्तुतमिव कारणं किञ्चित्साधारणं कैलासस्य महिमावगम्यत इति पर्यायोक्तिरलङ्कारः । तदुक्तम् । कारणं गम्यते यत्र

प्रस्तुतात्कार्यवर्णनात्। प्रस्तुतत्वेन संवन्धात्तत्पर्यायोऽयं समुच्चय इति॥ ३७॥ ॥
परिसरेति। इहाद्रौ परिसरविषयेषु पर्यन्तदेशेषु। विषये देश इति निदानतः। मृ
गीभिर्हरिततृणोद्गमशङ्कया नीलतृणाङ्कुरभ्रान्त्येति भ्रान्तिमदलङ्कारः। लीढपू
र्वमास्वादिताः पश्चान्मुक्ता लीढमुक्ताः दग्धप्ररूढ इत्यादिवत्पूर्वकालेत्यादिना समा
नाधिकरणसमासः नवशुककोमलाः शुकसवर्णा इत्यर्थः। मणीनां मरकतमणी
नाम्भासो रविकरैः सम्वलिताः मिश्रिताः सन्त्यः फलन्ति संमूर्छन्ति। वर्द्धत इतिदा
वत्॥ ३८॥ *~* ॥ ❀❀*❀❀ ॥ *~* ॥ ❀❀*❀❀ ॥ *~* ॥
उत्फुल्लेति। वात्याभिर्वातसमूहैः। वातादिभ्यो यदिति यत्प्रत्ययः। अमुष्माद्

परिसरविषयेषु लीढमुक्ता हरिततृणोद्गमशङ्कया मृगीभिः। इह न
वशुककोमला मणीनां रविकरसंवलिताः फलन्ति भासः॥ ३८॥ उत्
फुल्लस्थलनलिनीवनादमुष्मादुद्धूतः सरसिजसम्भवः परागः। वात्या
भिर्वियति विवर्तितः समन्तादाधत्ते कनकमयातपत्रलक्ष्मीम्॥ ३९॥

त्फुल्लस्थलनलिनीवनात् जलपतितस्य परागस्योत्थानासम्भवात्स्थलग्रहणम्।
उत्फुल्लसंफुल्लयोरुपसंख्यानान्निष्ठानत्वम्। उद्धूत उत्थापितो वियति समन्ता
द्विवर्तितः परिमण्डलितः। अन्तराले तु दण्डायमान एवेति भावः। सरसिजसम्भ
वः पद्मोद्भवः परागः। रूढ्यभिप्रायेणात्र सरसिजशब्दप्रयोगो द्रष्टव्यः। कनकम
यातपत्रलक्ष्मीमाधत्ते। अत्र परागस्यातपत्रलक्ष्मीसम्बन्धासम्भवात्। तत्सदृ
शीं लक्ष्मीमिति प्रतिबिम्बनाक्षेपादसम्भवद्धर्मसम्बन्धेयं निदर्शना। तदुक्तम्।
असम्भवद्धर्मयोगादुपमानोपमेययोः। प्रतिबिम्बक्रियागम्या यत्र सा स्यान्निदर्श
नेति॥ ३९॥ *~~~~* ॥ ❀*❀ ॥ *~~~~* ॥

ष्टुहेति। इहाद्रौउषसिप्रभातेसुरापगायांलक्षणयातत्कक्षेस्यावकासालक्तका
सव्यपादस्यलेखावामचरणमुद्रायस्यांसा। यावोलक्तकंस्मामयइत्यमरः। तथा
विषमाणिमहइदल्पानिपदानियस्यांसाविवर्त्तनेषुप्रदक्षिणक्रियासुपदवीशिव
योःप्रदक्षिणपद्धतिरित्यर्थः। सनियमयोःसंध्यायाम्प्रणमतोरित्यर्थः। शिवाच
शिवश्चतयोःशिवयोरुमाशङ्करयोः। पुमान्स्त्रियेत्येकशेषः। शरीरयोगंशरीरा
ङ्गसंघटनारूपङ्कथयति। सनियमयोरितिनियमविषयेऽपिविरहासहाविह्वविह
रतःशिवावितिभावः। अत्रपदवीविशेषणपदार्थयोःकथनंप्रतिहेतुत्वात्काव्यलिङ्ग
मलङ्कारः॥ ४०॥ * * ॥

इहसनियमयोःसुरापगायामुषसिसयावकसव्यपादलेखा। कथयति
शिवयोःशरीरयोगंविषमपदापदवीविवर्त्तनेषु॥ ४०॥ संमूर्च्छितार
जतभित्तिमयूखजालैरालोलपादपलतान्तरनिर्गतानाम्। घर्मद्युते
रिहमुहुःपटलानिधाम्नामादर्शमण्डलनिभानिसमुल्लसन्ति॥ ४१॥

संमूर्च्छितामिति। इहाद्रौरजतभित्तिमयूखजालैःसंमूर्च्छितानांबहुलीभवताम्। आ
लोलानांपादपलतानान्तरुशाखानांअन्तरेषुरंध्रेषुनिर्गतानाम्प्रसृतानांघर्मद्युते
रुष्णांशोर्द्धाम्नान्तेजसांआदर्शमण्डलनिभानिदर्पणविम्बसदृशानीत्युपमाल
ङ्कारः। पटलानिमण्डलानिमुहुर्वारंवारंसमुल्लसन्ति। पुनःपुनःस्फुरन्तिनतु
सातत्येनलतानामालोलत्वाभावात्। तच्चनान्यमृत्यायाणादिप्रायेणसम्भवतीति
भावः॥ ४१॥ * * ॥
शुक्लैरिति। शुक्लैर्मयूखनिचयैःशुभ्रकिरणसमूहैःपरिवीतमूर्त्तिर्व्याप्तदेहः। वप्रा
भिघातेनवप्रक्रीडयापरिमण्डलितोवर्त्तुलीकृतःउरुदेहोवृहच्छरीरोयस्यतथा.क्तो

।शि०व०। गणभर्त्तुः प्रमथनाथस्योक्षा वृषभः । उक्षानड्वान्बलीवर्द्द ऋषभो वृषभो वृष इत्यम
।सर्गे ५। रः । वधूजनमनस्सु शशाङ्कशङ्कां चन्द्रभ्रान्तिं कुर्वन्तेषां मौग्ध्यादिति भावः । अ
॥ ६१ ॥ मुष्याद्रेः शृङ्गाणि भजते । अत्र शङ्काशब्दस्य सन्देहार्थत्वे सन्देहालङ्कारः । भ्रान्ति
परत्वे भ्रान्तिमदलङ्कारः । यथेच्छसि तथास्तु । न चोक्षा विशेषणोत्थेन काव्यलिङ्गे
नाङ्गाङ्गिभावेन सङ्कीर्य्यते ॥ ४२ ॥ *०* ॥ ०~०*०~० ॥ *०* ॥

सम्प्रतीति । इह द्रौ विविधा नाना वर्णाः शिखरमणिरुचः सम्प्रति शरदीत्यर्थः । ल
घुन्यगुरूणि । कुतः क्षीणपयसि अत एव भिदां भेदम् । पिद्भिदादिभ्योऽङित्यङ्प्रत्य

शुक्लैर्मयूखनिचयैः परिवीतमूर्त्तिर्वप्राविघातपरिमण्डलितोरुदेहः । शृङ्गा
ण्यमुष्य भजते गणभर्त्तुरुक्षा कुर्वन्वधूजनमनस्सु शशाङ्कशङ्काम् ॥ ४२ ॥
सम्प्रति लब्धजन्म शनकैः कथमपि लघुनि क्षीणपयस्युपेयुषि भिदां जलधरपट
ले । खण्डितविग्रहं बलभिदो धनुरिह विविधाः पूरयितुम्भवन्ति विभवः शिखर
मणिरुचः ॥ ४३ ॥ स्नपितनवलतातरुप्रवालैरमृतलवस्रुतिशालिभिर्मयूखैः
। सततमसितयामिनीषु शम्भोरमलयतीह वनान्तमिन्दुलेखा ॥ ४४ ॥

यः । उपेयुषि गते जलधरपटले मेघमण्डले कथमपि शनकैर्लब्धजन्म उत्पन्नमि
त्यर्थः । अत एव खण्डितविग्रहं छिन्नस्वरूपं बलभिदः इन्द्रस्य धनुः पूरयितुं विभ
वः समर्था भवन्ति । अत्रैन्द्रधनुषो मणिरुचीनाम सम्बन्धे सम्बन्धकथनादतिशयो
क्तिरलङ्कारः । वंशपत्रपतितं वृत्तम् ॥ दिङ्मुनिभिर्वंशपत्रपतितम्भरनभनलगै
रिति लक्षणात् ॥ ४३ ॥ *००*००*००*००*००* ॥
स्नपितेति । इहाद्रौ शम्भोरिन्दुलेखा स्नपितानि सिक्तानि नवानि लतानां तरूणां
च प्रवालानि यैस्तैः । अमृतलवस्रुत्याऽमृतबिन्दुनिःस्यन्देन शालन्ते तैर्मयूखैः सततं

भ्रुवैकालंभवितयामिनीपुरुषपक्षरात्रिष्वपिवनान्तममलयतिधवलयति । अ
न्यत्रनैतदस्तीतिव्यतिरेकोव्यज्यते ॥ ४४ ॥ ✻ ✻ ✻ ॥
क्षिपतीति । अथयोऽद्रिरनुवनंविततांरौचनिकींत्वचंसौवर्णीमित्यर्थः । रोचनया
रक्तांरौचनिकीम् । लाक्षारोचनाशकलकर्द्दमाट्ठक् । टिड्ढाणञित्यादिनाङीप् ।
उत्प्रेक्ष्यते । वृहद्बृहतिकाम्महोत्तरासङ्गमिव । द्वौप्रावारोत्तरासङ्गौसमौबृहतिका
तथेत्यमरः । क्षिपतिप्रसारयति । अनेकाहिरण्मय्यःकन्दरायस्यसः । हिरण्म
यशब्दोदण्डिनायनेत्यादिनानिपातनात्साधुः । अयम्पुरोवर्त्तिगिरिरित्यर्थः । न
भपितुरिन्द्रस्यदयितःप्रियः । जगत्याधरोजगतीधरः । यस्तेगन्तव्यइन्द्रकील

क्षिपतियोनुवनंविततांबृहद्बृहतिकामिवरौचनिकींत्वचम् । अयम
नेकहिरण्मयकन्दरस्तवपितुर्दयितोजगतीधरः ॥ ४५ ॥ सक्तिञ्ज
वादपनयत्यनिलेलतानांवैरोचनैर्द्विगुणिताःसहसामयूखैः । रोधोभुवां
मुहुरमुत्रहिरण्मयीनाम्भासस्तडिद्विलसितानिविडम्बयन्ति ॥ ४६ ॥

ल इत्यर्थः ॥ ४५ ॥ ✻ ✻ ✻ ॥
सक्तिमिति । अमुत्रामुष्मिन्नद्रौअनिलेजवात्झटितिलतानांसक्तिंअन्योन्यसङ्गम
पनयतिसति । सहसाहठात्वैरोचनैःसावित्रैर्म्मयूखैर्द्विगुणिताद्विरावृत्ताःकृताइ
तिद्विगुणिताः । गुणस्त्वावृत्तिशब्दादिष्विन्द्रियामुख्यतन्तुष्वितिवैजयन्ती । हिरं
ण्मयीनां हिरण्यविकाराणाम् । दण्डिनायनेत्यादिनानिपातनात्साधुः । रोधोभु
वान्तटभुवाम्भासोमुहुस्तडिद्विलसितानिविडम्बयन्तिअनुकुर्वन्तीत्यर्थः । उपमा
लङ्कारः ॥ ४६ ॥ ✻ ✻ ✻ ॥
कपणेति । इहाद्रौकपणेनकण्डूयनेनकम्पस्तेननिरस्तामदाद्व्येमहासर्प्पाये

भ्यस्तैः। क्षणंविमत्तमतङ्गजवर्ज्जितैर्मत्तमतङ्गजरहितैः। कुतः मदस्नापितैरैरा
वतमदसिक्तैरित्यर्थः। मितां ह्रस्व इति ह्रस्वत्वम्। हरिचन्दनैश्चन्दनद्रुमैः सु
रगजस्यैरावतस्य गतम्प्राप्तिरनुमीयते। हरिचन्दनविशेषणैः काव्यलिङ्गमुन्ने
यम् ॥ ४७ ॥ ✿✿ ** ✿✿ ** ✿✿ ** ✿✿ ** ✿✿ ** ॥
जलदेति। इहास्मिन्नद्रौ जलदजालघनैर्मेघवृन्दसान्द्रैरसिताश्मनामिन्द्र
नीलानां मरीचिभिर्दीधितिभिः। भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियामि
त्यमरः। उपहतप्रचया विघट्टितसंघाता अत एवादीपितकन्दरा अप्रकाशितग

कषणकम्पनिरस्तमहाहिभिः क्षणविमत्तमतङ्गजवर्ज्जितैः। इह
मदस्नपितैरनुमीयते सुरगजस्य गतं हरिचन्दनैः ॥ ४७ ॥ जल
दजालघनैरसिताश्मनामुपहतप्रचये इह मरीचिभिः। भवति दीप्ति
रदीपितकन्दरा तिमिरसंवलितेव विवस्वतः ॥ ४८ ॥ भव्यो भवन्न
पि मुनेरिह शासनेन क्षात्रे स्थितः पथि तपस्य हतप्रमादः। प्रायेण सन्त्य
पि हितार्थकरे विधौ हि श्रेयांसि लब्धुमसुखानि विनान्तरायैः ॥ ४९ ॥

ह्वरा विवस्वतो दीप्तिस्तिमिरैः संवलिता व्यामिश्रितेव भवतीत्युत्प्रेक्षा ॥ ४८ ॥ *
। भव्य इति। इहाद्रौ भव्यः शान्तो भवन्नपि मुनेर्व्यासस्य शासनेन इन्द्राराधनरूपेण
क्षात्रे पथि क्षत्रियधर्मे स्थितो गृहीतशस्त्र एवेत्यर्थः। हतप्रमादोऽप्रमत्तः सन्त
पस्य तपश्चर्य्यां कुरु। तपस्येति कर्म्मणो रोमन्थतपोभ्यां वर्त्तिचरोरिति क्यप्। तदन्ता
द्धातोर्लोट्। नच सर्वभूतहितकारिणामेप्रमादः किङ्करिष्यतीति विश्वसितव्यमित्य
र्थान्तरन्यासेनाह। प्रायेणेति। हि यस्मात्प्रायेण बाहुल्येन। प्रायो वयस्यनश
ने मृतौ बाहुल्यतुल्ययोरिति हेमचन्द्रः। हितमर्थं करोतीति तस्मिन्विधौ व्यापारे स

ति अन्तरायैर्विघ्नैर्विनाश्रेयांसि लब्धुमसुखानि अशक्यानीत्यर्थः । अनएव शकधृ
षेत्यादिना समानकर्तृकेतिनुमुन् । अकारणवैरिणःसर्वे त्रैसर्वस्यापि सन्तीति भावः
॥ ४९ ॥ * ॥

माभूवन्निति । तव इन्द्रियाण्येव अश्वास्ते अपथेन हरन्तीत्यपथहरा माभूवन् त्वाम
पथ्यानं मा निनीषुरित्यर्थः । माङि लुङित्याशीरर्थे लुङ् । सन्तापे तपःक्लेशे सति शि
वः शिवां साधीयसीम्प्रसक्तिम्प्रवृत्तिमुत्साहं दिशतु । क्रिश्नेतिर्चार्थः । लोकपाला इ
न्द्रादयः तपसि विषये बलं शक्तिं रक्षन्तो वर्द्धयन्तः सन्तः कल्याणीं साध्वीं क्रियां अनु
ष्ठानं अधिकफलां क्रियासुः कुर्वन्तु । करोतेराशिषि लोट् ॥ ५० ॥ * ॥ ० ॥ * ॥

माभूवन्नपथहरास्तवेन्द्रियाश्वाः सन्तापे दिशतु शिवः शिवाम्प्रसक्तिम् । र
क्षन्तस्तपसि बलञ्च लोकपालाः कल्याणीमधिकफलां क्रियां क्रियासुः ॥
५० ॥ इत्युक्त्वा सपदि हितम्प्रियम्प्रियार्हं धाम स्वं गतवति राजराजभृत्ये ।
सोत्कण्ठं किमपि पृथासुतः प्रदध्यौ सन्धत्ते भृशमरतिं हि सद्वियोगः ॥ ५१ ॥

इतीति । प्रियार्हे राजराजभृत्ये इति पूर्वोक्तम् । हितं प्रियं वचनमिति शेषः । उ
क्त्वा सपदि स्वं स्वकीयं धाम स्थानं गतवति सति पृथासुतोऽर्जुनः सोत्कण्ठं सोत्सुकं किञ्चि
मपि प्रदध्यौ चिन्तयामास । तथाहि । सद्वियोगः सुजनवियोगो भृशमरतिं व्यथां
सन्धत्ते करोतीत्यर्थः । अर्थान्तरन्यासः ॥ ५१ ॥ * ० * ० * ॥

तमिति । अक्षता पूर्णाः लक्ष्म्यः शोभा यस्य सः अक्षतलक्ष्मीरिति बहुवचनाश्रितो
बहुव्रीहिः । एवमुरःप्रभृतिभ्यश्चेति कप्प्रत्ययानवकाशः । उरःप्रभृतिपाठसामर्थ्या
देव शैषिकस्तु वैभाषिक इत्यविरोधः । सोऽर्जुनः सर्वतः सर्वत्र सारयोगात् उत्कृष्टव
स्तुप्रयोगात् । सारो बले स्थिरांशे च न्याय्ये क्लीबे वरे त्रिषु इत्युभयत्राप्यमरः । अन

तिशयनीयमनतिक्रमणीयम् । अनेकेनबहुनाअङ्कभाजासमीपङ्गतेनशीघ्रभा-
विनेतियावत् । फलेनकार्य्यसिद्ध्याअविरहितमशून्यङ्कार्य्यसिद्धेरवश्यंसाधक-
मित्यर्थः । अकृशमतनु । चेतसाआशंसितम्प्राप्तुमिष्टंशैलमिन्द्रकीलंस्वंआत्मीय

तमनतिशयनीयंसर्वतःसारयोगादविरहितमनेकेनाङ्कभाजाफ-
लेन । अकृशमकृशलक्ष्मीश्चेतसाशंसितंस्वमिवपुरुषकारंशै-
लमभ्यासमाद ॥ ५२ ॥ इतिमहोपाध्यायश्रीभारविकृतौकि-
रातार्ज्जुनीयेमहाकाव्येहिमवद्वर्णनंनामपञ्चमःसर्गः ॥ ५ ॥

म्पुरुषस्यकारःकर्मतंपुरुषकारमुक्तविशेषणविशिष्टम्पौरुषमिवाभ्यासमाद् । मा-
लिनीवृत्तम् ॥ ५२ ॥ * ॥ इतिश्रीमहोपाध्यायमल्लिनाथसूरिविरचितायांकि-
रातार्ज्जुनीयव्याख्यायांघण्टापथसमाख्यायांपञ्चमस्सर्गः ॥ ५ ॥ * ॥ ❁ ॥ * ॥

रुचिराकृतिरिति । अथो आसादनानन्तरम् । रुचिराकृतिस्सौम्यविग्रहः । धृतसत्प
थोऽवलम्बितसन्मार्गः आकारानुरूपगुणवानित्यर्थः । यत्राकृतिस्तत्रगुणावसन्ती
तिसामुद्रिकाः । उपमानेपिसमानमेतत् । सपुरुहूतसुतोऽर्ज्जुनः । कनकस्य
विकारस्सानवोयस्यतङ्कनकसानुम् । गरुडसावर्ण्यार्थंविशेषणमेतत् । समुदा
येविकारषष्ठ्याश्चेतिबहुव्रीहिरुत्तरपदलोपश्चातइन्द्रकौलम्परमःपुमान्विष्णुः ।
पतताम्पक्षिणाम्पतिङ्गरुडमिव । त्रिभिःपथिभिर्गच्छतीतित्रिपथगाभागीरथी । अ
न्येष्वपिदृश्यतइतिडप्रत्ययः । उपपदसमासश्च । तामभितोऽभिमुखमारुरोह ।
संभ्रमेभयतःशीघ्रसाकल्याभिमुखेऽभितइत्यमरः । प्रमिताक्षरावृत्तम् । प्रमिता

रुचिराकृतिःकनकसानुमथोपरमःपुमानिवपतिम्पतताम् । धृ
तसत्पथस्त्रिपथगामभितस्सतमारुरोहपुरुहूतसुतः ॥ १ ॥
तमनिंद्यवन्दिनइवेन्द्रसुतंविहितालिनिक्वणजयध्वनयः । पवने
रिताकुलविजिह्मशिखाजगतीरुहोऽवचकरुःकुसुमैः ॥ २ ॥

क्षरासजसस्सैरुदितेतिलक्षणात् ॥ १ ॥ *०*—*०*—*०*—*०* ॥
अथास्यकार्य्यसिद्धिनिमित्तानिसूचयन्मार्गंवर्णयति । तमिति । विहितालि
निक्वणाजयध्वनयइवयैस्तेतथोक्ताः । पवनेरिताःपवनेनवायुनानुन्नाऽतएवाऽऽ
कुलालोलाविजिह्मावक्राश्चशिखाःअग्राणियेषान्तेतथोक्ताः । शिखाज्वालाकेकिमौ
ल्योःशिखाशाखाग्रमात्रयोरितिवैजयन्ती । जगतीरुहोभूरुहःकिपश्चनिंद्याऽनव
द्यायेवन्दिनःस्तुतिपाठकाइवतमिन्द्रसुतमर्जुनंकुसुमैरवचकरुःअभिववृषुरित्य
र्थः । ऋदृच्छत्पृतामितिगुणःअत्रकिरतेर्वृष्ट्यर्थत्वात्कुसुमानाङ्करणत्वंविक्षेपार्थत्वेतु
कर्मत्वमेवयथाकटाक्षान्वामावाकिरतीति । दृश्यतेच । धातूनामर्थभेदात्कारकव्य

न्वयः यथा सिन्धुतेः क्षरणार्द्रीकरणयोरर्थयोर्द्वन्द्वस्य कर्मत्वकरणत्वे यथा मेघोऽमृतं सिन्धुति गोः पयश्च सिन्धुति मेघाश्चामृतैर्वर्षुरिति अत्र वाक्ये समागतयोरुपमयोः साध्यसाधनभावादङ्गाङ्गिभावेन सङ्करः ॥ २॥ *~•~•~* ॥

अवधूतेति। अवधूताः पङ्कजपरागकणाः यैस्तेन तथोक्ताः। इति सौरभ्योक्तिः। तनूर्जाह्नव्याः सलिलवीचीभिदन्तीति तथोक्ताः। इति शैत्योक्तिः सुखयन्तीति सुखाः सुखस्पर्शाः इति मान्द्योक्तिः। पचाद्यच्। महतो वाताः तमर्जुनं सुहृदः सखायमिवाभिमुखमेत्यागत्य परिरेभिरे आलिङ्गितवन्तः॥ ३ ॥ * * * * * * * * * ॥

उदितेति। उदितोपलेषून्नतपाषाणेषु स्खलनेन प्रतिघातेन सम्बलिताः घूर्णिताः

अवधूतपङ्कजपरागकणास्तनुजाह्नवीसलिलवीचिभिदः। प
रिरेभिरेऽभिमुखमेत्य सुखाः सुहृदः सखायमिव तं मरुतः॥ ३॥
उदितोपलस्खलनसम्बलिताः स्फुटहंससारसविरावयुजः। मु
दमस्य माङ्गलिकतूर्य्यकृतां ध्वनयः प्रतेनुरनुवप्रमपाम् ॥ ४ ॥

अत एव तूर्य्यघोषइव धुमधुमायमाना इत्यर्थः। स्फुटैर्हंसानां सारसानाञ्च विरावैर्युज्यन्त इति तथोक्ताः अपाम्। अनुवप्रमपामन्तः पतन्तीनामिति शेषः। ध्वनयोऽस्यार्जुनस्य मङ्गलप्रयोजनमेषामस्तीति माङ्गलिकाः प्रयोजनमिति ठक्। तैस्तूर्यैः कृतां मुदं हर्षं प्रतेनुः। अत्रान्यस्यान्यकार्यकारणासम्भवात् तूर्य्यकृतामुत्सदृशीं मुदमिति प्रतिबिम्बनाक्षेपान्निदर्शनालङ्कारः॥ ४ ॥ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ॥

अवरुग्णेति। सोऽर्जुनः पुरोऽग्रे अवरुग्णतुङ्गसुरदारुतरौ भग्नोन्नतदेवदारुद्रुमे वलीयसि बलवत्तरे भवन्तादीयस्सु निमतो लुक्। सुरसरित्पयसां निचये पूरे विषये वेतसवनेन वानीरवनेनाचरितां। अथ वेतसे। रथाभ्रपुष्पविदुलशीतवानीरवञ्जु

वाड्यमरः। समृद्धिकरीं श्रेयस्करीं लोके यथा दृष्टामित्यर्थः। प्रणतिन्ददर्श।
यासर्वलोकदृष्टान्तभूतेतिभावः॥ ५॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁॥
प्रबभूवेति। सोऽर्जुनः परितः सरोजरजसा कमलरेणुनारुणितं उत्तरीयं कुसुमा
दिनारुणितं संहतिमन्नीरंध्रन्तरङ्गभङ्गिवारितरङ्गशोभि सरित्। उत्तरीयंस्त
नांशुकमिव स्थितं कलहंसकुलमवलोकयितुमलमत्यर्थन्न प्रबभूव न शशाक तन्सौ
न्दर्य्याद्येलत्वादिति भावः॥ ६॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁॥
दधतीति। क्षतीः क्षतानि दधति कुतः परिणतात्तिर्यग्दन्तप्रहारिणो द्विरदाय

अवरुग्णतुङ्गसुरदारुतरौ निचये पुरः सुरसरित्पयसाम्। स द
दर्श वेतसवनाचरितां प्रणतिम्बलीयसि समृद्धिकरीम्॥ ५॥
प्रबभूव नालमवलोकयितुम्परितः सरोजरजसाऽरुणितम्। स
रिदुत्तरीयमिव संहतिमत्स तरङ्गिभङ्गि कलहंसकुलम्॥ ६॥
दधतिं क्षतीः परिणतद्विरदे मुदितालियोषिति मदस्रुतिभिः। अ
धिकां स रोधसि बबन्ध धृतिं महते रुजन्नपि गुणाय महान्॥ ७॥

रिमन्तस्मिन्। तिर्यग्दन्तप्रहारस्तु गजः परिणतो मत इति हलायुधः। मदस्रु
तिभिर्मुदितालियोषिति रोधसि अधिकां धृतिं प्रीतिम्बबन्ध। निश्चलीकृतवानित्यर्थः।
तथाहि। महान् जनः रुजन् पीडयन्नपि महते गुणायोत्कर्षाय भवति। मह
त्कृता पीडापि प्रभावहैवेत्यर्थः। तदुक्तं गजरुग्णस्यापि रोधसः प्रीतिकरत्वमिति
भावः॥ ७॥ ✻ ❁ ✻ ❁ ✻ ❁ ✻ ❁ ✻ ❁ ✻ ❁ ✻ ❁ ✻ ❁ ✻ ❁॥
अन्विति। सोऽर्जुनोऽनुहेमवप्रङ्कनकसानुसमीपे। समीपार्थेऽव्ययीभावः। अ
रुणैः कनककान्त्युपरञ्जनादिति भावः। पृथुभिरूर्म्मिभिः समन्तात्तुल्यरूपताङ्गतम्

। सादृश्यात् दुर्वचनीयमितिभावः । सहभूतं सहचरम्प्रियं सहशब्दस्य पचाद्यज
न्तेन चरशब्देन समासः । कलमैर्दीनैःरुतैःकूजितैरनुबध्नतीमन्विष्यन्तीं रथा
ङ्गनामवनितां चक्रवाकीं अभिननन्द प्रहृष्टप्रेमदर्शनात्कस्य नानन्द इतिभावः । अ
त्रानावदूर्म्मीणां स्वधावल्यत्यागेनारुण्यस्वीकारात्तद्गुणालङ्कारः । तद्गुणः स्वगुण
त्यागादन्योत्कृष्टगुणाश्रयादिति लक्षणात्तन्मूलाचेयञ्चक्रवाक्याः स्वकान्ते नरङ्गभ्रा
न्तिरितितद्गुणभ्रान्तिमतोरङ्गाङ्गिभावेन सङ्करः ॥ ८ ॥ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ॥
सितवाजिन इति । चलवीचीनां रागो रञ्जनम्वर्णान्तरापादनं तस्य रचनाक्रियात

अनुहेमवप्रमरुणैः समतां गतमूर्म्मिभिः सहचरम्पृथुभिः । स
रथाङ्गनामवनिताङ्करुणैरनुबध्नतीमभिननन्द रुतैः ॥ ८ ॥
सितवाजिने निजगदू रुचयश्चलवीचिरागरचनापटवः । मणि
जालमम्भसि निमग्नमपि स्फुरितं मनोगतमिवाकृतयः ॥ ९ ॥
उपलाहतोद्धततरङ्गधृतं जविना विधूतविततं मरुता । स द
दर्श केतकशिखाविशदं सरितः प्रहासमिव फेनमपाम् ॥ १० ॥

त्रपटवः समर्थाः रुचयः प्रभाः । अम्भसि निमग्नमपि मणिजालं स्वाश्रयभूतमितिभा
वः । मनोगतं स्फुरितं रोषादिविकारमाकृतयो भ्रूभङ्गादिबाह्यविकारा इव सितवा
जिनेऽर्जुनाय निजगदुः ज्ञापयामासुरित्यर्थः ॥ ९ ॥ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ॥
उपलेति । उपलैराहता अत एवोद्धताश्च ये तरङ्गास्तैर्धृतं जविना वेगवता मरु
तावातेन विधूतं विततञ्च केतकस्य शिखाग्रं तद्वद्विशदं अपाम्फेनं डिण्डीरम् । डि
ण्डीरोऽब्धिकफः फेन इत्यमरः । सरितः प्रहासम्महाहासमिवेत्युत्प्रेक्षा । सोऽर्जुनो
ददर्श ॥ १० ॥ * ॥ ✿ ॥ * ॥ ✿ ॥ * ॥ ✿ ॥ * ॥ ✿ ॥ * ॥ ✿ ॥ * ॥

बह्विति । बर्हिचन्द्रकनिभं मयूरमेचकसदृशं । समौ चन्द्रकमेचकावित्यमरः ।
बहु अनेकधा दानपयसां पटलं जातावेकवचनं । बहवो मदाम्बुबिन्दव इत्यर्थः ।
अवगाढमन्तःप्रविष्टं ग्राहेः कर्त्तरि क्तः । इभपतिं ईक्षितुं विकसदुन्मिषन्तं सरितो
विलोचनशतमिवेत्युत्प्रेक्षा अस्य अर्जुनस्य धृतिं प्रीतिं विदधे ॥ ११ ॥ ✿ ✿ ✿ ✿ ॥
प्रतिबोधेति । प्रतिबोधः स्फुटनं निद्रापगमश्च तत्र यत् जृम्भणं उच्छूनता जृम्भा च
तेन विभिन्नमुखी विश्लिष्टाया विवृतास्या च । अत एव पतन् प्रसरन् अच्छो मौक्तिकमणी
नां प्रकरः स्तोमो यस्याः सा अत एव गलदश्रुबिन्दुरिव स्थितेत्युत्प्रेक्षा । शुक्तिर्वधूरिव

> बहु बर्हिचन्द्रकनिभं विदधे धृतिमस्य दानपयसां पटलम् । अ-
> वगाढमीक्षितुमिवेभपतिं विकसद्विलोचनशतं सरितः ॥ ११ ॥
> प्रतिबोधजृम्भणविभिन्नमुखी पुलिने सरोरुहदृशा ददृशे । पत-
> दच्छमौक्तिकमणिप्रकरा गलदश्रुबिन्दुरिव शुक्तिवधूः ॥ १२ ॥
> शुचिरप्सु विद्रुमलताविटपस्तनुसान्द्रफेनलवसम्वलितः । स्मर-
> दायिनः स्मरयति स्म भृशं दयिताधरस्य दशनांशुभृतः ॥ १३ ॥

पुलिने शय इति शेषः । सरोरुहदृशाऽर्जुनेन ददृशे दृष्टा । अत्र प्रतिबोधादिविशि-
ष्टपदोपात्तानां प्रकृतानां शुक्तिवध्वोश्चोपमारूपकयोः साधकबाधकाभावात्सन्देहा
लङ्कारस्तत्सापेक्षा चाश्रुगलनोत्प्रेक्षेति तयोरङ्गाङ्गिभावः ॥ १२ ॥ ✿ ✿ ✿ ✿ ॥
शुचिरिति । अप्सु शुचिः स्वच्छाः तनुना सान्द्रेण च फेनस्य लवेन शकलेन सम्वलितः ।
सङ्गतो विद्रुमलतायाः विटपः पल्लवः । विटपः पल्लवे षिङ्गे विस्तारे स्तम्बशाखयोरि
ति विश्वः । स्मरदायिनः कामोद्दीपकस्य दशनांशुभृतो दन्तकान्तिकलितस्येत्यर्थः ।
दयिताधरस्य । अधिगर्थेत्यादिना षष्ठी । भृशं स्मरयति स्म । लट् स्मे इति भूतार्थे ल

इमितां ह्रस्वः । स्मरणालंकारः ॥ १३ ॥ ॥
उपलभ्येति । सोऽर्जुनश्चञ्चलतरङ्गैर्धूतं न्वालंकान्तमित्यर्थः । मदगन्धमुपलभ्या
घ्रायपयसः । उत्थितवतां रोषादिति शेषः । करिणां यादसां शाकपार्थिवादिषु द्र
ष्टव्यः प्रतिदन्तिनामिवाभिमुखानभियातानित्यर्थः । करिणः सम्बुबुधे ददर्शेत्य
र्थः ॥ १४ ॥ ॥
स इति । सोऽर्जुनः पुरो ये सहसा समुत्पिपतिषोः समुत्पतितुमिच्छोः पतेः सन्नन्ताद्
प्रत्ययः । तनिपतिदरिद्राभ्यः सन् इड्वा वक्तव्यः । इति विकल्पादिडागमः फणि

उपलभ्य चञ्चलतरङ्गधृतं मदगन्धमुत्थितवतां पयसः । प्रतिद
न्तिनामिव स सम्बुबुधे करियादसामभिमुखान्करिणः ॥ १४ ॥
स जगाम विस्मयमुदीक्ष्य पुरः सहसा समुत्पिपतिषोः फणिनः । प्रहि
तं दिवि प्रजविभिः श्वसितैः शरदभ्रविभ्रममपांस्पटलम् ॥ १५ ॥
स ततार सैकतवतीरभितः शफरीपरिस्फुरितचारुदृशः । ललि
ताः सखीरिव बृहज्जघनाः सुरनिम्नगामुपयतीः सरितः ॥ १६ ॥

नः प्रजविभिरतिवेगवद्भिः श्वसितैः फूत्कारैर्दिवि आकाशे प्रहितं प्रेरितं शरदभ्र
विभ्रम इव विभ्रमः सौन्दर्यं यस्य तत् । शुभ्रमभ्रव्यापकञ्चेत्यर्थः । अपांस्पटलं पुरः
उदीक्ष्य विस्मयं जगाम । अत्रोपमानुप्राणितास्वभावोक्तिरलङ्कारः ॥ १५ ॥ *
स इति । सोऽर्जुनः सैकतवतीः पुलिनवतीरभितः शफरीणां मत्सीनां परिस्फुरि
तान्येव चारवो दृशो यासां ताः । सुरनिम्नगां गङ्गामुपयतीर्भजन्तीः इणः शतुरु
गित्वान्ङीप् । अत एव बृहज्जघना ललिताः सखीरिव स्थिताः सरितस्ततारभिच
क्रमे ॥ १६ ॥ ॥

अधिरुह्येति । सोऽर्जुनोऽधिरुह्य अर्थात् गिरिमिति शेषः । पुष्पभरेणानम्रशि
खैर्नतायैस्तरुभिः परितः परिष्कृततलां भूषितस्वरूपाम् । अधःस्वरूपयोरस्त्रीत
लमित्यमरः । सम्पर्य्युपेभ्यः करोतौ भूषणे सुडिति डागमः । शुचिं शुद्धां अतएवम
नसः प्रसत्तिमिव मूर्त्तां मनःप्रसादमिव स्थितां तदुक्तेनैतद्भावोत्प्रेक्षा । गिरेर्मूर्द्धि व
नान्तभुवमाससाद । अन्तशब्दः स्वरूपवचनः । अन्तोऽध्यवसिते मृत्यौ स्वरूपे नि
श्चयेऽन्तिक इति वैजयन्ती ॥ १७ ॥ * * ॥
अनुसान्विति । अनुसानु प्रतिसानु वीप्सार्थेऽव्ययीभावः । पुष्पिताः संजातपुष्पाः ल

अधिरुह्य पुष्पभरनम्रशिखैः परितः परिष्कृततलां तरुभिः । मन
सः प्रसत्तिमिव मूर्द्धि गिरेः शुचिमाससाद स वनान्तभुवम् ॥ १७ ॥
अनुसानु पुष्पितलताविततिः फलितोरुभूरुहविविक्तवनः । धृति
माततानतनयस्य हरेस्तपसेऽधिवस्तुमचलामचलः ॥ १८ ॥
प्रणिधाय तत्र विधिनाथ धियं दधतः पुरातनमुनेर्मुनिताम् । श्रम
माददावसुकरं न तपः किमिवावसादकरमात्मवताम् ॥ १९ ॥

ताविततयो यस्मिन्सः फलिताः उरुभूरुहाः येषु तानि विविक्तानि विजनानि पूतानि वा
वनानि यस्मिन्स तथोक्तः । विविक्तौ पूतविजनावित्यमरः । अचल इन्द्रकीलः हरेस्त
नयस्यार्जुनस्य तपसे तपश्चर्य्यार्थमधिवस्तुमधिष्ठातुम् । क्रियापेक्षया समानकर्तृ
कत्वात्तुमुन् । अचलां धृतिमुत्साहमाततान । अत्राचलविशेषणपदार्थस्य धृतिक
रणहेतुत्वात्काव्यलिङ्गमलङ्कारः ॥ १८ ॥ ॥
प्रणिधायेति । अथ तत्राद्रौ विधिना योगशास्त्रानुसारेण धियं चित्तवृत्तिं प्रणिधाय
ध्येयविषये धियं नियम्य । नेर्गदेत्यादिना णत्वम् । मुनितां दधतस्तपस्यतः इत्यर्थः

। पुरातनमुनेरर्ज्जुनस्येत्यर्थः । असुकरं दुःकरन्तपः श्रमं खेदञ्चाद्धैन चकार । तथाहि आत्मवतामनस्विनां अवसादकरमशान्तिजनकङ्किमिवनकिञ्चिदित्यर्थः । इवशब्दोवाक्यालङ्कारे ॥ १९ ॥ ० ॥ * ॥ ० ॥ * ॥ ० ॥ * ॥ ० ॥

शमयन्निति । धृतमिन्द्रियशमोविषयव्यावृत्तिरेवैकम्मुख्यंसुखंयेनसतथोक्तः आत्मारामइत्यर्थः । अन्यत्रधृतंकृतमिन्द्रियशमः सन्तापनिवर्त्तनमेकमद्वितीयंसुखमाह्लादश्चयेनसतथोक्तः । शुचिभिर्निर्मलैर्गुणैर्मैत्र्यादिभिरन्यत्रकान्त्यादिभिरघमयम्पापरूपन्तमः अज्ञानमन्यत्रान्धकारञ्चशमयन्निवर्त्तयन् । विमलोऽमलिनः शुभ्रोऽन्यत्रसोऽर्जुनः प्रतिवासरेसुकृतिभिः सुकृतैस्तपोभिरित्यर्थः । स्त्रियांक्तिन् कलाभिः

शमयन्धृतेन्द्रियशमैकसुखः शुचिभिर्गुणैरघमयंसतमः । प्रति
वासरंसुकृतिभिर्ववृधेविमलः कलाभिरिवशीतरुचिः ॥ २० ॥
अधरीचकारचविवेकगुणादगुणेषुतस्यधियमस्तवतः । प्रति
घातिनीम्विषयसङ्गरतिन्निरुपप्लवः शमसुखानुभवः ॥ २१ ॥

शीतरुचिश्चन्द्रइववववृधे ॥ २० ॥ ० * ~ * ० * ~ * ० * ~ * ० ॥

अधरीचकारेति । किञ्चेतिचार्थः विवेकस्तत्त्वावधारणं सएवगुणस्तस्मात्तेनहेतुनेत्यर्थः । विभायागुणेस्त्रियामितिपञ्चमी अगुणेषुकामक्रोधादिदोषेषुविषयेतद्विरोधेननञ्समासः धियञ्चित्तवृत्तिमस्तवतोनिवारितवतस्तस्यार्ज्जुनस्यनिरुपप्लवोनिर्बाधः शमसुखानुभवः शान्त्यानन्दानुभवः । प्रतिघातिनींसोपप्लवांविषयसङ्गरतिंशब्दाद्युपभोगरुचिमधरीचकारनिस्पृहाञ्चकारेत्यर्थः । उत्कृष्टसुखलाभस्यप्रकृष्टवैराग्यहेतुत्वादितिभावः ॥ २१ ॥ ० ~ ० * ० ~ ० * ० ~ ० ॥

मनसेति । प्रयतः अहिंसादिनिरतोमनसाध्यानेनजपैर्विशिष्टमन्त्राभ्यासैः प्रण

तिभिर्नमस्कारैः एवं मनोवाक्कायकर्मभिर्दिवोऽधिपतिमिन्द्रं समुपेयिवानुपसेदि
वान्सोऽर्जुनः सहजेतरैर्नैसर्गिकागन्तुकैर्जीयतेऽनेनेति जयो वीररसः । एरच्
। शाम्यतेऽनेनेति शमः । जयशमौ वीरशान्तिरसौ दधती पुष्णती महसी तेजसी यु
गपद्विभराम्बभूव बभार भृञ्ह्रीकृञ्वामिति विकल्पादाम्प्रत्ययः । अत्र युगपद्वीरशा
न्ताधिकरणाभिधानादस्य लोकादद्भुतमहिमत्वं व्यज्यते ॥ २२ ॥ ❁✻⁓✻❁ ॥
शिरसेति । हरिन्मणिनिभो मरकतमणिश्यामः अभिषवणेन स्नानेन कृतजन्मनो
जनिताः अतः पिशङ्गीरिति भावः । जटाः शिरसा वहन्सोऽर्जुनोऽरुणास्यानूरोर्दी

मनसा जपैः प्रणतिभिः प्रयतः समुपेयिवानधिपतिं स दिवः । सह
जेतरौ जयशमौ दधती बिभराम्बभूव युगपन्महसी ॥ २२ ॥ शि
रसा हरिन्मणिनिभः स वहन्कृतजन्मनोऽभिषवणेन जटाः । उ
पमां ययावरुणदीधितिभिः परिमृष्टमूर्द्धनि तमालतरौ ॥ २३ ॥
धृतहेतिरप्यधृतजिह्ममतिश्चरितैर्मुनीनधरयञ्शुचिभिः । र
जयाञ्चकार विरजाः स मृगान्कमिवेशते रमयितुं न गुणाः ॥ २४ ॥

धितिभिः परिमृष्टमूर्द्धनि व्याप्तशिरसि तमालतरावुपमां तमालतरोः सादृश्यं ययौ ।
इत्यार्थीयमुपमा तरोरौपम्याधिकरणत्वात्तदपेक्षया सप्तमी ॥ २३ ॥ ❁ ❁ ❁ ॥
धृतेति । धृतहेतिर्धृतायुधोऽप्यधृता जिह्ममतिः कुटिलमतिर्येन सः । शुचिभिश्च
रितैः मुनीनधरयन्तिरस्कुर्वन् । वेषेणैव भीषणो न तु कर्मणेति भावः । कुतो विर
जाः रजोगुणरहितः सोऽर्जुनो मृगान्रजयाञ्चकार रमयामास । रञ्जेर्णौ मृगरम
ण इति वक्तव्यादनुनासिकलोपः । तथा हि गुणाः दयादयः कमिव रमयितुं नेशते
कम्बा वशीकर्तुं न शक्नुवन्तीति भावः । शुद्धैरेव हि परं विश्वासदो जन्परस्य न वेषोना

विसंस्तवद्रुतिमानः ॥ २४ ॥ *~~~* ००० *~~~* ॥

अथास्य गिरिभिः ऋतुसिद्धिमाह । अनुकूलेत्यादिना । अनुकूलपातिनमननुप्रतिकूलपातिनमचण्डगतिमन्दगामिनं सुगन्धिं गन्धस्येत्येतदेकान्तग्रहणे पिकवीनां निरं कुशत्वान्नासान्तः । अथवा केचिद्गन्धकत्वेऽप्येकवचने समासान्तमिच्छन्ति । पवनमभितः किरता प्रवर्त्तयतेत्यर्थः । ऋतुरस्य प्राप्तः आर्तवः समयः तदस्य प्राप्तमिति अण्प्रत्ययः स चासौ गुणस्तिग्मत्वरूपः सोऽवधीरितस्तिरस्कृतो यस्य तं अंशुमतो रुचां निचयं सुखतां सुखस्पर्शतां नयता नयतिरिति द्विकर्मकत्वम् ॥ २५ ॥ *~* ॥

अनुकूलपातिनमचण्डगतिं किरता सुगन्धिमभितः पवनम् । अवधीरितार्तवगुणं सुखतां नयता रुचां निचयमंशुमतः ॥ २५ ॥

नवपल्लवाञ्जलिभृतः प्रचये बृहतस्तरून्गमयतावनतिम् । स्तृणता तृणैः प्रतिनिशं मृदुभिः शयनीयतामुपयती वसुधाम् ॥ २६ ॥

पतितैरपेतजलदान्नभसः पृषतैरपां शमयता च रजः । स दयालुनेव परिगाढकृशः परिचर्ययानुजगृहे तपसा ॥ २७ ॥

नवेति । प्रचये पुष्पावचयप्रसङ्गेन नवपल्लवा एवाञ्जलयस्तान् बिभ्रतीति तथोक्तान् बृहतः उच्चांस्तरूंनवनतिं गमयता । गतिबुद्ध्यादिना तरूणां कर्मत्वम् प्रतिनिशं निशि निशि शयनीयतामुपयतीं शयनस्थानीभूतामित्यर्थः । वसुधां मृदुभिस्तृणैः स्तृणता आच्छादयता ॥ २६ ॥ *~~~* ॥

पतितैरिति । अपेतजलदान्निरभ्रान्नभसः पतितैरपां पृषतैर्बिन्दुभिः रजश्च शमयता तपसा कर्त्रा दयालुनेवेत्युत्प्रेक्षा । दयालुत्वं सूचयति । परिगाढकृशोऽतिक्षीणः सोऽर्जुनः परिचर्ययोक्तविधया शुश्रूषया अनुजगृहेऽनुगृहीतः । अनुग्रहोऽत्र स

ह्यकारित्वमेवसर्वभूतानुकूल्यलिङ्गात्प्रचेलिमन्तपोऽस्येतिभावः । अत्रश्लोकत्रयस्याप्येकवाक्यत्वादुत्प्रेक्षैवप्रधानालङ्कारः ॥ २७ ॥

महतइति । सोऽर्जुनोमहतेफलायश्रेयसेशस्तायचविकसत्पूर्वोक्तंशिवन्निमित्तमेवकुसुमं । पुरोग्रेऽवेक्ष्यविस्मयवशंनजगाम । तथाहि । वशिनामनुभावएवगुणाःस्वधैर्येननिघ्नन्तिविस्मयादिविकारंनजनयन्तीत्यर्थः । तपःक्षरतिविस्मयादितिस्मरणादितिभावः ॥ २८ ॥

तदिति । सुकृतैस्तपोभिःकरणैरभूरिभिःकतिपयैरेववासरैःकृतन्तत्पूर्वोक्तंवैभव

महतेफलायतदवेक्ष्यशिवंविकसन्निमित्तकुसुमंसपुरः । नज
गामविस्मयवशंवशिनांननिघ्नन्तिधैर्यमनुभावगुणाः ॥ २८ ॥
तदभूरिवासरकृतंसुकृतैरुपलभ्यवैभवमनन्यभवम् । उपत
स्थुरास्थितविषादधियाशतयज्वनोवनचरावसतिम् ॥ २९ ॥
विदिताःप्रविश्यविहितानतयःशिथिलीकृतेधिकृतकृत्यविधौ ।
अनपेतकालमभिरामकथाःकथयांबभूवुरितिगोत्रभिदे ॥ ३० ॥

मन्यस्यनभवतीत्यनन्यभवमन्यस्यासाध्यमित्यर्थः । पचाद्युजन्तोत्तरपदेननञ्समासः । उपलभ्यनिश्चित्यआहितविषादाःप्राप्तखेदाःधियोयेषान्तेवनेचराः । वकुलग्रहणात्कुक्शतेनशतस्यवायज्वनःशतक्रतोःअत्रसंख्येयविशेषलाभोयजिसन्निधानादवगन्तव्यः । यज्वातुविधिनेष्टवानित्यमरः । सुयजोर्ङ्वनिप् । वसतिमुपतस्थुःप्रापुः ॥ २९ ॥

विदिताइति । वनचरइत्यनुवर्त्तनीयम् । विदिताःज्ञाताःअनुमतप्रवेशाःसन्तइत्यर्थः । प्रविश्यविहितानतयःकृतप्रणामाःअधिकृतकृत्यस्यनियुक्तकर्मणःशैलरक्ष

णात्मकस्यविधावनुष्ठानेशिथिलीकृतेसतिअनपेतशालमनतिक्रान्तकालंयथातथा गोत्रभिदेशक्रायइतिवक्ष्यमाणप्रकारेणअभिरामकथाःआप्तवाचः। चिन्तिपूजि कथिकुम्बिचर्चश्चेत्यप्रत्ययःकथयाम्बभूवुः ॥ ३० ॥ * * * * * * * * ॥

शुचीति। शुचिनावल्केनवल्कलेनवीताच्छादितातनुर्यस्यसः। तिमिरच्छिदांसूर्यादीनांमन्यतमइवस्थितइत्युत्प्रेक्षा। अनघःपुरुषःहेमघवन्भवतोगिरौइन्द्रकीलेजगतींभुवन्तपन्तापयन्महतेजयायतपस्यतितपश्चरति। कर्मणोरोमन्थेत्यादिनाक्यपिलट् ॥ ३१ ॥ *** ००० *** ००० *** ००० ॥

शुचिर्वीतवल्कावपुरन्यतमस्तिमिरच्छिदामिवगिरौभवतः। महते जयायमघवन्ननघःपुरुषस्तपस्यतितपन्जगतीम् ॥ ३१ ॥
सविभर्तिभीषणभुजङ्गभुजःपृथुविद्विषाम्भयविधायिधनुः। अमलेनतस्यधृतसच्चरितान्चरितेनचातिशयितामुनयः ॥ ३२ ॥
मरुतःशिवानवतृणाजगतीविमलन्नभोरजसिवृष्टिरपाम्। गुणसम्पदाऽनुगुणतांगमितःकुरुतेऽस्यभक्तिमिवभूतगणः ॥ ३३ ॥

जयायतपस्यतीत्युक्तन्तत्रहेतुमाह। सइति। भीषयतेइतिभीषणंनन्द्यादित्वात् ल्युप्रत्ययः। तौचतौभुजङ्गौचतावविभुजौयस्यसतथोक्तः। पुरुषोविद्विषाम्भय विधायिपृथुधनुर्विभर्तिअतोजयार्थीत्यर्थः। अमलेनतस्यपुरुषस्यचरितेनधृता निसच्चरितानियैस्तेमुनयोऽतिशयिताअतिक्रान्ताः ॥ ३२ ॥ ००००० ॥

अथास्यतपःसिद्धिंवर्णयति। मरुतइत्यादिना। मरुतोवाताःशिवाःसुखाःजगती पृथ्वीनवतृणाशयनासनाद्यनुकूलेत्यर्थः। नभोविमलन्नीहारादिरहितंरजसि सतिअपांवृष्टिर्भवतीतिशेषः। किञ्चकृतःअस्यपुरुषस्यगुणसम्पदाभूतहिताद्वि

गुणसम्पत्त्या अनुगुणतामनुकूलताङ्गमितो वशीकृत इत्यर्थः । भूतगणः पृथिव्या दिपञ्चकः भक्तिं सेवां कुरुत इव इत्युत्प्रेक्षा ॥ ३३ ॥ ✿✿✿✿✿✿✿✿✿ ॥

इतरेतरेति । किञ्च मृगास्तं अन्तेऽन्तिके सीदन्तीत्यन्तसदोऽन्तेवासिनः सत्सूद्विषेतिक्विप् । गुरुमिव इतरेतरेषामनभिभवेनाद्रोहेणोपासते । प्रचये पुष्पावचये तरवोऽस्य विनमन्ति । करप्रचेया भवन्तीत्यर्थः । अस्येति सम्बन्धसामान्ये षष्ठी । किम्बहुना । स नगइन्द्रकीलो भवतेव तेन परवान्पराधीनः सचिकस्यापि तवेव तस्यातिशयो वर्तत इत्यर्थः ॥ ३४ ॥ *~* ॥ ✿✿✿**✿✿✿ ॥ *~* ॥

इतरेतरानभिभवेन मृगास्तमुपासते गुरुमिवान्तसदः । वि
नमन्ति चास्य तरवः प्रचये परवान्स तेन भवतेव नगः ॥ ३४ ॥
उरु सत्त्वमाह विपरिश्रमता परमं वपुः प्रथयतीव जयम् । श
मिनोपि तस्य नवसङ्गमने विभुतानुषङ्गि भयमेति जनः ॥ ३५ ॥
ऋषिवंशजः स यदि दैत्यकुले यदि वान्वये महति भूमिभृताम् ।
चरतस्तपस्तव वनेषु सहा न वयं निरूपयितुमस्य गतिं ॥ ३६ ॥

उर्विति । किञ्च विपरिश्रमता आयासेपि श्रमराहित्यं उरु महत्सत्त्वं अन्तःसारमाह । दुर्बलस्य श्रमजया सम्भवादिति भावः । परमं वपुः जयम्प्रथयति च आकारेणैव जिष्णुत्वङ्गम्यत इत्यर्थः । शमिनः शान्तस्यापि तस्य नवसङ्गमनेऽपूर्वप्राप्तौ जनो विभुतायाः प्रभावस्यानुषङ्गि व्यापकं न तु हिंस्रत्वानुषङ्गीति भावः । भयमेति । शान्तो ङ्खवम्पराभवङ्गमयतीति भावः ॥ ३५ ॥ *~* ॥ *~* ॥ *~* ॥

अथेदृशो सौ क इति चेत्तन्न विद्म इत्याहुः । ऋषीति । स पुरुष ऋषिवंशजो वेति शेषः काकुर्वा । यदि वा दैत्यकुले जात इति शेषः । यदि वा महति भूमिभृतामन्वये

ज्ञातःतववनेषुतपश्चरतोस्यगतिंस्वरूपंनिरूपयितुंवयंसहन्ताइतिसहाःपचाद्यच्
।नसहाअसहाइतिशेषः ॥ ३६ ॥ *~* ॥ ०*० ॥ ०*० ॥ *~* ॥
अपृष्टपरिभाषणापराधम्परिहरति।विगणय्येति।अनेकगुणंबहुफलंइन्द्र
त्वाद्यनेकफलसाधकत्वेनयोग्यमित्यर्थः।कारणन्तपोरूपंविगणय्यविचार्यअथवा
निजयानैसर्गिक्याअल्पतयावाविश्लेनवाकथितंनोस्माकंअदःइदंवचनमित्य
र्थःअदसाध्यपिसहितुंसेढुन्तीषसहेत्यादिनाविकल्पादिडागमः। अर्हसि
।सदेवकिन्नोमन्तव्याऽऽह।वनेचराःकनिपुणामतयो।विवेकबुद्धयःकनोमयंसङ्ग

विगणय्यकारणमनेकगुणंनिजयाथवाकथितमल्पतया। अस
दप्यदःसहितुमर्हसिनःकवनेचराःकनिपुणामतयः ॥ ३७ ॥
अधिगम्यगुह्यकगणादितितन्मनसःप्रियम्प्रियसुतस्यतपः। नि
जुगोपहर्षमुदितंमघवानयवर्त्मगाःप्रभवतांहिधियः ॥ ३८ ॥
प्रणिधायचित्तमथभक्ततयाविदितेप्यपूर्वइवतत्रहरिः। उपल
ब्धुमस्यनियमस्थिरतांसुरसुन्दरीरितिवचोऽभिदधे ॥ ३९ ॥

च्छतइत्यर्थः।अज्ञानेनापराध्यतीतिभावः।अर्थान्तरन्यासोलङ्कारः ॥ ३७ ॥ ०
अधिगम्येति।मघवाइन्द्रइतिगुह्यकगणात्मनसःप्रियम्प्रियसुतस्यार्जुनस्यत
पअधिगम्यज्ञात्वागुप्त्यपेक्षयासमानकर्तृकत्वात्क्त्वाल्यप्निर्देशश्छादितन्तत्तपसोदेव
कार्यार्थत्वादुत्पन्नंहर्षंनिजुगोप । तथाहि। प्रभवताम्प्रभूणान्धियोनयवर्त्मगानी
तिमार्गानुसारिण्योहि।अन्यथामन्त्रभेदेकार्यहानिःस्यादितिभावः ॥ ३८ ॥ ० ॥
प्रणिधायेति।अथहरिरिन्द्रश्चित्तम्प्रणिधायविषयान्तरपरिहारेणआत्मन्यव
स्थाप्यतत्रतस्मिन्नर्जुनेभक्ततयाविदितेसत्यपिउपलक्षणेतृतीया। अपूर्वइवावि

दिनइवेत्यर्थः । पूर्वादिभ्योनवभ्योवेतिविकल्पात्स्मिन्नादेशः । अस्यार्जुनस्यम
नसःस्थिरतान्दार्ढ्यमुपलब्धुम्परीक्षितुमित्यर्थः । लोकप्रतीत्यर्थमितिभावः । सुर
सुन्दरीरितिवक्ष्यमाणप्रकारंवचोऽभिदधे ॥ ३९ ॥ ॥
सुकुमारमिति । मर्मभिदांमर्मच्छेदिनामस्त्राणांमध्यइत्यर्थः । यतश्चनिर्द्धारण
मितिषष्ठी अपरमन्यत्कतमम् । वाबहूनांजातिपरिप्रश्नेडतमच् । पूयमिवसुकु
मारंनतुकठिनम् । अन्यत्तुकठिनम्भवति । तथाएकंनबहुतत्तु अनेकम्भवतित
थाऽणुसूक्ष्मन्नस्थूलम् । अलक्ष्यप्रवेशित्वादितिभावः । तत्तुलक्ष्यप्रवेशि । तथा
अतिदूरगंदूरलक्ष्यभेदितत्तुसमीपलक्ष्यभेदि । तथाअमोघतयाअमोघत्वगुणेनयु

सुकुमारमेकमणुमर्मभिदामतिदूरगंयुतममोघतया । अवि
लक्ष्यमस्त्रमपरङ्कतमंविजयायपूयमिवचित्तभुवः ॥ ४० ॥
भववीतयेहतबृहत्तमसामवबोधवारिरजसःशमनम् । परि
पीयमाणमिववोऽसकलैरवसादमेतिनयनाञ्जलिभिः ॥ ४१ ॥

तंयुक्तन्नकदाचिद्व्यभिचरतीतिभावः । अन्यत्तुकदाचिदपिलक्ष्यादपराध्यति । त
थाअविलक्ष्यमसत्प्रतिकारं । अन्यद्विद्यमानप्रतीकारंअस्त्रञ्चित्तभुवःकामस्यकर्त्त
रिषष्ठीविजयायअस्तीतिशेषःनकिञ्चिदस्तीत्यर्थः । अत्रोपमालङ्कारः । साभिप्राय
विशेषणत्वात्परिकरालङ्कारश्च । तयोरुभयोःसङ्करः ॥ ४० ॥ ॥
असामर्थ्यशङ्काम्परिहरति । भवेति । भववीतयेसंसारनिवृत्तयेहतबृहत्तमसांनि
रस्तमहामोहानांयोगिनांसम्बन्धिरजोगुणःरजोधूलिरितिश्लिष्टरूपकम् । तस्य
शमनन्निवर्त्तकंअवबोधस्तत्त्वज्ञानमेववारितद्वोयुष्माकमसकलैरसमग्रैर्नयनान्ये
वाञ्जलयस्तैःपरिपीयमाणमिवेत्युत्प्रेक्षा । अवसादंतपःक्षयमेति । मुक्तानपिबध्न

तीनां वः कथमसामर्थ्यमिति भावः। अत्रोत्प्रेक्षारूपकयोः सङ्करः ॥ ४१ ॥ ** ॥
वसुधेति। किञ्च पुरा जगति वसुधागतान्ननाभिमुखेन विप्रकीर्णां कमनीयतां चन्द्रा
द्युपमानद्रव्यगतलावण्यं समभिहृत्य संगृह्य भवतीर्विदधता भूतस्रजा ब्रह्मणा ज
नता जनसमूहः। ग्रामजनेत्यादिना तल्। सुरसद्मयानसुमुखी स्वर्लोकयात्राप्र
वणा उपपादिता कृता स्वर्गस्यापि यत्प्रसादात् सर्वलोकश्लाघ्यत्वं तासां वः कथमसाम
र्थ्यमिति भावः। अत्राप्सरसां प्रकीर्णलावण्यसंग्रहात्सम्बन्धेऽपि तत्सम्बन्धाभिधानाद
तिशयोक्तिः ॥ ४२ ॥ * ॥ * ॥ * ॥ * ॥ * ॥
अथ कार्यशक्तिमाह। तदिति। तत् तस्मात् समर्थत्वात् कलासु गीतवाद्यादिषु कृतिभि:

वसुधागताज्जगति भूतस्रजा कमनीयतां समभिहृत्य पुरः। उपपा
दिता विदधता भवतीः सुरसद्मयानसुमुखी जनता ॥ ४२ ॥
तदुपेत्य विघ्नयत तस्य तपः कृतिभिः कलासु सहिताः सचिवैः। हृत
वीतरागमनसां ननु वः सुखसङ्गिनं प्रति सुखावजितिः ॥ ४३ ॥

कुशलैः सचिवैर्गन्धर्वैः सहिता उपेत्य तस्य पुरुषस्य तपो विघ्नयत विघ्नवत्कुरुत विह
तेत्यर्थः। विघ्नवच्छब्दान्मत्वन्तात्तत्करोतीति णिचि लोपे इष्ठवद्भावान्मतुपो लुक्।
न चात्रासामर्थ्यशङ्का कार्येत्यर्थान्तरन्यासेनाह। ननु सम्बोधने हे अप्सरसो वो यु
ष्माकमप्सरसां सुखसङ्गिनं पुरुषं प्रति सुखाभिलाषिणं प्रत्यवजितिर्विजयः सु
खानतुदुःकरा किंलक्षणानां वः हृतवीतरागमनसाम्। हृतानि वशीकृतानि वीतरागा
णां निःस्पृहाणां मुमुक्षूणां मनांसि चित्तानि याभिस्तासां तेनायं सुखार्थी न मुमुक्षुरित्यु
क्तम्। अर्थान्तरन्यासः ॥ ४३ ॥ ॥
अथ सुखसङ्गित्वलिङ्गमाह। अविमृष्येति। हे अप्सरसः एतद्विषयसक्तत्वं अवि

मृष्यमित्यवैतद्भवतिनसन्दिग्ध्यमित्यर्थः । सपुरुषोऽद्विषतांशत्रूणांवधेनशङ्कु
हननद्वारविषयाभिरतिंविषयसुखमभिलष्यतिवाञ्छति । वाभ्राशेत्यादिनाश्य
न्प्रत्ययः । अविमृश्यमितिऋदुपधाच्चाक्लृपिचृतेरितिक्यप् । हियस्मात्सविधिःसवि
भर्तिभीषणभुजङ्गभुजेत्यादिश्लोकोक्तोऽनुष्ठानप्रकारोभववीतयेमुक्तयेनभवति ।
कुतइत्याह । शरासनन्धनुःक्व । मुक्तिपथाःक्वचपरस्परंविरुद्धमित्यर्थः । नखलु
हिंसासाध्यामुक्तिरितिभावः । अर्थान्तरन्यासोऽलङ्कारः ॥ ४४ ॥ * * ॥
नचशापभयमपिसम्भाव्यमस्मादित्याह । पृथ्विति । पृथुधाम्निमहातेजसितत्रत
स्मिन्पुरुषविषयेऽन्यमुनिवदन्यस्मिन्मुनाविवतत्रतस्येवेतिवतिप्रत्ययः । विकृ

अविमृश्यमेतदभिलष्यतिसद्विषतांवधेनविषयाभिरतिम् । भ
ववीतयेनहितथासविधिःक्वशरासनंक्वचविमुक्तिपथाः ॥ ४४ ॥
पृथुधाम्नितत्रपरिबोधिचमाभवतीभिरन्यमुनिवद्विकृतिः । स्वय
शांसिविक्रमवतामवतांनवधूष्वघानिविमृषन्तिधियः ॥ ४५ ॥

तिःकोपविकारश्चभवतीभिर्मापरिबोधि । माविक्रियाशङ्कीतियावत् । बुध्यतेःकर्म
णिलुङ्माङ्योगादाशीरर्थेऽडागमाभावश्च । तथाहि । स्वयशांसिअवतांरक्षतांय
शोधनानामित्यर्थः । विक्रमवतांधियश्चित्तानिवधूषुस्त्रीविषयेष्वघानिव्यसनानि ।
दुःखैनोव्यसनेष्वघमितिवैजयन्ती । नविमृषन्तीत्यर्थान्तरन्यासः । स्त्रीहिंसायाः
शूराणांयशोहानिकरत्वान्नसर्वथावोहिनस्मीतिसङ्ग्यर्थः ॥ ४५ ॥ * * ॥
आशंसितेति । अमर्त्यवधूसमूहोऽप्सरसाङ्गणः । सुराणाम्पुरोऽग्रेआशंसितापचितिभिरपेक्षितसम्भावनाभिश्चारुयथातथा । क्षयार्चयोरपचितिरित्यमरः । अ
भिमुखंसमक्षम्भर्तुःस्वामिनःइतिपूर्वोक्तमादेशन्नियोगंसमवाप्यपरांद्युतिंलेभे । त

थाहि। अधिकृतस्य क्वचिदधिकारे नियुक्तस्य सम्भावना स्वामिकृता पूजा तेजः कान्तिं
तनोति ॥ ४६ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥
प्रणतिमिति। अथ प्रणतिं विधाय सद्मनः इन्द्रभवनात्प्रस्थिताः प्रचलिताः स्तनभरै
र्नमितानि अङ्गानि यासां ताः अङ्गकण्ठगात्रेभ्यश्चेति वक्तव्यात् ङीप्। प्रीतिभाजः स्वा
मिसम्भावनया सन्तुष्टाः ताः अङ्गनाः अचलनलिनानां स्थिरकमलानां लक्ष्मीं हरती

आशंसितापचितिचारुपुरः सुराणामादेशमित्यभिमुखं समवाप्य भर्तुः
। लेभे परां द्युतिममर्त्यवधूसमूहः सम्भावना ह्यधिकृतस्य तनोति तेजः
॥ ४६ ॥ प्रणतिमथ विधाय प्रस्थिताः सद्मनस्ताः स्तनभरनमिताङ्गी
रङ्गनाः प्रीतिभाजः। अचलनलिनलक्ष्मीहारि नालं बभूव स्तिमितममर
भर्तुर्द्रष्टुमक्ष्णां सहस्रम् ॥ ४७ ॥ इति महोपाध्यायश्रीभारविकृ
तौ किराताऽर्जुनीये महाकाव्ये युवतिप्रस्थानं नाम षष्ठः सर्गः ॥ ६ ॥

ति तथोक्तम्। तद्वन्मनोहरमित्यर्थः। कुतस्तिमितं विस्मयनिश्चलममरभर्तुर
क्ष्णां सहस्रं कर्तृ द्रष्टुमलं समर्थं न बभूव। तासां सौन्दर्यस्य सागरस्योद्वेलत्वादिति भावः
अत्रोपमालङ्कारः ॥ ४७ ॥ * ॥ इतिश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरि
विरचितायां किरातार्जुनीयव्याख्यायां घण्टापथसमाख्यायां षष्ठः सर्गः ॥ ६ ॥ ❁ ॥

श्रीमद्भिरिति । अथ प्रस्थानानन्तरं श्रीमद्भिः शोभावद्भिः सह रथगजेन सरथ
गजास्तैः तेन सहेति तुल्ययोगे इति बहुव्रीहिः । त्रयाणां लोकानां भर्तुस्त्रिलोकभर्तु
रिन्द्रस्य । तद्धितार्थेत्यादिनोत्तरपदसमासः । सचिवैर्गन्धर्वैर्गुप्तानां सुङ्गना
नां प्रस्थानं गमनं मलघु महत्सु विमानरन्ध्रेषु कुक्षिषु भिन्नः प्रतिध्वानैरनेकीभू
तः । अत एव संमूर्छन् व्याप्नुवन् मृदङ्गनादः समभिदधे आचख्यौ । पौरेभ्य इति
शेषः । अस्मिन्सर्गे प्रहर्षिणीवृत्तम् । म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयमिति ल
क्षणात् ॥ १ ॥

श्रीमद्भिः सरथगजैः सुराङ्गनानां गुप्तानामथ सचिवैस्त्रिलोकभर्तुः । सं
मूर्छन्नलघुविमानरन्ध्रभिन्नः प्रस्थानं समभिदधे मृदङ्गनादः ॥ १ ॥
सोत्कण्ठैरमरगणैरनुप्रकीर्णान्निर्याय ज्वलितरुचः पुरान्मघोनः ।
रामाणामुपरि विवस्वतः स्थितानां नासेदे चरितगुणत्वमातपत्रैः ॥ २ ॥
धूतानामभिमुखपातिभिः समीरैरायासादविशदलोचनोत्पलानां । आ
निन्ये मदजनितां श्रियं वधूनामुष्णांशुद्युतिजनितः कपोलरागः ॥ ३ ॥

सोत्कण्ठैरिति । सोत्कण्ठैरवेक्षणोत्सुकैरित्यर्थः । अमरगणैरनुप्रकीर्णादाकी
र्णात् ज्वलितरुचो दीप्तप्रभान्मघोनः इन्द्रस्य पुरादमरावत्याः निर्याय निर्गत्य । याते
र्ल्यप् । विवस्वतः उपरि स्थितानां रामाणां आतपात्त्रायन्त इत्यातपत्रैः । सुपीति यो
गविभागात्कप्रत्ययः । चरितगुणत्वं सार्थकत्वं नासेदे न प्रापि । आतपत्राणां सम्भ
वादिति भावः ॥ २ ॥

धूतानामिति । अभिमुखपातिभिः समीरैः प्रतिकूलवायुभिर्धूतानामिति दुर्निमित्त
सूचनं । आयासाद्गतिप्रयासादविशदलोचनोत्पलानां वधूनां उष्णांशुद्युतिजनि



44464

तः आतपक्षतः कपोलानां रागः पाटलत्वं मदेन जनितां श्रियन्तत्सदृशीं श्रियमित्यर्थः । अत एव निदर्शनालङ्कारः । आनिन्ये आनीतवान् । वधूरिति शेषः । आङ्पूर्वा न्नयतेः कर्त्तरि लिट् । ञकारानुबन्धत्वादात्मनेपदम् ॥ ३ ॥ ॥

तिष्ठद्भिरिति । कथमपि वाढं । कथमादितथाप्यन्तं यत्नगौरवबाढयोरिति वैजयन्ती । देवतानामनुभावात्तिष्ठद्भिरपतद्भिरित्यर्थः । रथविशेषणमेतत् प्रजविभिर्वेगवद्भिस्तुरङ्गैरायतं दूरमाकृष्टैः रथौघैर्वियति नेमीनाञ्चक्रधाराणां । चक्रधारा प्रधिर्नेमिरित्यादवः । विवर्त्तने भ्रमणेऽसति विमानवद्विमानानामिवेत्युपमातत्र तस्यैवेति वति प्रत्ययः । प्रवृत्तिर्गतिरासेदे प्राप्ता सदेः कर्मणि लिट् ॥ ४ ॥ ॥

तिष्ठद्भिः कथमपि देवतानुभावादाकृष्टैः प्रजविभिरायतन्तुरङ्गैः ।
नेमीनामसति विवर्त्तने रथौघैरासेदे नभसि विमानवत्प्रवृत्तिः ॥ ४ ॥
कान्तानां कृतपुलकः स्तनाङ्गरागे वक्त्रेषुच्युततिलकेषु मौक्तिकाभः । सं
स्पेदे श्रमसलिलोद्गमो विभूषां रम्याणां विकृतिरपि श्रियन्तनोति ॥ ५ ॥

कान्तानामिति । कान्तानां स्तनानामङ्गरागे कृतपुलको जनितोद्भेदः कृतरोमाञ्च इत्यर्थः । च्युताः प्रमृष्टास्तिलका येषान्तेषु वक्त्रेषु मौक्तिकाभः । श्रमसलिलोद्गमः स्वेदोद्भेदो विभूषम्भूषणं सम्पेदे संपन्नः कर्त्तरि लिट् । तथाहि । रम्याणां स्वभावसुन्दराणां विकृतिरपि श्रियन्तनोति । अतः स्वेदस्यापि विभूषणत्वमुपपद्यत इति भावः ॥ ५ ॥ ॥

राजद्भिरिति । मरुतामपि आकाशे राजद्भिर्दीप्यमानैरभिन्नरूपैरविच्छिन्नाकारैः अत एवोल्कानामर्चींषि तानीव स्फुटगतीर्निदीप्तमार्गाणि येषान्तैः कनकस्य निकाषः कषणन्तस्य राजीरेखा तद्वद्गौरैररुणैः । गौरः पीतेऽरुणे श्वेत इति वि

ष्वः । ध्वजांशुकानान्तेजोभिरायामस्तेषामेव दैर्घ्यं सातिरेकः सातिशयः क्रियते स्मेव कृत इव दीर्घा ध्वजपटाः स्वतेजःप्रसारेण दीर्घतमा इव लक्ष्यन्त इवेत्युत्प्रेक्षा चात्रोल्काद्युपमानुप्राणिता ॥ ६ ॥ ॥

रामाणामिति । मालैव माल्यन्तस्य सौकुमार्यमवर्जितं येन तस्मिन्कुसुमादपि मनोहरे इत्यर्थः । रामाणां वपुषि आतपस्य कर्तृयोगे कर्मणि षष्ठी । सहत इति सहः क्षमः पचाद्यच् तस्य भावः सहत्वम् । तत्सम्प्राप्ते सति अधिगतविस्मयैर्गन्धर्वैः विधातुर्विधिषु सृष्टिषु कल्याणी सध्वी श्रेयसी उपकारकत्वादिति भावः । विचित्रता नानावि

रुजद्भिः पथि मरुतामभिन्नरूपैरुल्कार्चिःस्फुटगतिभिर्ध्वजांशुकानाम् ।
तेजोभिः कनकनिकाषराजिगौरैरायामः क्रियत इव स्म सातिरेकः ॥ ६ ॥
रामाणामवर्जितमाल्यसौकुमार्ये संप्राप्ते वपुषि सहत्वमातपस्य । गन्ध
र्वैरधिगतविस्मयैः प्रतीये कल्याणी विधिषु विचित्रता विधातुः ॥ ७ ॥
सिन्दूरैः कृतरुचयः सहेमकक्ष्याः स्रोतोभिस्त्रिदशगजा मदं क्षरन्तः । सा
दृश्यं ययुररुणांशुरागभिन्नैर्वर्षद्भिः स्फुरितशतह्रदैः पयोदैः ॥ ८ ॥

धत्वम्प्रतीये अवगता ज्ञाता । प्रतिपूर्वादिणः कर्मणि लिट् ॥ ७ ॥ ॥

सिन्दूरैरिति । सिन्दूरैर्नागसम्भवाख्यै रागद्रव्यैः । सिन्दूरन्नागसम्भवमित्यमरः । कृतरुचयो अलंकृता इत्यर्थः । सह हेम्नः कक्ष्याभिर्मध्येभबन्धनैः सहेमकक्ष्याः । तेन सहेति तुल्ययोग इति बहुव्रीहिः । कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धन इत्यमरः । स्रोतोभिः सप्तभिर्मदनाडीभिः । कराकटाभ्यां मेढ्राच्च नेत्राभ्यां च मदच्युतिरिति पालकाव्ये । करान्नासारन्ध्राभ्यामित्यर्थः । मदं क्षरन्तो वर्षन्तस्त्रिदशगजाः । अरुणस्यार्कस्यांशूनां रागेणारुण्येन भिन्नैः संसृष्टैर्वर्षद्भिः स्फुरितशतह्रदैः

स्फुरिततडित्कलापैःपयोदैःसादृश्यंययुरित्युपमालङ्कारः ॥ ८ ॥
अव्यर्थमिति। बलानिसैन्यान्यव्यर्थे दुरापवराद्दुःखदाद् हिममयूखमण्डलस्य
सूर्य्यविम्बस्यपर्यन्तात्सन्निपातात्दूरमुपेत्यागय आशानामुपरिचितांगुम्फितामेकवे
णीमिवास्थितामित्युत्प्रेक्षा। रम्याऊर्म्मयस्तरङ्गभंग्यश्चयस्यास्तान्त्रिदशनदीम
न्दाकिनीं ययुः ॥ ९ ॥
आमत्तेति। आमत्तैर्भ्रमरकुलैराकुलानि उड्डूनानि उत्थापितानि ग्रथितानि अन्यो
न्यसंरब्धानि च रजांसि येषु तानि पङ्कजानि धुन्वन्कम्पयन्सुरभिरित्यर्थः। गगनन

अव्यर्थे दुरूपसद्वादुपेत्य दूरम्पर्यन्तादहिममयूखमण्डलस्य। आशा
नामुपरिचितामिवैकवेणीं रम्योर्म्मिं त्रिदशनदीं ययुर्बलानि ॥ ९ ॥
आमत्तभ्रमरकुलाकुलानि धुन्वन्नुद्धूतग्रथितरजांसि पङ्कजानि। का
न्तानां गगननदीतरङ्गशीतः सन्तापं विरमयति स्म मातरिश्वा ॥ १० ॥
सम्भिन्नैरिभतुरगावगाहनेन प्राप्योर्वीरनुपदवी विमानपंक्तीः। तत्पू
र्वप्रतिविहितेः सुरापगायाः वप्रान्तःस्खलितविवर्त्तनम्पयोभिः ॥ ११ ॥

दीतरङ्गैः शीतो मातरिश्वा वायुः कान्तानां सन्तापं विरमयति स्म शमयामास मातर्य्य
न्तरीक्षे श्वयतीति नैरुक्ताः ॥ १० ॥
सम्भिन्नैरिति। इभतुरगावगाहनेन हस्त्यश्वावलोडनेन सम्भिन्नैः संक्षुभितैः
सुरापगायाः। पयोभिः कर्त्तृभिः पदवीमनुपदव्यामित्यर्थः। लक्षणेत्थंभूतेत्यादि
नाकर्म्मप्रवचनीयत्वाद्द्वितीया। उर्वीर्विपुला विमानपङ्क्तीः प्राप्य तदेव पूर्वन्तत्पूर्वे
मिदम्प्रथमं यथा तथा आकाशगङ्गायास्तटाभावादिति भावः। वप्रान्तेषु रोधोभूमि
षु स्खलितानि तैर्विवर्त्तनं प्रत्यावृत्तिः। वप्रान्तःस्खलितविवर्त्तनं तटान्तःस्खलनप्रति

वृत्ता। वप्रः पितरि केदारे वप्रः प्राकाररोधसोरिति वैजयन्ती। प्रतिविदधे चक्रे

इत्यतिशयोक्तिः ॥ ११ ॥ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ॥

कान्तानामिति। यद्वैश्चरितात्सूर्य्यादिभिराक्रमात्। कर्मणिक्तः पथो मार्गात्।
क्रान्तानां निष्क्रान्तानां अक्षाश्चक्रधारादारुविशेषास्तेषामग्रैः क्षतादारिताः सुरवे
श्मवेदिका यैस्तेषां रथानां प्रधिभिर्नेमिभिश्चक्रान्तैः। चक्रं रथाङ्गं तस्यान्तो नेमिः
स्त्री स्यात्प्रधिः पुमानित्यमरः। सम्पीडेन नोदनेन क्षुभितानि जलानि येषां तेषु तो
यदेषु निःसङ्गमप्रतिघातं यथा तथा विवृत्तिः परिभ्रमणमुपाददे स्वीकृतम्। अति
शयोक्तिः स्वभावो वा तया संसृज्यते ॥ १२ ॥ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ॥

क्रान्तानां यद्वचरितात्पथो रथानामक्षाग्रक्षतसुरवेश्मवेदिकानाम्। नि
स्सङ्गं प्रधिभिरुपाददे विवृत्तिः सम्पीडक्षुभितजलेषु तोयदेषु ॥ १२ ॥
तप्तानामुपदधिरे विषाणभिन्नाः प्रह्लादं सुरकरिणां घनाः क्षरन्तः। यु
क्तानां खलु महतां परोपकारे कल्याणी भवति रुजत्स्वपि प्रवृत्तिः ॥ १३ ॥

तप्तानामिति। विषाणभिन्ना गजदन्तक्षताः अत एव क्षरन्तः स्रवन्तो घनास्तप्ता
नां सुरकरिणां प्रह्लादमुपदधिरे उपचक्रिरे तथाहि। परोपकारे युक्तानामा
सक्तानां रुजत्स्वपि पीडयत्स्वपि विषये कल्याणी हितकारिणी प्रवृत्तिर्व्यापारो भवती
त्यर्थान्तरन्यासोऽलङ्कारः। ततो युक्तं मेघानां गजदन्तक्षतानामपि तदाह्लादकत्व
मिति भावः ॥ १३ ॥ * * * * * * * * * * * * * * * * * * ॥

संवातेति। संवाता संवहता। वातेर्गत्यर्थत्वात्कर्तृप्रत्ययः। अनिलेन कामिनेवेति भा
वः। दिव्यस्त्रीणां जघनेषु वरं श्रेष्ठं यदंशुकं तस्मिन् विवृत्तिमपसारं मुकुर्नीयमा
ने सति पर्यस्यत्प्रसरत्पृथु विशालं मणिमेखलांशुजालमूर्वीर्युतकं चलनाख्यमिव। युत

कैसंश्लयेऽस्मेयैतकेवलनेपिचेतिविश्वः । अन्तरेभवंअन्तरीयमधोंशुकम् । अहो
दिभ्यश्चेतिछप्रत्ययः । अन्तरीयोपसंव्यानपरिधानान्यधोंशुकेइत्यमरः । संव
ह्नेसञ्जातं । जनिघासोःकर्त्तरिलिट् । उत्प्रेक्षालङ्कारः ॥१४॥
प्रत्यौति । तुषारपातैःशीकरवर्षैः । तुषारौहिमशीकराविति विश्वः । प्रत्यार्द्रीकृतति
लकामार्जितविशेषका अपिशमितपरिश्रमाःप्रह्लादमानन्दन्दिशन्तःपयोदाःकान्ता
नां । कर्त्तरिषष्ठीबहुमतिंसम्मानंमाययुः तथाहि । अल्पीयानल्पोदोषोबहुप्र
भूतंसुकृतमुपकारंनहिनस्तिनहन्ति । अर्थान्तरन्यासोलङ्कारः ॥ १५ ॥

संवातामुद्धुरनिलेननीयमानेदिव्यस्त्रीजघनवरांशुकेविवृत्तिम् । प
र्यस्यत्पृथुमणिमेखलांशुजालंसञ्जज्ञेयुतकमिवान्तरीयमूर्व्वोः ॥ १४ ॥
प्रत्यार्द्रीकृततिलकास्तुषारपातैःप्रह्लादंशमितपरिश्रमादिशन्तः । कान्ता
नांबहुमतिमाययुःपयोदानाल्पीयान्बहुसुकृतंहिनस्तिदोषः ॥ १५ ॥
यातस्यग्रथिततरङ्गसैकताभेविच्छेदंविपयसिवारिवाहजाले । आले
नुस्त्रिदशवधूजनाङ्गभाजांसन्धानंसुरधनुषःप्रभामणीनाम् ॥ १६ ॥

यातस्येति । ग्रथिततरङ्गंवद्धोर्मियत्सैकतन्तस्याभेवाभायस्यतस्मिन्विगतानिप
यांसियस्मात्तस्मिन्निर्जलेशेषाद्विभाषेत्यादिनाविकल्पान्नसमासान्तः । उरः
प्रभृतिपाठस्तुपयःशब्दस्यैकवचनान्तस्यैवेतिनकश्चिद्विरोधः । वारिवाहजाले
मेघवृन्देविच्छेदंत्रुटिंयातस्यसुरधनुषइन्द्रचापस्यत्रिदशवधूजनाङ्गभाजां
मणीनान्तदङ्गसङ्गिविभूषामणीनामित्यर्थः । प्रभाःकान्तयःसन्धानमातेनुश्च
क्रुः । अत्राभरणप्रभाणामिन्द्रधनुषोऽसम्बन्धेपिसम्बन्धाभिधानादतिशयोक्तिर
लङ्कारः ॥ १६ ॥

संसिद्धाविति। संसिद्धौ कार्य्यसिद्धिविषये इतीत्थं भाविना प्रकारेण कर्त्तव्यमितिक रणीयन्तेन सन्निबद्धैः संयोजितैरित्यर्थः। आलापैराभाषणैरुपलक्षितया। स्या दाभाषणमालाप इत्यमरः। दशशतानि संख्या येषुतानि लोचनानि यस्य सः। सह स्रलोचन इत्यर्थः। तस्य ध्वजिन्या सेनया पिपतिषतां पक्षिणां वीथीमार्गः। पिन्ध न्तोनभसंगमा इत्यमरः। तनिपतीत्यादिना विकल्पादिडागमः। विलंघ्य जीमूतैः जीवस्योदकस्य मूतः पटबन्धो येषान्तैः पृषोदरादित्वात् साधुः अपिहितसानु छादि ततटच्छन्नत इत्यर्थः। इन्द्रकील आसेदे प्राप्तः सीदतेः कर्मणि लिट् ॥ १७ ॥ *

संसिद्धाविति करणीयसन्निबद्धैरालापैः पिपतिषतां विलंघ्य वीथीम्। आसे दे दशशतलोचनध्वजिन्या जीमूतैरपिहितसानुरिन्द्रकीलः ॥ १७ ॥
आकीर्णा मुखनलिनैर्विलासिनीनामुद्धूतस्फुटविशदातपत्रफेना। सा तूर्यध्वनितगभीरमापतन्ती भूभर्त्तुः शिरसि नभोनदीव रेजे ॥ १८ ॥
सेतुत्वन्दधति पयोमुचां विताने संरम्भादभिपततो रथान् जवेन। आनिन्यु र्नियमितरश्मिभुग्नघोणाः कृच्छ्रेण क्षितिमवनामिनस्तुरङ्गाः ॥ १९ ॥

आकीर्णेति। विलासिनीनां मुखनलिनैः उपमितसमासः। आकीर्णा व्याप्ता उद्धूताः स्फुटान्यसंकुचितानि विशदानि आतपत्राणि श्वेतच्छत्राणि फेना इव यस्यास्तथोक्ता तूर्य्यध्वनितैर्वाद्यघोषैर्गभीरं यथातथा भूभर्त्तुरिन्द्रकीलस्य शिरसि आपतन्ती सा से ना नभोनदीव रेजे ॥ १८ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥
सेतुत्वमिति। पयोमुचां विताने सेतुत्वन्दधति सति संरम्भादाटोपाज्जवेनाभिपततो मे घवृन्दमधरीकृत्य धावत इत्यर्थः। तथभूतान् रथान् नियमितैराकृष्टै रश्मिभिः प्रग्रहै र्भुग्नाः कुञ्चिताः घोणाः प्रोथा येषान्ते। कुञ्चिरन्ततमविद्धं कुटिलम्भुग्नं वेल्लितं। वक्र

मित्यमरः । किरणप्रग्रहौ रश्मी । घोणान्तु प्रोथमस्त्रियामित्यमरः । अवनमन्ती
त्यवनामिनो ऽवनतपूर्वकायास्तुरङ्गाः । कच्छ्रेणमहता प्रबन्धेन क्षितिमापुरित्यर्थः इति
स्वभावोक्तिः ॥ १९ ॥ ॥

माहेन्द्रमिति । माहेन्द्रं नगमभितः इन्द्रकीलाभिमुखं । अभितः परितइत्यादिना
द्वितीया । दिवोन्तरीक्षात्पतन्तोऽवतरन्तः पर्य्यन्तस्थिताः पार्श्वस्था जलदा येषा
न्ते करेणुवर्य्याः न निर्द्धारण इति षष्ठीसमासनिषेधात् । सप्तमीतियोगविभागात्स
मासः । निलयनेस्थानैर्निःप्रकम्प्यपक्षैर्निश्चलपक्षैर्जलनिधिशायिभिर्नगेन्द्रैर्मैना
कादिभिः सादृश्यमाजग्मुरित्युपमा ॥ २० ॥ ॥

माहेन्द्रन्नगमभितः करेणुवर्य्याः पर्य्यन्तस्थितजलदा दिवः पतन्तः । सा
दृश्यं निलयननिःप्रकम्प्यपक्षैराजग्मुर्ज्जलनिधिशायिभिर्नगेन्द्रैः ॥ २०
॥ उत्सङ्गे समविषमे समं महाद्रेः क्रान्तानां वियदभिपातलाघवेन । आ
मूलानुपनदि सैकतेषु लेभे सामग्र्यं खुरपदवी तुरङ्गमाणाम् ॥ २१ ॥

उत्सङ्ग इति । महाद्रेरुत्सङ्गे मूर्द्ध्नि विषये यत्समविषमं समञ्च विषमञ्च निम्नोन्नत
न्तस्मिन् । द्वन्द्वैकवद्भावः । वियदभिपातलाघवेन गगनसञ्चारपाटवेन सममेक
रूपमारोहावरोहरहितमित्यर्थः । क्रान्तानाङ्गच्छतान्तुरङ्गमाणां खुरपदवी खु
रपंक्तिः उपनदि नदीसमीपे । अव्ययीभावश्चेति नपुंसकत्वात् ह्रस्वत्वं । सैकतेषु
आमूलान्मूलमारभ्य समग्रस्य भावः सामग्र्यं लेभे । सैकतादन्यत्र निम्नेषु गगनचा
रेण समप्रदेशवद्विषमेखुरस्पर्शाभावाद्विच्छिन्नाः खुरसरणिः सैकतेषु तु सर्व्वत्र स
मत्वादविच्छिन्नेत्यर्थः ॥ २१ ॥ ॥

सध्वानमिति । सध्वानं सशब्दं निपतिताः निर्झराः प्रवाहा यासु ताभु । प्रवाहो निर्झ

रोझरइत्यमरः। अधित्यकासूर्द्ध्वभूमिषु। भूमिरूर्ध्वमधित्यकेत्यमरः। उपा
धिभ्यामितित्यकन्प्रत्ययः। मन्द्रैर्गम्भीरैः। कलो मन्द्रस्तु गम्भीर इत्यमरः। प्रतिनि
नदैः प्रतिध्वानैः संमूर्च्छन्वर्द्धमानः रथानां ध्वनिर्घनरवशङ्कया गर्जितभ्रमेणेति भ्रा
न्तिमदलङ्कारः। उद्ग्रीवैर्मयूरैः सोत्कण्ठमुपशुश्रुवे उपश्रुतः शृणोतेः कर्मणि
लिट्॥२२॥ ०*० ॥ ०—० ॥ ०*० ॥ ०—० ॥ ०*० ॥ ०—० ॥
सम्भिन्नामिति। अविरलपातिभिर्निरन्तरप्रसारिभिरुपमेखलन्कटेष्वित्यर्थः। अ
थ मेखला। श्रोणिस्थानेऽद्रिकटके कटिबन्धेऽपि बन्धने इति यादवः। नीलानां मणी

स्वानन्निपतितनिर्झरासु मन्द्रैः संमूर्च्छन्प्रतिनिनदैरधित्यकासु। उ
द्ग्रीवैर्घनरवशङ्कया मयूरैः सोत्कण्ठैर्ध्वनिरुपशुश्रुवे रथानाम्॥ २२ ॥
सम्भिन्नामविरलपातिभिर्मयूखैर्नीलानाम्भृशमुपमेखलंमणीनाम्। वि
च्छिन्नामिव वनितानभोन्तराले वप्राम्भःस्रुतिमवलोकयांबभूवुः ॥ २३ ॥
आसन्नद्विपपदवीमदानिलाय क्रुध्यन्तो धियमवमत्य धूर्गतानाम्। सव्याजं
निजकरिणीभिरात्तचित्ताः प्रस्थानं सुरकरिणः कथञ्चिदीषुः ॥ २४ ॥

नां मयूखैर्भृशं सम्भिन्नामेकीभूताम् अत एव नभोन्तराले विच्छिन्नामिव स्थितामित्युत्प्रेक्षा
। वप्राम्भःस्रुतिं वप्रोदकधारां वनिता अवलोकयाम्बभूवुः वप्राम्भःस्रुतेः स्वधवलिमत्या
गेनेन्द्रनीलानां नीलिमस्वीकाररूपतद्गुणोत्थापिता विच्छेदोत्प्रेक्षेति तयोरङ्गाङ्गि
भावेन सङ्करः। तेन चैनाविच्छेदभ्रमरूपो भ्रान्तिमान् व्यज्यते ॥ २३ ॥ ० ० ॥
आसन्नेति। धुरङ्गतास्तेषां धूर्गतानां नियन्तॄणां धियमवमत्यागणयित्वा अवज्ञाये
तियावत् आसन्नायां द्विपपदव्यां वनगजमार्गे यो मदानिलस्तस्मै क्रुध्यन्तः तम्प्रति
कुप्यन्तः। क्रुधद्रुहेत्यादिना सम्प्रदानत्वाच्चतुर्थी। सव्याजं सकपटं निजकरि

णोभिरानचित्ताःआकृष्टचित्ताःसुरकरिणःप्रस्थानङ्गमनङ्कथञ्चिदीयुरभिलेषुः
॥ २४ ॥ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ॥

नीरंध्रमिति। नीरंध्रंसान्द्रम्पथिषुरथांगैश्चक्रैर्नुन्नंप्रेरितं। नुन्ननुत्तास्तनिष्ठ्यूतवि
द्धक्षिप्तेरिताःसमाइत्यमरः। पर्य्यस्यत्प्रसरन्नवसलिलमिवारुणंरजोवहन्ती
सावाहिनीसेनाघर्म्मान्तेप्रावृषिक्षुभितजलाकलुषोदकेत्यर्थः। जह्नुकन्यागङ्गेव
वनानिफलकुसुमप्रधानानिगहनानिजीर्णानि आतेनेव्यानसे। अत्रसमासगतं
वाक्यगतोपमयोःसजातीययोरङ्गाङ्गिभावेनसङ्करः॥ २५॥ * ○ * ○ * ○ ॥
सम्भोगेति। अथवृत्रारेःशक्रस्यसहायाःसचिवाःगन्धर्वाउपगङ्गङ्गङ्गासमीपे।

नीरंध्रंपथिषुरजोरथाङ्गनुन्नम्पर्य्यस्यन्नवसलिलारुणंवहन्ती। आ
नेनेवनगहनानिवाहिनीसाघर्मान्तक्षुभितजलेवजह्नुकन्या॥ २५॥
सम्भोगक्षमगहनामथोपगङ्गंविभ्राणांज्वलितमणीनिसैकतानि। अध्यू
षुश्च्युतकुसुमाचितांसहायावृत्रारेरविरलशाद्वलांधरित्रीम्॥ २६॥

अव्ययीभावस्यनपुंसकत्वाद्ध्रस्वत्वम्। सम्भोगक्षमगहनामुपभोगयोग्यवनांज्व
लिताःमणयोयेषुतानिसैकतानिविभ्राणांभृत्नःकर्त्तरिशानच्। च्युतैःस्वयम्पतितैः
कुसुमैराचितांव्याप्तांअविरलाःसान्द्राःशाद्वलाःशादप्रायप्रदेशायस्यांसातान्धरित्री
मध्यूषुरधितस्थुःवसतेर्य्यजादित्वात्सम्प्रसारणं। अत्रधरित्रीविशेषणार्थानामधि
वासहेतुत्वादनेकपदार्थहेतुकङ्काव्यलिङ्गमलङ्कारः॥ २६ ॥ * ○ ○ * ॥
भूभर्त्तुरिति। तदाहरिसखवाहिनीनिवेशोगन्धर्वसेनाशिविरम्। निवेशःशिविरो
द्वाहनिःस्वानेषुप्रकीर्त्तितइतिशाश्वतः। भूमर्त्तुःपर्वतस्यउर्व्याःसमधिकम्पूर्वस्मा
दभ्यधिकंयथातथाश्रीमत्तं श्रियमित्यर्थः। आदधेजनयामास। तथाहि। स

होदयानां महात्मनां संसक्तौ सम्यक्सेवायां किमसुलभं न किंचिद्दुर्लभमित्यर्थः।
यतो यदृच्छया दैवाद्योगोऽप्युच्छ्रायमुत्कर्षं नयति। अत्र प्रकृतयदृच्छयायोगस्योत्कर्
षाभिधानादप्रकृतभक्तियोगस्योत्कर्षाधायकत्वं कैमुतिकन्यायेनार्थादापत्तिरि
ति प्राकरणिकादप्राकरणिकस्यार्थापत्तिरलङ्कारः। तदुक्तं। एकस्य वस्तुनो भा
वादन्यवस्त्वन्यथापतेत्। कैमुत्येन यतः सास्यादर्थापत्तिरलंक्रियेति॥ २७॥
सामोदा इति। सामोदाः ससौरभाः कुसुमप्रधानास्तरवः शाकपार्थिवादिषु द्रष्ट
व्यः। तेषां श्रियः समृद्धयः विविक्ताः विजनप्रदेशाः। विविक्तविजनच्छन्ननिःशलाका

भूभर्तुः समधिकमादधे तदोर्व्याः श्रीमत्तां हरिसखवाहिनीनिवेशः। संस
क्तौ किमसुलभं महोदयानामुच्छ्रायं नयति यदृच्छयापि योगः॥ २७॥
सामोदाः कुसुमतरुश्रियो विविक्ताः सम्पत्तिः किशलयशालिनी लतानाम्।
साफल्यं ययुरमराङ्गनोपभुक्ताः सा लक्ष्मीरुपकुरुते यया परेषाम्॥ २८॥
क्रान्तोऽपि त्रिदशवधूजनः पुरस्ताल्लीनाहिश्वसितविलोलपल्लवानाम्।
सेव्यानां हतविनयैरिवावृतानां सम्पर्कं परिहरति स्म चन्दनानाम्॥ २९॥

स्तथा रह इत्यमरः। किशलयशालिनी लतानां सम्पत्तिः। यत अमराङ्गनोपभुक्ताः
सन्तः साफल्यं ययुः। तथा हि यया लक्ष्म्या करणेन परेषामुपकुरुते लक्ष्मीर्वा निर्विशे
षः सा लक्ष्मीर्नान्येति भावः। परेषामित्यत्रानुकरोति भगवतो नारायणस्येत्यादिव
त् श्रियायोगे हि सम्बन्धसामान्ये षष्ठी॥ २८॥ ** ०० ** ०० ** ०० ॥
क्रान्त इति। क्रान्तोऽपि त्रिदशवधूजनः पुरस्तादग्रे लीनानां संश्रितानामहीनां श्वसि
तैर्निश्वासैर्विलोलाः पल्लवाः येषां तेषां चन्दनानां सम्पर्कं हतविनयैर्दुर्जनैः खलैः आवृ
तानां संवृतानां सेव्यानां प्रभूणां सम्पर्कमिव परिहरति स्म। दुष्टसंसर्गस्यागुणावहत्वा

अपि त्याज्या इति भावः ॥ २९ ॥

उत्सृष्टेति । उत्सृष्टाः आक्षिप्ताः ध्वजाः कुथा आस्तरणानि कङ्कटाः तनुत्राणानि येभ्यस्ते । प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोरित्यमरः । विदितनयैः शिक्षाभिज्ञैर्यन्तृभिः श्रमं विनेतुं क्लमम् अपनेतुं धरित्रीमानीता निवेश्यमाना इत्यर्थः । द्विपा युगान्तवातैराक्षिप्तानि उद्धृतानि द्रुमाणां गहनानि येऽयस्ते पर्य्यस्ता विपर्य्यासिता गिरय इव विरेजुः ॥ ३० ॥

प्रस्थानेति । गजपतिना प्रस्थानश्रमेण जनितां निद्रां विहाय आमुक्ते सदानपङ्के श

उत्सृष्टध्वजकुथकङ्कटा धरित्रीमानीता विदितनयैः श्रमं विनेतुम् । आक्षि
प्तद्रुमगहना युगान्तवातैः पर्य्यस्ता गिरय इव द्विपा विरेजुः ॥ ३० ॥
प्रस्थानश्रमजनितां विहाय निद्रामामुक्ते गजपतिना सदानपङ्के । शय्या
न्ते कुलमलिनां क्षणं विलीनं संरम्भच्युतमिव शृङ्खलं चकाशे ॥ ३१ ॥
आयस्तः सुरसरिदोघरुद्धवर्त्मा सम्प्राप्तुं वनगजदानगन्धिरोधः । मूर्द्धा
नं निहितशिताङ्कुशं विधुन्वन् यन्तारं न विगणयाञ्चकार नागः ॥ ३२ ॥

य्यान्ते शयनदेशे क्षणं विलीनं प्रलीनम् अलीनां कुलं संरम्भेण आलानसंभ्रमेण च्युतं भ्रष्टं शृङ्खलं निगडमिवेत्युत्प्रेक्षा । अयं शृङ्खले । अन्दुको निगडोऽस्त्री स्यादित्यमरः । चकाशे शुशुभे ॥ ३१ ॥

आयस्त इति । वनगजदानस्य गन्धोऽस्यास्तीति तद्गन्धि रोधः परकूलमित्यर्थः । सम्प्राप्तुं गन्तुम् आयस्तः उद्युक्तः प्रयत्नं कुर्वाण इत्यर्थः । यसु प्रयत्ने इति धातोः कर्त्तरि क्तः । किन्तु सुरसरिदोघेन गङ्गाप्रवाहेन रुद्धं वर्त्म यस्य सः । नागो गजः निहितः शितस्तीक्ष्णोऽङ्कुशो यस्मिंस्तं मूर्द्धानं विधुन्वन् रोषादिति भावः । यन्तारं न विगण

पाङ्कुरार ॥ ३२ ॥

आरेचितेति । समवनतस्य जलपानार्थं मानतपूर्वकायस्य करेणोर्गजस्य । करेणु
रिभ्यां स्त्रीनेभे इत्यमरः । करेण पीतस्य शेषे पयसि आरेचितः हस्तिपकात्त्रासाशङ्कं सभ
यं समीरितः क्षिप्तः सन्नित्यर्थः । शीकरः अरुणौ मदस्रुतौ मदधारे ययोस्तौ कपोलौ सं
मार्जन् प्रमृजन् मृजेरजादौ संक्रमे विभाषा वृद्धिर्वक्तव्येति वृद्धिः मद इव सस्यन्दे स्र
वन्मदसम्पृक्तस्य मदसादृश्यान्मदोपमा ॥ ३३ ॥

आघ्रायेति । अतितृष्यतापि अतिपिपासतापि क्षणमाघ्राय रोषादुत्तीरन्तीरे । विभ

आरेचितः समवनतस्य पीतशेषे साशङ्कं पयसि समीरितः करेण । संमा
र्जन्नरुणमदस्रुती कपोलौ सस्यन्दे मद इव शीकरः करेणोः ॥ ३३ ॥
आघ्राय क्षणमतितृष्यतापि रोषादुत्तीरं निहितविवृत्तलोचनेन । सम्पृ
क्तं वनकरिणां मदाम्बुसेकैर्नाचेमे हिममपि वारि वारणेन ॥ ३४ ॥
प्रश्च्योतन्मदसुरभीणि निम्नगायाः क्रीडन्तो गजपतयः पयांसि कृत्वा । कि
ञ्जल्कव्यवहितताम्रदानलेखैरुत्तेरुः सरसिजगन्धिभिः कपोलैः ॥ ३५ ॥

क्त्यर्थेऽव्ययीभावः । निहिते विवृत्ते लोचने येन तेन प्रतिगजदिदृक्षयेति भावः वार
णेन हिमं शीतलमपि वनकरिणां मदाम्बुसेकैर्दानधाराभिः सम्पृक्तं वारि नाचेमे न
पीतम् आङ्पूर्वाच्चमु अदने इति धातोः कर्मणि लिट् ॥ ३४ ॥

प्रश्च्योतन्मदेति । क्रीडन्तो विहरन्तो गजपतयः निम्नगायाः गङ्गायाः पयांसि प्रश्च्यो
तद्भिः क्षरद्भिर्मदैः सुरभीणि कृत्वा किञ्जल्कैः केसरैर्व्यवहितास्तिरोहितास्ताम्रास्ता
म्रवर्णा दानलेखा मदराजयो येषु तैरत एव सरसिजगन्धिभिः कपोलैरुपलक्षिताः
सन्तः उत्तेरुर्निर्जग्मुः । अत्र मदसरसिजगन्धयोः समययोर्विनिमयोक्त्या समपरि

वृत्तिरलङ्कारः । तेनगजानांनिम्नगायाश्चपरिमलव्यत्ययान्तरसंरम्भोव्यज्य
ते ॥ ३५ ॥ * * * * * * * * ॥
आकीर्णमिति । घनारुणेनसान्द्रलोहितेन । विशेषणसमासःबलरजसासेना
परागेणाकीर्णंसपदिप्रक्षोभैरालोडनैस्तटेषुतीरेषुतरङ्गितंसञ्जाततरङ्गन्तार
कादित्वादितच् । यद्वा । तरङ्गवत्कृतंमत्वन्तात्तत्करोतीतिणिचिकर्मणिक्तःणा
विष्टवद्भावान्मतुपोलुक् । तथामातङ्गैरुन्मथितानांलुलितानांसरोजानांरेणुभिः
पिशङ्गमम्बुमञ्जिष्ठेनमहारञ्जनेनारक्तंमाञ्जिष्ठंवसनमिवनिर्बभासे । तेनरक्तमि
त्यण् । माञ्जिष्ठमित्यत्रकौशेयमितिवापाठःतत्रकौशशब्दात्ठक् । कौशेयंकृमिको

आकीर्णंबलरजसाघनारुणेनप्रक्षोभैःसपदितरङ्गितन्तटेषु । मात
ङ्गोन्मथितसरोजरेणुपिङ्गंमाञ्जिष्ठंवसनमिवाम्बुनिर्बभासे ॥ ३६ ॥
श्रीमद्भिर्नियमितकन्धरापरान्तैःसंसक्तैरगुरुवनेषुसाङ्गहारम् । सम्प्रा
पेनिभृतमदाम्बुभिर्गजेन्द्रैःप्रस्यन्दिप्रचलितगण्डशैलशोभा ॥ ३७ ॥

शोत्थमित्यमरः ॥ ३६ ॥ ** ** ** ** ॥
श्रीमद्भिरिति । श्रीमद्भिःशोभावद्भिःनियमिताःकन्धराःअपरान्ताश्चरमपादाया
णांचयेषान्तैः । अपरःपश्चिमःपादइतिवैजयन्ती । अगुरुवनेषुसाङ्गहारंसाङ्गवि
क्षेपंयथातथासंसक्तैःनिःसृतानिप्रस्रुतानिमदाम्बूनियेषांतैःगजेन्द्रैःप्रस्यन्दिनोज
लस्राविणःप्रचलितायेगण्डशैलास्तेषांशोभासम्प्रापेप्राप्ताकर्मणिलिट् । गण्डशैला
स्तुच्युताःस्थूलोपलागिरेरित्यमरः । अत्रान्योन्यशोभाप्राप्त्यसम्भवात्तत्सदृशींशोभे
तिप्रतिबिम्बत्वाक्षेपान्निदर्शनालङ्कारः ॥ ३७ ॥ ॥
निःशेषमिति । गन्धंवहतीतिगन्धवहोवायुःकर्मण्यण् । निःशेषंयथातथाप्रश

मितःरेणुर्य्यैनतत्मदजलंस्रोतोभिर्मदनाड़ीभिःश्च्युतमुज्झतांवर्षतांवारणानांस

म्बन्धिनंव्यवहितस्तिरस्कृतोभूरिपुष्पगन्धोयेनसःभिन्नाःफुल्लाःएलालताविशेषाः

पृथ्वीकाचन्द्रवालैलेत्यमरः। तत्पुष्पाणिचैलाः। पुष्पेजातीप्रभृतयःस्वलिङ्गा

व्रीह्यःफलेइत्यमरः। अत्रैलास्वसुरभिघ्राणेन्द्रियतर्पणमित्युपमा। आमोद

म्परिमलमुवाहवहतिस्म॥३८॥ ✲ ✲ ✲ ✲ ✲ ✲ ✲ ✲ ✲ ✲ ✲ ✲॥

सादृश्यमिति। गभीरैर्मेघघोषैर्गर्जितैःसादृश्यन्दधतीत्युपमा। दधातेःशतृप्रत्य

यःवानपुंसकस्येतिविकल्पान्नुमभावः। अनिद्रावृंहितश्रवणादेवप्रबुद्धाःश्रुभि

निःश्वेयम्प्रश्नमितरेणुवारणानांस्रोतोभिर्मदजलमुज्झतामजस्रम्। आ

मोदंव्यवहितभूरिपुष्पगन्धोभिन्नैलास्सुरभिमुवाहगन्धवाहः॥३८॥

सादृश्यन्दधतिगभीरमेघघोषैरुन्निद्रश्रुभितमृगाधिपश्रुतानि। आ

तेनुश्चकितचकोरनीलकण्ठान्कच्छांतानमरमहेभवृंहितानि॥३९॥

शाखावसक्तकमनीयपरिच्छदानामध्वश्रमातुरवधूजनसेवितानाम्। ज

ङ्घेनिवेशनविभागपरिष्कृतानांलक्ष्मीःपुरोपवनजावनपादपानाम्॥४०॥

ताःसंरब्धाश्चयेमृगाधिपास्तैःश्रुतानिआकर्णितानिनतुप्रबुद्धानीतिभावः। अमर

महेभवृंहितानिमहान्तश्चासौइभागजाश्चेतिमहेभाःअमराणांमहेभाःतेषांवृंहि

तानिगर्जितानिकच्छांतान्अनूपप्रदेशान्। जलप्रायमनूपंस्यात्पुंसिकच्छस्तथावि

धेइत्यमरः। चकितागर्जितशङ्कयासंभ्रान्ताश्चकोराःपक्षिविशेषानीलकण्ठामयूरा

श्चयेषुतांस्तथाभूतान्। आतेनुः। भ्रान्तिमदलङ्कारः॥३९॥ ✲ ✲ ✲ ✲ ✲॥

शाखेति। परिच्छाद्यतेऽनेनेतिपरिच्छदःपरिकरोवसनाभरणादिःपुंसिसंज्ञायां

घःप्रायेणेतिघप्रत्ययः। छदेर्घेह्युपसर्गस्येतिह्रस्वत्वं। शाखास्ववसक्ताःकमनीयाः

 परिच्छदायेपान्तेष्वविच्छिन्नमलेनानुरैःपीडितैर्वधूननैःसेवितानान्निवेशनविभा
 गैरावसतिकावच्छेदैःपरिस्कृतानांस्वलंकृतानां। सम्पर्य्युपेइत्यादिनासुट्। वन
 पादपानामरण्यवृक्षाणांपुरेपद्युपवनंकृत्रिमवनन्तत्रजातापुरोपवनजाललक्ष्मीः
जह्नेजाता। अत्रान्योन्यलक्ष्मीसम्बन्धासम्भवात्तत्सदृशीतिसादृश्याक्षेपादसम्भ

इतिमहोपाध्यायश्रीभारविकृतौकिराता
र्जुनीयेमहाकाव्येसप्तमःसर्गः ॥ ७ ॥

वेतद्वस्तुसम्बन्धेयन्निदर्शना। वसन्ततिलकावृत्तं। उक्तावसन्ततिलकातभजौ
गौ। इतिलक्षणात् ॥ ४० ॥ * ॥ इतिश्रीमहोपाध्यायकोलाचलमल्लिनाथसू
रिविरचितायांकिरातार्जुनीयव्याख्यायांघण्टापथसमाख्यायांसप्तमःसर्गः ॥ ७ ॥

अथेति । अथनिवेशनानन्तरं सुराङ्गना अप्सरसः स्वमायया स्वेच्छाविशेषेण कृतैर्निर्मितैर्मन्दिरैरुज्ज्वलं दीप्तं ज्वलन्तो मणयो यस्मिन् तद्व्योमसदां गन्धर्वाणां सनातनं सदातनं । सायञ्चिरमित्यादिना भावार्थे ट्युप्रत्ययः । गौर्वज्रं तत्पतिरिन्द्रस्तच्चापवर्णानि गोपुराणि यस्य तत्तथोक्तमित्युपमा । पुरं नगरं वनानां विजिहीर्षया वनानि विहर्त्तुमिच्छया कर्मणि षष्ठी जहुस्त्यजुः जहातेर्लिट् । अत्र ज्वलंज्वलमिति पुरंपुरमिति चासकृद्व्यञ्जनद्वयावृत्त्या छेकानुप्रासः । अन्यत्र तद्वैपरीत्यावृत्त्यनुप्रास इति तयोरुपमाया अत्र संसृष्टिः । अस्मिन्सर्गे वंशस्थं वृत्तम् ॥ १ ॥ ❁ ❁ ❁ ॥
यथायथमिति । यथायथं यथास्वं स्वकीयमनतिक्रम्येत्यर्थः । यथास्वे तु यथायथमि

अथस्वमायाकृतमन्दिरोज्ज्वलंज्वलन्मणि व्योमसदां सनातनम् । सु
राङ्गनागोपतिचापगोपुरम्पुरं वनानां विजिहीर्षया जहुः ॥ १ ॥
यथायथन्ताः सहिता नभश्चरैः प्रभाभिरुद्भासितशैलवीरुधः । वनं
विशन्त्यो वनजायतेक्षणाः क्षणद्युतीनान्दधुरेकरूपताम् ॥ २ ॥

त्यमरः । नपुंसकनिपातनन्तु ह्रस्वार्थम् । नभश्चरैर्गन्धर्वैर्म्मेघैश्च सहिताः प्रभाभिः स्वदीप्तिभिरुद्भासिताः शैलवीरुधो याभिस्ताः पूर्वोक्ता वनजायतेक्षणाः पद्मलोचनाः स्त्रियः वनं विशन्त्यः क्षणं द्युतिर्यासान्तासां क्षणद्युतीनां विद्युतामेकरूपतां समानरूपतान्दधुः । मुहुर्द्दर्शनान्तर्द्धानेन तासां स्फुरणस्य क्षणिकत्वादिति भावः । श्लेषानुप्राणितेयमुपमा श्लेषत्वमिति केचित् । उभयथाप्यनुप्रासेन संसर्गः ॥ २ ॥ ❁ ❁ ॥
निवृत्तेति । निवृत्तो गतः वृत्तस्य वर्त्तुलस्य ऊरुपयोधरस्य क्लमो यस्मिन्सः पादप्रक्षेपेषु विश्रान्तिसम्भवादिति भावः । किञ्च प्रवृत्तो जातो निर्ह्रादि विभूषणानां नूपुरादीनां आरवो यस्मिन्सः । अवनौ पृथिव्यां परिक्रमः सञ्चारो नितम्बिनीनां नभःप्रयाणात्

भृशमधिकम्पञ्चमीविभक्तेरितिपञ्चमी। धृतिसन्तोषमादधे। अत्रविशिष्टपरिक्रमस्यधृत्याधानहेतुत्वात्काव्यलिङ्गमलङ्कारः ॥ ३ ॥

घनानीति। घनानिसान्द्राणिनतुविरलानिकरप्रचेयानिहस्तग्राह्याणिअनुच्चानि अङ्गुल्येरधिकार्थवचनेइतितृतीयासमासः कामंकुसुमानिविभ्रतः नवकुसुमितान्शाखिनस्तरून्अपहायसुरसुन्दरीजनैःपुरोऽग्रेअभिसस्रेअभिगतम्भावेलिट्। तथाहिकामिनोगुणेष्वतिशयेषुविषयेषुउत्तरमुत्तरं। वीप्सार्थेऽव्ययीभावः। यथोत्तरमिच्छायेषान्तेयथोत्तरेच्छाः उत्तरोत्तराभिलाषुकाहि। अत्रपरिकरोत्यापितोऽ

निवृत्तवृत्तोरुपयोधरक्लमः प्रवृत्तनिर्ह्रादिविभूषणारवः। नित
म्बिनीनाम्भृशमादधेधृतिन्नभःप्रयाणादवनौपरिक्रमः ॥ ३ ॥
घनानिकामंकुसुमानिबिभ्रतः करप्रचेयान्यपहायशाखिनः। पु
रोभिसस्रेसुरसुन्दरीजनैर्यथोत्तरेच्छाहिगुणेषुकामिनः ॥ ४ ॥
तनूरलक्तारुणपाणिपल्लवाःस्फुरन्नखांशूत्करमञ्जरीभृतः। वि
लासिनीबाहुलतावनालयोविलेपनामोदहृताःसिषेविरे ॥ ५ ॥

र्थान्तरन्यासोऽलङ्कारः ॥ ४ ॥

तनूरिति। विलेपनामोदैर्हृताआकृष्टावनालयोवनभृङ्गास्तनूःकृशाःअलक्तैररुणाःपाणयएवपल्लवायासान्ताःस्फुरन्तोनखांशूनामुत्कराःपुञ्जाएवमञ्जर्यस्ताविभ्रतीतितथोक्ताःक्विप्। विलासिनीनांबाहवएवलतास्ताःसिषेविरे। अत्रसमस्तवस्तुविषयरूपकालङ्कारः। बाहूवयवानांलतावयवानाम्पल्लवादीनामपिनिरूपणादिति ॥ ५ ॥

निपीयमानेति। शिलीमुखैरलिभिः। अलिबाणौशिलीमुखावित्यमरः। निपीयमा

नःस्तवकोगुच्छोयस्याःसाचलावापल्लवायस्याःसाअतएवामन्दंदृष्टःओष्ठोयस्मि
स्तत्कालेवधूननङ्करकम्पनन्तत् विडम्बयन्तीस्तवकपानेनौष्ठदंशनम्पल्लवचल
नेनकरावधूननञ्चकुर्वतीत्यर्थः। धूञोण्यन्तात्ल्युट्। णिचिधूञोनक्कक्तव्यः। अशो
कयष्टिरशोकशाखेत्यर्थः। वधूजनैर्ददृशेदृष्टा। अत्रविडम्बयन्तीतिप्रस्तुता
शोकशाखाविभूषणभूतोपमामहिम्नाअप्रस्तुतनायिकाप्रतीतेःसमासोक्तिःउत्तिष्ठ
मानतयैवोपमयाअङ्गाङ्गिभावेनसङ्कीर्य्यते ॥ ६ ॥ ॥
अथकश्चिन्मधुकराक्रान्ताङ्काश्चिदाह। कराविति। मानपरिहारेणमधुपाश्रय
णेनकश्चिद्बाधङ्व्याशयेनसम्बोधयतिहेमानिनीति। नवपल्लवस्यआकृतिरि

निपीयमानस्तवकाशिलीमुखैरशोकयष्टिश्चलबालपल्लवा। वि
डम्बयन्तीददृशेवधूजनैरमन्ददृष्टौष्ठकरावधूननम् ॥ ६ ॥
करौधुनानानवपल्लवाकृतीवृथाकृथामानिनिमापरिश्रमम्। उ
पेयुषीकल्पलताभिशङ्कयाकथंन्वितस्त्रस्यतिषट्पदावलिः ॥ ७ ॥

वाकृतिर्ययोरित्युपमानौकरौधुनानाधूञःक्रियादिकात्कर्त्तरिशानच्। वृथाव्यर्थम्परि
श्रमंमाकृथाःमाकुरुष्व। करोतेराशीरर्थेमाङिलुङ्। वृथात्वेहेतुमाह। कल्पल
ताभिशङ्कयाकल्पवल्लीभ्रमेणेतिभ्रान्तिमदलङ्कारः। उपेयुषीउपगताषट्पदा
वलिःकथंनुइतस्त्रस्यतिबिभेतिनत्रस्यत्येवेत्यर्थः। वाभ्राशेत्यादिनाविकल्पेनश्यन्प्र
त्ययः। अत्रकान्तापरिश्रमवैयर्थ्यरूपकार्यस्यषट्पदावलेःकल्पवल्लीभ्रमेणानि
बन्धनवित्रासरूपकारणेनकार्यसमर्थनरूपोऽर्थान्तरन्यासोभ्रान्तिमदङ्गाङ्गिभा
वेनसङ्कीर्णःसन्नुपमयासंसृज्यते ॥ ७ ॥ ॥
अथकाचित्सखीकाञ्चित्प्रणयकुपितामाह। जहीहीति। प्रियमुपैतुंस्वयमेवानु

सर्तुमिच्छतीम् । आक्षीनद्योनुमितिविकल्पानुमभावः काञ्चिन्नायिकां निपुणश्चित
ज्ञः सखीजनः कोपञ्जहीहि त्यज । आवहाविति विकल्पाट्टीकारादेशः । दयितोऽ
नुगम्यतामनुश्रियताम् । उभयथापि प्रार्थनायां लोट् । अन्यथा चञ्चलमनव
न्नवमनः पुरोनुशेते अग्रेनुशयिष्यते अनुतप्स्यत इत्यर्थः । इत्यनेन प्रकारेण पु
पूर्वमेवानुनिन्ये प्रसादयामास ॥ ८ ॥ ❁✳~✳~✳✳~✳~✳❁ ॥
अथ चतुर्भिः श्लोकैः कलापकमाह । समुन्नतैरिति । समुन्नतैः काशान्यश्ववालकुसु
मानि तानि दुकूलानीव तैः शालन्ताइति तथोक्तैः सारसपंक्तयो मेखलाइवताः परिक्ष

जहीहि कोपं दयितोनुगम्यताम्पुरोनुशेते तव चञ्चलं मनः । इति
प्रियङ्काञ्चिदुपैतुमिच्छतीम्पुरानुनिन्ये निपुणः सखीजनः ॥ ८ ॥
समुन्नतैः काशदुकूलशालिभिः परिक्वणत्सारसपंक्तिमेखलैः । प्रती
रदेशैः स्वकलत्रचारुभिर्विभूषिताः कुञ्जसमुद्रयोषितः ॥ ९ ॥
विदूरपातेन भिदामुपेयुषश्च्युताः प्रवाहादभिसारिणः प्रियाम् । प्रि
याङ्कशीताः शुचिमौक्तिकत्विषो वनप्रहासाइव वारिबिन्दवः ॥ १० ॥

णान्योयेषु तैः स्वेषांकलत्राणिश्रोणयस्तद्वच्चारवस्तैः । कलत्रंश्रोणिभार्ययोरित्यमरः
। प्रतीरदेशैः विभूषिताः तटप्रदेशैः भूषिताः कुञ्जसद्द्योषितो वननद्य इत्यर्थः ।
अत्र तीरादीनाङ्कलत्रादौपम्यौपमेयाभ्यां योषित्त्वसामर्थ्याद्वनदीनां योषिदौ
पम्यङ्गम्यते ॥ ९ ॥ ❁✳❁✳❁✳❁✳❁✳❁✳❁✳❁✳❁✳❁✳ ॥
विदूरेति । विदूरपातेन भिदाम्भेदं । षिद्भिदादिभ्योऽङ् । उपेयुष उपगतान्
प्रवाहात् च्युताः अतएवाभितः प्रसारिणः प्रसर्पन्त इति प्रियायाः अङ्कउत्सङ्ग इव शी
ताः शीतलाः शुचीनां मौक्तिकानां त्विषइव त्विषो येषान्ते किञ्च वनस्य प्रहासाइव स्थिता

इत्युत्प्रेक्षावारिबिन्दवश्च । अत्रोपमयोरुभयोरुत्प्रेक्षायाश्च संसृष्टिः ॥ १० ॥ *
सखीति । द्वौ रेफौ वर्णविशेषौ येषान्ते द्विरेफाः भ्रमरशब्देन तदर्थो लक्ष्यते द्वाभ्य
रंमावमितिविदधानौ निर्भाग्यकारः । स्थिराः निश्चलाद्विरेफा एवाञ्जनानि तैः शारि
तानि शबलीकृतानि उदराणि येषान्तैः । शारः शबलपीतयोरितिविश्वः । विसारि
भिर्विस्तृतैः पुष्पाण्येव विलोचनानीव तैः प्रेम्णा गुरूकृतश्चादरो यस्मिन् कर्म्मणि तत्त
था सखीजनन्निरीक्ष्यमाणाः पश्यन्त इवस्थिताः । कुतः नम्रमूर्त्तयो ऽवनताङ्ग्यो ल
ताश्च । अत्ररूपकोत्प्रेक्षयोः सङ्करः ॥ ११ ॥ ❀ ❀ ** ** ❀ ❀ ॥
उपेयुषीणामिति । मदेनारुणैरव्यक्तरागैः । अव्यक्तरागस्त्वरुण इत्यमरः । करि

सखीजनप्रेमगुरूकृतादरन्निरीक्ष्यमाणाइवनम्रमूर्त्तयः । स्थिरद्विरे
फाञ्जनशारितोदरैर्विसारिभिःपुष्पविलोचनैर्लताः ॥ ११ ॥ उपेयुषी
णांवृहतीरधित्यकामनांसिजङ्गःसुरराजयोषिताम् । कपोलकाषैष्क
रिणांमदारुणैरुपाहितश्यामरुचश्चचन्दनाः ॥ १२ ॥ कलापकम् ॥

णां कपोलानां काषैः कषणैः उपाहितश्यामरुचो जनितकृष्णवर्णा इति तद्गुणाल
ङ्कारः । चन्दना मलयजाः । गन्धसारो मलयजो भद्रश्रीः चन्दनोऽस्त्रियामित्यम
रः । वृहतीरधित्यका ऊर्द्ध्वभूमीरुपेयुषीणां सुरराजयोषितां मनांसि जङ्गः अ
पहतुः श्लोकत्रयात्तद्यादीनां विशिष्टानामेवाप्सरो मनोहरणहेतुत्वोक्त्या काव्यलिङ्ग
मुन्नेयम् ॥ १२ ॥ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ॥
खगोचर इति । चित्तहारिणा मनोहरेण शाखिनाम्प्रसवेन पुष्पजातेन विलोभ्य
माना आकृष्यमाणा योषितः खगोचरे स्वविषये स्वकपरप्रपञ्चे सत्यपीत्यर्थः । प्रसव
इतिशेषः । उपकर्त्तुम्परिचरितुं इच्छतां नभश्चराणां गन्धर्वाणां प्रणयेन सहायहेतु

नाप्रियाणिचक्रुः । स्वकरयाह्यमपिप्रसवंस्वकान्तप्रणार्थन्तह्रीयमानमेवार्थह्री
षुरित्यर्थः ॥ १३ ॥

प्रयच्छतेति । कुसुमानिप्रयच्छतादयितेनउच्चैरुच्चैस्तरांविपक्षगोत्रंसपत्नीनाम
धेयंलम्भिताप्रापितातन्नाम्नाआहूतेत्यर्थः । नामगोत्रंकुलंगोत्रमितिशाश्वतः । मा
निनीअतएवनकिञ्चिदूचेकर्तरिलिट् । किन्तुकेवलंवाष्पाकुललोचनासतीचर
णेनभुवंलिलेख । गोत्रस्खलनजनितेर्ष्यानिमित्तनिर्वेदादितिभावः । मानिनीअ
तएवनकिञ्चिदित्युक्तम् । तदुक्तंदशरूपके । तत्वज्ञानापदीर्ष्यानिर्वेदःस्वावमान

स्वगोचरसत्यपिचित्तहारिणाविलोभ्यमानाःप्रसवेनशाखिनाम् । न
भश्चराणामुपकर्तुमिच्छताम्प्रियाणिचक्रुःप्रणयेनयोषितः ॥ १३ ॥
प्रयच्छतोच्चैःकुसुमानिमानिनीविपक्षगोत्रन्दयितेनलम्भिता । न
किञ्चिदूचेचरणेनकेवलंलिलेखवाष्पाकुललोचनाभुवम् ॥ १४ ॥
प्रियेपरायच्छतिवाचमुन्मुखीनिबद्धदृष्टिःशिथिलाकुलोच्चया । स
मादधेनांशुकमाहितंवृथाविवेदपुष्पेषुनपाणिपल्लवम् ॥ १५ ॥

नात्सनिःश्वसत्यविवर्णाह्रीसदाननताइति ॥ १४ ॥

प्रियइति । वाचंयच्छतिददतिसमालपतीत्यर्थः । दाणःशातृप्रत्ययःपाघ्रेत्यादिना
यच्छादेशः । प्रियेनिबद्धदृष्टिःअतएवोन्मुखीशिथिलःश्लथःआकुलःस्खलितश्चनी
दृष्टउच्चयोनीविबन्धोयस्याःसा । नारीकट्यंशुकग्रन्थौनीविःस्यादुच्चयोऽप्यथेतिमा
नैरडः । अपराअन्यास्त्रीअंशुकंनसमादधेनबबन्धरागपारवश्यादितिभावः । पुष्पेषु
वृथाव्यर्थंआहितमारोपितंअस्थानेप्रसारितमित्यर्थः । पाणिपल्लवंस्वनविवेदप्रि
याधर्ताचलाचेतिभावः । एषाचप्रगल्भानायिकापाणिपल्लवमित्यत्रअन्यतरवा

व्यक्तप्रबाधकप्रमाणाभावादुपमारूपकयोः सन्देहसङ्करः ॥ १५ ॥

सलीलमिति। आसक्ता लतान्ताः पल्लवा भूषणं यस्य तत् पल्लवैः सह ग्रथितमित्यर्थः। कुसुमावतंसकं पुष्पशेखरं कान्तदत्तमिति भावः। सलीलं समासजन्त्या शिरसि प्रतिदधत्याः दंशसञ्जस्वञ्जां शपीत्यनुनासिकलोपः। कान्तया कश्चित् स्तनाभ्यामुपपीड्य स्तनोपपीडं सप्तम्यां चेत्यादिना णमुल्प्रत्ययः। नितम्बिना प्रशंसायामिनिः घनेन निबिडेन जघनेन। पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः इत्यमरः। नुनुदे नुन्नः अभिमुखानिरेकादिति भावः। एषा च प्रगल्भैव ॥ १६ ॥

अथ युग्मेनाह। कलत्रेति। विलोलनीविना गात्रोन्नमनाद्विश्लिष्टवस्त्रग्रन्थिना क

सलीलमासक्तलतान्तभूषणं समासजन्त्या कुसुमावतंसकम्। स्तनोपपीडं नुनुदे नितम्बिना घनेन कश्चिज्जघनेन कान्तया ॥ १६ ॥

कलत्रभारेण विलोलनीविना गलद्दुकूलस्तनशालिनोरसा। बलिव्यपायस्फुटरोमराजिना निरायतत्वादुदरेण ताम्यता ॥ १७ ॥

लत्रभारेण श्रोणिभारेण तथा गलत् स्रंसमानं दुकूलं याभ्यां ताभ्यां स्तनाभ्यां शालत इति तथोक्तेनोरसा तथा बलिव्यपायेन भङ्गिनिवृत्त्या स्फुटा रोमराजिर्यस्मिन् तेन निरायतत्वात् प्रसारितत्वात् ताम्यता तनूभवता उदरेण चोपलक्षिता। स्वभावोक्तिरलङ्कारः ॥ १७ ॥

विलम्बमानेति। विलम्बमानो विस्रंसमान आकुलो विलुलितः केशपाशो यस्यास्तया आविष्कृतबाहुमूलया दर्शितकक्षप्रदेशया कयाचित्कान्तया तरुप्रसूनान्यपदिश्य प्रसूनग्रहणव्याजीकृत्येत्यर्थः। व्याजोऽपदेशो लक्ष्यं चेत्यमरः। सादरं साभिलाषं मनो धिनं यस्य प्रियस्य मनः समाददे आचकर्षे कर्मणि लिट्। सर्वाङ्गसै

ष्टवद्दर्शनात् । सद्यो लग्नम्प्रियमनस्तत्वेति भावः । अत्र प्रियमनोहरणहेतुभिः कान्ताविशेषणपदार्थैः काव्यलिङ्गमुत्तिष्ठमानं स्वभावोक्त्या सहाङ्गाङ्गिभावेन सङ्कीर्यते ॥ १८ ॥ ॥

व्यपोहितुमिति । उन्नतौ च पीवरौ च स्तनौ यस्याः सा उन्नतपीवरस्तनी स्वाङ्गाच्चेत्यादिना ङीप् । काचिल्लोचनतः स्वनेत्रात् पुष्पजं रजः परागं मुखानिलैः फूत्कारमारुतैः व्यपोहितुं अपनेतुं अपारयन्तं किल अशक्नुवन्तं किलेत्यलीके । वस्तुतस्तदास्यस्पर्शलोभादपारयन्तमित्यर्थः । प्रियमुन्मनाः उत्सुका सती आननस्य पयोधरेणोरसि

विलम्बमानाकुलकेशपाशया कयाचिदाविष्कृतबाहुमूलया । तरु
प्रसूनान्यपदिश्य सादरं मनोधिनाथस्य मनः समाददे ॥ १८ ॥
युग्मं ॥ व्यपोहितुं लोचनतो मुखानिलैरपारयन्तं किल पुष्पजं रजः ।
पयोधरेणोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तनी ॥ १९ ॥
इमान्यमूनीत्यपवर्जिते शनैर्यथाभिरामं कुसुमाग्रपल्लवे । विहा
य निस्सारतयेव भूरुहान्पदं वनश्रीर्वनितासु सन्दधे ॥ २० ॥

जघान । तत्कपटपरिज्ञानजन्यादौत्सुक्यादिति भावः । हननस्थानत्वादुरसीति सप्तमी । इयञ्च प्रगल्भैव ॥ १९ ॥ ॥

इमानीति । यथाभिरामं वीप्सायामव्ययीभावः । कुसुमान्यग्रपल्लवानि च कुसुमाग्रपल्लवं तस्मिन् जातिरप्राणिनामित्येकवद्भावो नपुंसकत्वं इमान्यमूनीति इत्यनिर्देशपूर्वकमित्यर्थः । इदमदसोः सन्निकृष्टविप्रकृष्टार्थैः शनैरपवर्जिते ऽपचिते सति वनश्रीर्निःसारतयेवेति हेतूत्प्रेक्षा । भूरुहान् तरून् विहाय वनितासु पदं सन्दधे । अत्र वनितागतायाः पुष्पप्रसाधनसम्भावनायाः लक्ष्म्याः विषयभूतायाः निगरणे

नविषयेणाश्रियोवनितागतत्वोक्त्याऽसम्बन्धेसम्बन्धरूपाभेदेऽभेदरूपावाऽतिश
योक्तिरलङ्कारः। विषयस्यानुपादानाद्विषय्यप्युपपाद्यते। यत्रसातिशयोक्तिःस्या
त्कविप्रौढोक्तिजीवितेतिलक्षणात्॥ २०॥ **∽*०*∽*०*∽** ॥

प्रवालेति। प्रवालभङ्गेनपल्लवलवेनारुणःपाणिपल्लवःनद्दसरञ्जनादित्यर्थः।
परागेणपुष्परजसापाण्डूकृतौपीवरौस्तनौयस्यसः पुष्पैःसुगन्धिःसुरभिःअङ्गना
जनोमहीरुहोवृक्षजातान्वपुर्गुणस्यस्वदेहगुणस्यउच्छ्रायःपाणिपल्लवारुण्या
देर्य्यदुत्कर्षस्तंआददेलब्धवानिवेत्युत्प्रेक्षा। वस्तुतस्तुस्वाभाविकएवप्रवालभ
ङ्गादिभिरभिव्यज्यतइतिभावः। उत्कृष्टःआयउच्छ्रायइतिघञन्तेनप्रादिसमा

प्रवालभङ्गारुणपाणिपल्लवःपरागपाण्डूकृतपीवरस्तनः। मही
रुहःपुष्पसुगन्धिराददेवपुर्गुणोच्छ्रायमिवाङ्गनाजनः॥ २१॥
वरोरुभिर्वारणहस्तपीवरैश्चिरायखिन्नान्नवपल्लवश्रियः। समे
पियातुञ्चरणाननीश्वरान्मदादिवप्रस्खलतःपदेपदे॥ २२॥

सः। ननूपसृष्टात्घञ्प्रत्ययःश्रीणीभुवोनुपसर्गेइतिप्रतिषेधात्॥ २१॥ ❀ ॥
पञ्चभिःकुलकमाह। वरोरुभिरिति। अनुसानुसानुषुयद्गमनंततःसकाशात्गुरु
शाखेदेनमन्थरमलसंविनिर्यतीनाङ्गच्छन्तीनांसुराङ्गनानांसम्बन्धिभिर्वारणह
स्तपीवरैःकरिकरस्थूलैःवराश्चतेउरवश्चेतितैःचिरायखिन्नान्। किंचनवपल्लवा
नांश्रीरिवश्रीर्य्येषान्तान्तद्वन्मृदूनित्यर्थः। अतएवसमेसमस्थलेपिकिम्पुनर्वि
षमइतिभावः। यातुङ्गन्तुमनीश्वरान्अशक्तान्अतएवमदादिवपदेपदेवीप्सा
र्थाद्विर्भावः। प्रस्खलतश्चरणान्। मदादिवेत्युपमा॥ २२॥ *∽∽* ॥
विसारीति। विसारिभिःकाञ्चीमणिरश्मिभिःलब्ध्यातज्जनितयेत्यर्थः। मनोहर

उच्छ्रायः उन्नतिर्येषान्तेषान्नितम्बानां शोभया करणेन नवसैकतानां द्युतिं शोभां जित्वा स्थितानि तत्तुल्यानीत्यर्थः । अत एवोपमालङ्कारः । श्रमेणातिरिक्तैरतिशयितैः गौरवैर्गुरुत्वैरुपलक्षितानि नितराम्भासेपमस्थितानि तत्तुल्यानीत्यर्थः । जघनानि च । उच्छ्रायो व्याख्यातः ॥ २३ ॥

समुच्छ्रसदिति । समुच्छ्रसत्पङ्कजकोशकोमलैः उल्लसत्कमलमुकुलैर्मुग्धैरित्युपमानाभिभिः प्रतारिकाख्यैः । अयनाभिसंज्ञम्बराङ्गं यस्य संज्ञा प्रतारिकेति केशवः । पुल्लिङ्गतायान्तु कविरेव प्रमाणम् । उपनीवि नीवीसमीपे । उपाहित

विसारिकाञ्चीमणिरश्मिलब्धया मनोहरोच्छ्रायनितम्बशोभया ।
स्थितानि जित्वा नवसैकतद्युतिं श्रमातिरिक्तैर्जघनानि गौरवैः ॥ २३ ॥
समुच्छ्रसत्पङ्कजकोशकोमलैरुपाहितश्रीण्युपनीविनाभिभिः । द-
धन्ति मध्येषु वलीविभङ्गिषु स्तनातिभारादुदराणि नम्रताम् ॥ २४ ॥
समानकान्तीनि तुषारभूषणैः सरोरुहैरस्फुटपत्रपंक्तिभिः । चिता-
नि घर्माम्बुकणैः समन्ततो मुखान्यनुत्फुल्लविलोचनानि च ॥ २५ ॥

श्रीणि जनितशोभानि तथा वलीविभङ्गिषु ऊर्मिमत्सु मध्येषु जघनस्थलेषु स्तनातिभारात् नम्रतान्दधन्ति । बिभ्राणानि । वा नपुंसकस्येति विकल्पान्नुमागमः उदराणि च ॥ २४ ॥

समानेति । किञ्च घर्माम्बुकणैः स्वेदोदकबिन्दुभिः समन्ततश्चितानि व्याप्तानि अनुत्फुल्लविलोचनानि अविकसदक्षीणि । अत एव तुषारभूषणैः सीकरपरिवृतैः । तुषारौ हिमसीकराविति शाश्वतः । अस्फुटपत्रपंक्तिभिः । अविकचदलावलिभिः । व्याकोशविकचस्फुट इत्यमरः । सरोरुहैः समानकान्तीनीत्युपमा । मुखा

निचे ॥ २५ ॥ ॥

विनिर्य्यतीनामिति । सविस्मयं रूपयतः पूर्वोक्तचरणादीनि वर्णयतो नभस्वरान्गन्धर्वान् तत्पूर्वमिव तद्देव प्रथमं यथा इत्युत्प्रेक्षा ईक्षणादरः आलोकनकौतुकं विवेश पूर्वार्द्धे व्याख्यातम् । अत्र कुलकेऽस्वभावोक्तिरुत्प्रेक्षाङ्गम् ॥ २६ ॥ ** ** ॥

सम्प्रति सलिलक्रीडावर्णनमारभते । अथेति । अथ पुष्पावचयानन्तरं स्फुरद्भिश्चलद्भिर्मीनैर्विधूतपङ्कजेति सदृक्मुखवीक्षणोक्तिः विपङ्कम्पङ्करहितं विहारयोग्यमिति यावत् । तत्र तीरे स्खलिता विचलिता ऊर्म्मिसंहतिर्य्यस्यां सेति हस्तसंज्ञोक्तिः ।

विनिर्य्यतीनां गुरुखेदमन्थरं सुराङ्गनानामनुसानुवर्त्मनः । सवि

स्मयं रूपयतो नभस्वरान्विवेश तत्पूर्वमिवेक्षणादरः ॥ २६ ॥ कुल

कम् ॥ अथ स्फुरन्मीनविधूतपङ्कजा विपङ्कतीरस्खलितोर्मिसंहतिः

। पयोवगाढुङ्कलहंसनादिनी समाजुहावेव वधूः सुरापगा ॥ २७ ॥

प्रशान्तघर्माभिभवः शनैर्विवान्विलासिनीभ्यः परिमृष्टपङ्कजः । द

दौ भुजालम्बमिवात्तसीकरस्तरङ्गमालान्तरगोचरोऽनिलः ॥ २८ ॥

कलहंसनादिनीकादम्बशब्दवतीति वाग्व्यापारोक्तिः । अत एव सुरापगा गङ्गा वधूरप्सरसः पयोऽवगाढुमवगाहितुं ह्लादेः रदितत्वादिड्विकल्पः समाजुहावेव आकारयामासेवेत्युत्प्रेक्षा इति । हूतिराकारणाह्वानमित्यमरः । ह्वयतेर्लिट् । अभ्यस्तस्य चेति सम्प्रसारणम् ॥ २७ ॥ ॥

प्रशान्तेति । प्रशान्तघर्माभिभवः प्रशान्तोष्णबाधः । वाद्दान्तशान्तेत्यादिना निपातनात्साधुः । शनैर्विवान्मन्दं वहन्वातेः शतृप्रत्ययः । परिमृष्टपङ्कजः पद्मगन्धोपेतः । आत्तसीकरः कृतः तरङ्गमालानामन्तरे मध्ये गोचरः स्थानं यस्य सोऽनिलो वि

शालिनीभ्यो भुजावलम्बन्ददाविवेत्युत्प्रेक्षा । विशिष्टघायुसम्पर्कात्तयोः सुरभित्व
घैः ॥ २८ ॥ *** ❁❁❁ *** ❁—❁ *** ❁❁❁ *** ॥

गतैरिति । सुरस्त्रियोऽप्सरसः सहावैः सविलासैर्गतैः गतिभिः नपुंसके भावे क्तः क
लहंसानां विक्रमं गतिं विलासविधुरमिति शेषः । तथा नितम्बैः कलत्रभारैः जघन
भारैः पुलिनन्तथा दीर्घलोचनैर्मुखैः सरोजानि च साम्यगुणान्निरासिरे निरस्तवत्यः
गुणावद्गुणयोः कुतः साम्यमिति भावः । अस्यतेः कर्तरि लिट् । उपसर्गादस्यत्यूह्यो
र्वेति विकल्पादात्मनेपदम् ॥ २९ ॥ ❁*❁—❁*❁—❁*❁—❁*❁ ॥

गतैस्सहावैः कलहंसविक्रमं कलत्रभारैः पुलिनन्नितम्बिभिः । मुखैः
सरोजानि च दीर्घलोचनैस्सुरस्त्रियस्साम्यगुणान्निरासिरे ॥ २९ ॥
विभिन्नपर्यन्तगमीनपङ्क्तयः पुरो विगाढाः सखिभिर्मरुत्वतः । कथ
ञ्चिदापस्सुरसुन्दरीजनैस्सभीतिभिस्तत्प्रथमम्प्रपेदिरे ॥ ३० ॥
विगाढमात्रे रमणीभिरम्भसि प्रयत्नसंवाहितपीवरोरुभिः । वि
भिद्यमाना विससार सारवानुदस्य तीरेषु तरङ्गसंहतिः ॥ ३१ ॥

विभिन्नेति । विभिन्ना विच्युतसङ्घाताः पर्य्यन्तगाः प्रान्तगताः मीनानाम्पङ्क्तयो यासां
ताः कुतः मरुत्वतः सखिभिरिन्द्रसचिवैर्गन्धर्वैः पुरः पूर्वमवगाढाः प्रविष्टाः तासां विक्षा
सार्थं गन्तव्या हादि परीक्षार्थञ्चेति भावः । सभीतिभिः अप्रविष्टविषयत्वात्सभयैर्विया
दिभिरिति पाठेप्ययमेवार्थो लभ्यः सुरसुन्दरीजनैः तदेवावगाहनम्प्रथमं यथा तथा
। अत एव कथंचिद्भयात्कृच्छ्रेण आपः प्रपेदिरे जगाहिरे ॥ ३० ॥ ❁❁❁❁ ॥

विगाढेति । प्रयत्नेन सम्वाहिताः सञ्चारिताः पीवरा ऊरवो याभिस्ताभिः रमणीभिः
अम्भसि विगाढमात्रे प्रविष्टे एवं घतिसुप्सुपेति समासः । मात्रङ्कार्त्स्न्येऽवधारणे इ

त्यमरः । विभिद्यमानास्स्वयंविशीर्य्यमाणाकर्म्मकर्त्तरिशानच् । तरङ्गसंहतिस्रो
रेषुसारसान्पक्षिविशेषान् । सारसोमैथुनीकामीगोनर्द्दःपुष्कराह्वयइतियाद
वः । यद्वा । सारसान्हंसान्चक्राङ्गःसारसोहंसइतिशब्दार्णवे । उदस्योत्सा
र्य्य ससारवितस्तार ॥ ३१ ॥ ॥

शिलेति । शिलावत्घनैःकठिनैःनाकसदाङ्गन्धर्वाणांउरःस्थलैर्वृहन्निवेशैर्महा
संस्थानैरतिस्थूलैरित्यर्थः । वधूपयोधरैश्चतटमभितःनीतेनप्रापितेनअतएववि
भिन्नवीचिनाभग्नोर्म्मिणाअम्भसाकर्त्रारुषेवेतिहेतूत्प्रेक्षा । कलुषत्वमाविलत्वमन्तः
क्षोभश्चध्वन्यते । भेजेकर्मणिलिट् । यथाकश्चिन्मृदुस्वभावःकेनचित्कठिनादि

शिलाघनैर्नाकसदामुरस्स्थलैर्वृहन्निवेशैश्चवधूपयोधरैः । तटा
भिनीतेनविभिन्नवीचिनारुषेवभेजेकलुषत्वमम्भसा ॥ ३२ ॥
विधूतकेशाःपरिलोलितस्रजःसुराङ्गनानाम्प्रविलुप्तचन्दनाः । अ
तिप्रसङ्गाद्विहितागसोमुहुःप्रकम्पमीयुस्सभयाइवोर्म्मयः ॥ ३३ ॥

नासंगभङ्गन्ताडयित्वानिष्कासितःक्षुभ्यतितद्वदितिभावः । कलुषत्वमित्यत्रवा
च्यप्रतीयमानयोरभेदाध्यवसायः । अन्यथाम्भसोवाच्यस्याविलत्वस्यरोषहेतुकत्वा
नुत्प्रेक्षानुविधानादिति ॥ ३२ ॥ ॥

विधूतेति । विधूताविक्षिप्ताःकेशायैस्तेपरिलोलिताःस्रजोयैस्तेप्रविलुप्तचन्दनाःप्रमृ
ष्टाङ्गरागाःअतिप्रसङ्गादविच्छेदात्सुराङ्गनानांविहितागसःकृतमर्दनखण्डन
रूपापराधाः । अतएवोर्म्मयःसभयाइवस्त्रीभ्योभीताइवमुहुःप्रकम्पमीयुःस्वाभा
विकस्यकम्पस्यभयहेतुत्वमुत्प्रेक्ष्यते । यद्वासुराङ्गनानांविधूतकेशाइत्यादियोज
नासापेक्षत्वेपिगमकत्वात्समासः । स्त्रीसंग्रहणसाहसमपराधःभयन्तुराजादिभ्य

इति ॥ ३३ ॥ ** ●● ** ●● ** ●● ** ●● ** ●● ** ●●॥
विपक्षेति । विपक्षस्य सपत्नीजनस्य चित्तानामुन्मथना व्यथका इत्यर्थः । नन्द्यादित्वाल्ल्यु
हणात्कर्त्तरि ल्युट् । येन नखव्रणाः नखक्षतानि । व्रणोऽस्त्रियामित्यमरः । विभ्रमस्य
सौन्दर्य्यस्य मण्डनं तस्मात्तदर्थेष्यश्वघासादित्वात्षष्ठीसमासः । ननु चतुर्थीसमासः धू
मायद्दार्वादिवत्प्रकृतिविकारभावादिति । तेन कुङ्कुमलेपादिना तिरोहिताः छन्नाः हृ
तस्य क्षालितस्य कुङ्कुमस्य शेषानिवावशिष्टलेशानिव स्थितानित्युत्प्रेक्षा विकत्थनीयान्
भर्तृत्वाल्लभ्यस्य व्यञ्जकत्वेन श्लाघनीयान् तान्नखव्रणान् स्त्रियोऽन्यथा दधुः प्रकाश

विपक्षचित्तोन्मथना नखव्रणास्तिरोहिता विभ्रममण्डनेन ये । हृत
स्य शेषानिव कुङ्कुमस्य तान्विकत्थनीयान्दधुरन्यथा स्त्रियः ॥ ३४ ॥
सरोजपत्रे नु विलीनषट्पदे विलोलदृष्टेः स्विदमू विलोचने । शिरोरु
हाः स्विन्नतपक्ष्मसन्ततेर्द्विरेफवृन्दं नु निःशब्दनिश्चलम् ॥ ३५ ॥
अगूढहासस्फुटदन्तकेसरं मुखं स्विदेतद्विकसन्नु पङ्कजम् । इति प्र
लीनां नलिनीवने सखीं विदांबभूवुः सुचिरेण योषितः ॥ ३६ ॥ युग्मं ॥

न्दधुरित्यर्थः ॥ ३४ ॥ * ॥ ● ॥ * ॥ ● ॥ * ॥ ● ॥ * ॥ ● ॥ * ॥ ●॥
अथ युग्मेनाह । सरोजेत्यादिना । अमू पुरोवर्त्तिनी विलीनषट्पदे संसक्तभृङ्गे एके
नैनिकत्वमक्ष्णोरर्थसिद्धिरित्युपमानविशिष्यते । सरोजपत्रे नु यद्वा विलोलदृष्टे
श्चञ्चलाक्ष्याः विलोचने स्वित् । नुस्वित्शब्दौ वितर्कौ । किञ्च नतपक्ष्मसन्ततेः चञ्चला
क्ष्याः शिरोरुहाः स्वित् निःशब्दं नीरवञ्च तत् निश्चलञ्च तत् द्विरेफवृन्दं नु ॥ ३५ ॥ *
अगूढेति । किञ्च अगूढहासं व्यक्तस्मितं तेन स्फुटाः दन्ताः केसरा इव दन्तकेसरा य
स्य तत् मुखं स्वित् । यद्वा विकसत्पङ्कजं नु इति इत्थं संशयेनेति शेषः । नलिनीवने प्रली

नानिगूढं सखीयोषितः सुचिरेणातिविलम्ब्य विदांबभूवुः विदुः निश्चिक्युरित्यर्थः । उ
षविदजागृभ्योऽन्यतरस्यामिति विकल्पादाम्प्रत्ययः । अत्र युग्मे निश्चयान्तः सन्दे
हालङ्कारः ॥ ३६ ॥

प्रियेणेति । काचित्प्रियेण संग्रथ्य स्वयमेव रचयित्वा विपक्षसंनिधौ सपत्नीजनसमक्ष
पीवरस्तने वक्षसि उपाहितां स्रजं मालां जलाविलां मृदितामपीत्यर्थः । तां न विज
हौ न तत्याज । न च निर्गुणतायां तत्र का प्रीतिरिति वाच्यमित्यर्थान्तरन्यासेनाह गु
णाः प्रेमणि वसन्ति वस्तुनि न वसन्ति हि । यत्प्रेमास्पदं तदेव गुणवत् । अन्यत्तु गुण
वदपि निर्गुणमेव प्रेम तु न वस्तुपरीक्षामपेक्षत इति भावः ॥ ३७ ॥

प्रियेण संग्रथ्य विपक्षसंनिधावुपाहितां वक्षसि पीवरस्तने । स्रजं
न काचिद्विजहौ जलाविलां वसन्ति हि प्रेमगुणा न वस्तुनि ॥ ३७ ॥
असंशयं न्यस्तमुपान्तरक्ततां यदेव रोद्धुं रमणीभिरञ्जनम् । हृते
पि तस्मिन्सलिलेन शुक्लतां निरासरागो नयनेषु न श्रियम् ॥ ३८ ॥

असंशयमिति । स्त्रीणां नेत्रशोभार्थमञ्जनधारणमम्बुविहारादुपगमाद्रक्तवर्णत्वञ्चा
क्ष्णान्ततः शुक्लत्वतिरोधानञ्च निश्चितमित्युत्प्रेक्षते । रमणीभिर्यदञ्जनं न्यस्तं तदि
ति शेषः यत्तदोर्नित्यसम्बन्धात् । तदञ्जनमुपान्त्ययोः रक्ततां रोद्धुं प्रतिबद्धुमेव न्यस्तं
न तु शोभार्थमित्यर्थः । अन्यथा रागाभिव्याप्त्या शुक्लत्वतिरोधानं स्यादित्यर्थः । असंश
यमित्युत्प्रेक्षाव्यञ्जकं संशयस्याभावः । नात्र संशयोऽस्तीत्यर्थः । अर्थाभावेऽव्ययी
भावः । कुत एतदिति चेत् । यतस्तस्मिन् अञ्जने सलिलेन हृते क्षालिते सत्यपि रागः
पूर्वोक्त एवोपान्तरक्ततां किन्तु प्रतिबन्धाभावादभितो व्याप्येत्यसंशयः । नयनेषु शु
क्लतां निरास निरस्तवान् । अस्यतेर्लिट् । श्रियं शोभान्तु न निरास अतः शुक्लत्वविरोधि

रागविरोधार्थमेवेदमञ्जनं स्यान्न तु शोभार्थं न तस्यास्तदभावेपि सद्भावादित्यर्थः । अ-
ञ्जनापगमेपि नयनानां राग एवालङ्कारी भूदिति भावः । अत्राञ्जनन्यासमनूद्य
तस्य शोभार्थत्वनिषेधेन रागरोधार्थत्वोत्प्रेक्षणं उदितं उत्तरार्द्धं तस्यैव समर्थनात् ।
एवमुपरोद्धुं यदञ्जनन्यस्तमित्येकान्वये विध्यनुवादविरोधः स्यात् ॥ ३८ ॥ ● ● ॥
द्युतिमिति । द्युतिं शोभान्तेजश्च वहन्तः वेगिभिः जविभिर्जलैः जडलयोरभेदा-
त् । यद्वा जलं गोकलले नीरे ह्रीवेरे च जडेऽन्यवदिति विश्वः । प्रलोभान्मोहात्
हृता गृहीता उपप्लुता मृदिताः । यद्वा कर्त्तरि क्तः प्लवमाना इत्यर्थः । अन्यत्र धनग्र-
हणबन्धनादिना पीडिता वनितावतंसकाः च्युताधिकाराः भ्रष्टाधिकाराः सचिवा इवात-

द्युतिं वहन्तो वनितावतंसका हृताः प्रलोभादिव वेगिभिर्जलैः । उ-
पप्लुतास्तत्क्षणशोचनीयतां च्युताधिकाराः सचिवा इवाययुः ॥ ३९ ॥
विपत्रलेखा निरलक्तकाधरा निरञ्जनाक्षीरपि बिभ्रतीः श्रियम् । नि-
रीक्ष्य रामा बुबुधे नभश्चरैरलंकृतं तद्वपुषैव मण्डनम् ॥ ४० ॥

त्क्षणं शोचनीयतामाययुः ॥ ३९ ॥ ● ● ● ● ● ● ● ● ● ● ● ● ● ॥
विपत्रेति । विगताः पत्रलेखा यासां ता विपत्रलेखाः निरलक्तकाः क्षालितरागा अ-
धरा यासां ता निरञ्जनाक्षीरपि । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् । पित्गौरादि-
भ्यश्चेति ङीष् । तथापि श्रियं बिभ्रतीः शोभाकारणाभावेपि शोभमाना इति विभावना-
लङ्कारः । रामा निरीक्ष्य नभश्चरैर्गन्धर्वैः तासां वपुषैव मण्डनमलंकृतं न तु मण्ड-
नेन तद्वपुरित्यक्षरार्थः इति बुबुधे । कर्मणि लिट् । स्वभावरमणीयानां किमलंकर-
णैरिति भावः ॥ ४० ॥ ● ● ● ● ● ● ● ● ● ● ● ● ● ● ● ● ● ● ॥
तथेति । विलासिनीजनः पूर्वं जलविहारात्प्राक् कृतो भूषणेष्वादरः आसक्तिर्येन

सुःश्रेनुरक्तप्रियत्वात् । सम्यक्प्रसाधितःसन्नपीत्यर्थः । प्रियस्यानुरागेणचविप
क्षयोषितांसपत्नीनांदृष्टीश्चक्षूंषितथानददाहनदुःखीचकारयथाजलार्द्रःसन्
खशद्धेननखक्षतानिविवक्ष्यन्तेतान्येवमण्डनन्तस्यश्रियाकृतशोभयेत्यर्थः । विप
क्षयोषितांसपत्नीनांदृष्टीःचक्षूंषियथाददाहतापयामासमण्डनान्तरादपिनख
मण्डनानुरागादर्पितदनुभावएवसपत्नीनान्दुःखहेतुरितिभावः । जलार्द्रोददाहे
तिविरुद्धकार्य्योपनिरूपोविषमालङ्कारः । विरुद्धकार्यौत्पत्तिश्चयथार्थसम्भावो
भवेत् । विरूपघटनावास्याद्विषमालंकृतिस्त्विधेतिलक्षणात् ॥ ४१ ॥ ❀ ❀ ॥
शुभेति । शुभाननाविलोलहारानितान्तगौर्य्योऽरुणाः । गौरोरुणेषितेपीतइ

अथानपूर्वेकृतभूषणादरम्प्रियानुरागेणविलासिनीजनः । यथा
जलार्द्रीनखमण्डनश्रियाददाहदृष्टीःप्रतिपक्षयोषिताम् ॥ ४१ ॥
शुभाननाःसाम्बुरुहेषुभीरवोविलोलहाराश्चलफेनपङ्क्तिषु । नि
तान्तगौर्योहृतकुङ्कुमेष्वलन्नलेभिरेताःपरभागमूर्मिषु ॥ ४२ ॥

तिवैजयन्ती । भीरवःताःस्त्रियःसाम्बुरुहेषुचलाःफेनपङ्क्तयोयेषुहृतानिकुङ्कुमा
नियैस्तेषुकुङ्कुमसंक्रान्तारुणेष्वित्यर्थः । ऊर्मिषुविषयेषुश्चलमत्यर्थम्परभागङ्गुणो
त्कर्षेनलेभिरे । परभागेगुणोत्कर्षइतियादवः । तासामूर्म्मीणाञ्चारुणत्वादिगुण
साम्यात्नकश्चिद्विशेषोलक्ष्यतइत्यर्थः । अतएवसामान्यालङ्कारः । सामान्यंगुण
साम्येनयत्रवस्त्वन्तरेकतेतिलक्षणात्अनयोरङ्गाङ्गिभावेनसङ्करः ॥ ४२ ॥ ❀ ॥
ह्रदेति । व्यस्ताभ्यांविपर्य्यासिताभ्याम्वधूकराभ्यांआहतेएकेनकरेणान्यायान्ये
नताडितइत्यर्थः । ह्रदाम्भसिमृदङ्गध्वनिवत्धीरङ्गम्भीरंरवमुज्झतिसतितथा
ध्वनतिसतीत्यर्थः । मुक्तस्तनैस्तालोगीतवाद्यन्त्यानाङ्कालपरिच्छेदः । तालःका

लक्रियामानमित्यमरः । तस्य सममनुरूपं मनोरमं नृत्यमिव प्रवेपितं प्रकम्पितं
म्भावेनः समाददे प्राप । उपमालङ्कारः ॥ ४३ ॥ *\~*\~*\~* ॥
श्रियेति । श्रिया शोभया कमलानि हसद्भिः कमलसदृशैरित्यर्थः । हसतीर्ष्यत्यसू
यतीत्यादिदण्डिना सदृशपर्यायपरा उक्ताः सस्मितैः प्रतिमागतैः प्रतिबिम्बगतैरित्यर्थः ।
प्रतिमानं प्रतिबिम्बमित्यमरः । मुखैरलंकृतान्यम्बूनि यस्याः सा । किं च सुरराज
योषितां कृतमानुकूल्यं विहारद्वारोपकारो यया सा इत्थं योषित्सूपकृत स्वयं च ताभिरु
पचिकीर्षुः जाह्नवी गङ्गा प्रसादस्य स्वच्छस्य साफल्यमर्थगौरवं पद्मोदनात्निर्याहः

हृताम्भसि व्यस्तवधूकराहतेरवं मृदङ्गध्वनिधीरमुज्झति । मुहुः
स्तनैस्तालसमं समाददे मनोरमं नृत्यमिव प्रवेपितम् ॥ ४३ ॥
श्रिया हसद्भिः कमलानि सस्मितैरलंकृताम्बुः प्रतिमागतैर्मुखैः । कृता
नुकूल्या सुरराजयोषितां प्रसादसाफल्यमवाप जाह्नवी ॥ ४४ ॥
परिस्फुरन्मीनविघट्टितोरवः सुराङ्गनास्त्रासविलोलदृष्टयः । उपा
ययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम् ॥ ४५ ॥

। अवाप । अत्राम्भसि विहारे बिम्बग्रहणयोरसम्भवादित्यर्थः । स्वच्छा एव हि प
रैरुपक्रियन्ते स्वयं चोपकुर्वते तेषामिति भावः । कृतानुकारे इति पाठेऽनुकारोऽनुकूल
करणमुपकार इत्येवं व्याख्येयं । अत्र जाह्नवी विशेषणपदार्थस्य साफल्यं प्रति हेतुम
त्वात्काव्यलिङ्गमलङ्कारः ॥ ४४ ॥ *** ॥ ००० ॥ * ॥ ००० ॥ *** ॥
परीति । परिस्फुरद्भिर्विवर्तमानैर्मीनैर्विघट्टिता ऊरवो यासां तास्त्रासेन त्रासाद्विलो
लदृष्टयः । कम्पितपाणिपल्लवाः सुराङ्गनाः सखीजनस्यापि विलोकनीयतामुपाय
युः । किमुत प्रियजनस्येति भावः । स्वभावोक्तिरलङ्कारः ॥ ४५ ॥ ० * ॥

भयादिति । मानिनीदुर्लभस्वयंग्रहणेतिभावः । अम्भसि झषेणमत्स्येनाहतेऽ
ति । पृथुरोमाझषोमत्स्यइत्यमरः । भयादिवनतुकामुकतयेतिभावः । किन्तुमु
दानैसर्गिकयैवाश्लिष्यप्रियमानन्दयतिस्म तथाहि । रामाःस्त्रियःअकृत्रिमोऽनारो
पितोयःप्रेमैवरसस्तेनाहितैर्जनितैःकृतकैःकृत्रिमैरपीहितैश्चेष्टितैर्मनोहरन्ति
अतोऽपितस्याभयप्रेममूलत्वान्मनोहरंबभूवेत्यर्थः । अत्रस्वानुभवेनभयेनानु
रागनिगूहनान्मीलनालङ्कारः । मीलनंवस्तुनायत्रवस्त्वन्तरनिगूहनमितिलक्ष
णात्तत्समर्थनादर्थान्तरन्यासेनसंसृज्यते ॥ ४६ ॥

भयादिवाश्लिष्यझषाहतेम्भसिप्रियंमुदानन्दयतिस्ममानिनी । अ
कृत्रिमप्रेमरसाहितैर्मनोहरन्तिरामाःकृतकैरपीहितैः ॥ ४६ ॥
तिरोहितान्तानिनितान्तमाकुलैरपांविगाहादलकैःप्रसारिभिः । य
युर्वधूनांवदनानितुल्यतांद्विरेफवृन्दान्तरितैःसरोरुहैः ॥ ४७ ॥
करौधुनानानवपल्लवाकृतीपयस्यगाधेकिलजातसंभ्रमा । सखीषु
निर्वाच्यमधार्ष्ट्यदूषितंप्रियाङ्गसंश्लेषमवापमानिनी ॥ ४८ ॥

तिरोहितेति । अपांविगाहादवगाहान्नितान्तमाकुलैर्विकीर्णैःप्रसारिभिश्चञ्चलैरलकैःकेशैस्ति
रोहितान्तानिछन्नप्रान्तानिवधूनांवदनानिद्विरेफवृन्दैरन्तरितानितैःसरोरुहैस्तु
ल्यतांययुरित्युपमालङ्कारः ॥ ४७ ॥
करौविति । मानिनीपयस्यगाधेमतिनिमज्जनशङ्कयाभयादित्यर्थः । जातसं
भ्रमानवपल्लवाकृतीकरौधुनानाकम्पयन्ती । धुनोतेःक्र्यादिकाच्छतरिशानच् ।
सखीषुविपर्ययेननिर्वाच्यमवाच्यंवक्तुमित्यर्थः । धार्ष्ट्यदूषितन्नभवतीत्यधार्ष्ट्यदूषि
तंतं । तत्कृतोऽनुरागस्तेनकामिनाभयमुक्तत्वाद्दोषपादितिभावः । प्रियाङ्गसंश्लेषमवाप

ऽप्यपितुल्याङ्गेनभयेनागन्तुकेनसहजानुरागनिगूहनान्मीलनालङ्कारः । तदुक्त ङ्काव्यप्रकाशे । समानलक्ष्मणांवस्तुतस्तुनायन्निगूह्यते । निजेनागन्तुनावापित न्मीलनमुदाहृतम् ॥ ४८ ॥ ॥

प्रियैरिति । प्रियैःसलीलंकरवारिभिरञ्जलिजलैर्वारितोवरुद्धःसिक्तइत्यर्थः । प्रवृद्धैरुन्नतैर्निश्वासैर्विकम्पितौस्तनौयस्यसः।सविभ्रमंसविलासमाधूतानिकराग्रपल्लवानिपाणिपल्लवानियेनसः । विलसनशीलाविलासिनी । वीकषलसकत्थस्रम्भइतिघिनुण्सैवजनःजाताजेकवचनम् । यथार्थतामापञ्चनारीत्याअनेकविलासवत्तायाययार्थनामकत्वमवापेत्यर्थः । कश्चिद्गन्यमानार्थस्यप्रयोगः । यथामाघे

> प्रियैःसलीलङ्करवारिवारितःप्रवृद्धनिःश्वासविकम्पितस्तनः । स
> विभ्रमाधूतकराग्रपल्लवोयथार्थतामापविलासिनीजनः ॥ ४९ ॥
> उदस्यधैर्य्यंदयितेनसादरम्प्रसादितायाःकरवारिवारितम् । मु
> खन्निमीलन्नयनन्नतभ्रुवःश्रियंसपत्नीवदनादिवाददे ॥ ५० ॥

चिरायथाथार्थमलंभिदिग्गजैरिति । क्वप्रयुज्यतेचयथारघुवंशे । परन्तपोनामयथार्थनामेति । नैषधेपिराजयत्यरिसार्थसार्थकीकृतनामाकिलभीमभूपतिरिति । स्वभावोक्तिरलङ्कारः ॥ ४९ ॥ ॥

उदस्येति । दयितेनधैर्य्यंकाठिन्यमुदस्यापनीयअनुनीयेत्यर्थः सादरंयथातथा । प्रसादितायाःसौमनस्यंजनितायाःनतभ्रुवःस्त्रियःसम्बन्धिकरवारिभिर्वारितमवरुद्धमतएवनिमीलितौनयनेयस्यतन्मुखंसपत्नीवदनादिवश्रियमाददेजग्राह । तदानीन्तद्वदनस्यनिःश्रीकत्वात्तदीयश्रीग्रहणमुत्प्रेक्षते ॥ ५० ॥ ॥

विहस्येति । धृताम्भसिप्रियसेचनार्थंगृहीतजलेपाणौअञ्जलावित्यर्थः । प्रियेणवि

हस्ते विधृते अवलम्बिते सति अतएव मदनार्द्रचेतसः मदनपरवशाया इत्यर्थः । व
ध्वाः सम्बन्धि वीतोच्चयबन्धं मुक्तनीविग्रन्थिस्त्वं समानमित्यर्थः । अंशुकम्पयसा घनी
कृता काञ्ची सखीव बभार जग्राह । स्त्रीणां किल स्त्रीष्वेवापतते लज्जारक्षणमिति
भावः ॥ ५१ ॥ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ॥

निरञ्जनेति । नतभ्रुवोऽङ्गनायाः विग्रहे वपुषि निरञ्जने निर्धौतकज्जले दृशौ क
र्मसाचिविलोकितं तिर्यगीक्षणं कर्तृ मण्डयति स्म । तिर्यगर्थे साचि तिर इत्यमरः ।
अयावकं क्षालितलाक्षारागमोष्ठपल्लवं वेपथुः कम्पो मण्डयति स्म । ट्वितोऽथुजित्यथु

विहस्य पाणौ विधृते धृताम्भसि प्रियेण वध्वा मदनार्द्रचेतसः । सखी
व काञ्ची पयसा घनीकृता बभार वीतोच्चयबन्धमंशुकम् ॥ ५१ ॥
निरञ्जने साचिविलोकितं दृशावयावकं वेपथुरोष्ठपल्लवम् । नतभ्रु
वो मण्डयति स्म विग्रहे वलिक्रिया चातिलकं तदास्पदम् ॥ ५२ ॥
निमीलदाकेकरलोलचक्षुषां प्रियोपकण्ठं कृतगात्रवेपथुः । नि
मज्जतीनां श्वसितोद्धतस्तनः श्रमो नु तासां मदनो नु पप्रथे ॥ ५३ ॥

च् प्रत्ययः । अतिलकं तदास्पदं स्थानं ललाटं आस्पदं प्रतिष्ठायामिति निपातः । व
लिक्रिया रेखाबन्धश्च मण्डयति स्म तदा निरलङ्कारस्याङ्गनाशरीरस्य तच्छरीरवि
कारैरेवालङ्कारः समजनीत्यर्थः ॥ ५२ ॥ ✿ ॥ * ॥ ✿ ॥ * ॥ ✿ ॥ * ॥ ✿ ॥

निमीलदिति । प्रियोपकण्ठं प्रियसमीपे । अत्यन्तसंयोगे द्वितीया । निमज्जती
नाङ्गाहमानानां अतएव निमीलन्ति निमिषन्ति । आकेकराणि आकेकरवन्ति लो
लानि चक्षूंषि यासां तासां । आकेकरलक्षणं नाट्यविलासे । दृष्टिराकेकरा किञ्चि
त्स्फुटापाङ्गे प्रसारिता । मीलितार्द्धपुटालोके तारा व्यावर्त्तनोत्तरेति । तासां स्त्रीणां

जातोगात्राणांवेपथुःकम्पोयेनसःश्वसितैर्निःश्वासैरुद्गतावुत्पतितौस्तनौयेनसःश्रमः
खेदोनुमदनोनुपप्रथेप्रादुर्बभूव। निमज्जनप्रियसन्निधानरूपोभयकारणसम्भ
वान्नेत्रनिमीलनगात्रकम्पनिःश्वासधारणाच्चसन्देहःसङ्करएवालङ्कारः ॥ ५३ ॥ ❁
प्रियेणेति। काचित्प्रियेणविपक्षतःसपत्नीतस्त्वरमम्पश्चात्सिक्तासतीचुकोप। पृष्ठ
न्तुचरमन्ततोरित्यमरः। सान्त्वनैरनुनयैर्नतुतोष। तथाहिरूढप्रणयस्य रूढ
प्रेम्णोजनस्यसम्बन्धीचेतसोमर्षोमनसःप्रकोपःकिमपिकुतोवहितोऽनुनयेसति
भृशायतेगाढोभवति। भृशादिभ्योभुव्यच्वेर्लोपश्चहलइतिक्यङ्। अन्यत्रशान्ति
हेतुरनुनयः। अत्रप्रकोपायैवभवतितत्रकारणन्तुनज्ञायतइत्यर्थः। प्रमादादि

प्रियेणसिक्तास्त्वरमंविपक्षतश्चुकोपकाचिन्नतुतोषसान्त्वनैः। जनस्य
रूढप्रणयस्यचेतसःकिमप्यमर्षोनुनयेभृशायते ॥ ५४ ॥ इत्थंविहृ
त्यवनिताभिरुदस्यमानम्पीनस्तनोरुजघनस्थलशालिनीभिः। उत्स
र्पितोर्मिचयलङ्घिततीरदेशमौत्सुक्यनुन्नमिववारिपुरःप्रतस्थे ॥५५॥

दंश्लोकद्वयंव्यत्ययेनलिखितम् ॥ ५४ ॥ ❁〜❁ ॥ *〜* ॥ ❁〜❁ ॥
इत्थमिति। पीनैस्तनैरूरुभिर्जघनस्थलैश्चशालन्तइतितथोक्ताभिःसलिलनोद
नसामर्थ्योक्तिःस्थलस्यसाक्षाद्प्राण्यङ्गत्वान्नद्वन्द्वैकवद्भावः। वनिताभिरित्थंविहृ
त्योदस्यमानंनुद्यमानंउत्सर्पितैरुपरिभावम्प्रापितैरूर्मिचयैर्लङ्घितस्तीरदेशोयेन
तद्वारिश्रौत्सुक्यंविहारसहिष्णुत्वन्तेननुन्नम्प्रेरितमिवेत्युत्प्रेक्षा। उदवितेत्यादिना
निष्ठानत्वम्पुरोऽग्रेप्रतस्थेस्वजनवदितिभावः ॥ ५५ ॥ *〜*〜*〜* ॥
तीरान्तरमिति। रथांगनाम्नांमिथुनानिचक्रवाकद्वन्द्वानिअन्यानितीराणितीरान्त
राणिनीत्वानियोज्येत्यर्थः। अविहितलक्षणास्तत्पुरुषोमयूरव्यंसकादिषुद्रष्टव्यः

विलोलिताविलुलिताःसरोजवनश्रियोयाभिस्ताःसुरसरिज्जलैर्धौतहाराःक्षालितमु
क्तावलयस्ताःस्तारवितानैरुडुगणैस्तरलाभासुराः। तरलोभासुरे हीरेचञ्चलेपी
निवैजयन्ती। यामवत्योरात्रयइवसंरेजिरे॥ ५६॥ ॥
संक्रान्तेति। संक्रान्तैश्चन्दनरसैर्मलयजद्रवैराहितोवर्णभेदोरूपान्तरंयस्यतत्
विच्छिन्नानित्रुटितानियानिविभूषणानितेषांयेमणिप्रकराःमणिगणास्तैर्यामंशुभि

तीरान्तराणिमिथुनानिरथाङ्गनाम्नांनीत्वाविलोलितसरोजवनश्रिय
स्ताः। संरेजिरेसुरसरिज्जलधौतहारास्तारवितानतरलाइवया
मवत्यः॥ ५६॥ संक्रान्तचन्दनरसाहितवर्णभेदंविच्छिन्नभूषणमणि
प्रकरांशुचित्रम्। बद्धोर्म्मिनाकवनितापरिभुक्तमुक्तंसिन्धोर्बभार
सलिलंशयनीयलक्ष्मीम्॥ ५७॥ इतिमहोपाध्यायश्रीभारविकृतौ
किरातार्जुनीयेमहाकाव्येसुराङ्गनाविहारोनामाष्टमःसर्गः॥ ८॥

श्चित्रन्नानावर्णंबद्धोर्म्मितरलन्तरंगितन्नाकवनिताभिःपरिभुक्तमुक्तंपूर्वंपरिभुक्त
म्पश्चान्मुक्तंपूर्वकालेत्यादिनातत्पुरुषःसिन्धोर्गङ्गायाःसलिलंशेरते। अत्रेतिशयनी
यन्तल्पम्बकुलयहणात्साधुःतस्यलक्ष्मींबभारेत्यर्थः। अत्रएवनिदर्शनालङ्कारः।
लक्षणन्तूक्तम्॥ ५६॥ *॥ इतिश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिवि
रचितायांकिरातार्जुनीयव्याख्यायांघण्टापथसमाख्यायांअष्टमःसर्गः॥ ८॥ *॥

॥ शि० स०॥ वीक्ष्येति। अथ जलक्रीडानन्तरम्भानुमानंशुमान्। आत्तचित्रपरिधानविभूषाः

। सर्गः ९॥ स्वीकृतविविधवस्त्राभरणाः सुरतसन्नाहं वहन्तीरित्यर्थः। अत एव रन्तुमनसः

॥ ९२ ॥ रमणकर्तृकतुमुन्। लुम्पेदवश्यमः कृत्ये तुं काममनसोरपीति मकारलोपः। सु

रनारीः वीक्ष्य तासाम्प्रियार्थन्तात्पर्य्यार्थमिव अवसरदानरूपम्प्रियङ्कर्त्तुमिवेत्य र्थः फलोत्प्रेक्षेयम्। अस्तमदर्शनमकारान्तमव्ययमेतत्। यातुमस्तमुपपयोधिप योधिसमीपे ललम्बे स्रंसे। अस्मिन्सर्गे स्वागतावृत्तम्। स्वागतेति रनभागुरुयुग्मं इति लक्षणात्॥ १॥ ॥

मध्येति। मध्यमोपलनिभे नायकमणिसदृशे। निभसङ्काशनीकाशप्रतिरूपोप

वीक्ष्य रन्तुमनसः सुरनारीरात्तचित्रपरिधानविभूषाः। त
त्प्रियार्थमिव यातुमथास्तम्भानुमानुपपयोधि ललम्बे॥ १॥
मध्यमोपलनिभे लसदंशावेकतश्च्युतिमुपेयुषि भानौ। द्यौरु
वाह परिवृत्तिविलोलां हारयष्टिमिव वासरलक्ष्मीम्॥ २॥

मादय इत्यमरः। शर्करायां दृषत्पुत्रे चाश्मन्युपलो मणाविति वैजयन्ती। लसदं शौ प्रसरद्रश्मौ भानौ एकतः एकस्मिन्भागे च्युतिं स्खलनमुपेयुषि प्राप्ते सति द्यौः परि वृत्त्या मध्यात्क्रमेण विलोलाञ्चञ्चलरीं अन्यत्र गात्रपरिवर्त्तनवृत्त्या मुक्तस्खलन्तीं वा सरलक्ष्मीं हारयष्टिं मुक्तावलीमिवोवाह। वहतिस्म॥ २॥ ॥

अंशुपाणिभिरिति। पतङ्गः सूर्यः। पतङ्गौ पक्षिसूर्यौ चेत्यमरः। अतीव निर्भरम्। अत्यतीव च निर्भरमित्यमरः। पातुमिच्छुः पिपासुः तृषितः सन्पिबतेः सन्नन्तादुप्रत्य यः। अंशव एव पाणयस्तैः पद्मेषु जातम्पद्मजं मधु मद्यमिव मध्विति श्लिष्टरूपकं मकरन्दमयमित्यर्थः। मधु मद्ये पुष्परसे इत्यमरः। भृशं मुहुः रसयित्वास्वाद्य क्षी

बतामिवगत इवेत्युत्प्रेक्षा। मत्ते शौण्डोत्कटक्षीबाइत्यमरः। क्षितिमेष्यन्गमिष्यन्लोहितंरक्तंवपुरुवाह। यथामत्तःक्षितौलुठतिरज्यतेचतद्वदितिभावः। सूर्यस्यक्षितिविलयनमस्तमयइत्यागमः अत्ररूपकोत्प्रेक्षयोःसापेक्षत्वादङ्गाङ्गिभावेनसङ्करः॥ ३॥

गम्यतामिति। सहस्रमरीचौसूर्य्येलोहितोभवतीतिलोहितायति। लोहितडाड्भ्यःक्यष्। वाक्यषइतिपरस्मैपदेशतृप्रत्ययः नयनानाङ्गम्यतामुपगतेदर्शनीयतांप्राप्तेसतिअभितापःधरित्रींविरहय्यविहायल्यपिलघुपूर्वादित्ययादेशः चक्रवाकहृदयान्याससादप्राप। अत्रधरित्र्यायाद्दृशस्तीव्रार्ककरकृतसन्तापस्यादृक्

अंशुपाणिभिरतीवपिपासुःपद्मजंमधुभृशंरसयित्वा। क्षीबतामिवगतःक्षितिमेष्यल्लोहितंवपुरुवाहपतङ्गः॥ ३॥

गम्यतामुपगतेनयनानांलोहितायतिसहस्रमरीचौ। आससादविरहय्यधरित्रींचक्रवाकहृदयान्यभितापः॥ ४॥

चक्रवाकहृदयेषुविरहसन्तापःसञ्जातइतिपरमार्थः। परन्तुतदुपक्रमानन्तरमेतस्याविर्भावात्सएवात्रसंक्रान्तइत्यभेदाध्यवसायेनोपदेशः। अतएवभेदेऽभेदरूपातिशयोक्तिरलङ्कारः॥ ४॥

मुक्तेति। रवौसामिमज्जतिअर्द्धास्तमितेसति। अर्द्धगुप्तमानेसतीत्यर्थः। सामित्वर्द्धे जुगुप्सायामित्यमरः। मुक्तन्यक्कप्रायंमूलमाश्रयभूतोरविरन्यत्रसामीप्येनसःअतएवलघुरल्पकश्चमुक्तमूललघुःउज्झितपूर्वःन्यक्कपूर्वदिक्कः अन्यत्रन्यक्कपूर्वैजनः। पश्चिमेनभसिनभोभागेऽन्यत्रक्वचिन्नीचस्थलेसम्भृतःसंहतःसन्अतएवसान्द्रश्चरश्मिसमूहः। आश्रितजनश्चध्वन्यतेदुःखेनखिन्नःजिह्मोदीनइवनवि

रेजे। अत्रमुक्तत्वादिप्रस्तुतविशेषणसाम्यादप्रस्तुताश्रितजनप्रतीतेःसमासोक्तौ अवाच्यस्यरश्मिसमूहस्याचेतनस्यापिप्रतीयमानेनचेतनेनाभेदाभिमानात्दुःखि तत्वाद्युत्प्रेक्षेतितयोरङ्गाङ्गिभावेनसङ्करः ॥ ५ ॥

कान्तेति। कुंकुमवत्कुङ्कुमेनवाताम्राःसायंसायङ्कालस्य। सायंसायेप्रगेप्रातइत्यम रः। सायंयन्मण्डनन्तदभितद्दिश्यत्वरयन्त्यस्त्वरांकारयन्त्यः। सौधानाञ्जालैर्ग वाक्षैःपतिताःप्रविष्टाः। जालङ्गवाक्षमानायइतिवैजयन्ती। रविभासःकान्तान् प्रेयसान्दूत्यइववनिताभिःसादरंयथातथादृशिरेददृष्टाःसायन्तनार्कभासाम्प्रि

मुक्तमूललघुरुज्झितपूर्वःपश्चिमेनभसिसम्भृतसारः। सा मिमज्जतिरवौनविरेजेखिन्नजिह्मइवरश्मिसमूहः॥ ५॥

कान्तदूत्यइवकुङ्कुमताम्राःसायमण्डनमभित्वरयन्त्यः। सा दरन्ददृशिरेवनिताभिःसौधजालपतितारविभासः॥ ६॥

अथसानुषुनितान्तपिशङ्गैर्भूरुहान्मृदुकरैरवलंब्य। अस्त शैलगहनन्नुविवस्वानाविवेशजलधिन्नुमहींनु ॥ ७ ॥

यसमागमसूचकत्वात्दूत्याइवतासुस्त्रीणामादरोभवदित्यर्थः॥ ६ ॥

अथेति। विवस्वानथेऽस्तशैलशिखरेयेसानवस्तेषुयेभूरुहास्तान्नितान्तपिशङ्गै रत्यन्तारुणैर्मृदुभिःकरैरिव। करैरंशुहस्तैरितिश्लिष्टरूपकम्। बलिहस्तांशु वःकराइत्यमरः। यद्वा। करैर्मृदुअथमवलंब्यास्तइतिशैलोऽस्तशैलः। अस्तस्तु चरमःक्ष्माभृदित्यमरः। तस्यगहनंकाननंनुजलधिंनु। महींनुआविवेश। तप नस्यपतनसन्देहएवदृष्टः। पतनंतुक्वचास्यतन्नज्ञायतेशीघ्रगमनादित्यर्थः। अत्र तपनपतनस्यारोप्यमानस्यगहन त्रये तविषयत्वेनसन्देहात्सन्देहालङ्कारः। उत्प्रे

स्तेतिकेचित् ॥ ७ ॥ ॥

आकुलइति। चलानांकुलायेभ्यःकुलायान्प्रतिचलतांपतत्रिकुलानामारवैःशब्दैरा कुलःव्याप्तः। अनुदितशब्देनाभावमात्रमुषःशब्देनसंध्यामात्रञ्चविवक्ष्यते। उष सिभवःऔषसःसंधिवेलेत्यादिनायोगविभागादण्प्रत्ययःअन्यथाकालाट्ठञ्स्यात् । तथाचानुदितौषसरागइत्यविद्यमानसंध्यारागइत्यर्थः। एकत्रापगमादन्यत्रा नुदयाच्चेतिभावः। अहरिदश्वोविद्यमानसूर्य्यःएकत्रानुदयादन्यत्रास्तमयाच्चे तिभावः। अतएवविपाण्डुःतिमिरानुदयाच्चेतिविशेषः दिनान्तःसायङ्कालोदिनमु खेनप्रातःकालेनतुल्यतामाययौतद्वद्बभूवेत्यर्थः। अतएवोपमालङ्कारः ॥ ८ ॥

आकुलश्चलपतत्रिकुलानामारवैरनुदितौषसरागः। आय
यावहरिदश्वविपाण्डुस्तुल्यतान्दिनमुखेनदिनान्तः ॥ ८ ॥
आस्थितःस्थगितवारिदपङ्क्त्यासंध्ययागगनपश्चिमभागः। सो
र्म्मिविद्रुमवितानविभासारञ्जितस्यजलधेःश्रियमूहे ॥ ९ ॥

आस्थितइति। स्थगितवारिदपङ्क्त्यापिहितमेघवृन्दयासंध्यया आस्थितःआक्रान्तो व्याप्तः। गगनपश्चिमभागःसोर्म्मिरूर्म्मिसंक्रान्तेत्यर्थः। तथाविद्रुमवितानविभासा प्रवालप्रकरकान्त्यारञ्जितस्यस्वसावर्ण्यम्प्रापितस्यजलधेःश्रियमूहेसंध्यायारक्तव र्णत्वादितिभावः। वहतेःकर्त्तरिलिट्। तत्सदृशींश्रियमुवाहेत्यर्थः। अतएवनिद र्शनालङ्कारः ॥ ९ ॥ ॥

प्राञ्जलाविति। प्रबद्धःअञ्जलिर्येनतस्मिन्प्राञ्जलौ। तौयुतावञ्जलिःपुमानित्यम रः। प्रादिभ्योधातुजस्यवाच्योवाचोत्तरपदलोपश्चनतमूर्द्धिनमस्कुर्वाणेतत्प्रवण तत्रसंध्यायामेवाहितञ्चेतोयस्यतस्मिन्एवंविधेपिजनेविषयेप्रेमहित्वाविहाय

विरमन्त्यानिवर्तमानया । व्याङ्परिभ्योरमइतिपरस्मैपदम् । संध्ययाचापलेना
स्थैर्येणयुवादित्वादण्प्रत्ययः । सुजनादितरोदुर्जनस्तस्यमैत्रीसख्यमनुविदधे
अनुचक्रे । कर्मणिलिट् । यथादुर्जनमैत्रीसन्तमपिजहातितद्वत्संध्यापिसेवक
जनमहासीदित्यर्थः । मित्रस्यकर्ममैत्रीअणन्तान्ङीप् । अत्रसंध्यादुर्जनमैत्र्यो
श्चापलंसमानधर्मःअनुविधानमतएवार्थरूपेणेयमुपमा ॥ १० ॥ ०***० ॥
औपसेति । औपसात्प्राभातिकादातपाद्भयन्त्रासादिवेत्युत्प्रेक्षा । अपलीनंक्वचिद्गूढं
वासरच्छवेरातपस्यविरमाद्धेतोःपटीयःप्रभविष्णुऋमन्धयतीत्यन्धकारोध्वान्तं ।

प्राञ्जलावपिजनेनतमूर्द्ध्निप्रेमतत्प्रवणचेतसिहित्वा । संध्या
यानुविदधेविरमन्त्याचापलेनसुजनेतरमैत्री ॥ १० ॥
औपसातपभयादपलीनंवासरच्छविविरामपटीयः । संनि
पत्यशनकैरिवनिम्नादन्धकारमुदवापसमानि ॥ ११ ॥
एकतामिवगतस्यविवेकःकस्यचिन्नमहतोप्युपलेभे । भास्व
तानिदधिरेभुवनानामात्मनीवपतितेनविशेषाः ॥ १२ ॥

अन्धकारोस्त्रियांध्वान्तमित्यमरः । अथसंध्यापगमनानन्तरंशनकैर्निम्नान्निपत्या
गत्यसमानिसमस्थलानिउदवापव्यानशे । अत्रप्रस्तुतान्धकारविशेषणसाम्याद
प्रस्तुतार्थप्रतीतेःसमासोक्तिरलंकारः । उत्प्रेक्षाचाङ्गंस्यात् ॥ ११ ॥ ०००० ॥
एकतामिति । एकतामभेदङ्गतस्येवतमोव्याप्यात्तथाप्रतीतेरियमुत्प्रेक्षा । महतः
शैलादेरपिकस्यचित्कस्यापिपदार्थस्यविवेकोभेदोनोपलेभेनगृहीतः । अतएवोत्प्रे
क्ष्यतेपतितेनास्तमितेनभास्वतासूर्येणभुवनानाम्भुवनस्थपदार्थानामित्यर्थः । वि
शेषाभूधरादिभेदाःआत्मनिस्वस्मिन्नेवनिदधिरेइवनिहिताइव । कथमन्यथानो

पलभ्येरन्नित्यर्थः । अत्रोत्प्रेक्षयोःसजातीययोःसापेक्षत्वादङ्गाङ्गिभावेनसङ्करः ।
भास्वद्विवस्वत्सप्ताश्वेत्यमरः ॥ १२ ॥ ❁ ॥ * ॥ ❁ ॥ * ॥ ❁ ॥ * ॥ ❁ ॥ * ॥
इच्छतामिति । वधूभिःस्वकामिनीभिःसहाभेदमवियोगमिच्छताम् । तथासंकल्प
यतामपीत्यर्थः यामिनीषुविरहिणांनियतवियोगानांहरतेराभीक्ष्ण्येर्थेणिनिः यद्वा
निरूढ्यायामिनिः । तेषांविहगानांचक्रवाकानामित्यर्थः । मिथुनानिवियोगमापुरे
वनतुनापुरित्ययोगव्यवच्छेदः तथाहि । कालनियोगोदैवाज्ञानलंघ्यतेखलुदु
र्वारइत्यर्थः ॥ १३ ॥ ❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁ ॥
यच्छतीति । शकुन्तौचक्रवाकपक्षिणिसामान्यस्यप्राकरणिकविशेषेपर्यवसाना

इच्छतांसहवधूभिरभेदंयामिनीविरहिणांविहगानाम् । आ
पुरेवमिथुनानिवियोगंलंघ्यतेनखलुकालनियोगः ॥ १३ ॥
यच्छतिप्रतिमुखन्दयितायैवाचमन्तिकगतेपिशकुन्तौ । नी
यतेस्मनतिमुज्झितहर्षम्पङ्कजंमुखमिवांबुरुहिण्या ॥ १४ ॥

त् । शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाइत्यमरः । अन्तिकगतेसमीपस्थे
पिदयितायैचक्रवाक्यैप्रतिमुखमभिमुखंयथातथावाचंयच्छतिवाचमेवददाने । न
तुसङ्गच्छमानेसतीत्यर्थः । पाघ्राध्मेत्यादिनादाणोयच्छादेशः । अंबुरुहिण्यानलि
न्याउज्झितहर्षंचक्रवाकदुर्दशादर्शनादिवत्यक्तविकासम्पङ्कजंमुखमिवनतिन्नम्र
त्वंनीयतेस्मनीतम् । प्रधानकर्म्मण्याख्येयेलादीनाङ्द्विकर्मणामितिनीयतेर्द्विक
र्मकात्प्रधानेकर्म्मणिलिट् । प्रायेणदुःखदर्शनात्स्त्रियःखिद्यन्तेविशेषेणविरह
दर्शनादितिभावः । अत्रपङ्कजावनतेश्चक्रवाकविक्रोशनानन्तर्यात्तद्धेतुकत्वमुत्प्रे
क्ष्यते । तच्चमुखोपमेयं । अंबुरुहिण्याकामिनीसाम्यङ्गमयन्त्यानिरुह्यतेइत्युपमो

त्प्रेक्षयोरङ्गाङ्गिभावेनसङ्करः। व्यञ्जकाप्रयोगात्प्रतीयमानोत्प्रेक्षा ॥ १४ ॥ *
रञ्जिताइति। तिमिरेणविविधास्तरवःशैलाश्चरंजिताःस्वसावर्ण्यमापादितानु
। अन्यथाकथमेषांनीलत्वमितिभावः। तथागगनंनामितंनु। आभूतलादितिशे
षःमितान्ह्रस्वइत्यत्रवाशब्दानुवृत्त्याकेषाञ्चिद्विकल्पान्नह्रस्वः। यद्वागगनंस्थगि
तंआच्छादितंनु। उभयत्रापितमसावृतत्वान्नदृश्यतइतिभावः। तथाधरित्रीविष
मेषुनिम्नोन्नतेषुपूरितासमीकृतानु। अन्यथातद्विवेकःकथंनस्यादितिभावः। क
कुभोदिशःसंहृतानुप्राप्ताःकिं। दिशस्तुककुभःकाष्ठाआशाश्चहरितश्चताइत्यम
रः। कथमन्यथानदृश्यन्तइतिभावः। अत्रतिमिरेणतरुशैलादीनांविषयरञ्ज

रञ्जितानुविविधास्तरुशैलानामितंनुगगनंस्थगितंनु। पू
रितानुविषमेषुधरित्रीसंहृतानुककुभस्तिमिरेण ॥ १५ ॥
रात्रिरागमलिनानिविकाशंपङ्कजानिरहयन्तिविहाय। स्प
ष्टतारकमियायनभःश्रीर्वस्तुमिच्छतिनिरापदिसर्वः ॥ १६ ॥

कत्वादिकमारोप्यसन्दिग्धइतिसन्देहालङ्कारः। अन्येतुनुशब्दस्यसम्भावनाद्यो
तकत्वमत्रोत्प्रेक्षाप्रकारमित्यलङ्कारसर्वस्वकारः ॥ १५ ॥
रात्रीति। श्रीःशोभाकर्त्रीरात्रेःसंध्यायारागेणस्वच्छायोपरञ्जनेनमलिनानि। अ
तएवविकाशंरहयन्तित्यजन्ति। रहयतेस्त्यागार्थात्कर्तृप्रत्ययः। पङ्कजानिविहा
यव्यक्तास्पष्टतारकंनभःखमियायप्राप तथाहि। सर्वोनिरापदिनिर्बाधस्थानेव
स्तुंस्थातुम्। एकाचउपदेशेनुदात्तादितीट्प्रतिषेधः। श्रेयसीतेषुवसिःप्रणारि
णीतिवचनात्। इच्छति ॥ १६ ॥
अस्तादिसंध्यान्तंवर्णयित्वाचन्द्रोदयवर्णनमारभते। व्यानशइति। शशधरेण

चन्द्रेण विमुक्तः क्षिप्तः केतकीकुसुमकेसर इव पाण्डुः लम्भिता प्रापिता कान्तिर्यस्य
स रश्मिसमूहश्चूर्णस्य कर्पूरक्षोदस्य मुष्टिरिव मुष्टिशब्दस्य द्विलिङ्गत्वेऽप्यत्र पुल्लिङ्ग
तैवग्राह्या। उपमेयानुसाराद्वासवस्येन्द्रस्य दिशम्प्राचीं व्यानशे व्याप। अनेन दि
शानिशाकरयोर्नायिकानायकौपम्यङ्गम्यते॥ १७॥ ************॥
उज्झतीति। इन्द्रस्येयमैन्द्री दिक् प्राची तारकराजे नक्षत्रनाथे। कनीनिकायां न
क्षत्रे तारकं तारकेति विश्वः। अन्तिकं व्रजति सति आप्लुतमिस्रामन्धतमसं। त
मिस्रा स्त्री ध्वान्तनिशि निश्यन्धतमसे नन्नेति वैजयन्ती। शुचमिव विरहदुःखमि

व्यानशे शशधरेण विमुक्तः केतकीकुसुमकेसरपाण्डुः। चूर्णमु
ष्टिरिव लम्भितकान्तिर्वासवस्य दिशमंशुसमूहः॥ १७॥
उज्झती शुचमिवाशु तमिस्रामन्तिकं व्रजति तारकराजे। दि
क्प्रसादगुणमण्डनमूहे रश्मिहासविशदं मुखमैन्द्री॥ १८॥
नीलनीरजनिभे हिमगौरं शैलरुद्धवपुषः सितरश्मेः। खे
रराजनिपतत्करजालं वारिधेः पयसि गाङ्गमिवाम्भः॥ १९॥

वेत्यर्थः। उज्झती विजहती प्रसादो नैर्मल्यमेव गुणास्स एव मण्डनं यस्य तत्। र
श्मयो हास इव तेन विशदं मुखमिव मुखमग्रभागं। श्लिष्टोपमेयम्। ऊहे वहति
स्म। अत्र दिक्चन्द्रयोर्नायिकानायकौपम्यङ्गम्यते॥ १८॥ ○*○*○*○*॥
नीलेति। शैलरुद्धवपुषः उदयगिरितिरोहितमण्डलस्य सितरश्मेरिन्दोः सम्ब
न्धि नीरजनिभे श्यामकमलतुल्ये खे आकाशे निपतत् प्रसरत्। हिमवत् गौरं शुभ्र
करजालमंशुसमूहं वारिधेः पयसि निपतत् गाङ्गमम्भ इव रराज। उपमानेऽपि वि
शेषणं योज्यम्॥ १९॥

द्यामिति। द्यां निरुन्धदाकाशमावृण्वत् अतिनीलघनाभमुद्यताः कराः अंशवो हस्ताश्च यस्य तेन। असिताभ्यइतराः शुभ्रा भासो यस्य तेन चन्द्रेण पुरस्तात्प्राच्याम्। अग्रे च क्षिप्यमाणं नुद्यमानं ध्वान्तं शम्भुना क्षिप्यमाणं गजचर्मेव चकासे। उपमानेपि विशेषणानि योज्यानि ॥ २० ॥

अन्तिकेति। अन्तिकान्तिकेऽतिसमीपे। प्रकारे गुणवचनस्येति द्विर्भावः कर्मधारयवद्भावात्सुपो लुक्। अन्तिकान्तिकगतेनेन्दुना विसृष्टे मुक्ते दीधितिजाले जिह्मतां सङ्कोचं जहति त्यजति सति तिमिरभारैस्तमःस्तोमैर्निरोधादुपरोधान्निःसृतो निर्गतः

द्यां निरुन्धदतिनीलघनाभं ध्वान्तमुद्यतकरेण पुरस्तात्। क्षि
प्यमाणमसितेतरभासा शम्भुनेव करिचर्म चकासे ॥ २० ॥
अन्तिकान्तिकगतेन्दुविसृष्टे जिह्मतां जहति दीधितिजाले। निः
सृतस्तिमिरभारनिरोधादुच्छ्वसन्निव रराज दिगन्तः ॥ २१ ॥
लेखया विमलविद्रुमभासा सन्ततं तिमिरमिन्दुरुदासे। दं
ष्ट्रया कनकटङ्कपिशंग्या मण्डलं भुव इवादिवराहः ॥ २२ ॥

दिगन्तः उच्छ्वसन् प्राणयन्निव रराजेत्युत्प्रेक्षालङ्कारः ॥ २१ ॥ ** ॥ ** ॥

लेखयेति। इन्दुर्विमलविद्रुमभासा स्वच्छप्रवालसवर्णया लेखया कलया सन्ततं सान्द्रतिमिरम्। आदिवराहः कनकस्य टंकः शिलाभेदकं शस्त्रम्। टङ्कः पाषाणदारण इत्यमरः। तद्वत्पिशंग्या लोहितवर्णया। पिशङ्गाच्चेति वक्तव्यमिति ङीप्। दंष्ट्रया भुवो मण्डलमिव उदासे उच्चिक्षिपे अस्यतेः कर्त्तरि लिट्। सोपसर्गादस्यतेरात्मनेपदं विकल्पात् ॥ २२ ॥

दीपयन्निति। अथोदयानन्तरं किरणौघैर्नभो दीपयन् प्रकाशयन्। कुङ्कुमेना

रुणोयःपयोधरःकुचःतद्वत्गौरोरुणःउदयरागादितिभावः। तुहिनांशुरिन्दुःश्र
नकैःपूर्वपयोधेःपूर्वसागरात्। हेम्नःकुम्भोहेमकुम्भइवोन्ममज्जोज्जगामेत्युत्प्रे
क्षा॥ २३॥ ॥
उद्गतेन्दुमिति। लोकोजनः। लोकस्तुभुवनेजनइत्यमरः। उद्गतेन्दुमुदितच
न्द्रांशुविभिन्नतमिस्रामनिःशेषितध्वान्तांरजनींव्यंशुकमपनीतावगुण्ठनमतएवस्फु
टंदृश्यमानंमुखंयस्याःसातान्तथापिव्रीडयातिजिह्मांवक्रांनववधूंनवोढांस्त्रिय
मिवावितृप्तःसन्पश्यतिस्म। वधूर्नवोढयोषायांस्नुषाभार्य्याङ्गनासुचेतिधरणिः

दीपयन्नथनभःकिरणौघैःकुङ्कुमारुणपयोधरगौरः। हे
मकुम्भइवपूर्वपयोधेरुन्ममज्जशनकैस्तुहिनांशुः॥ २३॥
उद्गतेन्दुमविभिन्नतमिस्राम्पश्यतिस्मरजनीमवितृप्तः। व्यं
शुकस्फुटमुखीमतिजिह्मांव्रीडयानववधूमिवलोकः॥ २४॥
नप्रसादमुचितङ्गमिताद्यौर्नोद्धृतन्तिमिरमद्रिवनेभ्यः। दि
ङ्मुखेषुनचधामविकीर्णम्भूषितैवरजनीहिमभासा॥ २५॥

॥ २४॥ ॥ ॥ ॥ ॥ ॥
नेति। हिमभासाचन्द्रेणद्यौराकाशमुचितंयोग्यम्प्रसादन्नगमिता। अद्रयोवना
निचतेभ्यस्तिमिरंनोद्धृतंनोत्सारितन्दिशांमुखेषुधामतेजश्चनविकीर्णंनपर्यस्तन्त
थापिरजनीभूषितैवकिमुतोक्तगुणसम्पत्तावितिभावः। अत्रप्रसाधनकारणाभावे
पितत्कार्य्यभूषणोक्त्याविभावनालङ्कारः॥ २५॥ ॥ ॥ ॥ ॥ ॥
मानिनीति। उदितःशीतमयूखःउष्णेनविरहतप्तेनवाष्पेणकलुषानाविलान्मा
निनीजनस्यकलहान्तरितनायिकाजनस्यविलोचनपातान्मानभङ्गजनितरोषेण

भीषणानितिभावः। कोपाक्रान्तम्परागुत्तपश्चात्तापसमन्विता। कलहान्तरिता प्रोक्तानायिकानयशाविभिरितिदशरूपके। प्रतिगृह्णन्स्वीकुर्वन्नपराधस्यापरिहार्य्यत्वादितिभावः। अतएवभीतभीतोभीतप्रकारइवेत्युत्प्रेक्षा। मन्दमन्दं मन्दप्रकारम्। उभयत्रापिप्रकारेगुणवचनस्येतिद्विर्भावे कर्मधारयवद्भावात्सुलोपः। खमाकाशम्प्रययौ ॥ २६ ॥ ॥

स्निग्धतइति। ततःप्रसारितःकराएवकरास्तंसुदस्तायेनतस्यततकरस्य। तारकाएवप्रियवधूःउपकण्ठंअन्तिकेकण्ठेवा। अत्यन्तसंयोगेद्वितीयाविभक्त्यर्थेऽव्य

मानिनीजनविलोचनपातानुष्णवाष्पकलुषान्प्रतिगृह्णन्। मन्दमन्दमुदितःप्रययौखम्भीतभीतइवशीतमयूखः॥ २६ ॥

स्निग्धतःप्रियवधूरुपकण्ठंतारकास्ततकरस्यहिमांशोः। उद्गमन्नभिरराजसमन्तादङ्गरागइवलोहितरागः ॥ २७ ॥

प्रेरितःशशधरेणकरौघःसंहतान्यपिनुनोदतमांसि । क्षीरसिन्धुरिवमन्दरभिन्नःकाननान्यविरलोच्चतरूणि ॥ २८ ॥

यीभावः। स्निग्धतःप्रत्यासीदतःआलिङ्गतश्चहिमांशोःसम्बन्धीसमन्तात्उद्गमन्नुत्सर्पन्। अर्थान्तरत्वादकर्मकत्वं। धातोरर्थान्तरेवृत्तेरितिवचनात्। लोहितरागोरुणप्रभःअङ्गरागइवाभिरराज आलिङ्गनाद्रागोगलतीतिप्रसिद्धिः। अत्ररूपकोपमयोरङ्गाङ्गिभावेनसङ्करः॥ २७ ॥ ॥

प्रेरितइति। शशधरेणचन्द्रेणप्रेरितोविसृष्टःकरौघःसंहतानिसान्द्राण्यपितमांसिमन्दरेणमन्दराचलेनभिन्नोनुन्नःक्षीरसिन्धुःअविरलाःसान्द्राःउच्चाउन्नतास्तरवोयेषुतानिकाननानीवनुनोदचिक्षेपदूरीचकार॥ २८ ॥ ॥

शारतामिति । शशिपादैश्चन्द्ररश्मिभिः । पादा रश्म्यङ्घ्रितुर्यांशा इत्यमरः । शारतां शबलताङ्गमितया । शारः शबलपीतयोरिति विश्वः । विटपिनान्तरूणां छायया न्यस्तैर्निःक्षिप्तैः शुक्लबलिभिः श्वेतपुष्पाद्युपहारैश्चित्राणि तलान्युपरिभागा यासान्ताभिः । करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियामित्यमरः । वसतिवेश्ममहीभिस्तुल्यता साम्यं प्रतिपेदे कर्मणि लिट् । आर्थीयमुपमा ॥ २९ ॥ * ॥ * ॥

आतप इति । आतपे दुःकरेऽपीति भावः । वध्वा चक्रवाक्या सह अत एव धृतिमता सन्तोषवता यामिनीषु विरहिणा नियतविरहेण अत एव विहगेन चक्रवाकेन हिमर-

शारताङ्गमितया शशिपादैश्छायया विटपिनाम्प्रतिपेदे । न्य-
स्तशुक्लबलिचित्रतलाभिस्तुल्यता वसतिवेश्ममहीभिः ॥ २९ ॥
आतपे धृतिमता सह वध्वा यामिनीविरहिणा विहगेन । से-
हिरे न किरणा हिमरश्मेर्दुःखिते मनसि सर्वमसह्यम् ॥ ३० ॥
गन्धमुद्धतरजःकणवाही विक्षिपन्विकसतां कुमुदानाम् । आ-
दुधाव परिलीनविहङ्गा यामिनीमरुदपां वनराजीः ॥ ३१ ॥

श्मेश्चन्द्रस्य किरणा न सेहिरे । तथाहि । दुःखिते जातदुःखे मनसि सर्वं मनोहरमपीति भावः असह्यं सोढुमशक्यं शकिसहोश्चेति यत्प्रत्ययः । पूर्वं चातपाङ्गतिपे तु सत्त्ववध्वा सहातपा अपि सेहिरे तद्विरहिणा तु शशिकिरणा अपि न सेहिर इति योज्यम् । फलन्तु स्नानम् ॥ ३० ॥ ॥

गन्धमिति । अपाङ्कणवाही योऽस्यान्वये व्यवधानमपि सोढव्यम् । विकसतां कुमुदानाङ्गन्धं सौरभं उद्धतं रजः परागो यस्मिन्कर्मणि तद्यथा तथा शेषाद्विभाषेति विकल्पान्न कप् । विक्षिपन् विकिरन् । इत्थं शिशिरः सुरभिर्यामिनीमरुद्वायुः परितो लीनाः स

यिताः विहंगायास्तु तावनराजोट्टध वद्वेप कम्पयामास ननरा ...ः किञ्चित्कम्पितमि
त्यर्थः। विहङ्गश्शयनाविरोधेनेत्यर्थः। आङीषदर्थेऽभिव्याप्ताविभ्यमरः। यथाक
श्चित्कामिनीं गन्धोदकादिना सिञ्चन्नाकर्षति तद्वदिति भावः॥ ३१॥ ० * ०॥
संविधातुमिति। यामिनीवनितेव वनितया रात्रिरूपया कान्तया मन्मथस्याभिषेकं त्रिभु
वनजैत्रयात्राभिषेकं संविधातुं सम्यक्कर्तुं अंशवो जलानीव तेषामोघः पूरः लसन्य
स्मिन्सः ततचिह्नः स्फुटलाञ्छन इन्दुः सोत्पलो रजतकुम्भ इव उदासे उत्क्षिप्तः उद्धृ
तः। अस्यतेः कर्मणि लिट्। अत्र संविधातुमिति तुमुना प्रतीयमानोत्प्रेक्षयानुप्राणि
तोयं उपमोत्प्रेक्षयोः सङ्करः॥ ३२॥ ० ० ० ० ० ० ० ० ० ० ० ० ० ॥

संविधातुमभिषेकमुदासे मन्मथस्य लसदंशुजलौघः। या
मिनीवनितया ततचिह्नः सोत्पलो रजतकुम्भ इवेन्दुः॥ ३२॥
ओजसापि खलु नूनमनूनं नासहायमुपयाति जयश्रीः। यद्वि
भुः शशिमयूखसखः सन्नाददे विजयि चापमनङ्गः॥ ३३॥

ओजसेति। ओजसा अनूनं सम्पूर्णं तपि असहायं सहायरहितं पुरुषमिति शेषः।
जयश्रीर्नोपयाति खलु नूनं कुतो यद्यस्माद्विभुः। समर्थोप्यनङ्गः शशिमयूखानां सखा
सहचरस्तयोक्तः सन्सहायः सन्नित्यर्थः। विजयि विजयशीलं जिद्दृक्षीत्यादिना इ
नि प्रत्ययः। चापमाददे। विशेषेण सामान्यसमर्थनरूपोर्थान्तरन्यासः॥ ३३॥
इत्थमुद्दीपनसामग्रीमुपवर्ण्य सम्प्रति तत्कार्यभूतं रतिवर्णनमारभते। सद्मनामित्या
दि। वत्रिकष्टरतिभिरासन्नरतोत्सवैरत एव सुरदारैः सुरवधूभिः सहितशोभैः प्रा
गेव विहितकेलिगृहमण्डनैरपि पुनः सद्मनां केलिगृहाणां विरचनामण्डनमीषेऽभि
लेषे। इषेः कर्मणि लिट्। आगतप्रियकथैः प्राप्तप्रियजनवृत्तान्तैरपि दूतप्रक

र्मेदूत्यंदूतिव्यापारईषे। दूतस्यभावकर्मणोर्यत्प्रत्ययः। तथाभूषितैरपिविभूषणं प्रसाधनमीषे। औत्सुक्यातिरेकादितिभावः॥ ३४ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥

नेति। विरहेवियोगावस्थायांस्रजोमाल्यानिचन्दनानिगन्धाःमदिरामद्यानिवा रमणीभ्यःरुच्यर्थानांप्रीयमाण इतिसम्प्रदानत्वाच्चतुर्थीनरुरुचिरेनरोचन्तेस्म। हियस्मात्प्रियसमागमएवरतेःसाधनेषुस्रगादिषुरम्यतांमनोहरत्वंरुचिरत्वमि तियावत्उपधत्तेआधत्ते। तदभावादरुचिर्युक्तैवेत्यर्थः। अतएववैधर्म्यात्कारणे नकार्यसमर्थनरूपोर्थान्तरन्यासः। रम्यंतेएष्वितिरम्याणिपोरदुपधादितियत्प्र

सज्जनांविरचनाहितशोभैरागतप्रियकथैरपिदूत्यम्। सन्नि
कृष्टरतिभिःसुरदारैर्भूषितैरपिविभूषणमीषे॥ ३४ ॥
नस्रजोरुरुचिरेरमणीभ्यश्चन्दनानिविरहेमदिरावा। सा
धनेषुहिरतेरुपधत्तेरम्यतांप्रियसमागमएव॥ ३५ ॥
प्रस्थिताभिरधिनाथनिवासंध्वंसितप्रियसखीवचनाभिः। मा
निनीभिरपहस्तितधैर्य्यःसादयन्नपिमदोऽवललम्बे॥ ३६ ॥

त्ययःकृत्यल्युटोबहुलमित्यधिकरणार्थः॥ ३५ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥ ❁ ॥

प्रस्थिताभिरिति। अधिनाथनिवासंप्रियगृहंप्रतिप्रस्थिताभिःप्रचलिताभिर्ध्वंसि तानिखण्डितानिप्रियसखीवचनानिस्वयंप्रस्थानंलाघवायेत्येवंरूपाणियाभिस्ताभि र्मानिनीभिःकोपनाभिः। स्त्रीणामीर्ष्याकृतःकोपोमानोऽन्यासङ्गिनिप्रियेइतिल क्षणात्। अपहस्तितन्निरस्तंधैर्य्यंयेनसः। तथासादयन्म्लानंशरीरंकर्षयन्न पीत्यर्थः। सदोषोपीत्यर्थःमदोऽवललम्बेस्वीकृतःअज्ञानव्याजेनलाघवापह्नवसौ कर्यादितिभावः॥ ३६ ॥ ❁❁ ॥ ❁❁ ॥ ❁❁ ॥ ❁❁ ॥ ❁❁ ॥ ❁❁ ॥ ❁❁ ॥

कान्तेति । रतवेलसुरतायवक्तुसन्दिशतीभिरनेकंवाचिकङ्कथयन्तीभिःसन्देशव
सनाद्वक्तव्यमप्यजानतीभिरित्यर्थः । रमणीभिःकान्तवेश्मयातम्प्राप्तमेवनतुमा
र्गान्मध्येनिवृत्तमित्यर्थः । तथाहिमन्मथेनपरिलुप्तमतीनांभ्रष्टमतीनांस्खलितंवि
रुद्धाचरणमपिप्रायशउपकारिभवति ॥ ३७ ॥ *०*~*०*~*०* ॥
आश्विति । आशुकान्तमभिसारितवत्याःअभिगतवत्याःस्वार्थेणिच् । योषितःसम्ब
न्धिपुलकैरुद्धावावृतौकपोलौयस्यतत् । खण्डाप्रमृष्टापत्राणांपत्रलेखानांतिलकस्य
चाकृतिःसन्निवेशोयस्यततथोक्तंमुखङ्कान्त्याऽखण्डंपूर्णइन्दुन्निर्जिगायजयतिस्म

कान्तवेश्मवक्तुसन्दिशतीभिर्यातमेवरतयेरमणीभिः । म
न्मथेनपरिलुप्तमतीनाम्प्रायशःस्खलितमप्युपकारि ॥ ३७ ॥
आशुकान्तमभिसारितवत्यायोषितःपुलकरुद्धकपोलम् । नि
र्जिगायमुखमिन्दुमखण्डंखण्डपत्रतिलकाकृतिकान्त्या ॥ ३८ ॥
उच्यतांसवचनीयमशेषंनेश्वरेपरुषतासखिसाध्वी । आन
येनमनुनीयकथंवाविप्रियाणिजनयन्ननुनेयः ॥ ३९ ॥

इत्यार्थीयमुपमा । जयतिद्वेष्टीतिदण्डिनातत्सादृश्यार्थेपुगणनात् ॥ ३८ ॥ ०
अथयुग्मेनसखीनायिकासम्वादमाह । उच्यतामिति । तत्रनायिकाह । सधूर्तःअ
शेषमखिलंवचनीयंवक्तव्यमुच्यतान्निःशंकमुपलभ्यतामित्यर्थः । ब्रुञोदुह्यादित्वा
दप्रधानेकर्मणिलेट् । अथसख्याह । हेसखिनायकेईश्वरेभर्त्तरिविषयेपरुषता
पारुष्यंनसाध्वीनहिता । अथनायिकाह । हेसखितर्हिएनमनुनीयसान्त्वयि
आनय । पुनःसखीआह । विप्रियाणिजनयन्अप्रियाणिकुर्वन्सकथंवाऽनुनेयः
अनुनयार्हः ॥ ३९ ॥ ००० ॥ ००० ॥ ००० ॥ ००० ॥ ००० ॥ ००० ॥

किमिति। पुनर्नायिकाह। तर्हिं गतेन तत्प्रतिगमनेन किं कोऽर्थ इत्यर्थः। त्वत्तउपै
तुङ्गन्तुन्नयुक्तं हि। पुनः सख्याह। हे सुभगमानिनि सौन्दर्यमानिनि सुभगमात्मा
नं मन्यते इति आत्ममाने खश्चेति णिनिप्रत्ययः। तस्मिन्प्रिये विषये को मानः। यद्वा न
हीत्यादि सखीवाक्यम्। न हीत्येकं वाक्यन्तद्युक्तं न हीत्यर्थः। हे सखि किन्तु उपैतुं यु
क्तम्। कुतः सुभगमानिनि प्रिये को मानस्तादृक्जनस्य दुर्लभत्वादिति भावः। इत्येवं
रूपासु योषितां कथासु विषये समेतैः समीपमागत्याकर्णयद्भिरित्यर्थः। कामिभिर्वि
ऊरसाऽनेकस्वादाधृतिः सन्तोषः ऊहे ऊढा। अत्रौत्सुक्यनिर्वेदनाद्यनेक
भावशावल्यपरिपूर्णाकान्ताकर्णनादुत्तरमपूर्वहृदयानन्दनिष्यन्दमानसन्दोहम

किन्तेन न हि युक्तमुपैतुं कः प्रिये सुभगमानिनि मानः। योषिता
मिति कथासु समेतैः कामिभिर्विऊरसाधृतिरूहे ॥ ४० ॥ युग्म
म् ॥ योषितः पुलकरोधि दधत्या घर्मवारि नवसङ्गमजन्म।
कान्तवक्षसि बभूव पतन्त्या भूषणं लुलितमण्डनतैव ॥ ४१ ॥

विन्दन्नित्यर्थः। प्रायेणात्र प्रौढाः कलहान्तरिताश्च नायिकाः ॥ ४० ॥ ❁✱❁ ॥
योषित इति। पुलकरोधि शेमाञ्चव्यापि नवसङ्गमेन जन्म यस्य तत्। घर्मवारिस्वे
दोदकन्दधत्या इति सात्विकोक्तिः। कान्तवक्षसि पतन्त्या इत्यौत्सुक्योक्तिः। योषितो
या लुलितमण्डनता उत्कृष्टप्रसाधनत्वाभावेन तत्। सैव मण्डनम्बभूव। तादृश
फलत्वात्तस्येति भावः ॥ ४१ ॥

शीध्विति। शीध्यतेऽनेनेति शीधु पक्वेक्षुरसविकारो मद्यविशेषस्तस्य पानेन विधु
रासु विमूढासु। तथा दयितैः सङ्गतासु च कामिनीषु त्राप्तमानङ्कोपं निगृह्णन्निव
नयन्। शिथिलीकृता लज्जा येन सः मदनोऽनुमदोऽनुत्तरत्नेभेऽनश्यत्तेस्म इत्यर्थः। शि

थसमागमशीधुपानरूपोभयकारणसत्त्वादुभयथाप्यनिश्चयान्मदनमदयोरिवेति सन्देहानुभावसाधार
ण्याच्च सन्देहः स एवालङ्कारः ॥ ४२ ॥ ॥ ॥ ॥
द्वारीति । द्वारि त्वदागमनमार्ग एव चक्षुरित्यौत्सुक्योक्तिः । अधिपाणि पाणौ क
रे कपोलाविति चिन्तोक्तिः । किञ्च जीवितं त्वयि त्वदधीनम् । त्वां विना न जीव
तीत्यर्थः इति गाढानुरागोक्तिः । अतोऽस्याः कलहो विग्रहः कुतः इत्येवं कामिनां प्री
तये पुनरुक्तं पुनरुच्यमानं वचो दूतीवाक्यं नवनवत्वं नवप्रकारत्वमपूर्ववद्भावमिया
य च । प्रकारार्थे द्विर्भावः । कर्मधारयवद्भावात्सुपो लुक् । कान्तानुरागप्रकटना

शीधुपानविधुरासु निगृह्णन्मानमाशु शिथिलीकृतलज्जः । सं
गतासु दयितैरुपलेभे कामिनीषु मदनो नु मदो नु ॥ ४२ ॥
द्वारि चक्षुरधिपाणि कपोलौ जीवितं त्वयि कुतः कलहोऽस्याः ।
कामिनामिति वचः पुनरुक्तं प्रीतये नवनवत्वमियाय ॥ ४३ ॥
साचि लोचनयुगं नमयन्ती रुन्धती दयितवक्षसि पातम् । सु
भ्रुवो जनयति स्म विभूषां सङ्गतावुपरराम च लज्जा ॥ ४४ ॥

त्कामिनः प्रहृष्यन्तीति भावः ॥ कलहान्तरितेयम् ॥ ४३ ॥ ॥
साचीति । लोचनयुगं साचि तीर्यक् नमयन्ती प्रियेण तदन्ती । ननु ह्रियेत्यर्थः द
यितवक्षसि पातं रुन्धती इष्टमपि प्रतिबध्नती लज्जा सुभ्रुवो नायिकाया विभूषां शो
भां जनयति स्म । सङ्गतौ सुरतप्रसङ्गे सत्युपरराम च । एवं यतस्तदा न दूषणमेवे
ति भावः । विभाषाकर्मकादिति परस्मैपदम् ॥ ४४ ॥ ॥
सव्यलीकमिति । सव्यलीकं सापराधमत एवावधीरितः अवज्ञातः सन् खिन्नस्तम् । पूर्वं
कालेत्यादिना तत्पुरुषः सपदि कोपस्य पदेन व्याजेन प्रस्थितं निर्गच्छन्तं प्राणनाथं प्रि

थंयोयितःसम्बन्धिअभिवाष्पनिपातःआभिमुख्येनाश्रुमोक्षःसुहृदिवरुणाद्धिस्म रुरोध । वाष्पपातस्यमन्युमोक्षलिङ्गतयाप्रस्थानप्रतिबन्धकत्वात्सुहृदौपम्यं । इयमधीराखण्डिता । ज्ञातेऽन्यासङ्गिनिपत्यौखण्डितेर्ष्याकयायिता । अधीरास्रु विमुञ्चन्तीविज्ञेयाचात्रनायिकेतिदशरूपके ॥ ४५ ॥ ❁❁〜❁〜❁❁ ॥

शङ्कितायेति । शङ्कितायनायकायअविश्वस्तायदयितायईर्ष्ययाविमुखितांवि मुखीकृताम् । अतएवकृतवाष्पनिपातांमानिनींघनरोमविभेदःसान्द्रपुलकोद यःअभिमुखंस्थितमाहितञ्चित्तंययातांनिःकोपामित्यर्थः । शंसतिस्मव्यनक्तिस्मे

अव्यलीकमवधीरितखिन्नम्प्रस्थितंसपदिकोपपदेन । योयि
तःसुहृदिवस्मरुणद्धिप्राणनाथमभिवाष्पनिपातः ॥ ४५ ॥
शङ्कितायकृतवाष्पनिपातामीर्ष्ययाविमुखितान्दयिताय । मा
निनीमभिमुखस्थितचित्तांशंसतिस्मघनरोमविभेदः ॥ ४६ ॥
लोलदृष्टिवदनन्दयितायाश्चुम्बतिप्रियतमेरभसेन । व्रीड
यासहविनीविनितम्बादंशुकंशिथिलतामुपपेदे ॥ ४७ ॥

त्यर्थः । अन्यथासात्विकानुदयादितिभावः । अत्रापिपूर्वोक्तैवनायिका ॥ ४६ ॥ ❁
अथसम्भोगशृङ्गारमाह । सचान्तरोवाह्यश्चतत्रवाह्यरतमाह । लोलेति । प्रिय तमेलोलदृष्टिचञ्चलेक्षणान्दयितायावदनंरभसेनबलात्कारेणचुम्बतिसतिवि नीविनिर्गतबन्धनमंशुकंनितम्बात् । व्रीडयासहशिथिलतामुपपेदेउभयमपि शिथिलमासीदित्यर्थः । अत्रव्रीडांशुकरूपसम्बन्धिभेदभिन्ननिवृत्तिशंसनरूपशै थिल्यस्याभेदाध्यवसायनिबन्धनातिशयोक्तिमूलसहोक्तिविशेषोलङ्कारः । अत एवव्रीडांशुकौपम्यञ्चकल्प्यम् । अत्रवात्स्यायनःवाह्यमाभ्यन्तरञ्चेतिद्विविधंरत

मुच्यते । तत्राद्यं चुम्बनाश्लेषनखदन्तक्षतादिकम् । द्वितीयं सुरतं साक्षात्तन्नानादत्तै रीणकल्पितमिति ॥ ४७ ॥ ॥

ह्रीतयेति । गलितनीवि गलितवन्धनम् । तथाप्यवलम्बिता काञ्ची येन तत् । काञ्चीवद्धमित्यर्थः । तदन्तरीयमधोंशुकम् । अन्तरीयोपसंव्यानपरिधानान्यधोंशुकेइत्यमरः । निरस्यन्नाक्षिपन् हृदयेशः प्रियः । ह्रीतया वस्त्रापगमाल्लज्जितया । ह्रीधातोः कर्तरि क्तः दयितया मण्डलीकृतः वर्तुलीकृतः पृथुस्तनभारो यस्मिन्कर्मणि तद्यथा तथा गाढमित्यर्थः । सस्वजे आश्लिष्टः । प्रियदृष्टेः प्रतिवन्धार्थमित्यर्थः ॥ ४८ ॥ ॥

ह्रीतया गलितनीविनिरस्यन्नन्तरीयमवलम्बितकाञ्चि । म
ण्डलीकृतपृथुस्तनभारं सस्वजे दयितया हृदयेशः ॥ ४८ ॥
आदृता नखपदैः परिरम्भाश्चुम्बितानि घनदन्तनिपातैः । सौ
कुमार्यगुणसम्भृतकीर्तिर्वाम एव सुरतेष्वपि कामः ॥ ४९ ॥

आदृता इति । परिरम्भा आलिङ्गनानि नखपदैर्हेतुभिरादृताः अभिमताः । एवमितिनृतीया । तथा चुम्बनानि घनदन्तनिपातैर्हेतुभिरादृतानीति लिङ्गविपरिणामः । सुरतसुखोद्दीपकत्वान्नखदन्तक्षतपूर्वकेष्वालिङ्गनचुम्बनेष्वादरः संवृत्त इत्यर्थः । ननु सुकुमारे कामतन्त्रे कथं पीडाकरेष्वादर इति न वाच्यमित्याह । सौकुमार्येति । सौकुमार्यमेव गुणस्तेन सम्भृतकीर्तिः लब्धयशाः कामः सुरतेषु भोगेष्वपि न केवलं विप्रलम्भेष्विति भावः । वामः क्रूर एव । सुकुमारः काम इति वादमात्रम् । वस्तुतस्तु पीडयन्नेव सुखमावहतीति भावः । सामान्येन विशेषणसमर्थनरूपोऽर्थान्तरन्यासः ॥ ४९ ॥ ॥

अथाभ्यन्तरं रतमाह । पाणीति । रहस्येकान्तेऽविश्रम्भातिशयोक्तिः गद्गदवाचां
स्खलद्गिरां योषितां सम्बन्धीनि पाणिपल्लवयोर्विधूननं कम्पनमन्तःसीत्कृतानि सी
त्काराः एतेन कुट्टमिताख्यो भाव उक्तः । अधरपीडनादौ सुखेऽपि दुःखवदुपचारः कु
ट्टमितमिति लक्षणात् । नयनार्द्धनिमेषा अर्द्धनिमीलितानि । रहस्येकान्ते ग
द्गदवाचां योषितामिति विशेषणसामर्थ्यात् । गद्गदवाक्त्वेत्येतानि मदनस्यास्त्रतामुप
ययुरस्त्रवत्पुंसामुद्दीपनान्यासन्नित्यर्थः । अत्र सीत्काराद्धनिमेषादिना सुखपारव
श्यव्यज्यते । तदुक्तं रतिरहस्ये । स्रस्ततावपुषि मीलनं दृशोर्मूर्च्छनाच रतिलाभल
क्षणं । श्लेषयेत्खु जघनं मुहुर्मुहुः सीत्करोति गलगद्गदाकुलेति ॥ ५० ॥ *** ॥

पाणिपल्लवविधूननमन्तःसीत्कृतानि नयनार्द्धनिमेषाः । यो
षितां रहसि गद्गदवाचामस्त्रतामुपययुर्मदनस्य ॥ ५० ॥
पातुमाहितरतीन्यभिलेषुस्तर्षयन्त्यपुनरुक्तरसानि । सस्मि
तानि वदनानि वधूनां सोत्पलानि च मधूनि युवानः ॥ ५१ ॥

अथ मधुपानवर्णनमारभते । पातुमित्यादिना । युवानः आहितरतीनि वर्द्धितरागा
णि अत एवापुनरुक्तरसानि पुनःपुनःपानेनाप्यपूर्वस्वादानि । अत एव तर्षयन्ति तृ
ष्णोत्पादकानि अतृप्तिकरणीत्यर्थः । सस्मितानि वधूनां वदनानि सोत्पलानि मधू
नि च पातुमभिलेषुरिच्छन्ति स्म । अत्र प्रस्तुतानामेव वदनानां मधूनां च पानक्रियौप
म्यस्य गम्यत्वात् केवलप्राकरणिकविषयस्तुल्ययोगितालङ्कारः । प्रस्तुतानामन्यथा
न्येषां केवलं तुल्यधर्मतः । औपम्यं गम्यते यत्र सा मता तुल्ययोगितेति लक्षणात्
॥ ५१ ॥

॥

कान्तेति । कान्तसङ्गमेन पराजितमन्यौ अत्यन्तरोषे तदवधिकत्वात्तस्येति भावः । कि

ऽवारुणीरसनेनमध्वास्वादेनशान्तोविवादोवाक्कलहोरिर्यस्यतस्मिन् कृतःउपा हितसन्धौप्रियैःसहकृतसन्धानेमानिनीजनेविषयेअनङ्गोधनुषिइषुनसन्दधेसि द्धेसाध्येसाधनवैयर्थ्यादितिभावः॥ ५२॥ ❁〰〰〰❁〰〰〰❁॥

कुप्यतेति। यूनःप्रियान् कुप्यतकोपञ्जनयतनाक्रुधद्रुहेत्यादिनायूनांसम्प्रदान त्वेचतुर्थीतस्ययम्प्रतिकोपइतिनियमात्कोपस्यावत्कर्मइति। आप्तुआननचि त्ताअनुकूलचित्ताभवत। किञ्च। कोपितान्वरिवस्यतपरिचरत। नमोवरिवश्चि त्रङःक्यच्। वरिवसःपरिचर्य्यायाइत्यर्थःनियमश्चेत्येवमनेकोनेकप्रकारोयउपदे

कान्तसङ्गमपराजितमन्यौवारुणीरसनशान्तविवादे। मा
निनीजनउपाहितसन्धौसन्दधेधनुषिनेषुमनङ्गः॥ ५२॥
कुप्यताश्रुभवताननचित्ताःकोपितांश्चवरिवस्यतयूनः। इत्य
नेकउपदेशइवस्मस्वाद्यतेयुवतिभिर्मधुवारः॥ ५३॥
भर्तृभिःप्रणयसंभ्रमदत्तांवारुणीमतिरसांरसयित्वा। ह्री
विमोहविरहादुपलेभेपाटवंनुहृदयन्नवधूभिः॥ ५४॥

शःप्रवर्त्तकवाक्यंसन्देशइवमधुवारोमधुपानावृत्तिः। मधुवारामधुक्रमाइत्यमरः। युवतिभिःस्वाद्यतेस्म। मधुवारस्यकोपादिकार्य्यप्रवर्त्तकत्वसाम्यादुपदेशइवेत्यु त्प्रेक्षा। अनियताःखलुमत्तचेष्टाइतिभावः॥ ५३॥ ❁〰❁〰❁〰❁॥

भर्तृभिरिति। भर्तृभिःप्रणयसंभ्रमाभ्यांप्रेमादराभ्यांदत्तां। संभ्रमःसाध्वसेपिस्या त्संवेगादरयोरपीतिविश्वः। अतएवातिरसामधिकस्वादांवारुणींवरुणात्मजां। सुराहलिप्रियाहालापरिस्रुद्वरुणात्मजाइत्यमरः। रसयित्वाआस्वाद्यवधूभिःह्री विमोहविरहात्मदेनजाड्यापगमाद्धेतोःपाटवंनुहृदयंनुज्ञानविशेषनुउपले

भे । अतएवहृदयस्यतत्कार्यज्ञानसामर्थ्यात्हृदयमेवप्रागसत्यश्चाल्लब्धामातस
न्देहः । अन्यथाकथंप्रियंप्रतिवक्तोत्कआदृर्थेषुप्रवृत्तिरितिभावः । सन्देहालङ्कारः
॥ ५४ ॥ ०~०*०~०*०~०*०~०*०~०*०~० ॥
स्वादितइति । स्वयंस्वादितआदौस्वयमेवपीतोऽथानन्तरम्प्रियतमैरेधितमानंव
र्द्धितबकुसन्मानंयथातथालम्भितोग्राहितःस्वहस्तेनप्रापितइत्यर्थः । ततःप्रियत
मैःसहपीतःयुगपदेकपात्रेणापीतइत्यर्थः । आसवःप्रमदानाम्प्रतिपदम्प्रतिक्षणंनै
कारूपरसतामनेकविधस्वादुत्वन्ननञर्थस्यनशब्दस्यसुप्सुपेतिसमासः । नञ्समा
सेनलोपःस्यात् । भेजेइवप्रापेव । प्रायेणोपचारविशेषाद्भोज्येषुरसविशेषः

स्वादितःस्वयमथैधितमानंलम्भितःप्रियतमैःसहपीतः । आ
सवःप्रतिपदम्प्रमदानान्नैकरूपरसतामिवभेजे ॥ ५५ ॥
भ्रूविलाससुभगाननुकर्त्तुंविभ्रमानिववधूनयनानाम् । आ
ददेमृदुविलोलपलाशैरुत्पलैश्चषकवीचिषुकम्पः ॥ ५६ ॥

स्यादितिभावः । आस्वादनादिपदार्थानामनेकरसताप्राप्तिहेतुत्वात्काव्यलि
ङ्गन्तावदेकंस्वादनादीनामनेकाधर्म्माणामेकस्मिन्नेवसर्वक्रमेणसम्बन्धात्पर्या
यभेदश्चतयोश्चसंसृष्टयोरनेकरसत्वात्उत्प्रेक्षावीजत्वात्तयासहाङ्गाङ्गिभावेनस
ङ्करः ॥ ५५ ॥ ०००**००**००**००**००० ॥
भ्रूविलासेति । भ्रूविलासैःसुभगान्सुन्दरान्वधूनयनानांविभ्रमाननुकर्त्तुंतैरात्मानं
समीकर्त्तुमिवेतिफलोत्प्रेक्षार्थत्वात् । मृदुविलोलपलाशैरीषच्चञ्चलदलैरुत्पलैश्च
षकेषुयावीचयोमधूर्मयस्तासुयःकम्पःसआददेस्वीकृतः । ननुस्वकम्पस्तस्यवि
लोलविशेषणेनैवोक्तत्वात्स्वीकारश्चतद्योगपूर्वेनेत्रमात्रसाम्यभाजामुत्पलानांक

ष्यमाणवीचियोगात्सभूलासनेत्रसाम्यं जातमित्यर्थः ॥ ५६ ॥ ❁*❁ ॥ ❁*❁ ॥
ओष्ठेति । ओष्ठ एव पल्लवस्तस्य विदंशे दंशने रुचिरभिप्रायो येषां तेषां मुखसुरा
पानमिषेणाधरम्पिपासूनामित्यर्थः । रमणानां फुल्लानि लोचनान्येव विनीलसरोजा
नि येषु तैः अङ्गनास्यचषकानि पानपात्राणि । चषकोऽस्त्री पानपात्रमित्यमरः । तैर्मधु
वारो मधुपानावृत्तिर्हृद्यतां हृदयप्रियतामुपययौ हृदयस्य प्रेम इति यत्प्रत्ययः हृदय
स्य हृल्लेखयदण्लासेष्विति हृद्भावः । रमणविशेषार्थहेतुकङ्काव्यलिङ्गसङ्कीर्णो रू
पकालङ्कारः ॥ ५७ ॥ ❁❁ ॥ ❁*❁ ॥ ❁*❁ ॥ ❁*❁ ॥ ❁*❁ ॥ ❁❁ ॥

ओष्ठपल्लवविदंशरुचीनां हृद्यतामुपययौ रमणानाम् । फु
ल्ललोचनविनीलसरोजैरङ्गनास्यचषकैर्मधुवारः ॥ ५७ ॥
प्राप्यते गुणवतापि गुणानां व्यक्तमाश्रयवशेन विशेषः । तत्त
थाहि दयिताननदत्तं व्यानशे मधुरसातिशयेन ॥ ५८ ॥
वीक्ष्य रत्नचषकेष्वतिरिक्तां कान्तदन्तपदमण्डनलक्ष्मीम् ।
जज्ञिरे बहुमताः प्रमदानामोष्ठयावकनुदो मधुवाराः ॥ ५९ ॥

प्राप्यत इति । गुणवतापि आश्रयवशेन गुणानां विशेषः प्रकर्षः प्राप्यते व्यक्तं तत्तथा
यदुक्तं तथैवेत्यर्थः । हि यस्माद्दयिताया आननेन करणेन दत्तं मधु रसातिशयेन
स्वादुप्रकर्षेण कर्त्रा व्यानशे व्याप्तम् । व्याप्तिविशेषण सामान्यसमर्थनरूपोऽर्थान्त
रन्यासः ॥ ५८ ॥ ***〰***〰**❁**〰***〰*** ॥
वीक्ष्येति । रत्नचषकेषु स्फटिकादिमणिपात्रेषु अतिरिक्तां यावकापगमात्पूर्वाभ्यधि
कां कान्तस्य यद्दन्तपदमण्डनं तस्य लक्ष्मीं शोभां प्रतिबिम्बितामिति शेषः वीक्ष्य ओष्ठ
यावकनुदोऽधरलाक्षारागहारिणो मधुवारा मधुपानाभ्यासाः प्रमदानां बहुमता ब

मिमताः वर्त्तमाने क्तः तद्योगात् षष्ठी । जज्ञिरे जाताः प्रेयानुरागचिह्नप्रकाशकत्वा
दिति भावः ॥ ५९ ॥ ॥

मधुपानाद्धि लोचनेषु रागोत्पत्तिरधरेभ्यस्तु लाक्षारागनिवृत्तिर्मिथ्याननयोस्त्वान्योन्यग
न्धसंक्रान्तिरिति स्थिते सत्युत्प्रेक्ष्यते । लोचनेति । लोचने चाधरश्च लोचनाधरं समु
द्राभ्रातृव्यइतिव्यभिचारज्ञापकान्नात्राधरशब्दस्य पूर्वनिपातः । कृतश्चासावाहृत
श्चेति विशेषणसमासः लोचनाधरयोः कृताहृतो रागो यया सा तथोक्ता लोचनयोः कृतरा
गा अधरादाससन्तात् हृतरागा चेत्यर्थः । षष्ठ्याश्चार्थसम्बन्धात् सामान्यस्य योग्यवि
शेषणपर्य्यवसाननियमेनाधिकरणापादानार्थयोगक्षेमात् । तथा चाधरलोचन
गुणयोः रागतद्विरहयोः स्थानविपरीतवृत्तिं कृतवतीत्यर्थः । तथा वासितेन स्वगन्धसं

लोचनाधरकृताहृतरागा वासिताननविशेषितगन्धा । वा
रुणी परगुणात्मगुणानां व्यत्ययं विनिमयं नु वितेने ॥ ६० ॥

क्रान्तिसुरभितेनाननेन विशेषितो निर्णयितो गन्धो यस्याः सा । यद्वा वासिताननाद्य
सौ स्वार्थादानेनैव विशेषितगन्धा चेति कृतबहुव्रीहि विशेषणसमासः उभयथापि स्वा
ननसंक्रान्तस्वगन्धा स्वसंक्रान्ताननगन्धा चेत्यर्थः । एवंभूता वारुणी मदिरा परगुणा
त्मगुणानाम्परयोर्लोचनाधरयोर्गुणौ च परस्याननस्य गुणश्चात्मनो वारुण्याः गु
णाः परगुणात्मगुणास्तेषाम्परगुणानामात्मगुणानां व्यत्ययं नु विनिमयं नु वितेने वि
स्तारयामास । चित्तेन प्रामादिकं वस्तुपरिवृत्तिर्व्यत्ययः । बुद्धिपूर्वा तु वस्तुपरिवृत्ति
र्विनिमयः । अत्र तन्त्रोच्चरितस्य परगुणशब्दस्यावृत्त्या परगुणात्मगुणोपमेयपरगु
णौ च परगुणात्मगुणौ चेति विग्रहः कथञ्चिदगत्यासेव्यः । उपमानपूर्वपदबहु
व्रीहिवत् । तथा चायमर्थः परगुणयोरधरलोचनयोर्गुणयोः रागतद्विरहयोर्व्यत्य

यन्नु विनिमयन्नु वितेने तथा परगुणात्मगुणयोः आननगन्धात्मगन्धयोरप्यन्योन्यं वि
निमयं नु वितेने । अन्यथा कथमन्यस्मिन्नन्यधर्मोपलम्भः सम्भवतीति भावः ।
अत्र लोचनाधररागयोस्तद्भावयोर्वाभेदेऽप्यभेदाध्यवसायादेकत्ववचोयुक्तिः तस्मा
न्मूलातिशयोक्त्यनुप्राणिता चेयं व्यत्ययविनिमययोरन्यतरकरणोत्प्रेक्षेति संक्षेपः
। सा च प्रतीयमाना व्यंजकाप्रयोगात् । नुशब्दस्तु संशये ॥ ६० ॥ ✿ ॥ * ॥ ✿ ॥
तुल्येति । अक्ष्णास्तुल्यरूपमक्षितुल्याकृति योषितः कर्णगं कर्णावतंसीकृतमसितो
त्पलं निरुपकारि अनुपकारकं विदित्वा ज्ञात्वा तत्कार्यस्य शोभायाः कर्णान्तविश्रान्तेना
क्ष्णैव कृतत्वादिति भावः । मदरागः सुहृदिव उत्पलस्य बन्धुरिवानिष्टवारकत्वादि

तुल्यरूपमसितोत्पलमक्ष्णोः कर्णगं निरुपकारि विदित्वा । यो
षितः सुहृदिव प्रविभेजे लम्भितेक्षणरुचिर्मदरागः ॥ ६१ ॥
क्षीणयावकरसोऽप्यतिपानैः कान्तदन्तपदलम्भितशोभः । आ
ययावतितरामिव वध्वाः सान्द्रतामधरपल्लवरागः ॥ ६२ ॥

तिभावः । लम्भितेक्षणरुचिः आवृतनयनकान्तिः सन् प्रविभेजे वर्णान्तरापादनेन प्र
विभक्तः । अवैलक्षण्यकरादक्ष्णः व्यावर्तयामास । ततो विच्छित्तिकरत्वादिति भा
वः ॥ ६१ ॥ ✿✱✿ ✿✱✿ ✿✱✿ ✿✱✿ ✿✱✿ ✿✱✿ ॥
क्षीणेति । अतिपानैः क्षीणयावकरसः क्षीणलाक्षारागोऽपि कान्तस्य दयितस्य दन्त
पदेन दन्तक्षतेन सम्भृतशोभायस्य सः वध्वा अधरपल्लवरागोऽतितराममतिमात्रं अति
शयान्तरप्रत्यये किमेत्तिङव्ययेत्यादिना आम्प्रत्ययः तद्धितश्चासर्वविभक्तिरित्यव्यय
संज्ञा । सान्द्रतां घनत्वमाययाविव प्रियोपभोगचिह्नमण्डनानां कामिन्यवयवानां
किमन्यैर्मण्डनैरिति भावः । तत्र क्षीणस्यापि सान्द्रतेति विरोधात् कान्तदन्तेत्यादि वि

श्लेषस्तुगत्यासान्द्रत्वेहेतुत्वात्काव्यलिङ्गन्तत्सङ्कीर्णाचोत्प्रेक्षा ॥ ६२ ॥ *०* ॥
रागेति । वनितानांसर्वगापिसर्वाङ्गगतापिअन्तात्यन्तेत्यादिनाडःमदश्रीरागेणका
न्तानिनयनानियेषुतेषुविद्रुमवदरुणानिकपोलतलानियेषुतेषुमुखेषुदर्पणेष्विव
वनितानान्दृश्येनैषांनयनादिनैर्मल्येनरागाभिव्यक्तिसम्भवादितिभावः । अत्रम
दश्रीःसर्वगतापिमुखेष्वेवदृश्येइतिविरोधःतस्यमुखविशेषणैःसमाधानात्काव्य
लिङ्गानुप्राणितोविरोधवदाभासोऽलङ्कारः । सचोपमयासंसृज्यते ॥ ६३ ॥ ० ॥
वक्रेति । वक्राकोपेनविकृतिर्याभिस्तास्तथाभूताअपिरमाःकर्म्मचारुतातासांसौन्द

रागकान्तनयनेषुनितान्तंविद्रुमारुणकपोलतलेषु । सर्वगा
पिदृश्येवनितानान्दर्पणेष्विवमुखेषुमदश्रीः ॥ ६३ ॥
वक्रकोपविकृतीरपिरमाश्चारुताभिमततामुपनिन्ये । व
श्यतांमधुमदोदयितानामात्मवर्गहितमिच्छतिसर्वः ॥ ६४ ॥
वाससांशिथिलतामुपनाभिह्रीनिरासमपदेकुपितानि । यो
षितांविदधतीगुणपक्षेनिर्ममार्ज्जमदिरावचनीयम् ॥ ६५ ॥

र्य्यङ्कर्त्रीअभिमततांप्रियवाल्लभ्यमुपनिन्ये । सौन्दर्य्यंहिविकृतिमपिरोचयतइति
भावः । मधुमदोदयितानांवश्यतांविधेयत्वमुपनिन्ये । तथाहि । सर्वआत्मवर्ग
हितमिच्छतिअतश्चारुतास्त्रीणामुपचकारमधुमदस्तुपुंस्त्वात्पुंसांवश्यताविधेय
त्वमुपनिन्ये । इतियुक्तमित्यर्थः । अत्रविकृताअप्यभिमताःकुपिताअपिवश्याइतिवि
रोधस्यचारुतामदाभ्यांसमाधानादुभयथापिविरोधाभासोभवन्नर्थान्तरन्यासेन
संसृज्यते ॥ ६४ ॥ ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ॥
वाससामिति । उपनाभिनाभिसमीपेवाससांशिथिलतांह्रीनिरासंलज्जात्यागम

पदेकुपितानिअस्थानकोपाअगुणपक्षेगुणकोटौविदधतीस्थापयन्तीगुणकोटौ
निवेशयन्तीदोषानप्येतान्गुणान्कुर्वतीत्यर्थः। मदिरापियोषितांवचनीयम्। न
नाभिन्दर्शयेदितिशास्त्रनिषिद्धाचरणनिन्द्यंनिर्ममार्ज्ज। तथादोषाणामपिवस्त्र
शैथिल्यादीनान्तदानींगुणत्वान्नकश्चिद्वचनीयावकाशइत्यर्थः ॥ ६५ ॥ *
भर्तृष्विति। उपसखिसखीसमीपे। समीपार्थेऽव्ययीभावः। आत्मनःस्वदेहान्।
आत्माजीवेधृतौदेहेस्वभावेपरमात्मनीतिवैजयन्ती। भर्तृषुनिक्षिपतीनांनिपात
यन्तीनाम्भर्तॄणामुपरिपतन्तीनामित्यर्थः। आच्छीनद्योर्नुमितिविकल्पान्नुमभावः।
कुतः। मधुमदेनोद्भ्रमितानांप्रेरितानांनतुस्वेच्छयेतिभावः। वनितानामनूरक्ता

भर्तृषूपसखिनिक्षिपतीनामात्मनोमधुमदोद्भ्रमितानाम्। व्री
डयाविफलयावनितानांनस्थितंनविगतंहृदयेषु ॥ ६६ ॥
रुन्धतीनयनवाक्यविकाशंसादितोभयकरापरिरम्भे। व्री
डितस्यललितंयुवतीनांक्षीबताबहुगुणैरनुजह्रे ॥ ६७ ॥

स्त्रीणां। वनिताजनितात्यर्थानुरागयोषितीतिविश्वः। हृदयेषुविफलयाअनुचिता
चरणादितिभावः। व्रीडयानस्थितंनविगतंवैफल्यात्तस्यमदोपाधिकत्वाच्चेतिभा
वः। अतएवनोभयनिषेधविरोधः ॥ ६६ ॥ ॥ * ॥
रुन्धतीति। नयनानांवाक्यानाञ्चविकाशम्प्रागल्भ्यंरुन्धतीप्रतिबध्नती। तथापरि
रम्भेआलिङ्गनेसादितौस्तम्भितावुभौकरौययासायुवतीनांसम्बन्धिनीक्षीबताम
त्तता। कर्त्तरिक्तः। अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाइतिनिपातनात्साधुःक्षीबा
मत्तातस्याभावःक्षीबता। त्वतलोर्गुणवचनस्यपुंवद्भावोवक्तव्यः। बहुगुणैर्दृष्टिसं
कोचादिभिर्व्रीडितस्यव्रीडायाभावेक्तः। ललितंविलासंअनुजह्रेअनुचक्रे। चकार

त्कर्त्तरिश्लिष्टव्रीडाकार्य्यकरत्वाद्व्रीडानुकरणमित्युपमालङ्कारः ॥ ६७ ॥ *
योषिदिति । उद्धतउत्कटोमनोभवेनयोरागःसयस्याःसायोषिन्मानवत्यपिद
यितस्याङ्कंययौयतोमानाद्रागोबलीयानितिभावः । लाघवदोषम्परिहरति । कार
यतीति । अनिभृताचपलानकार्यकारिणीत्यर्थः । वारुणीमदिरागुणेषुदोषेषुच
विषये । सर्वौद्वंद्वौविभाषयैकवद्भवतिरहस्यविभेदंरहस्यभङ्गङ्कारयतिखलु । नि
गूहितावपिगुणदोषौप्रकाशयतीत्यर्थः । यतोनिगूढरागप्रकटनम्प्रकटमान
त्यागश्चप्रमत्ततायानलाघवमावहति । अबुद्धिपूर्वकत्वादितिभावः ॥ ६८ ॥ ❁

योषिदुद्धतमनोभवरागामानवत्यपिययौदयिताङ्कम् । कार
यत्यनिभृतागुणदोषेवारुणीखलुरहस्यविभेदम् ॥ ६८ ॥
आहितेनुमधुनामधुरत्वेचेष्टितस्यगमितेनुविकाशम् । आ
बभौनवइवोद्धतरागःकामिनीष्ववसरःकुसुमेषोः ॥ ६९ ॥
मागमन्मदविमूढधियोनःप्रोज्झ्यरन्तुमितिशङ्कितनाथाः । यो
षितोनमदिराम्भृशमीषुःप्रेमपश्यतिभयान्यपदेपि ॥ ७० ॥

आहितेइति । मधुनामद्येनचेष्टितस्यव्यापारस्यमधुरत्वेआहितेनुप्राक्सत्येवमनोह
रत्वेसम्प्रत्युत्पादितेवा । विकाशङ्गमितेनुप्राक्सत्येवमाधुर्य्येप्रकर्षम्प्रापितेवाउद्धत
रागउद्रिक्तरागः । अतएवकुसुमेषोःकामिनीष्ववसरःप्रवेशोनवइवाबभौनित्य
सन्निहितोपिमदनः । कामिनीषुमदकृततात्कालिकचेष्टामाधुर्याद्रागोद्रेकेसत्य
पूर्ववदुद्दीप्तोभूदित्यर्थः । संशयानुप्राणितेयमुत्प्रेक्षा ॥ ६९ ॥ ❁❁❁❁❁❁ ॥
मागमन्निति । शंकितनाथाअविश्वस्तपुरुषाःयोषितोमदेनविमूढधियःसत्यबुद्ध
योनोऽस्मान्प्रोज्झ्यविसृज्य । प्रपूर्वादुज्झतेःसमासेनञ्पूर्वेक्त्वाल्यप्रन्तुंमागम

न्नगच्छन्त्विति नन्नीयथेति शेषः । गमेर्माङि लङ् नमाङ्योग इत्यडागमप्रतिषेधः । मन्दिरं भृशमतिमात्रं नेयुर्नैच्छन्ति स्म किन्तु भर्तृवियोगभयादीषदेव पपुरित्यर्थः । तथाहि । प्रेम स्नेहः स्वपदेऽस्थानेऽपि भयान्यनिष्टानि पश्यत्युत्प्रेक्षते शङ्कत इति यावत् । शङ्काहेतौ प्रेम्णि कर्तृत्वोपचारः ॥ ७० ॥ ○ ○ ○ ○ ○ ○ ○ ॥

चित्तेति । चित्तस्य निर्वृतिविधायि सुखकरं विविक्तं रहः । विविक्तं रहसि स्मृतमिति विश्वः । मन्मथो मधुमदः मद्यमदः शशिभासश्चन्द्रिकाः दयितैः सङ्गमश्च वृद्धो यूनेति निपातनात्सह शब्दाप्रयोगेऽपि सहार्थे तृतीया । एतानि प्रमदानां प्रेम वियोगासहत्वावस्थां सम्भोगं कामपि भुवं काञ्चिद्दशां नयन्ति स्म रत्यवस्थामप्यतिक्रम्य शृङ्गारव

चित्तनिर्वृतिविधायि विविक्तं मन्मथो मधुमदः शशिभासः । सं
गमश्च दयितैः स्म नयन्ति प्रेम कामपि भुवं प्रमदानाम् ॥ ७१ ॥
धार्ष्ट्यलङ्घितयथोचितभूमौ निर्दयं विलुलितालकमाल्ये । मा
निनीरतिविधौ कुसुमेषुर्मत्तमत्त इव विभ्रममाप ॥ ७२ ॥

स्थां क्रीडामपि निन्युरित्यर्थः । प्रेमाभिलाषो रागश्च स्नेहः प्रेम रतिस्तथा । शृङ्गारश्चेति सम्भोगः सप्तावस्थः प्रकीर्तितः इत्युक्तं रसरत्नाकरे । प्रेमादिलक्षणं त्वेषु तच्चित्ताप्यभिलाषकः । रागस्तत्सङ्गबुद्धिः स्यात्स्नेहस्तत्प्रवणक्रिया । तद्वियोगासहं प्रेम रतिस्तत्सहवर्तनं । शृङ्गारस्तत्समक्रीडा सम्भोगः सप्तधा क्रम इति ॥ ७१ ॥ ○ ॥

क्रीडावस्थामाह । धार्ष्ट्येति । धार्ष्ट्येन प्रागल्भ्येन लङ्घिता यथोचिता योग्या भूमिर्मर्यादा यस्मिन् तथोक्ते । चुम्बनताडनमणितसीत्कारपुरुषायितादौ स्वयमुच्छृङ्खलवृत्तिरिति भावः । निर्दयं यथा तथा विलुलितानि स्राकर्षणाकुञ्चितान्यलकमाल्यानि यस्मिंस्तस्मिन् मानिनीरतिविधौ सुरते कुसुमेषुर्मत्तमत्त इव प्रकार इव विभ्रमं वि

जृम्भणमापप्राप। मनःकिन्नकरोतीतिभावः। कारयितरि कर्तृत्वोपचारादुत्प्रे-
क्षा ॥ ७२ ॥

शीधुपानइति। शीधुपानेनमद्यपानेनविधुरेषुविह्वलेषु। मैरेयमासवःशीधु
रित्यमरः। अतएववपुःषुअङ्गेषुनिघ्नताम्प्रियपराधीनतामुपगतेषुसत्सु। अ
धीनोनिघ्नआयत्तइत्यमरः। वधूनांसम्बन्धिरतिरसेषुसुरतरसास्वादेषुआ
हितभावन्दत्तचित्तंकामिषुविषयेईहितञ्चुम्बनताडनादिचेष्टितंवीतलक्ष्यन्निर्वि
षयमस्थानकृतमपीत्यर्थः। रेजेरागिणांस्खलितमपिशोभतइतिभावः। विरो
धालङ्कारः ॥ ७३ ॥

शीधुपानविधुरेषुवधूनांनिघ्नतामुपगतेषुवपुःषु। ई
हितंरतिरसाहितभाववीतलक्ष्यमपिकामिषुरेजे
॥ ७३ ॥ अन्योन्यरक्तमनसामथबिभ्रतीनाञ्चेतोभुवः
सुरसखाप्सरसांनिदेशम्। वैबोधिकध्वनिविभावित
पश्चिमार्द्धासासंहृतेवपरिवृत्तिमियायरात्रिः ॥ ७४ ॥

अन्योन्येति। अथसुरसखाइन्द्रसचिवागन्धर्वास्तेषामप्सरसांचअन्योन्यरक्त
मनसाम्परस्परानुरक्तचित्तानाञ्चेतोभुवःकामस्यनिदेशमाज्ञांबिभ्रतीनांस्मरविधे
यानान्तासुरममाणास्वेवेत्यर्थः। षष्ठीचानादरेइतिषष्ठीविबोधनशीलमेषान्ते
वैबोधिकावैतालिकाः। तच्छीलमितिठक्। तेषांध्वनिभिर्मङ्गलरवैर्विभावितो
ऽभ्यूहितःज्ञातःपश्चिमार्द्धश्चरमभागोयस्याःसातथोक्तासारात्रिःसंहृतासंक्षिप्तेवेत्यु
त्प्रेक्षा। सुखिनाम्भूपानाम्भूयानपिकालोलघीयानिवभवतीतिभावः। परिवृत्तिं
विवर्त्तिमियापप्रभातकल्पाभूदित्यर्थः ॥ ७४ ॥

निद्रेति । निद्रया विनोदितेऽपनीते नितान्तं अत्यर्थं येऽरत्याः क्लमःस्वयेयान्तेर्या
आयामिभिरायामवद्भिर्दीर्घैर्मङ्गलनिनादैर्वैबोधिकध्वनिभिर्विबोधितानाम् ।
यूनां रमासु । सुन्दरी रमणी रमा इत्यमरः । भाविविरहेणाकुलितासु सतीषु र
तानि तान्येव पूर्वाणि प्रथमानि तत्पूर्वाणि तेषां भावस्तत्पूर्वता । भावे तल्प्रत्ययः । स
मादधिरे प्रापुरिवेत्युत्प्रेक्षा आद्यसुरतवदादरात्प्रवर्त्तित इत्यर्थः । यदुत्तरकालं दु
र्लभं तदतितृष्णयानुभूयत इत्यर्थः ॥ ७५ ॥ *✿*✿*✿*✿*✿*✿*✿* ॥
कान्तेति । सुरतखेदेन निमीलितान्यक्षीणि येन तं कान्ताजनं स्त्रीसमूहं संवाहि
तुं संवाहयितुमिव खेदापनोदार्थं अङ्गमर्द्दनं कर्त्तुमिवेत्यर्थः । संवाहनं बाहने पिनस्

निद्राविनोदितनितान्तरतिक्लमानामायामिमङ्गलनिनादवि
बोधितानाम् । रामासु भाविविरहाकुलितासु यूनान्तत्पूर्वता
मिव समादधिरे रतानि ॥ ७५ ॥ कान्ताजनं सुरतखेदनि
मीलिताक्षं सम्बाहितुं समुपयानिव मन्दमन्दम् । हर्म्येषु माल्यम
दिरापरिभोगगन्धानाविश्चकार रजनीपरिवृत्तिवायुः ॥ ७६ ॥

देरङ्गमर्द्दन इति विश्वः । वाह प्रयत्न इति धातोरण्यन्तात्तुमुन् । अन्यथा संवाहयि
तुमिति णिज्ग्रहणं स्यात् । मन्दमन्दं मन्दप्रकारं प्रकारे गुणवचनस्येति द्विर्भावे क
र्मधारयवद्भावात्सुपो लुक् । समुपयान् सम्यान् रजनीपरिवृत्तिवायुर्निशावसान
मरुत् । हर्म्येषु माल्यानि च मदिरा च परिभोगो विमर्द्दस्तेन ये गन्धास्तानाविश्चकार
बहिः प्रसार्य्ययामासेत्यर्थः । अत्र सम्बाहितुमिवेत्युत्प्रेक्षा । मांद्यगुणमूलत्वाद्गुण
निमित्तक्रियाफलोत्प्रेक्षा ॥ ७६ ॥ ✿~✿*✿~✿*✿~✿*✿~✿ ॥
आमोदेति । आमोदेन मद्यगन्धेन वासिताः सुरभिता अत्ताद्दष्टमुक्तत्वास्फुरन्त्या

धरपल्लवायेषुतेषुनिद्रयाकषायितान्यपटुत्वानि विपाटलानि लोचनानि येषु तेषु। कषायस्तुवरे न स्त्री निर्यासे रञ्जकादिके। सुरभावपटौ रक्ते सुन्दरे लवने पिचे इति केशवः। व्यामृष्टानि प्रमृष्टानि पत्त्राणि तिलकाश्च येषान्तेषु विलासिनीनां वदनेषु मदावशेषः शोभाम्बबन्ध। मण्डनान्तरापाये मदशेष एव मण्डनं बभूवेत्यर्थः। स्त्रीणां मद एव भूषणमिति भावः॥ ७७॥ ❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁॥

गतवतीति। अङ्गरागेऽङ्गविलेपनेन खरेखासु नखपदेषु लक्ष्यतां दृश्यतां गतवति सति विमर्दात्तन्मात्रावशेषे सतीत्यर्थः। किञ्च बिम्बतुल्याश्चाधराः बिम्बाधराः शाक

आमोदवासितचलाधरपल्लवेषु निद्राकषायितविपाटललोचनेषु। व्यामृष्टपत्त्रतिलकेषु विलासिनीनां शोभाम्बबन्ध वदनेषु मदावशेषः॥ ७७॥ गतवति नखलेखा लक्ष्यतामङ्गरागे समददयितपीताताम्रबिम्बाधराणाम्। विरहविधुरमिष्टा सत्सखीवाङ्गनानां हृदयमवललम्बे रात्रिसम्भोगलक्ष्मीः॥ ७८॥

॥ * ॥ इति महोपाध्यायश्रीभारविकृतौ किरातार्जुनीये महाकाव्ये सुरसुन्दरीसम्भोगवर्णनं नाम नवमः सर्गः॥ ९॥ * ॥

पार्थिवादित्वात् मध्यमपदलोपी समानाधिकरणसमास इति वामनः। समदैर्दयितैः पीताः पीडिताः अत एवातिपीडनादाताम्राश्च समन्ताद्रक्ता बिम्बाधरा यासान्तासामङ्गनानां सम्बन्धि विरहेणाह्निकेन वियोगेन विधुरं विह्वलं हृदयं रात्रिसम्भोगलक्ष्मीः नखपदादिशोभेत्यर्थः। इष्टा आप्ता सत्सखी व निपुणसहचरीवावललम्बे धारयामास। प्रियसम्भोगचिह्नशोभा स्पष्टा बभूवेत्यर्थः। प्रियोपभोगचिह्नशोभावलोकनलालसाः कथं विरहं सहन्त इत्यर्थः। श्रुतिपूर्णोपमालङ्कारः

। मालिनीवृत्तम् । लक्षणमुक्तम् ॥ ७८ ॥ * ॥ इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किराताऽर्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायां नवमः सर्गः ॥ ९ ॥

॥ समाप्तश्चायं पूर्वार्द्धः ॥

अथागन्तुकसहजशोभासम्पन्नतया समग्रसाधनाः स्त्रियो मुनिमनःप्रलोभनार्थं प्रास्थन्नित्याह । अथेति । अथ प्रभाते परिमलजां सम्भोगसम्भूतां शोभामवाप्य । सम्भोगोऽस्यात्परिमल इति वैजयन्ती । सम्भोगात्स्त्रियः शोभन्त इति भावः । एतेनागन्तुकशोभासम्पत्तिरुक्ता । अत एव सुरतादिवर्णनप्रस्तुतोपयोगित्वञ्चोक्तं । अथ सहजशोभासम्पत्तिमाह । अवयवेति । अवयवैः स्तनादिभिर्दीपिता मण्डिता मण्डनश्रीः प्रसाधनशोभा याभिस्ताः । रम्यहावा मनोहरविलासास्ताः स्त्रियः वसतिं शिबिरं अभिविहाय सर्वे तस्य त्वक्लासुरपतिसूनोरर्जुनस्य विलोभनाय जग्मुः । अत्रावयवदीपकतया प्रसिद्धस्य मण्डनस्य तद्दीप्यत्वासम्बन्धेऽपि सम्बन्धाभिधाना

अथ परिमलजामवाप्य लक्ष्मीमवयवदीपितमण्डनश्रियस्ताः ।
वसतिमभिविहाय रम्यहावाः सुरपतिसूनुविलोभनाय जग्मुः ॥ १ ॥

द्रुतपदमभियातुमिच्छतीनां गगनपरिक्रमलाघवेन तासाम् । अव-
निषु चरणैः पृथुस्तनीनामलघुनितम्बतया चिरं निषेदे ॥ २ ॥

दवयवसौन्दर्यातिशयद्योतनार्थत्वादतिशयोक्तिरलङ्कारः । अस्मिन्सर्गे पुष्पिताग्रावृत्तम् । अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा इति लक्षणात् ॥ १ ॥ *❁*❁*❁*❁*❁* ॥

द्रुतेति । गगनपरिक्रमलाघवेन गगनगमनवेगेन च द्रुतपदं यथा तथाऽभियातुं गन्तुमिच्छतीनां किन्तु । पृथुस्तनीनां तासामप्सरसाम् । किन्तु । अलघुनितम्बतयाऽलघवो नितम्बा यासां तासां भावस्तत्ता तया चरणैरवनिषु चिरं निषेदे स्थितम् । अभ्यासपाटवेन मनसा त्वरमाणानामपि तासां स्तनजघनभाराच्चरणा नोत्तस्थुरित्यर्थः ॥ २ ॥ ❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁ ॥

निहितेति । निहिताः आरोपिताः सरसयावकाः सान्द्रलाक्षारागाः येषु तैर्वधूनां चरणतलैः चरणन्यासैः कृतपद्धतिः कृतरेखा । अत एवारुणिता अरुणीकृताः नीलाः स्निग्धाः तृणोलपाः तृणानि दूर्वादीनि उलपा वल्वजाः स्थूलतृणविशेषा यस्याः सा उलपा बल्वजाः प्रोक्ता इति हलायुधः । उलपा उशीरतृणानीति धूर्तस्वामी । ब्राह्मणपरिव्राजकवदुलपानां पृथङ्निर्देशः । धरित्री शक्रगोपैरिन्द्रगोपाख्यैः कीटकैः । इन्द्रगोपस्त्वग्निरज इति हेमः । अविरलं निरन्तरं यथा तथा वितता व्याप्तेवेत्युत्प्रेक्षा । बभासे ॥ ३ ॥ ॥

ध्वनिरिति । अगविवरेषु नगरन्ध्रेषु गुहास्वित्यर्थः । प्रतिरवैः प्रतिध्वनिभिः विततः

निहितसरसयावकैर्बभासे चरणतलैः कृतपद्धतिर्वधूनाम् । अ
विरलविततेव शक्रगोपैररुणितनीलतृणोलपा धरित्री ॥ ३ ॥
ध्वनिरगविवरेषु नूपुराणां पृथुरशनागुणसिञ्जितानुयातः । प्र
तिरवविततो वनानि चक्रे मुखरसमुत्सुकहंससारसानि ॥ ४ ॥

संमूर्च्छितः पृथुभिः रशनागुणानां सिञ्जितैः स्वनितैरनुयातोऽनुगतो मिलित इति यावत् । अश्नोतेर्युच् स्यात् रशादेशश्च रशना काञ्ची तालव्यशकारवतीति सिद्धान्तकौमुदी । काञ्ची सप्तकी रशना तथेत्यमरः । स्वनिते वस्त्रपर्णानां भूषणानां तु सिञ्जितमित्यमरः । नूपुराणां ध्वनिभिः ध्वानैः वनानि मुखराः शब्दायमानाः समुत्सुकाः उत्कण्ठिता हंसाः सारसाश्च येषु तानि चक्रे । अत्र हंसादिमुखरं समुत्सुकीकरणरूपेण वस्तुना तेषां नूपुरादिध्वनेः सादृश्याद्धंससारसान्तरकूजितभ्रान्तिमदलङ्कारो व्यज्यते ॥ ४ ॥ ॥

अवचयेति । अवचयः पुष्पफलादिच्छेदनम्परिभोग उपभोगः । तद्वन्ति हिंसाः

घातुकाःव्याघ्रादयः । शरारुर्घातुकोहिंस्रइत्यमरः । तैःसहचरिताःसहचरन्तः कर्त्तरिक्तः । मतिबुद्धीत्यादिसूत्रेणचकारात्सुखशयितादिवर्त्तमानार्थताअन्यैर्हिंस्रेतरैर्मृगाहरिणादयोयेषुतानिसहचरितान्यमृगाणिकाननानि । तथासमुदितेनसाध्वसेनविक्लवंविवशञ्चेतश्चवधूभ्यःक्रियाग्रहणमपिकर्त्तव्यमितिसंप्रदानत्वाच्चतुर्थी । अभितोमुनिमभिदधुः । सूचयामासुरित्यर्थः । अवचयादिलिङ्गचतुष्टयेनासन्नोमुनिरित्यनुमीयतइत्यर्थः ॥ ५ ॥ ॥

नृपतिमुनिपरिग्रहेणेति । साभूर्नृपतिरेवमुनिःतस्यपरिग्रहेणाधिष्ठानेनहे

अवचयपरिभोगवन्तिहिंस्रैःसहचरितान्यमृगाणिकाननानि ।
अभिदधुरभितोमुनिंवधूभ्यःसमुदितसाध्वसविक्लवञ्चचेतः ॥ ५ ॥
नृपतिमुनिपरिग्रहेणसाभूःसुरसचिवाप्सरसाञ्जहारतेजः । उ
पहितपरमप्रभावधाम्नांनहिजयिनान्तपसामलंघ्यमस्ति ॥ ६ ॥
सचकितमिवविस्मयाकुलाभिःशुचिसिकतास्वतिमानुषाणिताभिः ।
क्षितिषुददृशिरेपदानिजिष्णोरुपहितकेतुरथाङ्गलाञ्छनानि ॥ ७ ॥

तुनासुरसचिवानाङ्गन्धर्वाणामप्सरसाञ्चतेजोजहार । तदाश्रमप्रवेशादेवनिस्तेजस्काअभूवन्नित्यर्थः । कथंमानुषेणामानुषतेजोनिरस्तमितिचनवाच्यम् । हियस्मादुपहितेआहितेपरमेप्रभावधाम्नीसामर्थ्यतेजसीयैस्तेषाञ्जयिनाञ्जयनशीलानां । महतामितिपाठेमहतामुत्कटानान्तपसामलंघ्यंनास्ति ॥ ६ ॥ ॥

सचकितमिति । विस्मयाकुलाभिस्ताभिःस्त्रीभिःशुचयःसिकतायासुतासुपादरेखाभिव्यक्तियोग्यास्वित्यर्थः । क्षितिषुउपहितानिविन्यस्तानिकेतुरथाङ्गलाञ्छनानिरेखास्वरूपध्वजचक्राद्येवचिह्नानियेषुतानिअतएवातिमानुषाणिजिष्णोर

ऽर्जुनस्यपदानिसचकितमिवददृशिरेदृष्टानि । अद्भुतवस्तुदर्शनाद्भयविस्म
यौभवतइतिभावः ॥ ७ ॥ ooo *** ooo ooo *** ooo ॥
अतिशयितेति । अतिशयिताअतिक्रान्तावनान्तराणांद्युतिर्याभिःतासांकृतःफलानां
कुसुमानाञ्चावचयेपिलवनेपिसैवविधाप्रकारोयासान्तद्विधानांतथैवसमृधाणामित्य
र्थः । तरूणांवीरुधाञ्चसमृद्ध्यालिङ्गेनयुवतिजनैर्मुनिप्रभावोऽऋतुरिवजगृहेनि
श्चितःकारणतयेतिशेषः ॥ ८ ॥ * ॥ o ॥ * ॥ o ॥ * ॥ o ॥ * ॥ o ॥
मृदितेति । ससलिलमार्द्रंयद्वल्कलन्तदेवभारस्तेनभुग्नशाखोनम्रशाखःअतस्व

अतिशयितवनान्तरद्युतीनाम्फलकुसुमावचयेपितद्विधानाम् । ऋ
तुरिवतरुवीरुधांसमृद्ध्यायुवतिजनैर्जगृहेमुनिप्रभावः ॥ ८ ॥
मृदितकिसलयःसुराङ्गनानांससलिलवल्कलभारभुग्नशाखः । बहु
मतिमधिकांययावशोकःपरिजनतापिगुणायसद्गुणानाम् ॥ ९ ॥
यमनियमकृशीकृतस्थिराङ्गःपरिददृशेविधृतायुधःसताभिः । अनु
पमशमदीप्तितागरीयान्कृतपदपङ्क्तिरथर्वणेववेदः ॥ १० ॥

मृदितकिसलयोविलुलितपल्लवःकाचिन्नेतिप्रतिषेधान्नमृदेगुणःअशोकोवृक्षविशे
षःसुराङ्गनानामप्सरसांसम्बन्धिनीमधिकांबहुमतिंसज्जनसेवीधन्योयमितिय
यौ । ननुसेवकेषुकाश्लाघेत्यत्राह । सद्गुणानांपरिजनतापिअनुचरत्वमपि । भा
वेतल् । गुणायोत्कर्षायभवतीतिशेषः । एतेनतासांमुनेःप्रभावदर्शनादेवपारव
श्यंगम्यते ॥ ९ ॥ o************************o ॥
यमेति । यमोदेशकालाद्यनपेक्ष्याशुद्धिहेतुरहिंसादिः । नियमस्तदपेक्ष्याशु
द्धिहेतुःतपःस्वाध्यायादिःताभ्यांकृशीकृतान्यपिस्थिराणिदृढानिअङ्गानियस्यसः ।

विधूतायुधः। अतएवतपस्कात्रयुक्तः सोऽर्जुनःशमःशान्तिरभ्युदयकाण्डेदीप्तिता
ऽत्ययोऽभिचारकाण्डेताभ्यामनुपमाभ्यांगरीयानुदयः। अथर्वणावशिष्ठेनकृतार
चितापदानाम्पङ्क्तिरानुपूर्वीयस्यसवेदश्चतुर्थवेदइत्यर्थः। अथर्वणस्तुमन्त्रोद्धारो
वशिष्ठकृतइत्यागमः। सइवताभिस्त्रीभिःपरिददृशेदृष्टः॥ १०॥ ●~●॥
अथचतुर्भिस्तमेवविशिनष्टि। शशधरेत्यादिभिः। शशधरश्चन्द्रइवलोचनाभिरामै
र्गगनविसारिभिरंशुभिस्तेजोभिः। परीतोव्याप्तोऽम्बरवत्एकंसानुसद्मयस्यसएक
कदेशस्योपीत्यर्थः। महीधरस्येन्द्रकीलस्यसकलंशिखरनिचयमपिदधदावृ
र्वन्निवेत्युत्प्रेक्षा॥ ११॥ ●●~●●~●●~●●~●●~●●॥

शशधरइवलोचनाभिरामैर्गगनविसारिभिरंशुभिःपरीतः। शिखर
निचयमेकसानुसद्मासकलमिवापिदधन्महीधरस्य ॥ ११ ॥
सुरसरितिपरन्तपोधिगच्छन्विधूतपिशङ्गबृहज्जटाकलापः। हु
विरिवविततःशिखासमूहैःसमभिलषन्नुपवेदिजातवेदाः॥ १२॥

सुरेति। पुनःसुरसरितिगङ्गाकूलेपरन्तपोधिगच्छन्नर्ज्जयम्। फलाभिलाषेणे
तिशेषः। हविरभिलषन्इत्युपमानविशेषणसामर्थ्यात्। तथाविधूतःपिशङ्गबृ
हज्जटाकलापोयेनसः। अतएवोपवेदिवेद्यांविभक्त्यर्थेऽव्ययीभावः। शिखास
मूहैर्ज्वालाजालैर्विततोहविराज्यादिकंसमभिलषन्। जातंवेदोहिरण्यंयस्मा
दितिजातवेदावह्निरिवस्थितः॥ १२॥ ●॥ ●॥ ●॥ ●॥ ●॥ ●॥ ●॥
सदृशमिति। पुनराकृतेर्वपुषः। आकृतिःकथितारूपेसामान्यवपुषोरपीतिविश्वः
। सदृशन्तुल्यमतनुंमहान्तम्प्रयत्नमुद्योगन्दधत्। तथातदनुगुणाम्प्रयत्नानुगुणा
मपरैरन्यैर्दुर्वहांकर्तुमशक्यामित्यर्थः। क्रियांव्यापारंदधत्। तथाक्रियानुरूपम

लघुगुरु तपो दधत्॥ तथा विजयवतीं सर्वोत्कर्षवतीं विजयफलां वा तपःक्रियानुरूपां तपःसमां समृद्धिमैश्वर्यं दधत्। अत्र पूर्वम्प्रत्युत्तरस्य विशेषणतया स्थापनात् यथैकावल्यलङ्कारः। यथापूर्वम्परस्य विशेषणतया स्थापने एकावलीति लक्षणात्॥ १३॥

चिरनियमेति। पुनश्च चिरनियमेन दीर्घकालतपसा कृशः क्षीणाङ्गोऽपि शैलसारः। उपमानपूर्वपदो बहुव्रीहिः। शमनिरतोऽपि प्रकृत्या दुरासदो दुर्द्धर्षः निर्जने विजने देशे तिष्ठन्नपि ससचिवः सपरिवार इव। किञ्च मुनिरप्यैश्वर्यरहितोऽपीत्यर्थः

सदृशमतनुमाकृतेः प्रयत्नन्तदनुगुणामपरैः क्रियामलंघ्याम्। दधदलघु तपः क्रियानुरूपं विजयवतीच तपःसमां समृद्धिम्॥ १३॥

चिरनियमकृशोऽपि शैलसारः शमनिरतोऽपि दुरासदः प्रकृत्या। ससचिव इव निर्जनेऽपि तिष्ठन् मुनिरपि तुल्यरुचिस्त्रिलोकभर्तुः॥ १४॥

तनुमवजितलोकसारधाम्नीं त्रिभुवनगुप्तिसहां विलोकयन्त्यः। अवययुरमरस्त्रियोऽस्य यत्नं विजयफले विफलं तपोऽधिकारे॥ १५॥

त्रयाणां लोकानाम्भर्तुरिन्द्रस्य तद्धितार्थेत्यादिना उत्तरपदसमासः। तुल्यरुचिः समानतेजाः अपिशब्दः सर्वत्र विरोधद्योतनार्थः स च मुनेरतर्क्यमहिमत्वेन निरस्त इति विरोधालङ्कारः। विरोधाभासत्वं विरोध इति लक्षणात्॥ १४॥

तनुमिति। अवजितेति रस्कृते लोकानां सारधाम्नी सत्वतेजसी यया ताम् अवजितसारधाम्नीं ... त्यादिना ङीप्। त्रयाणाम्भुवनानां समाहारस्त्रिभुवनं। तद्धितार्थेत्यादिना समाहारार्थे तत्पुरुषः पात्रादित्वान्ङीत्वप्रतिषेधः तस्य गुप्तौ रक्षणे सहां समर्थाम्पाण्डव। तनुं मूर्तिं विलोकयन्त्योऽमरस्त्रियो विजयफले जयार्थे तपोऽधिकारे तपोऽनु

ञ्चानेऽस्यार्जुनस्य यत्नं विफलमवययुर्मेनिरे । त्रैलोक्याधिपत्यादिमहाफलसाध
नस्यार्थस्य तुच्छफलाभिलाषो मत्तमातङ्गमांसभोगोचितस्य कण्ठीरवस्य जीर्णतृण
चर्वणात्कण्ठेवन शोभामावहतीति भावः । अत्र विशिष्टतनुविलोकनस्य स्त्रीविशेष
णावैफल्यजननहेतुत्वोक्त्या पदार्थहेतुकः काव्यलिङ्गमलङ्कारः ॥ १५ ॥ * ॥
मुनीति । प्रतनुबलानि उत्कृष्टसाराणि तपांस्यधितिष्ठतोऽनुतिष्ठतो मुनीन् दनु
तनयान् दानवान् सद्यस्तत्क्षणमेव विलोभ्याकृष्य चिरात् कुलिशभृता शक्रेण अलघु
नि पदे स्थाने विहितं तत्स्वं स्वकीयं नियोगमधिकारं ताः स्त्रियो बहु यथा तथा मेनि
रे । निकृष्टपदवृत्तीनामुत्कृष्टपदलाभो महद्बहुमानमूलमिति भावः । विलोभ्य

मुनिदनुतनयान्विलोभ्य सद्यः प्रतनुबलान्यधितिष्ठतस्तपांसि । अ
लघुनि बहु मेनिरे च ताः स्वं कुलिशभृता विहितं पदे नियोगम् ॥ १६ ॥
अथ कृतकविलोभनं विधित्सौ युवतिजने हरिसूनुदर्शनेन । प्रस
भमवततार चित्तजन्मा हरति मनो मधुरा हि यौवनश्रीः ॥ १७ ॥

मेनिर इत्यन्वयः । यद्वा । विलोभ्य लोभं कारयित्वा विहितं शक्रेणेत्यन्वयात्समानक
र्तृत्वनिर्वाहः ॥ १६ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥
अथेति । अथानन्तरं कृतकविलोभनं कृत्रिमं विलोभनं विधित्सौ विधातुमिच्छौ विनिर्वि
पूर्वाद्दधातेः सन्नन्तादुप्रत्ययः । युवतिजने हरिसूनोरर्जुनस्य दर्शनेन चित्तज
न्मा कामः प्रसभं बलादवततार । देवतत्परं विषयितुमागतस्य मोहो भवति यत् । स्व
यं मुनिवञ्चनप्रवृत्ताः स्त्रियस्तेन वञ्चिता इत्यर्थः । युक्तं चैतत् । हि यस्मान्मधुरा मनो
हरा यौवनश्रीः मनो हरति बलादिति शेषः ॥ १७ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥
सपदीति । वधूनां निदेशान्नियोगात् ध्वनिता नादिता मनोरमा वल्लकी वीणाः मृद,

ङ्गाश्चयैस्तैर्हरिसखैर्गन्धर्वैर्वियत्याकाशे वने च युगपत् । ऋतुगणस्य ऋतुषट्कस्य सन्निधानमाविर्भावो यथार्थं यथायथं यथास्वमसङ्करेणेत्यर्थः । यथास्वे तु यथायथमिति निपातः । वितेने वितस्तरे । उद्दीपनसामग्रीसम्पादनायेत्यर्थः ॥ १८ ॥ ❀ ॥

अथ वर्षाक्रमेणर्तून्वर्णयति । सजलेत्यादि । सजला जलधरा यस्मिंस्तन्नभो विरेजे । तडितो लता इव तासां रुचिः प्रभा विहृतिं विजृम्भणमियाय । तथा व्यवहितरतिविग्रहैः प्रकल्पितप्रणयकलहैर्जलगुरुभिर्जलभाराद्गम्भीरैरित्यर्थः । स्तनितैः गर्जितैर्दिगन्तरेषु वितेने विततैरभावि । भावे लिट् । अकर्मकत्वं वैवक्षिकमत

सपदि हरिसखैर्वधूनिदेशाद्ध्वनितमनोरमवल्लकीमृदङ्गैः । यु
गपदृतुगणस्य सन्निधानं वियति वने च यथायथं वितेने ॥ १८ ॥
सजलजलधरं नभो विरेजे विहृतिमियाय रुचिस्तडिल्लतानाम् ।
व्यवहितरतिविग्रहैर्वितेने जलगुरुभिस्स्तनितैर्दिगन्तरेषु ॥ १९ ॥
परिसुरपतिसूनुधाम सद्यः समुपदधन्मुकुलानि मालतीनाम् ।
विरलमपजहार बद्धबिन्दुः सरजसतामवनेरपां निपातः ॥ २० ॥

एव दिगन्तरेष्वित्यधिकरणे प्रयोगः अन्यथा कर्मत्वमेव स्यात् ॥ १९ ॥ ❀ ॥ ❀ ॥

परीति । परिसुरपतिसूनुधाम अर्जुनाश्रमम्प्रति परीति लक्षणार्थे कर्मप्रवचनीयस्य योगाद्द्वितीया । यद्वा । विभक्त्यर्थेऽव्ययीभावः । विवर्जनार्थस्य तस्यात्र विरोधात् । तथा च सुरपतिसूनुधाम्न इत्यर्थः । सद्यो मालतीनां जातीलतानां । सुमना मालती जातिरित्यमरः । मुकुलानि समुपदधत् जनयत् । विरलं यथा तथा बद्धबिन्दुरपान्निपातो वृष्टिरवनेः सम्बन्धिनी सरजसतां सरजस्कत्वं अचतुरेत्यादि सूत्रेण साकल्यार्थेऽव्ययीभावः । समासान्तनिपातः बहुव्रीह्यर्थस्तु लभ्यते । अव्ययीभाव

दर्शनन्तुप्रायिकमितिकेचित् । अपजहारधूलिंशमयामासेत्यर्थः ॥ २० ॥ *

प्रतिदिशमिति । दिशिदिशिप्रतिदिशंयथार्थेऽव्ययीभावः । शरत्प्रभृतिजात्... तः अभिगच्छतासंवाताककुभान्यर्जुनकुसुमानि । इन्द्रद्रुःककुभोऽर्जुनइत्यमरः । तेषांविकासेनसुगन्धिनामनोज्ञगन्धेन । गन्धस्येत्त्वेतदेकान्तग्रहणम्प्रायिकं । अनिलेनाभिमृष्टःसंस्पृष्टः । अतएवसचित्तजन्माकामाक्रान्तइत्यर्थः । अतएवगतधृतिर्गतधैर्यः आकुलितःक्षोभितश्चरतिंप्रतिइतिभावः । एवम्भूतोजीवलोकोनवइवावस्थान्तरप्राप्त्या अपूर्वइवविबभौभातिस्मेत्युत्प्रेक्षा ॥ २१ ॥ ०००० ॥

व्यथितमिति । व्यथितंदुःखितमपिमनोहरन्तीकिमुतसुखितमितिभावः । जं

प्रतिदिशमभिगच्छताभिमृष्टःककुभविकाससुगन्धिनानिलेन । न
वइवविबभौसचित्तजन्मागतधृतिराकुलितश्चजीवलोकः ॥ २१ ॥
व्यथितमभृशंमनोहरन्तीपरिणतजम्बुफलोपभोगहृष्टाः । प
रभृतयुवतिःस्वनंविदध्रेनवनवयोजितकण्ठरागरम्यः ॥ २२ ॥

म्बाविकारःफलञ्जम्बु । वार्हतञ्चफलेजंब्वाजम्बूस्त्रीजम्बुजाम्बवमित्यमरः । जंब्वाश्चेतिलुक् । लुक्तद्धितलुकीतिह्रस्वः । जम्बुचतत्फलञ्चेतिसामान्यविशेषयोःसहनिर्देशः । यद्वा । जंब्वाःफलमितिविग्रहःइकोह्रस्वोऽङ्योगालवस्येतिह्रस्वः । तस्यपरिणतस्योपभोगेनहृष्टाः । अतएवपरभृतयुवतिःकोकिलाङ्गनानवनवंनवप्रकारं । यथातथायोजितेनसम्पादितेनकण्ठरागेणकण्ठमाधुर्येणरम्यंसौम्यमित्यर्थः । स्वनंवितेनेवर्षास्वपिमधुराःस्वराःकोकिलायाइतिप्रसिद्धिः ॥ २२ ॥ ०००० ॥

अभिभवतीति । कदम्बवायौकदम्बसम्बन्धिनिमारुतेमन्दमधुरेशिखण्डिनांनिनादेमनोऽभिभवतिअभिहरतिसतिजिष्णुर्जयनशीलोऽर्जुनः । जातःपृथक्ज

नइवधृतेर्धैर्यान्नचचाल । वर्षं अभि..टुद्दीपनाय समर्थो नाभूदित्यर्थः । हियत...
...सन्नाधिभङ्गःसुकरेणनकेनापिकर्तुंशक्यतइत्यर्थः ॥ १३ ॥ ००*००॥
धृतेति । विसानिवलयानीवतेषामावलिंधृतायया सा । कुमुदघनमेकमुख्यंदुकू
लमिवनदूहन्ती । आत्तानिगृहीतानिवाणानिनीलीझिरटीनि यया सा आत्तवाणा
धृतशराच । गृह्णीयात्क्षत्रियःशरमितिस्मरणात् । वाणोक्तानीलाझिरटीचेति वैज
यन्ती । शरवत्वधूर्जायेवघनसमयेनवर्षर्तुनावरेणेतिशेषः । अमलतलेनिर्म
लतलेसरोजंपाणाविवतस्मिन्नाललम्बेजगृहे । कर्मणिलिइवधूवरसमागमवद्

अभिभवतिमनःकदम्बवायौमदमधुरेचशिखण्डिनांनिनादे । ज
नइवनधृतेश्चचालजिष्णुर्नहिमहतांसुकरःसमाधिभङ्गः ॥ २३ ॥
धृतविसवलयावलिर्वहन्तीकुमुदवनैकदुकूलमात्तवाणाम् । शर
दमलतलेसरोजपाणौघनसमयेनवधूरिवाललम्बे ॥ २४ ॥
समदशिखिरुतानिहंसनादैःकुमुदवनानिकदम्बपुष्पवृष्ट्या । श्रि
यमतिशयिनींसमेत्यजग्मुर्गुणमहतांमहतेगुणाययोगः ॥ २५ ॥

तुसन्धिरशोभतइत्यर्थः । अत्रात्तवाणेतिझिरटीशरयोर्वाणयोरभेदाध्यवसायात्
श्लेषमूलातिशयोक्तिरुपमाङ्गमित्यनयोःसङ्करः ॥ २४ ॥ ०००० ००००० ॥
अथऋतुसन्धिंवर्णयति । समदेति । समदशिखिरुतानिमत्तमयूरकूजितानिहं
सनादैःसमेत्यतथाकुमुदवनानिकदम्बपुष्पवृष्ट्यासमेत्यातिशयनीमतिशयवतीं
श्रियञ्जग्मुः । तथाहि । गुणमहतांगुणाधिकानांयोगःपरस्परसमागमोमहतेगु
णायोत्कर्षायभवतीतिशेषः । अत्रत्रिपाद्यांसमालङ्कारः । समालंकृतियोग्यवस्तु
नोरुभयोरितिलक्षणात् । सोपिचतुर्थेनअर्थान्तरन्यासेनसमर्थ्यमनयकनाङ्गाङ्गि

...वेनसङ्करः ॥ २५ ॥ *∘∘∘∘∘∘∘∘∘∘∘∘∘∘∘∘∘∘∘∘∘∘∘∘* ॥

सरज...मिति । प्रियमधुरिष्टमकरन्दः । अनित्यत्वान्नसमासान्तःपुल्लिङ्गोऽस्य... ...विकल्प...हरिरितिकेचित् । नपुंसकलिङ्गस्यैवमधुशब्दस्यऽर्द्धर्चादिषुपाठात् । मकरन्दस्यमद्यस्यमाक्षिकस्यापिवाचकोऽर्द्धर्चादिगणेपाठात्पुन्नपुंसकयोर्मधुरिति । षट्पदालीषट्पदावलिःउपान्तिकेयानिनीपानिकदम्बकुसुमानितेषांरेणुभिःकीर्णव्याप्तं । किञ्च स्वतोपिसहरजसासरजसंनत्वरजस्कमितिभावः । अचतुरेत्यादिनानिपातःकेतकीनाम्प्रसवमपहायविनीलवन्धनानिनलिनवृन्तानिअसनानिप्रियकपुष्पाणिमकरंदभरितानीतिशेषः । सर्जकासनवन्धूकपुष्पंप्रिय

सरजसमपहायकेतकीनाम्प्रसवमुपान्तिकनीपरेणुकीर्णम् । प्रिय

मधुरसनानिषट्पदालीमलिनयतिस्मविनीलवन्धनानि ॥ २६ ॥

मुकुलितमतिशय्यबन्धुजीवन्धृतजलविन्दुषुशाद्वलस्थलीषु । अवि

रलवपुषःसुरेन्द्रगोपाविकचपलाशचयश्रियंसमीयुः ॥ २७ ॥

कजीवकाइत्यमरः । मलिनयतिस्मयथावृन्तादन्यत्रापिमालिन्यंस्यात् । तथामधुलोभाच्छादयामासइत्यर्थः । नहिमध्वासक्तोमधुलाभेविभूतिष्वासज्जतीतिभावः ॥ २६ ॥ *~*~*~*~*~*~*~*~*~*~*~*~* ॥

मुकुलितमिति । धृताजल...वोयासुतासुशाद्वलस्थलीषुशादहरितप्रदेशेषु अविरलवपुषःस्थूलमूर्त्तयःसुरेन्द्रगोपाःकीटविशेषाःमुकुलितम्बन्धुजीवम्बन्धुजीवकमुकुलमित्यर्थः । बन्धूकोबन्धुजीवकइत्यमरः । अतिशय्यातिक्रम्यविकचपलाशचयंविकसितकिंशुकराशिः । पलाशेकिंशुकःपर्णइत्यमरः । तस्यश्रियन्तत्सदृशश्रियमित्यर्थः । अतएवनिदर्शनालङ्कारः । समीयुःप्रापुः ॥ २७ ॥ * ॥

अथ हेमन्तवर्णनमाह । अविरलेति । अविरलानि घनानि फलिनीवनानां प्रिय
ङ्गुवनानां प्रसूनानि यस्मिन्सः । प्रियंगुः फलिनी फली त्यमरः । कुसुमितैः कुन्दै
र्माघ्यकुसुमैः सुगन्धिर्गन्धवाहो यस्मिन्सः । माघ्यं कुन्दमित्यमरः । शैशिराणाम
पि कुन्दानां हेमन्ते प्रादुर्भावादविरोधः । विरलतुषारकण इति प्रारम्भोक्तिः । तु
षारकालो हेमन्तश्शिशिरया समयजमकालसम्भवं गुणमुत्कर्षं लेभे ॥ २८ ॥ ०॥
निचयिनीति । निचयिनि उपचयवति लवलीलतानां विकाशे पुष्पविजृम्भणे तथा
लोध्रसमीरणे च हर्षं प्रसादं जनयति सति पाण्डुसूनुर्विकृतिं नोपपयौ । कुतः हि

अविरलफलिनीवनप्रसूनः कुसुमितकुन्दसुगन्धिगन्धवाहः । गु
णमसमयजं चिराय लेभे विरलतुषारकणस्तुषारकालः ॥ २८ ॥
निचयिनि लवलीलताविकाशे जनयति लोध्रसमीरणे च हर्षम् । वि
कृतिमुपययौ न पाण्डुसूनुश्चलति नयान्न जिगीषतां हि चेतः ॥ २९ ॥
कतिपयसहकारपुष्परम्यस्तनुतुहिनोऽल्पविनिद्रसिन्दुवारः । सु
रभिमुखहिमागमान्तशंसी समुपययौ शिशिरः स्मरैकबन्धुः ॥ ३० ॥

यस्माज्जिगीषतां जेतुमिच्छतां चेतो नयान्नीतेर्न चलति न हि क्रोधाक्रान्ते चेतसि शृ
ङ्गाररसस्य विकाशस्तद्विरुद्धत्वाद्रौद्रस्येति भावः ॥ २९ ॥ * ॥ ० ॥ * ॥ ० ॥
कतिपयेति । कतिपयैरेव सहकारपुष्पैश्चूतकुसुमै[illegible]र्न तु [illegible] समग्रैर्नापि
हेमन्तवत्तद्रहितैरिति भावः । तनुतुहिनः तनु हेमन्तवद्बहुतुहिनो नापि वसन्त
वद्विरलतुहिन इति भावः । अल्पानि कतिपयानि विनिद्राणि सिन्दुवाराणि विकासि
तनिर्गुण्डीकुसुमानि यस्मिन्सः अत्रापि सहकारवदभिप्रायो द्रष्टव्यः । सिन्दुवारे
न्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपीत्यमरः । इत्थं सुरभिमुखस्य [illegible]प्रारम्भे हिमागमस्य

न्तं हेमन्तावसानं च शंसतिसूचयतीति सतथोक्तः। स्मरस्यैकवन्धुःसहकारी उभ यर्तुधर्मसम्पत्तेरितिभावः। शिशिरःसमुपययौ॥ ३०॥ ०००००००॥
अथवसन्तप्रारम्भमाह। कुसुमेति। कुसुमप्रधानानान्नगानांवृक्षाणांकुसुमानान्न गाविृक्षोक्षिजेयांवनान्युपैतुङ्कामोरेदुङ्कामोयस्याःसा। शैलवृक्षौनगावगाविल्यम रः। लुम्पेदवश्यमःकृत्येतुङ्काममनसोरपीतिमकारलोपः। वसन्तलक्ष्मीःकिस लयिनीम्पल्लविनीञ्चूतयष्टिञ्चूतशाखामिवेतिभावः। अवलंब्यावष्टभ्यान्यथारो ढुमशक्यत्वादितिभावः। कणन्शिञ्जमानमलिकुलंनूपुरमिवयस्याःसातथोक्तास ती। अन्यत्रालिकुलवन्नूपुरन्नलिनवनेषुपदंनिराशेनिदधे। तेषुप्रथमम्प्रादुरा

कुसुमनगवनान्युपैतुकामाकिशलयिनोमवलंब्यचूतयष्टिम्। क
णदलिकुलनूपुरन्निरासेनलिनवनेषुपदंवसन्तलक्ष्मीः॥ ३१॥
विकसितकुसुमाधरंहसन्तींकुरवकराजिवधूंविलोकयन्तम्। द
दृशुरिवसुराङ्गनानिषसंसशरमनङ्गमशोकपल्लवेषु॥ ३२॥

सीदित्यर्थः। उपसर्गादस्यत्यूह्योवेतिवचनादात्मनेपदम्। अत्रप्रक्रान्तवसन्त लक्ष्मीविशेषणसामर्थ्यादप्रस्तुतनायिकाव्यवहारसमारोपात्समासोक्तिरलङ्का रः॥ ३१॥ ** ~ * ~ * ~ * ~ * ~ * ~ * ~ * ~ ** ॥
विकसितेति। विकसितोविश्लिष्टःकुसुममेवाधरोयस्मिन्कर्मणितद्यथातथाह सन्तींस्मयमानांकुरवकराजिरेववधूस्तांविलोकयन्तंकामुकतयेतिभावः। अतए वाशोकपल्लवेषुपल्लवसंस्तरेषुनिषसंस्थितमित्यर्थः। रिरंसयेतिशेषः। सशर न्नित्यविजयित्वादितिभावः। इत्थंशृङ्गारवीरयोरेकाधिकरणभूतमनङ्गंसुराङ्ग नाददृशुरित्युत्प्रेक्षा। अशोकाद्यवलोकनान्मदनसाक्षात्कारादिवमहात्मनःक्षोभ

स्तासामासीदित्यर्थः। अत्ररूपकोत्प्रेक्षयोःसंसृष्टिः ॥ ३२ ॥ * ॥ ० ॥ * ॥

मुकुरिति। अनुपतताऽनुधावतादक्षिणानिलेनमलयमारुतेनमुकुरंविधूयमानंवि
रचितासंहतिर्येनतन्सम्भूतमित्यर्थः। पङ्कजिन्यायन्नलिनंमुखमिवतस्यान्तवि
सर्पिप्रान्तचारिअलिकुलङ्कर्तृअलकाकृतिमलकसादृश्यंप्रपेदे ॥ ३३ ॥ ० * ॥
श्वसनेति। षट्पदेनशाललतासर्जतरुशाखावधूरिवशाललतावधूः। प्राकारोवर
णःशालःसर्जतरुस्मृतःइतिशाश्वतः। श्वसनेनवायुनानिःश्वासेनचलितःपल्लवो
ऽधरोष्ठइवयत्रतस्मिन्। ओत्वोष्ठयोःसमासेवापररूपंवक्तव्यम्। मधुनामकर

मुकुरनुपतताविधूयमानंविरचितसंहतिदक्षिणानिलेन। अलि
कुलमलकाकृतिम्प्रपेदेनलिनमुखान्तविसर्पिपङ्कजिन्याः ॥ ३३ ॥
श्वसनचलितपल्लवाधरोष्ठेनवनिहितेर्ष्यमिवावधूनयन्ती। मधु
सुरभिणिषट्पदेनपुष्पेमुखइवशाललतावधूश्चुचुम्बे ॥ ३४ ॥
प्रभवतिनतदापरोविजेतुम्भवतिजितेन्द्रियतायदात्मरक्षा। अव
जितभुवनस्तथाहिलेभेसिततुरगेविजयंनपुष्पमासः ॥ ३५ ॥

न्देनमद्येनचसुरभिणिपुष्पेमुखइवतंयथातथानिहितेर्ष्यंकृतकोपमिवेतिक्रिया
विशेषणंयथातथाऽवधूनयन्तीकम्पयन्ती। धुञ्प्रीञोर्नुग्वक्तव्यइतिणिचिनुमाग
मःचुचुम्बेचुम्बिताः। अत्रश्वसनशब्दार्थमधुरशब्दार्थयोरभेदाध्यवसायश्लेष
मूलातिशयोक्तिः। साचोपमाङ्गमित्यनयोःसङ्करः ॥ ३४ ॥ * * * * ॥
प्रभवतीति। परःशत्रुस्तदातस्मिन्कालेविजेतुन्नप्रभवतिनशक्नोति। यदाजि
तेन्द्रियताइन्द्रियजयत्वंआत्मरक्षाभवतिविद्यते। तथाहि। अवजितभुवनःत्रैलो
क्यविजयीपुष्पमासोवसन्तःसिततुरगेऽर्जुनेविषयेविजयन्नलेभे। अतोजितेन्द्रि

यात्तु जीयाद् इत्यर्थः । विशेषेण सामान्यार्थसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥ ३५ ॥

अथ ग्रीष्मं वर्णयति । कथमिति । विरचितमल्लिकाविकाशो निदाघकालो ग्रीष्मः ऋतुभिर्वर्षादिभिः समं मुनिनावधीरितस्य तिरस्कृतस्य तवसंमतिर्लोके योग्यत्वेनानुमतिः कथमिव कथञ्चिद्भविचीनभविष्यतीत्यर्थः । इतीत्थं मधुर्वसन्तः । चैत्रे दैत्ये च सन्ते च जीवे के कोशे मधुः स्मृत इति विश्वः । स्मयते स्मेव जहासकिमुत्युत्प्रेक्षा । लट स्मे इति भूतार्थे लट् । प्रहासस्य शुभ्रत्वेन कविप्रसिद्धो मल्लिकाविकाशे हासत्वाध्यवसायः । अत्र ऋतुभिः समवधीरितस्येत्यत्राभेदाध्यवसायमूलासहोक्तिरलङ्कारः

कथमिव तव संमतिर्भविता सममृतुभिर्मुनिनावधीरितस्य । इति विरचितमल्लिकाविकाशः स्मयते स्म मधुं निदाघकालः ॥ ३६ ॥
बलवदपि बलं मिथो विरोधि प्रभवति नैव विपक्षनिर्ज्जयाय । भुवनपरिभवी न यत्तदानीन्तमृतुगणः क्षणमुन्मनीचकार ॥ ३७ ॥

। सम्बन्धभेदभिन्नस्यावधीरणस्याभिन्नतयाध्यवसायात्तदेवावधीरणमसंमतिद्वारा स्मयोत्प्रेक्षामित्यनयोरङ्गाङ्गिभावेन सङ्करः ॥ ३६ ॥ ॥

बलवदिति । बलवत्प्रबलमपि प्रकृष्टगामीति यावत् । मिथो विरोधि परस्परस्पर्द्धि बलं सैन्यम् । वरूथिनी बलं सैन्यमित्यमरः । विपक्षनिर्जयाय शत्रुविजयाय न प्रभवति न शक्नोत्येव । अलमर्थयोगे च तुर्थी शत्रून्जेतुमित्यर्थः । कुतः यद्यस्मात्कारणात् भुवनानां परिभवी जेतापि । जिदृक्षीत्यादिना इनिप्रत्ययः । ऋतुगणस्तदानीं तमर्ज्जुनं क्षणमपि नोन्मनीचकार अनुन्मनसमुन्मनसम्भावनञ्चकार । अरुर्मनश्चक्षुरित्यादिना अभूततद्भावे च्विप्रत्ययः सलोपश्च । विशेषेण सामान्यसमर्थन

रूपोऽर्थान्तरन्यासः ॥ ३७ ॥ ॥

एवन्तटस्थस्योद्दीपनसामग्रीविफलेत्युक्तं सम्प्रति विपरीता जातेत्याह । श्रुतीति । सहायैस्तासां सहचरैर्गन्धर्वैः कृतमिति शेषः । नलोकेत्यादिना षष्ठीप्रतिषेधः कर्त्तरि तृतीया । श्रुतिसुखं श्रोत्रमधुरमुपवीणितं वीणया गानम् । सत्यापपाशेत्यादिना वीणाशब्दात् णिजन्तात् भावे क्तः । अविरलैर्भूयोभिर्लाञ्छनैः । पूर्वोक्तैः फलकुसुमादिभिश्चिह्नैर्हारिणो मनोहराः कालाः वसन्तादिऋतवोऽविहिताऽकृता हरिसूनोरर्जुनस्य विक्रिया मनोविकृतिर्यैस्तानि तथाभूतानि सन्ति । नपुंसकमनपुंसकेन्यादिना नपुंसकैकशेषः । त्रिदशवधूषु मनोभवं वितेनुः विस्तारयामासुः । सोयम्

श्रुतिसुखमुपवीणितं सहायैरविरललाञ्छनहारिणश्च कालाः । अ
विहितहरिसूनुविक्रियास्ते त्रिदशवधूषु मनोभवं वितेनुः ॥ ३८ ॥
न दलति निचये तथोत्पलानां न च विषमच्छदगुच्छयूथिकासु । अ
भिरतिमुपलेभिरे यथासां हरितनयावयवेषु लोचनानि ॥ ३९ ॥

म्परप्रहारार्थमुद्युक्तं सायुधं स्वात्मानमेव प्रहरतीति न्यायवज्जातमिति भावः । अत्र मुनिविक्रियार्थं स्त्रीणां विक्रियारूपानर्थोत्पत्तिकथनाद्द्वितीयो विषमालङ्कारः । तथा च सूत्रम् । विरूपकार्य्यानर्थयोरुत्पत्तिरूपसंघटनाद्विषमालङ्कार इति ॥ ३८ ॥

तटस्थवदालम्बनगुणोपि विपरीतोऽभूदिति श्लोकद्वयेनाह । नेत्यादि । आसां लोचनानि हरितनयावयवेषु यथा तथा दलति विकसति उत्पलानां निचये अभिरतिं नोपलेभिरे न प्रापुः । विषमच्छदगुच्छाः सप्तपर्णस्तवकाः यूथिका मल्लिकाश्च तासु अभिरतिं नोपलेभिरे । सप्तपर्णो विशालत्वक् शारदो विषमच्छद इत्यमरः । तथा रमणीयत्वात्तदवयवानामित्यर्थः । इति वक्रप्रीतिरुक्ता ॥ ३९ ॥ ॥

अथमनःसङ्गं सूचयति । मुनिमिति । याःस्त्रियःकमनीयतासौन्दर्य्यं सैवगुणस्ते
नमुनिमर्जुनमभिमुखतांनिनीषवोनेतुमिच्छवःसमुपययुः । तासांसमुनिरेवमद
नमुपदधेजनयामास । तथाहि । प्रयोजनानामुद्देश्यानाङ्गतिःपरिणतिःदुरधि
गमाहिदुर्ज्ञेयाखलुयतः । क्वचिद्भवतिक्वचिन्नभवतीतिभावः ॥ ४० ॥ ०*० ॥
अथासामनुरागमेवकार्य्यतःप्रपञ्चयति । प्रकृतमिति । विलासिषुविलासंनर्त्तकी
नांसम्बन्धि । शिल्पिनिष्वुन्निति ष्वुन्प्रत्ययःन्टत्तिखनिरञ्जिभ्यएवेतिनियमः । च
क्षुःकर्त्तृ । प्रकृतम्प्रक्रान्तमभिनेयमभिनेतव्यंरसभावादिकंनानुससार । तद्रूप
शान्तदानुगुण्येनैवदृष्टिप्रयोगनियमादितिभावः । तथाप्रविकसदंगुलिपाणिप

मुनिमभिमुखतांनिनीषवोयाःसमुपययुःकमनीयतागुणेन । मद
नमुपदधेसएवतासांदुरधिगमाहिगतिःप्रयोजनानाम् ॥ ४० ॥
प्रकृतमनुससारनाभिनेयम्प्रविकसदंगुलिपाणिपल्लवंवा । प्रथ
ममुपहितंविलासिचक्षुःसिततुरगेनचचालनर्त्तकीनाम् ॥ ४१ ॥

ल्लवंवानानुससार । सचदोषःयतोहस्तस्ततोदृष्टिरितिनियमादितिभावः । प
ल्लवोस्त्रीत्यमरः । वास्याद्विकल्पोपमयोरेवार्थेचसमुच्चयइतिविश्वः । किन्तु ।
प्रथमम्प्रवेशएवसिततुरगेऽर्ज्जुनएवोपहितंसन्नचचालतत्रैवलग्नन्तस्थौ । रागा
न्धानांकिञ्चित्करणीयमनुसन्धेयमवययुरितिभावः ॥ ४१ ॥ ०००००००० ॥
अभिनयेति । अभिनयोरसभावादिव्यञ्जकचेष्टाविशेषः । व्यञ्जकाभिनयौसमा
वित्यमरः । तत्रमनोयस्यास्तस्याः । व्यासंगात्भृङ्गापातमजानन्त्याइत्यर्थः । सुराङ्ग
नायाःसम्बन्धिअलक्तकवर्त्तनेनलाक्षारसरञ्जनेनाभिताम्रन्निहितंन्यस्तञ्चरणंपद
पदालीकर्त्री । धूतानवलोहितपङ्कजानांशङ्काप्रत्यग्रकोकनदभ्रमोययासाऽभिन

पातधावतिस्मअत्रषट्पदाल्याःस्त्रीचरणेपंकजभ्रमनाभिधानाद्भ्रान्तिमदलङ्का
रः। तेनचोपमाव्यज्यतेइत्यलङ्कारध्वनिः॥४२॥ ॥
अविरलमिति। नमितशिखानिनर्त्तकीपादपीडनान्नमिताग्राणिकदम्बकेसराणिरं
गपूजादत्तानीतिशेषः। अविरलंसान्द्रंयथातथाद्रुतःसरागोऽष्मणाविलीनोतस्य
वपरिषिक्तःप्रस्तुतस्तंपरितषिक्तन्नर्त्तकीनामलसेषुपदेषुपादन्यासेषुअलक्तकला
क्षारागंसवपुषम्मूर्तिमन्तञ्चित्तरागमुत्कण्ठाख्यायादिहिनिःसृतंमुनिविषयकंरागमि
वेत्युत्प्रेक्षा। ऊहुर्वहन्तिस्म॥४३॥ ॥

अभिनयमनसःसुराङ्गनायानिहितमलक्तकवर्त्तनाभिताम्रम्। चर
णमभिपपातषट्पदालीधृतनवलोहितपङ्कजाभिशङ्का॥४२॥
अविरलमलसेषुनर्त्तकीनान्द्रुतपरिषिक्तमलक्तकम्पदेषु। सवपु
षमिवचित्तरागमूहुर्नमितशिखानिकदम्बकेसराणि॥४३॥
नृपसुतमभितःसमन्मथायाःपरिजनगात्रतिरोहिताङ्गयष्टेः। स्फु
टमभिलषितम्बभूववध्वाःकथयतिसंवृतिरेवकामितानि॥४४॥

अथासांशृङ्गारचेष्टांकथयति। नृपेति। नृपसुतमर्जुनमभितःसम्मुखम्परिज
नस्यसखीजनस्यगात्रेणतिरोहितालज्जयास्वाकारगोपनयान्तर्हिताङ्गयष्टिर्य
स्यास्तस्याःसमन्मथायाः। वध्वाअभिलषितम्मुनिम्प्रत्यनुरागःस्फुटंबभूव। नचसं
वृतेरस्याभिव्यक्तिर्विरुद्धेतिवाच्यमित्याह। यतःसंवृतिःसम्यग्गोपनमेवकामिता
न्यनुरागान्कामयतेभावेक्तःवदतिप्रकटयतीत्यर्थः। अयमनुरागस्यस्वभावउ
क्तः। ययाचचेष्टयासंव्रीयतेसैवास्यप्रकाशिकेतिभावः॥४४॥ ॥
अभिमुनीति। अभिमुनिमुनिसमक्षेघनेनमहताजघनांशुकस्यैकदेशेसहसाद्रुते

त्रपायाःसलज्जायाः । परस्याःसम्बन्धिअवसनोरुनिरावरणौऊरूयस्मिन्तच्च
कितम्भयसंभ्रमःआश्चर्य्यं । प्रतियुवतीरपिसपत्नीरपिविस्मयंनिनाय । किमुता
न्यजनमित्यपिशब्दार्थः । नतंमुनिमित्याशयः ॥ ४५ ॥ ॥
धृतेति । अपरास्त्रीस्मराभितापाद्धेतोःधृतानिविसान्येववलयानियेनतस्मिन् । पा
णौअधिरूंषितेचंदनादिचर्चितेपाण्डुगण्डलेखङ्गण्डस्थलेयस्यतन्मुखन्निधायारो
प्यामधुमदेमधुमदरहितेतथाप्यलसेलोचनेयस्मिन्कर्मणितद्यथातथातंस्त
पस्तुतंनिदध्यौपश्यतिस्म । निर्वर्णनन्तुनिध्यानन्दर्शनालोकनेक्षणमित्यमरः

अभिमुनिसहसाहृतेपरस्याघनमरुताजघनांशुकैकदेशे । च
कितमवसनोरुसत्रपायाःप्रतियुवतीरपिविस्मयन्निनाय ॥ ४५ ॥
धृतविसवलयेविधायपाणौमुखमधिरूंषितपाण्डुगण्डलेखम् । न्त
पस्तुतमपरास्मराभितापादमधुमदालसलोचनन्निदध्यौ ॥ ४६ ॥
सखिदयितमिहानयेतिसामाम्प्रहितवतीकुसुमेषुणाभितप्ता । हृ
दयमहृदयाननामपूर्वम्भवदुपकण्ठमुपागतंविवेद ॥ ४७ ॥

॥ ४६ ॥ ॥
अथपञ्चभिर्मुनिम्प्रतिदूतीवाक्यमाह । सखीति । कुसुमेषुणाकामेनाभितप्ता
पीडितासानायिका । हेसखिदयितंमुनिमिहानयेतिमाम्प्रहितवतीभवदन्तिक
म्प्रेषितवती । किन्तुअविमृश्यकारिणीयमित्याह । हृदयमिति । अहृदयाअम
नस्कातस्यत्वद्गतत्वादितिभावः । अतएवसापूर्वंप्रागेवभवदुपकण्ठन्त्वत्समीपमु
पागतंहृदयम्मनोनविवेदनामसम्भावनायांअतोमत्प्रेषणंव्यर्थन्तस्यान्तरङ्ग
त्वाद्बहिरङ्गस्यदुर्वेलत्वादितिभावः । एतेनमनःसङ्गउक्तः । चक्षुःप्रीतिस्तुप्रा

गेव सर्वासामुक्तेति न पृथगुच्यते ॥ ४७ ॥ * * * * * * ॥
दूगमनःसङ्गसङ्कल्पौ जागरः कृशतारतिः । ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा
दशेति । तत्रावस्थाद्वयमभ्यधायि । संप्रति काचित्क्रमनैरपेक्षेणाह चय
ति । चिरमिति । चिरं कलितान्यपि सन्देशार्थं बुद्ध्या योजितान्यपि वचनानीति शे-
षः । परिशुष्यता मुखेनेति जागरोक्तिः परिगदितुमपारयन्त्याऽशक्नुवन्त्या तया ।
हे गतघृण अद्यापि तां नानुकम्पयसे इति भावः । तत्सखीनां मनांसि नयनयुगैः स-
ममार्द्रतां गमितानि रूपचयं गमितानीत्यर्थः । शोकवाष्पाभ्यामिति भावः । अथ
सखीशोकोक्त्या मूर्च्छावस्था सूच्यते । अथ शोकवाष्परूपकारणभेदात्प्रतियोगि

चिरमपि कलितान्यपारयन्त्या परिगदितुं परिशुष्यता मुखेन । ग-
तघृण गमितानि सत्सखीनां नयनयुगैः सममार्द्रतां मनांसि ॥ ४८ ॥
अचकमत सपल्लवां धरित्रीं मृदु सुरभिं विरहय्य पुष्पशय्याम् । भृ-
शमरतिमवाप्य तत्र चास्यास्तव सुखशीतमुपैतुमङ्कमिच्छा ॥ ४९ ॥

भेदादार्द्रत्वभेदेऽप्यभेदाध्यवसायस्तन्मूला चेयं नयनयुगैः सममिति सहोक्तिरल-
ङ्कारः ॥ ४८ ॥ ॥
अचकमतेति । मृद्वीं सुरभिं या पुष्पशय्यां विरहय्य विहाय सपल्लवां धरित्रीं अ-
चकमत । तस्यास्ततोऽपि शीतलत्वादिति भावः । कमेर्णिङन्ताल्लुङि णिश्रिद्रुस्रु-
भ्यः कर्तरि चङीति द्विर्भाव इति केचित् । तन्न अचीकमतेति प्रसङ्गात् अतो णिङभावप-
क्षे कमेश्च्लेश्चङ् वक्तव्य इति वक्तव्याच्चङिरूपमेतत् । अस्या नायिकायास्तत्र धरित्र्या-
मपि भृशमरतिं दुःखमवाप्य । सुखयतीति सुखः शीतः शीतलः सुखशीतस्तं सुखशीतन्त-
वाङ्कमुत्सङ्गमुपैतुमिच्छा वर्त्तत इति शेषः । अस्याः औत्सुक्यं कथितं अरतिजागरौ

सुव्यक्तावितिअस्याःनायिकायाःक्रमेणपुष्पशय्याद्यनेकाधारसम्बन्धकथनात्प्रथमः
पर्यायालङ्कारः। तदुक्तम्। क्रमेणैकमनेकस्मिन्नाधारेवर्ततेयदि। एकस्मिन्न
थवानेकेपर्य्यायालंकृतिर्द्विधेतिलक्षणात् ॥ ४९ ॥ * * * * ॥

तदिति। ततस्मात्कारणात्तस्याःदुःखस्यत्वाद्धेतोःहेअनघनिष्पापतनुःकृशेति
कार्श्यावस्थाकथनम्। सानायिकासकामासफलमनोरथाऽस्तु। हियस्मात्त्वमेवा
र्थःप्रयोजनंवस्तुवा। तस्मिन्त्वदर्थेनिमित्तेसतीतिशेषःत्वामुद्दिश्येत्यर्थः। परा
सुतांनिष्प्राणत्वम्पुराव्रजतिव्रजिष्यतिमरिष्यतीत्यर्थः। तथाचतेनिमित्तहत्यया
नघत्वव्याघातःस्यादितिभावः। यावत्पुरानिपातयोर्लडितिभविष्यदर्थेलट्। इ

मदनघतनुरस्तुसासकामाव्रजतिपुराहिपरासुतांत्वदर्थे। पुन
रपिसुलभन्तपोनुरागीयुवतिजनःखलुनाप्यतेऽनुरूपः ॥ ५० ॥
जहिहिकठिनतांप्रयच्छवाचन्ननुकरुणामृदुमानसंमुनीनाम्।
उपनतमवधीरयन्त्यभव्याःसनिपुणमेत्यकयाचिदेवमूचे ॥ ५१ ॥

दन्दशमावस्थाप्रदर्शनम्। नचतपोनिष्ठत्वाद्भेतव्यमित्याह। पुनरिति। पुन
रपिपश्चादपि। पुनरप्रथमेभेदइतिविश्वः। तपःसुलभंअनुरागीअनुरूपोयो
ग्यश्चयुवतिजनस्तुनाप्यतेनलभ्यतेखलु ॥ ५० ॥ * * ॥
एवंप्रलोभितस्यापिमुनेर्मौनत्वभङ्गमित्याह। जहिहीति। कठिनतांनिःस्पृहताञ्ज
हिहित्यजेत्यर्थः। जहातेश्चहावितिईकारःवाचम्प्रयच्छसम्भाषस्वेत्यर्थः। मुनी
नांमानसंमनःकरुणामृदुननुदयार्द्रंखलु। स्वान्तंहृन्मानसंमनइत्यमरः। कि
ञ्च। अभव्यानिर्भाग्याउपगतंप्राप्तंविषयमितिशेषः। अवधीरयन्तिअवमन्यन्ते
एवमुक्तप्रकारेणसोऽर्जुनःकयाचिदेत्यसमीपमागत्यनिपुणञ्चतुरंयथास्यात्तथा

 जनेन्द्रकः। अत्रपद्मस्तोक्त्यांविप्रलम्भशृङ्गारस्यानुभवनाङ्गे व्यभिचारिभावस्य
 चापुनरुक्तिः। अनौचित्येन नायिकायाः प्रवृत्तेराभासत्वमनुसन्धेयम्। तदुक्तंरुद्र
 टेन त्वचेन्नानुरागस्तिर्यङ्म्लेच्छगतोपिवा। योषितामकुलक्लिष्टेत्तुरसाभासस्तथामत
इति। तन्निबन्धनादूर्जस्वलमलंकारः। तथाचसूत्रम्। रसभेदतदाभासतत्प्र
काशमानानिबन्धनेनरसवत्प्रापकऊर्जस्वलालङ्कारइति। तत्प्रकाशमानबंधने
समाहितालङ्कारः। इतिसूत्रार्थः ॥ ५१ ॥ ○*○—○*○—○*○ ॥
सुललितेति। सुललितंसविलासंयथातथावलितेनविवर्तितेनत्रिकेणकटिभागे
न। पृष्ठवंशाधरेत्रिकमित्यमरः। अभिरामाः शिरसिजाताः। शिरसिजाः सुप्र

सुललितवलितत्रिकाभिरामाःशिरसिजसंयमनाकुलैकपाणिः। सु
रपतितनयेपरानिरासेमनसिजजैत्रशरंविलोचनार्द्धम् ॥ ५२ ॥
कुसुमितमवलंब्यचूतमुच्चैस्तनुरिभकुम्भपृथुस्तनानताङ्गी। तद
भिमुखमनङ्गचापयष्टिर्विततगुणेवसमुन्ननामकाचित् ॥ ५३ ॥

न्यञ्जनेडः। अमूर्द्धमस्तकात्स्वाङ्गादकामइत्यलुक्। उपपदमतिङितिसमा
सः एतेनमनसिजोव्याख्यातः। तेषांसंयमनेबन्धनेआकुलोव्यग्रः एकः पाणिर्यस्याः
सापरास्त्रीसुरपतितनयेऽर्जुनेजेतैवजैत्रः जेतृशब्दात्तृन्नन्तात्प्रज्ञादिभ्यश्चेत्यण्प्र
त्ययः। मनसिजस्यजैत्रःशरस्तत्तयाभूतंविलोचनस्यार्द्धमेकदेशंकटाक्षमित्य
र्थः। निरासेविससर्ज ॥ ५२ ॥ ○○○ *** ○○○ *** ○○○ *** ॥
कुसुमितमिति। इभकुम्भवत्पृथुभ्यांस्तनाभ्यामानतमङ्गंयस्याःसा। अङ्गगा
त्रकण्ठेभ्यश्चेतिङीप्। काचित्तनुः तन्वी। वोतोगुणवचनादितिविकल्पा
न्ङीप्। कुसुमितमुच्चैरुन्नतञ्चूतमवलंब्य। अतएवचूतलतायोगात्। वि

स्तुतो विस्तृतो गुणो ज्या यस्याः सा। विस्तृतं विस्तृतं ततम्। मौर्वी ज्या शिञ्जिनी गु
णा इति चामरः। अनङ्गचापयष्टिरिवाकृष्टमुक्तेति भावः। तदभिमुखं समुन्नताम
समुज्जृम्भे अङ्गभङ्गं चकारेत्यर्थः॥ ५३॥ ॥
सरभसमिति। अन्या विगलितनीवि विश्लथबन्धनमत एव विलोलं स्थानचलितन्नी
लमरक्तं नीलनीत्या अव्यक्त्यव्ययीभावप्रत्ययः। अन्तरीयं परिधानमवलंब्य हस्तेन
गृहीत्वा सरभसं सत्वरमभिपतितुं मनो यस्याः साऽपगन्तुमुद्युक्तेत्यर्थः। तथापि ससा
ध्वसेव न तु वस्तुतः ससाध्वसा किन्तु च्युतेन गलितेन रशनागुणेन संदितावद्धा सती अ
वतस्थे स्थिता। बद्धे सन्दानितं मूतमुदितं सन्दितं सितमित्यमरः। कर्मणिक्तः चुतिरख

सरभसमवलंब्य नीलमन्या विगलितनीवि विलोलमन्तरीयम्। अ
भिपतितुमनाः ससाध्वसेव च्युतरशनागुणसन्दितावतस्थे॥ ५४॥
यदि मनसि शमः किमङ्गचापं शठ विषयास्तव वल्लभा न मुक्तिः। भव
तु दिशति नान्यकामिनीभ्यस्तव हृदये हृदयेश्वरावकाशम्॥ ५५॥

तिमास्थामितीकारः॥ ५४॥ ॥
काचिद्युग्मेनाह। यदीत्यादि। तव मनसि शमः शान्तिर्यदि अस्तीति शेषः। भोऽन
ङ्गचापं किं किमर्थमित्यर्थः। किन्तु शठ त्वत्कृत तव विषयाः शब्दादयो वल्लभाः प्रि
या न तु मुक्तिः। तदेव द्रढयितुमाह। भवतु को दोष इति शेषः। यदहं रागी तर्हि
किमिति भवती न गणयामीति शंकां निवारयति। तव हृदये मनसि हृदयेश्वरी
काचित्तव प्रेयसी अन्यकामिनीभ्यः स्वागारेभ्योऽवकाशं न दिशति न प्रयच्छति।
स्वान्तरसत्त्वानासां गणयसि न तु वैराग्यात्। तदर्थमेवायं लोकः कलः प्रयास इती
त्यर्थः॥ ५५॥ ॥

इतीति । इतीत्थमसूयया मत्सरेण स्फुरन्नधरोष्ठो यस्मिन् कर्मणि तत्तदभिधाय
विधमितचक्षुषा कुटिलीकृतदृष्ट्या अगणितागुरवज्ञाचव्योदयो मनोभिमानो
लज्जा च यया तया कयाचिदसौ मुनिरुरसि स्वयं स्वहस्तेनैव श्रवणोत्पलेन जघ्ने ह
तः ॥ ५६ ॥ ॥
सविनयमिति । अपरा सविनयमनौद्धत्येन साचि तिर्यगभिसृत्य समीपङ्गत्वा स्मि
तेन मन्दहासेन सुभगाः एकस्य लसतः कपोलस्य लक्ष्मीर्यस्याः सेति । बहुवचनप
दोत्तरे बहुव्रीहिः अन्यथा कप्प्रत्यय इत्युक्तं प्राक् । श्रवणनियमितेन निरुद्धप्रसारे

इति विधमितचक्षुषाभिधाय स्फुरदधरोष्ठमसूयया कयाचित् । अ
गणितगुरुमानलज्जयासौ स्वयमुरसि श्रवणोत्पलेन जघ्ने ॥ ५६ ॥
सविनयमपराभिसृत्य साचिस्मितसुभगैकलसत्कपोललक्ष्मीः । श्र
वणनियमितेन तन्निदध्यौ सकलमिवासकलेन लोचनेन ॥ ५७ ॥
करुणमभिहितत्रपा निरस्ता तदभिमुखञ्च विमुक्तमश्रु ताभिः । प्रकु
पितमभिसारणेऽनुनेतुम्प्रियमियती ह्यबलाजनस्य भूमिः ॥ ५८ ॥

णाकर्णान्तप्रापितेन तावदायतेनेत्यर्थः । असकलेनासम्पूर्णेन कटाक्षेणेति यावत्
लोचनेन तं मुनिं धनञ्जयम् । सकलमिव समग्रप्रायं यथा तथा निदध्यौ पश्यति स्म
। कटाक्षेणैव गाढमद्राक्षीदित्यर्थः । एषु श्लोकेषु भावाभासनिबन्धनत्वादूर्ज्जस्व
स्वालङ्कारः । औत्सुक्यमत्र भावः । आभासत्वञ्चास्य विरक्ते मुनावनौचित्यादित्युक्त
म्प्रागेवेति ॥ ५७ ॥ ॥
अथ तासां मुनिविलोभनमुपसंहरति । करुणमिति । ताभिः स्त्रीभिस्तदभिमुखं
मुनिसमक्षं करुणं दीनमभिहितमुक्तं त्रपा निरस्ता त्यक्ता किञ्चाश्रु च विमुक्त

न्ततःपरं न किञ्चिद्विधेयमासीदितिभावः । कुतः हि यस्मादबलाजनस्याभिसार
णे समागमविषये प्रकुपितमनुकूलम्प्रियमनुनेतुमनुकूलयितुमियतीभूमिरियं
तावतीसीमासाधनानाम्परमावधिरितिरितिभावः । अर्थान्तरन्यासोऽलङ्कारः
॥ ५८ ॥ ॥

अथासामनुरागदार्ढ्यं गमयति । असकलेति । असकलनयनेक्षितानिनयना
र्द्धविलोकितानि लज्जा अलसङ्गतम्मन्दंगमनम्परिपाण्डुतापाण्डुरवर्णत्वं विषादः
इष्टानवाप्तिनिमित्तश्चेतोभङ्ग इत्येवंप्रकारं विविधन्नानाविचेष्टितन्नपुंसकमनपुं
सकेत्यादिना नपुंसकैकत्वन्तासुभूषामियायेतिभावप्राधान्येनयोज्यम् । तथाहि

असकलनयनेक्षितानि लज्जागतमलसम्परिपाण्डुतां विषादः । इ
ति विविधमियाय तासु भूषाम्प्रभवति मण्डयितुम्वधूरनङ्गः ॥ ५९ ॥
अलसपदमनोरमम्प्रकृत्या जितकलहंसवधूगतिप्रयातम् । स्थित
मुरुजघनस्थलातिभारादुदितपरिश्रमजिह्मितेक्षणम्वा ॥ ६० ॥

अनङ्गो वधूर्मण्डयितुम्प्रभवतिसर्वावस्थास्वितिशेषः । अतस्तासामनङ्गभूषितानां
मखिलम्भूषणमेवेतिभावः ॥ ५९ ॥ ॥

इदानीन्तासान्त्रिभिर्मुनिविलोभनप्रयासवैफल्यमाह । अलसेति । वधूनांयम्ब
न्धिप्रकृत्याऽलसैःपदैर्मनोरमं मनोज्ञम् । अतएवजिता कलहंसवधूनाङ्गतिर्येन त
तत्प्रयातङ्गमनम् । कर्मणि क्तः । तथा उरुणोऽतिविपुलस्य जघनस्थलस्यअति
भारादतिगौरवादुदितपरिश्रमेणोद्भूतश्रमेणजिह्मितेघूर्णितेईक्षणे यस्मिंस्त
त्स्थितंवास्थितिश्चसर्वं त्र वाशब्दः समुच्चये । वा समुच्चय एवार्थेऽप्युपमानविकल्पयो
रिति हेमचन्द्रः ॥ ६० ॥ ॥

भृशेति । तथा भृशेन गाढेन कुसुमशरस्य कामस्य इषोर्निपातेन यो मोहो मूर्च्छा तस्मा
द्धेतोः अनवसितार्थैः अस्फुटोच्चारणादनवधारिताभिधेयैः पदैः श्रुभितशब्दैराकुलः
सङ्कीर्णः अभिलापो वाक्यप्रयोगश्चाधिकविततेऽधिकविस्तृते लोचने यस्मिन् तत् अ
युगपत्पर्यायेणोन्नमिते भ्रुवौ यस्मिन् ह्रस्वो नपुंसकस्येति ह्रस्वः । वीक्षितं वीक्षण
ञ्च ॥ ६१ ॥

रुचिकरमिति । पूर्वोक्तं रुचिकरं स्पृहाजनकमपि । रुचिः कान्तिरुचोभासि स्त्रि
यां शोभास्पृहार्थयोरिति वैजयन्ती । स्तिमितेन स्थिरेण समाधिना तपोयोगेन अ

भृशकुसुमशरेषुपातमोहादनवसितार्थपदाकुलोऽभिलापः । अ
धिकविततलोचनं वधूनामयुगपदुन्नमितभ्रु वीक्षितं वा ॥ ६१ ॥
रुचिकरमपि नार्थवद्बभूव स्तिमितसमाधिशुचौ पृथातनूजे । ज्व
लयति महतां मनांस्यमर्षे नहि लभतेऽवसरं सुखाभिलाषः ॥ ६२ ॥
कुलकम् ॥ स्वयं संराध्यैवं शतमखमखण्डेन तपसा परोच्छित्या लभ्या
मभिलषति लक्ष्मीं हरिसुते । मनोभिः सोद्वेगैः प्रणयविहतिध्व
स्तरुचयः सगन्धर्वा धाम त्रिदशवनिताः स्वं प्रतिययुः ॥ ६३ ॥

शौ शुद्धे निर्विकारचेतसीत्यर्थः । पृथातनूजेऽर्जुने विषये अर्थवत् सप्रयोजनं न ब
भूव तथा हि । महतां धीराणां मनांसि अमर्षः क्रोधे ज्वलयति सति सुखाभिलाषो अव
सरमवकाशं न लभते किन्तु रौद्रस्य शृङ्गारविरोधित्वादिति भावः । अत्र कुलकेऽर्थान्त
रन्यासोऽलङ्कारः ॥ ६२ ॥

स्वयमिति । एवं हरिसुतेऽर्जुने स्वयमखण्डेनाविच्छिन्नेन तपसा शतमखमिन्द्रं सं
राध्य प्रीणयित्वा परोच्छित्या शत्रुवधेन लभ्यां साध्यां लक्ष्मीं राज्यलक्ष्मीं समभिलष

त्सिोद्वेगैः कार्य्यसिद्ध्यभावात्सुनिर्वेदैर्मनोभिरुपलक्षिताः । किञ्च । प्रणयविहत्याप्रार्थनाभङ्गेन ध्वस्तरुचयो नष्टकान्तयः । सगन्धर्वाः गन्धर्वैः सहिताः स्त्रिदशवनिताः स्वन्धाम स्वस्थानं प्रतिययुः । शिखरिणीवृत्तमेतत् । रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणीति लक्षणात् ॥ ६३ ॥ * ॥ इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किराताऽर्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायां दशमः सर्गः ॥ १० ॥

॥ ॥ इति महोपाध्यायश्रीभारविकृतौ किराताऽर्ज्जुनीये महाकाव्ये ऽर्ज्जुनविलोभनप्रस्थानो नाम दशमः सर्गः ॥ १० ॥ ॥

अथेति । अथाप्सरसांप्रतियानानन्तरम् । पाकोनामकश्चिद्दानवस्तंशास्तीतिपाकशासनइन्द्रः नंद्यादित्वात्ल्युप्रत्ययः । तयाअप्सरोमुखात्श्रुतयाअमर्षात्कोपान्निसर्गाच्च याजितेन्द्रियतातयाआगन्तुकानागन्तुकोभयविधहेतुकयाप्रतीतोहृष्टःसन् । ख्यातोहृष्टःप्रतीतइत्यमरः । जिष्णोरर्जुनस्य । जिष्णुःशक्रेधनञ्जयइत्यमरः । आश्रममाजगाम अमर्षेनिसर्गेयोर्जितेन्द्रियताहेतुकत्वाद्व्यधिकरणेश्लोकेस्फुटमवगम्यते॥ १॥ ॥

इन्द्रोमुनिरूपेणैवाजगामेत्याह । मुनिरूपइति । मुनेःरूपमिवरूपंयस्यसमुनिरूपोमुनिवेषधारीत्यर्थः । सइन्द्रोऽनुरूपेणदर्शनप्रदानयोग्येनेत्यर्थः । सूनु

अथामर्षान्निसर्गाच्चजितेन्द्रियतयातया । आजगामाश्रमञ्जिष्णोः
प्रतीतःपाकशासनः॥ १॥ मुनिरूपोऽनुरूपेणसूनुनाददृशेपुरः ।
द्राघीयसावयोतीतःपरिक्लान्तःकिलाध्वना ॥ २॥ जटानाङ्कीर्णयाके
शैःसंहत्यापरितःसितैः । पृक्तयेन्दुकरैरह्नःपर्यन्तइवसंध्यया ॥ ३॥

नापुत्रेणार्जुनेनददृशेदृष्टःकिम्भूतोवयोयौवनादिकमतीतोवृद्धःद्वितीयाश्रितेत्यादिनाद्वितीयासमासः । द्राघीयसाअतिदीर्घेणप्रियस्थिरेत्यादिनादीर्घशब्दस्यद्राघादेशः अध्वना अध्वगमनेनेत्यर्थः । परिक्लान्तःपरिश्रान्तः । किलइत्यलीके । किलसम्भाव्यवार्तयोः । हेत्वरुच्योरलीकेचेतिहेमचन्द्रः । वृद्धइवदूराध्वश्रान्तइवददृशेदृष्टःइत्यर्थः । इवेतिपाठेस्पष्टार्थः ॥ २॥ ॥

अथचतुर्भिरिन्द्रंविशिनष्टि । जटानामिति । परितःसितैःकेशैःकीर्णयाव्याप्तया जटानांसंहत्याउपलक्षितः । अतएवइन्दुकरैरिन्दुकिरणैःपृक्तयायुक्तयासंध्ययाउपलक्षितः । तस्यापिपरिणतरूपत्वात् वृद्धोपमानत्वञ्जटानांसंहतेरित्युक्त

त्वात्संध्यासाम्यम् ॥ ३ ॥ ॥

विशदेति । पुनश्चविशदेनपलितपाण्डुरेणभ्रूयुगेनच्छन्नेववलिनापाङ्गेनवलिमत्प्रान्तेलोचनेयस्यसस्तथोक्तः । अपाङ्गौनेत्रयोरन्तावित्यमरः । पामादित्वाल्लोमादिसूत्रेणनप्रत्ययः । प्रालेयावतत्याहिमसंहत्याम्लानपलाशानिक्लान्तदलानिअब्जानियस्मिन्सःह्रदइवस्थितः ॥ ४ ॥ ॥

आसक्तेति । पुनश्चपरिकृशैःपरिक्षीणैरप्यासक्तभरनीकाशैर्भाराक्रान्तसदृशैःसभारवदुरुभवद्भिरित्यर्थः । इकःकाश इतिदीर्घः । अङ्गैरुपलक्षितःकार्श्याल्लघून्यपिस्वाङ्गानिस्वयंवोढुमसमर्थइत्यर्थः । अतएवाद्यूनश्चौदरिकःआद्यूनः

> विशदभ्रूयुगच्छन्नवलिनापाङ्गलोचनः । प्रालेयावततिम्लानपलाशाब्जइवह्रदः ॥ ४ ॥ आसक्तभरनीकाशैरङ्गैःपरिकृशैरपि । आद्यूनःसङ्गृहिण्येवप्रायोयष्ट्यावलम्बितः ॥ ५ ॥ गूढोपिवपुषाराजन्धाम्नालोकाभिभाविना । अंशुमानिवतन्वभ्रपटलच्छन्नविग्रहः ॥ ६ ॥

स्यादौदरिकेविजिगीषाविवर्जितइत्यमरः । आङ्पूर्वाद्दीव्यतेःक्तःछ्वोःशूडनुनासिकेचेतिऊठादेशः । दिवोविजिगीषायामितिनिष्ठानत्वंसङ्गृहिण्याऽनुकूलकलत्रेणेवप्रायःप्राचुर्येणयष्ट्यावलम्बनदण्डेनावलम्बितोधारितोनतुस्वशक्त्येति भावः ॥ ५ ॥ ॥

गूढइति । वपुषागूढोपिप्रच्छन्नरूपोपीत्यर्थः । प्रकृत्यादिभ्यउपसंख्यानात्तृतीया । तन्वभ्रपटलच्छन्नविग्रहस्तोकाभ्रवृन्दान्तरितमूर्त्तिरंशुमानिवलोकाभिभाविनालोकव्यापिनाधाम्नातेजसा । धामरश्मौगृहेदेहेस्थानेजन्मप्रभावयोरितिहेमचन्द्रः । राजन्दीप्यमानोदृशइतिपूर्वेणसम्बन्धः ॥ ६ ॥ ॥

जरतीमिति । जरतीं जीर्णाम् । जीनो जीर्णो जरन्नपीत्यमरः । जीर्यतेरतीतार्थेऽतृन्प्रत्ययः उगितश्चेति ङीप् । तनुं शरीरं बिभ्राणोऽदधन्नपि अशक्तताऽलोकसामान्या कृतिर्मूर्तिर्यस्य स इन्द्रः आक्रान्ताभिभूता लक्ष्मीः शोभा येन सः आक्रान्तलक्ष्मीकः । अत्र नित्यमुरःप्रभृतिभ्यः कबिति नित्यकबाश्रयेण एकवचनोत्तरस्य लक्ष्मीशब्दस्यैकवचनान्तस्यैव नित्यमुरःप्रभृतिषु पाठाच्छेषाद्विभाषेति विकल्पात्प्रायेण बहुवचनोत्तरपदो बहुव्रीहिरिति विवेकः । आश्रमं ससाध्वसमिव चकार । तेजस्विदर्शनाद्भयम्भवतीति । तत्पुनर्दुःखजनकं तस्यामानुषत्वादिति सूचयितुमिवशब्दः ॥ ७ ॥ ॥

जरतीमपि बिभ्राणस्तनुमप्राकृताकृतिः । चकाराक्रान्तलक्ष्मीकः ससा
ध्वसमिवाश्रमम् ॥ ७ ॥ अभितस्तम्पृथासूनुः स्नेहेन परितस्तरे । अ
विज्ञातेऽपि बन्धौ हि बलात्प्रह्लादते मनः ॥ ८ ॥ आतिथेयीमथासाद्य
सुतादपचितिं हरिः । विश्रम्य विष्टरे नाम व्याजहारेति भारतीम् ॥ ९ ॥

अभित इति । पृथासूनुरर्जुनस्तमिन्द्रमभितस्तं प्रति स्नेहेन परितस्तरे । तद्गोचरेण प्रेम्णा पर्यावृतः स्तृणोतेः कर्मणि लिट् । ऋतश्च संयोगादेर्गुण इति गुणः । नन्वज्ञातसम्बन्धविशेषस्य कथं स्नेहोदय इत्यत आह । अविज्ञात इति । बन्धौ सुहृदि अविज्ञाते बन्धुरयमित्यज्ञातेऽपि बलाद्बान्धवसत्तावशादेव मनः प्रह्लादते स्निह्यतीत्यर्थः ॥ ८ ॥ ॥

आतिथेयीमिति । अथ हरिरिन्द्रः सुतादर्जुनादातिथेयीमतिथिषु साध्वीम् । पथ्यातिथिवसतिस्वपतेर्ढञ् । अपचितिम्पूजामासाद्य प्राप्य । पूजा नमस्यापचितिरित्यमरः । विष्टरे आसने ऋदोरबिति स्तृणातेरप्प्रत्ययः वृक्षासनयोर्विष्टर इति ष

त्वम्। विश्राम्यन्नामविश्रम्य किलश्रमापनयायेत्यर्थः। इतिवक्ष्यमाणप्रकारांभारतींव्याजहारउक्तवान्। व्याहारउक्तिर्लपितमित्यमरः॥ ९॥ * * * ॥

अथप्रथमंतावन्मुनिवदेनंमुमुक्षुंकृत्वाऽऽह। त्वयेति। त्वयासाधुसमारम्भिसम्यगुपक्रान्तंरभेःकर्मणिक्तः। कुतःयद्यस्मान्नवेवयसियौवनेतपश्चर्यतइतिशेषः। तथाहि। अहमिवदृश्यतेमादृशोवर्षीयानतिवृद्धोऽपि। प्रियस्थिरेत्यादिनावृद्धशब्दस्यवर्षादेशः। प्रायोविषयैर्ह्रियतेआकृष्यतेकिमुभवादृशोयवीयानितिभावः॥ १०॥ ॥

अथैवमनारम्भितस्याकारलाभोऽपिविफलःस्यादित्याशयेनाह। श्रेयसीति। त

त्वयासाधुसमारम्भिनवेवयसियत्तपः। ह्रियतेविषयैःप्रायोवर्षीयानपिमादृशः॥ १०॥ श्रेयसीतवसम्प्राप्तागुणसम्पदमाकृतिः। सुलभारम्यतालोकेदुर्लभंहिगुणार्ज्जनं॥ ११॥ शरदम्बुधरच्छायागत्वर्य्योयौवनश्रियः। आपातरम्याविषयाःपर्य्यन्तपरितापिनः॥ १२॥

वाकृतिर्मूर्त्तिः रम्येतिशेषःश्रेयसीश्रेष्ठागुणसम्पत्तपःसमारम्भरूपाप्राप्ताऽतोननिःफलेतिभावः। नचस्वाकाराद्याश्वगुणाः कियन्तोनसन्तीतिवाच्यमित्याह। लोकइति। लोकेरम्यतारम्याकारतासुलभागुणार्ज्जनंगुणसम्पादनन्दुर्लभन्त्वयितूभयंसम्पद्यतइतिभावः॥ ११॥ * * ॥

यदुक्तन्त्वयासाधुसमारम्भीतितदेवसाधुत्वंसंसारनिःसारताख्यापनाययुग्मेनोपपादयति। शरदिति। यौवनश्रियस्तावच्छरदंबुधरच्छायाइवगत्वर्य्यःचञ्चलाःगत्वरश्चेतिक्वरवन्तोनिपातःटिड्ढाणञित्यादिनाङीप्। विषयाःशब्दादयस्तुआपातरम्यास्तत्कालेमरणीयाः। तत्कालेपातआपातइतिवैजयन्ती। पर्य्यन्तेऽ

वत्मनेपरितापयन्तिदुःखंकुर्वन्तीतितथोक्ताः ॥ १२ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥
अन्तकइति। किञ्च। सन्तताअनवच्छिन्नाःआपदःक्लेशायस्यतस्यजन्मिनःप्राणि
नः। प्राणीतुचेतनोजन्मीत्यमरः। व्रीह्यादित्वादिनिः अन्तकोमृत्युःपर्य्यवस्था
तापर्य्यवसेद्धाप्रथमन्तावत्जन्मिनोदुःखमेवदुस्तरन्ततोजातस्यजीवनमपिसत
तन्दुःखसन्निभतयाविषयुक्तान्नप्रायन्तदपिमृत्युग्रस्तमितिसोयंकाकमांसंशुनोच्छि
ष्टंस्वल्पन्तदपिदुर्लभमितिन्यायादितिभावः। इत्युक्तहेतोस्त्याज्येभवेसंसारेभ
वतीतिभव्योयोग्योजनोभवादूर्ध्वंइतिशेषः। भव्यंसुखेशुभेचापिसत्येचयोग्यभा
विनोरितिविश्वः। भव्यगेयादिनाकर्त्तरियत्निपातः। मुक्तौमोक्षेउत्तिष्ठतेउद्यु
क्तोभवति। उदोनूर्द्ध्वकर्म्मणीत्यात्मनेपदम्॥ १३॥ ** ❁*❁ ** ॥

अन्तकःपर्य्यवस्थाताजन्मिनःसन्ततापदः। इतित्याज्येभवेभ
व्योमुक्तावुत्तिष्ठतेजनः॥ १३॥ चित्तवानसिकल्याणीयत्त्वांमति
रुपस्थिता। विरुद्धःकेवलंवेषःसन्देहयतिमेमनः॥ १४॥

संप्रतिप्रशंसापूर्वकंस्वाभिसन्धिन्दर्शयति। चित्तवानिति। चित्तवान्प्रशस्तचित्तो
ऽसिप्रशंसायांमतुप्। कुतोयतस्त्वांकल्याणीसाध्वीवह्वादिभ्यश्चेतिङीप्। मति
रुपस्थितासङ्गता। किन्तुकेवलमेकंयथातथाविरुद्धोवेषोमेमनःसन्देहयतिसंश
ययुक्तङ्करोति। यद्वावेषःकेवलम्वेषएवेत्यर्थः। केवलःकृत्स्नएकेचकेवलञ्चावधा
रितइत्युभयत्रापिशाश्वतः॥ १४॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥
वेषविरोधमेवाह। युयुत्सुनेति। त्वयायुयुत्सुनेवयोद्धुमिच्छुनेवयुधेःसन्नन्तादु
प्रत्ययः। किमिदङ्कवचञ्चर्मकिमामुक्तंकिमपि। तत्रकोविरोधइत्यत्राह। हियस्मा
त्तपस्विनःकेवलेएकेकवचाद्यसहचारितेइतियावत्तेचतेऽजिनवल्कलेच। निर्ष्टी

तेकेवलमितित्रिलिङ्गन्त्वेकक्कत्स्नयोरित्यमरः। वसतेश्चाच्छादयन्ति। अतस्तप
स्विनस्तेकवचधारणंविरुद्धमित्यर्थः ॥ १५ ॥ * * * * * ॥
प्रपित्सोरिति। किञ्चमुक्तिंप्रपित्सोः। प्रयन्तुम्प्राप्नुमिच्छोः। सनिमीमेत्यादिना
इसादेशः अत्रलोपोभ्यासस्येत्यभ्यासलोपः। अतोमुमुक्षुत्वादेवकलेवरेशरीरे
निःस्पृहस्यगतस्पृहस्य अतोनात्मरक्षार्थंधनुर्धारणमित्यर्थः। नापिपरहिंसार्थ
मित्याह। भूतानांजन्तूनाम्। क्ष्मादौजन्तौचभूतानीतिवैजयन्ती। क्रुधद्रु
होरुपसृष्टयोःकर्मेतिकर्मसंज्ञयाकर्तृकर्मणोःकृतीतिकर्तरिषष्ठी। अनभिद्रु
होऽहिंसकस्यसत्सूद्विषेत्यादिनाक्विप्। तेतवमहेषुधीमहानिषङ्गौभीमन्बास

युयुत्सुनेवकवचञ्चिमामुक्तमिदन्त्वया। तपस्विनोहिवसतेकेवला
जिनवल्कले ॥ १५ ॥ प्रपित्सोःकिन्तेमुक्तिन्निःस्पृहस्यकलेवरे। म
हेषुधीर्द्धनुर्भीमम्भूतानामनभिद्रुहः ॥ १६ ॥ भयङ्करःप्राणभृता
म्मृत्योर्भुजइवापरः। असिस्तवतपस्थस्यनसमर्थयतेशमम् ॥ १७ ॥

जनकन्धनुश्चनसमर्थयतेशममित्युत्तरेणान्वयः। समर्थयेतइतिवचनविपरि
णामःकार्यः ॥ १६ ॥ * * * * * * * ॥
भयङ्करइति। तथामृत्योरपरोभुजइवप्राणभृतांप्राणिनाम्भयङ्करोतीतिभयङ्करः
मेघर्तिभयेषुकृञितिखच्प्रत्ययः अरुर्द्विषेत्यादिनामुमागमःअसिःखड्गःतपसिति
ष्ठतीतितपस्थस्तपश्चरतीत्यर्थः। सुपिस्थइतिकप्रत्ययःतस्यतवशमंशान्तिंनसम
र्थयतेनसम्भावयतिकिंशान्तस्यशस्त्रेणेतिभावः ॥ १७ ॥ ○ ○ ○ ○ ○ ○ ○ ॥
नन्वशान्तस्यकिन्तपसेत्याशंक्यजयार्थमित्याह। जयमिति। अत्रभवान्पूज्यइत्य
र्थः। इतरेभ्योपिदृश्यन्तइतिप्रथमार्थेप्राक्दिव्यतीयस्त्रल्प्रत्ययः। सुप्सुपेतिस

मासः । त्रिषुतत्रभवान्पूज्यस्तत्रैवात्रभवानपीतियादवः । अरतिषुविषयेष्वजयम
भिलाषुकोजयमिच्छुःलषपतेत्यादिनाउकञ्प्रत्ययः । नलोकेत्यादिनाषष्ठीप्रति
षेधःनूनमितिनिश्चयः । नूनन्तर्केपिनिश्चयेइत्यमरः । क्रोधस्यलक्ष्म्यालिङ्गमायु
धंक्व । क्षमावन्तःशान्तास्तपोधनाःक्वक्रोधशान्त्योर्विरोधात् । तत्कार्य्ययोःशस्त्र
तपसोरप्येकत्रासङ्गतेःशस्त्रिणस्तेतपोजयार्थेननुमोक्षार्थमितिनिश्चयइत्यर्थः
॥ १८ ॥ ॥

तपसोजयार्थत्वेदोषमाह । यइति । यःपुमान्निःनिश्चरांश्रेयश्रेयसंमुक्तिश्चचतु
रेत्यादिनासमासोनिपातःनिःश्रेयसंकुर्वन्तीतिनिःश्रेयसकरीःनिःश्रेयसेहेतवइत्य
र्थः । कृञोहेतुताच्छील्यानुलोम्येष्वितिहेत्वर्थेटप्रत्ययःटित्वान्ङीप् । क्रियास्त

जयमत्रभवान्नूनमरातिष्वभिलाषुकः । क्रोधलक्ष्मक्षमावन्तःक्वा
युधंक्वतपोधनाः ॥ १८ ॥ यःकरोतिवधोदर्कानिःश्रेयसकरीः
क्रियाः । ग्लानिदोषच्छिदःस्वच्छास्समूढःपङ्कयत्यपः ॥ १९ ॥

पोदानादिकर्म्माणिवधोदर्काहिंसाफलकाःकरोति । उदर्कःफलमुत्तरमित्यमरः
। अतएवमूढःसपुमान्ग्लानिरेवदोषस्तञ्छिन्दन्तीतिग्लानिदोषच्छिदःपिपासा
हारिणीःक्विप् । स्वच्छाःनिर्म्मलाअपःपङ्कयतिपङ्कवतीःकरोति । णाविष्ठवद्भा
वेविन्मतोर्लुगितिमतुपोलुक्महाफलसाधनस्यतपसस्तुच्छफलेविनियोगःस्वच्छा
म्बुनःपङ्कनिकरवत्प्रेक्षावद्भिर्गर्हितामित्यर्थः । अत्रयत्तपसोवधोदर्कीकरणन्त
न्निर्मलस्यपयसःपङ्कसङ्करीकरणमितिवाक्यार्थान्तरमारोप्यप्रतिविम्बकरणाक्षेपा
दसम्भववस्तुसम्बन्धाद्वाक्यार्थवृत्तिनिदर्शनालङ्कारः ॥ १९ ॥ ॥
नन्वर्थकामयोरपिमोक्षवत्पुरुषार्थत्वात्तपसस्तदर्थेनकोदोषस्तत्राह । मूनमिति ।

[illegible]

षस्येव गुणस्य मूलं कारणभूतौ । स्त्रीकामा धनकामाश्च किन्न कुर्वन्ति पातकमिति भावः । अर्थकामौ मास्म पुषः नोपचिनुषः स्मोत्तरे लङ् चेति लुङ् । पुषादीत्यादिनाङ्गे रङादेशः । हि यस्मात्तावर्थकामौ तत्त्वावबोधस्य तत्त्वज्ञानस्य मोक्षसाधनस्येति शेषः । दुरुच्छेदौ दुर्वारावुपप्लवौ हिंसादिप्रवर्तकत्वाद्घातकौ वतः पुरुषार्थपरिपन्थिनावेतौ न पुरुषार्थावित्यर्थः ॥ २० ॥ * ❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁ * ॥

मुक्तिप्रतिबन्धकत्वादपुरुषार्थावर्थकामावित्युक्तं तत्रार्थस्य दुःखैकनिदानत्वादप्यपुरुषार्थत्वमिति पञ्चभिः प्रपञ्चयति । अभिद्रोहेणेत्यादि । भूतानामभिद्रोहेण हिंसया गत्वरीरस्थिराः । श्रियः सम्पदोऽर्जयन् जनः उदकमस्मिन्नस्तीत्युदन्वानुद

> मूलं दोषस्य हिंसादेरर्थकामौ स्म मा पुषः । तौ हि तत्त्वावबोधस्य दुरुच्छेदावुपप्लवौ ॥ २० ॥ अभिद्रोहेण भूतानामर्जयन्गत्वरीः श्रियः । उदन्वानिव सिन्धूनामापदामेति पात्रताम् ॥ २१ ॥

धिः । उदन्वानुदधौ चेति निपातनात्साधुः । सिन्धूनां नदीनामिवापदां पात्रतां मूलत्वमेति ॥ २१ ॥ ❁*❁~❁*❁~❁*❁~❁*❁~❁*❁ ॥

आपत्पात्रतामेव व्यनक्ति । या इति । याः सम्पदः सत्सहायानां विद्यमानसाधनानामेव पुंसाङ्गम्याः प्राप्याः विपदोऽपि सत्सहायानामेव गम्यानि स्त्रीया इत्यर्थः । कृत्यानां कर्तरि चेति षष्ठी । यासु सतीषु खेदो रक्षणादिक्लेशः विपत्सु स्वत एवेति विशेषः यतो याभ्यः सम्पद्भ्यो भयमनेकार्थमूलत्वादिति भावः । विपद्भ्यस्तु स्वरूपत एवेति भावः । किं बहुना । विपदामिव तासां सम्पदां सम्बन्धो न किमस्तीति शेषः । यत्तदुःखायनं भवति सर्वं दुःखावहमेवेति भावः । यदाहुः । अर्थानामर्जने दुःखमर्जिता

नाम्नुरक्षसे । नाशेदुःखंव्ययेदुःखंधिगर्थीदुःखभाजनमितिअतोहेयइतिभावः
। अन्वयन्नदुःखायेत्युत्तरवाक्यस्ययच्छब्दसामर्थ्यात्तासाङ्किमितिपूर्ववाक्येतच्छब्दो
पादानतापेक्षनेतदेवकाव्यप्रकाशेस्पष्टम् ॥ २२ ॥ **~*०*~** ॥
दुरासदानिति । किञ्च दुरासदान्दुःप्रापान्विश्वासाज्जन्मयस्यास्तस्याः जन्मो
त्तरपदात्वाद्व्यधिकरणोबहुव्रीहिः । धृतेःसन्तोषस्यायानरीन्भूपस्ससर्वत्रत्रासानु
भवाद्विस्रम्भसुखभञ्जकानित्यर्थः । भुज्यन्तइतिभोगान्धनानिअहेयानहिषु
भवान् । इतिकुक्षिकत्वमिवस्थ्यस्यहेर्भ्भोगान् फणान् । भोगःसुखेधनेचा
हेःशरीरफणयोरपीत्युभयत्रापिविश्वः अध्यास्यअधिष्ठायआपत्विपत्नदुर्लभा

थागम्याःसन्त्यहायानांयासुखेदोमयंयतः । तासांकिंयन्नदुः
खायविपदामिवसम्पदाम् ॥ २२ ॥ दुरासदानरीनुग्रान्
धृतेर्विश्वासजन्मनः । भोगान्भोगानिवाहेयानध्यास्यापन्न
दुर्लभा ॥ २३ ॥ नान्तरज्ञाःश्रियोजातुप्रियैरासांनभूय
ते । आसक्तास्तास्वमीमूढावामशीलाहिजन्तवः ॥ २४ ॥

आशीविषमुखमिवतमेवभोगिनंपुमांसंबलादेवस्कन्दतीत्यर्थः ॥ २३ ॥ ०*० ॥
इतोपिश्रियोहेयाइत्याह । नेति । श्रियःसम्पदोजातुकदाचित् । अन्तरज्ञानी
त्यानीचविशेषाभिज्ञानभवन्ति । अतएवासाम्प्रियैर्नभूयतेनकुत्राप्यनुरज्यन्तीत्य
र्थः । नन्वयंश्रीदोषोनपुरुषदोषइतिचेत्तत्राह । मूढाअमीजनास्तास्वननुर
क्तासुश्रीष्वासक्ताःस्त्रीष्विवाननुरक्तास्वनुरागःपुंसामेवायन्दोषइत्यर्थः । किम
र्थंतर्हितास्वेवसर्वैषामासक्तिरित्यर्थान्तरंन्यस्यति । वामेति । जन्तवोवामशीलाव
क्रस्वभावाहिस्वभावस्यदुर्वारत्वादितिभावः ॥ २५ ॥ ०*०*०*०* ॥

यदुक्तंनान्तरज्ञाःश्रियइतितदेवभङ्ग्यन्तरेणाह। कइति। यत्यस्मात्। सम्प
दोऽशीलेषुदुःशीलेषुविषयेचञ्चलाअस्थिराः। नतद्विरुद्धमुच्यते। यतःचञ्चला
इति। अतस्तुतिपदेस्तुतिविषयेतत्रकोपवादःकानिन्दाकिन्तुक्षुद्राःसम्पदःसाधु
वृत्तानपिविक्षिपन्त्येवजहात्येवतदेतदासान्निन्दास्पदमित्यर्थः। तस्मादर्थेनपु
रुषार्थइतिसन्दर्भार्थः॥२५॥ ॥ ॥ ॥ ॥ ॥

ननुनार्थमहमर्थयेकिन्तुवीरधर्म्ममनुपालयन्वैरिनिर्यातनमिच्छामीत्याशंक्य
तदपिपरपीडात्मकत्वादयुक्तमितिश्लोकचतुष्टयेनाचष्टे। कृतवानिति। तत्रा
त्मदृष्टान्तेनैवपरपीडातोनिवर्त्तितव्यमित्याशयेनाह। अप्रियैरनिष्टवस्तुभिःसं

कोपवादःस्तुतिपदेयदशीलेषुचञ्चलाः। साधुवृत्तानपिक्षुद्राविक्षिप
न्त्येवसम्पदः॥२५॥ कृतवानन्यदेहेषुकर्त्ताचविधुरंमनः। अप्रि
यैरिवसंयोगोविप्रयोगःप्रियैःसह॥२६॥ शून्यमाकीर्णतामेतितु
ल्यंव्यसनमुत्सवैः। विप्रलम्भोपिलाभायसतिप्रियसमागमे॥२७॥

योगइवप्रियैरिष्टवस्तुभिःसहविप्रयोगोविरहोऽन्यदेहेषुस्वस्यैवदेहान्तरेषुअ
तीतानागतेषुइतिशेषः। मनोविधुरन्दुःखितंकृतवान्। कर्त्ताकरिष्यतिच। भ
विष्यत्येवइ। वर्त्तमानेचानुभूयतइतिशेषः। इष्टनाशोदुःखहेतुरितिसर्वस्यापि
त्रैकालिकसिद्धमितिश्लोकार्थः॥२६॥ ॥

सम्प्रतीष्टसमागमस्यसुखहेतुत्वमाह। शून्यमिति। प्रियसमागमेइष्टजनसं
योगेसतिशून्यंरिक्तमप्याकीर्णतांसम्पूर्णतामेतिसमृद्धमिवप्रतीयतइत्यर्थः। व्य
सनंविपत्अपिउत्सवैस्तुल्यम्। व्यसनंविपदिभ्रंशइत्यमरः। विप्रलम्भोवञ्च
नाप्रतारणमितियावत्सोपिलाभाय। किम्बहुना। प्रियसङ्गतस्यसर्वोवस्यास

पिसुखमेवेत्यर्थः ॥ २७ ॥ ॥
पुनर्भेदान्तरेणाप्रियवियोगस्यदुःखहेतुत्वमाह । तदेति । तदारम्याण्यपरम्याणि
अमनोहराणिभवन्ति । किम्बहुना । प्रियाअसवःप्राणाअपिशल्यंशल्यवदसह्या
भवन्तीत्यर्थः । किञ्च । तदासबन्धुःसन्नपिएकाकीअसहायएव । एकादाकिनि
श्चासहायइत्याकिनिच्प्रत्ययः । कदेत्याकांक्षायामाह । यदाइष्टेनरहितोभव
सितदासर्वमसह्यमिति ॥ २८ ॥ ॥ ॥ ॥ ॥
युक्तइति । किञ्च । युक्तोहितेनेतिशेषः । हितेनेष्टेनयुक्तःसन् । प्रमाद्यसिप्रकर्षे
णमाद्यसिहृष्यसि । हितादपेतःपरितप्यसेपरितप्तोभवसि । तपेर्दैवादिकात्,

तदारम्याण्यरम्याणिप्रियाःशल्यन्तदासवः । तदैकाकीस
बन्धुःसन्निष्टेनरहितोयदा ॥ २८ ॥ युक्तःप्रमाद्यसिहिता
दपेतःपरितप्यसे । यदिनेष्टात्मनःपीडामासञ्जिभवताज
ने ॥ २९ ॥ जन्मिनोऽस्यस्थितिंविद्वान्लक्ष्मीमिवचलाच
लाम् । भवान्मास्मवधीन्न्याय्यंन्यायाधाराहिसाधवः ॥ ३० ॥

रिलट् । सत्यमेवन्ततःकिमतआह । यदीति । पीडाआत्मनःस्वस्यनेष्टायदितर्हिभ
वताजनेपरस्मिन्नपिमासञ्जिनसंज्यताम् । सजेर्ण्यन्तात्कर्मणिलुङ् आत्मदृष्टान्ते
नपरपीडातोनिवर्तितव्यमित्यर्थः । पीडायाःपरात्मनोःसमत्वात् ॥ २९ ॥ ॥
अथदेहस्यऐश्वर्य्यस्यचाचपरपीडानकार्येत्याह । जन्मिनइति । अस्यज
न्मिनउत्पत्तिधर्म्मिकस्यशरीरिणः । व्रीह्यादित्वादिनिःस्थितिंलक्ष्मीमिवचलाच
लाञ्चञ्चलांजन्मिधर्मत्वादेवचञ्चलामनित्यामित्यर्थः । चलतेःपचाद्यच् । चलिचरि
पतिवदीनांवाद्वित्वमभ्यासस्येतिद्विर्भावोऽभ्यासस्यआगमश्चविद्वान्ज्ञातवानित्य;

र्थः । विदेः शतुर्वा वसुरिति वैकल्पिको वस्वादेशः भवान् न्यायादनपेतं न्याय्यं ।
साधुकर्म्म धर्म्मपथ्यर्थन्यायादनपेत इति यत्प्रत्ययः । मास्मवधीत मा नाशयेत्यर्थः
। स्मोत्तरे लङ् चेति लुङ् । लुङि चेति हनो वधादेशः शेषे प्रथम इति प्रथमपुरुषः
हि यस्मात् साधवो न्यायाधारा न्यायावलम्बाः बहुव्रीहिस्तत्पुरुषो वा । न्यायत्यागे सा
धुत्वमेव न स्यादिति भावः । न्यायाचारा इति पाठे न्यायमाचरन्तीति तथोक्ताः कर्म
ण्यण् ॥ ३० ॥ ॥
तर्हि किं मे कर्त्तव्यन्तत्राह । विजहीहीति । हे तपोधन रणोत्साहं रणोद्योगं लोको
त्तरेषु कार्येषु स्थेयान् प्रयत्न उत्साहस्तं विजहीहि त्यज । ई च हाविती कारः । सा
धु समीचीनं निःश्रेयसकरत्वादिति भावः । तपो मा नीनशः न नाशय । नश्यतेर्ण्य.

विजहीहि रणोत्साहं मा तपः साधु नीनशः । उच्छेदं जन्मनः क
र्त्तुमेधि शान्तस्तपोधन ॥ ३१ ॥ जीयन्तां दुर्जया देहे रिपवश्चक्षु
रादयः । जितेषु ननु लोकोऽयं तेषु कृत्स्नस्त्वया जितः ॥ ३२ ॥

न्तान्माङ्योगादाशिषि लुङ् । अडागमनिषेधश्च । किन्तु जन्मन उच्छेदं कर्त्तुं मो
क्षं साधयितुमित्यर्थः । शान्त एधि विजिगीषानिवृत्तो भवेत्यर्थः । हुझल्भ्यो हेर्धिः
घ्वसोरेद्धावभ्यासलोपश्चेत्येकार इति ॥ ३१ ॥ * ॥ * ॥ * ॥ * ॥ * ॥ * ॥
अथ सर्वथा मे विजयकण्डूरस्ति न निवर्त्तत इत्याशंक्य तद्ध्यन्तःशत्रुविजयेन विधीय
नान्तदपनोद इत्याह । जीयतामिति । दुर्ज्जयाः अजय्याः चक्षुरादयो देहे वर्त्तमा
नाः रिपवो जीयन्तां यस्मात्तेषु शत्रुषु जितेषु सत्सु त्वयाऽयं कृत्स्नो लोको जितो ननु कि
मु तान्येव शत्रवः तदन्तर्गता इत्यर्थः । जितेन्द्रियस्य इन्द्रियार्थे निस्पृहस्य निर्भरवै
राग्यानुदयाद्विजयव्यपदेशः ॥ ३२ ॥ ॥

अजितेन्द्रियस्यानिष्टमाचष्टे । परवानिति । अर्थसंसिद्धौ अभ्यवहारादिस्वार्थ साधने परवान् पराधीनः । परतन्त्रः पराधीनः परवानित्यमरः । नीचवृत्तिः कृपण वहनादिनिकृष्टकर्मा अपत्रपो निर्लज्जः अविधेयेन्द्रियोऽजितेन्द्रियः । पुमान् गौरिव बलीवर्द इव पुंसां विधेयतां तथोक्तप्रकारतां प्रेष्यतामिति यावत् । विधेयो विनयग्राही वचने स्थित आश्रव इत्यमरः । एति प्राप्नोति । उपमालङ्कारोयम् । प्रकृताप्रकृ तयोरर्थसाधर्म्यात् श्लेषे पुनः शब्दमात्रसाधर्म्यादिति ॥ ३३ ॥ ॥

न केवलं हिंसादिदोषमूलत्वाद्विषयाणां हेयत्वं किन्तु अपरमार्थकत्वादपीत्याह । श्व इति । अधुनाभवा अधुनातनी इदानीन्तनी । सायंचिरमित्यादिना ल्युप्र

परवानर्थसंसिद्धौ नीचवृत्तिरपत्रपः । अविधेयेन्द्रियः पुंसां
गौरिवैति विधेयताम् ॥ ३३ ॥ श्वस्त्वया सुखसंवित्तिः स्मर
णीयाधुनातनी । इति स्वप्नोपमान्मत्वा कामान्मागास्तद
ङ्गताम् ॥ ३४ ॥ श्रद्धेया विप्रलब्धारः प्रिया विप्रियकारिणः
। सुदुःस्त्यजास्त्यजन्तोपि कामाः कष्टा हि शत्रवः ॥ ३५ ॥

त्ययः । सुखसंवित्तिः सुखानुभवः श्वः परेह्नि त्वया स्मरणीया न त्वनुभवनीया इति हेतोः । काम्यन्त इति कामाः विषयास्तान् स्वप्नोपमान् स्वप्नतुल्यान्मत्वाऽतात्त्विकान्निश्चित्य तदङ्गतां तच्छेयत्वं कामपरतन्त्रतां मागाः न गच्छ । इणो गा लुङीति गादेशः ॥ ३४ ॥ ॥ ॥ ॥ ॥

इतोपि हेयाः कामा इत्याह । श्रद्धेया इति । श्रद्धातुमर्हाः श्रद्धेयाः विश्वसनीयाः तथा विप्रलब्धारः प्रतारका विश्वासघातका इत्यर्थः । तथा प्रीणयन्तीति प्रियाः प्रीतिजनकाः इगुपधेत्यादिना कप्रत्ययः । तथा विप्रियकारिणो दुःखजनकशीलाः । कि

च्च । त्यजन्तोपिपुरुषंविहायगच्छन्तोपिसुहृत्स्वजनाःस्वयत्नेनत्यक्तुमशक्याःकामा
विषयाःकष्टाःकुत्सिताःशत्रवोहिप्रसिद्धशत्रवःवैधर्म्यादितिभावः । अत्रग्रन्थ्यत्वा
दीनांविप्रलम्भकत्वादीनांचैकत्रविरोधोविषयस्वाभाव्येनसमाधीयतइतिविरोधा
भासोलङ्कारः । तेनचकामानाम्प्रसिद्धशत्रुवैधर्म्यव्यतिरेकेणव्यज्यतइत्यलङ्का
रेणालङ्कारध्वनिः ॥ ३५ ॥ * ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥ * ॥
तर्हिकिन्तेनस्थमित्याशंक्योपसंहरन्नाह । विविक्तइति । विविक्तेविजने । विवि
क्तविजनच्छन्ननिःसलाकास्तथारहइत्यमरः । जह्नुकन्यदागङ्गयाभूयोभूयिष्ठ
म्पुनःपुनर्वा । भूयःपुनःपुनःस्यातम्भूतार्थेपुनरथ्यर्थमितिविश्वः । पाविनेसिक्ते
पावितइतिपाठेपवित्रीकृतेइत्यर्थः । अस्मिन्नगेइन्द्रकीलेत्वांमुक्तिः । पुरानिकटे

विविक्तेस्मिन्नगेभूयःप्लाविनेजह्नुकन्यया । प्रत्यासीदतिमुक्तिस्त्वा
म्पुराभामूरुदायुधः ॥ ३६ ॥ व्याहृत्यमरुताम्पत्याविविति वाचम
वस्थिते । वचःप्रश्रयगम्भीरमथोवाचकपिध्वजः ॥ ३७ ॥

। प्रत्यासीदतिसन्निहिताभविष्यतीत्यर्थः । पुरापुराणेनिकटेप्रबन्धानीतभाविष्वि
तिविश्वः । उदायुधोगृहीतशस्त्रोमाभूःशस्त्रंविमुञ्चेत्यर्थः ॥ ३६ ॥ * ० * ॥
व्याहृत्येति । मरुताम्पत्यादेवेन्द्रेइतिवाचंव्याहृत्योक्त्वाऽवस्थितेसतितूष्णींस्थितेस
तिश्वयकपिध्वजोऽर्जुनःप्रश्रयगम्भीरम्विनयमधुरम् । विनयप्रश्रयौसमावि
तियादवः । वचउवाच ॥ ३७ ॥ ० ० ० ० ० ० ० ० ० ० ० ० ० ० ॥
किमुवाचेत्यपेक्षायाञ्चतुर्भिरिन्द्रवाक्यमुपश्लोकयन्नाह । प्रसादेति । प्रासादोत्वप्र
सिद्धार्थपदत्वन्तेनरम्यं । प्रसिद्धार्थपदत्वंयत्सप्रसादोनिगद्यतइतिलक्षणात् । ओ
जस्विसमासभूयिष्ठं । ओजःसमासभूयस्त्वमितिशासनात् । गरीयोऽर्थभूयस्त्व

मर्थपरिगतंगुरुत्वंनतुशब्दाडम्बरमात्रमित्यर्थः। लाघवान्वितंविस्तरदोषरहितम्। साकांक्षमाकांक्षावत् पदकदम्बात्मकंनतुदशदाडिमादिवाक्यवदनाकांक्षितमित्यर्थः। अनुपस्कारमध्याहारदोषरहितम्। विष्वग्गतिकत्वार्थप्रतिपादकंनतुसावशेषार्थं अतएवनिराकुलंमसङ्कीर्णार्थम्॥ ३८॥ *~~~*॥

न्यायेति। पुनर्न्यायेनयुक्त्यानिर्णीतसारत्वान्निश्चितार्थत्वाद्धेतोरागमेशास्त्रेविषयेनिरपेक्षंस्वतन्त्रमिवयुक्तिदार्ढ्यादेवम्प्रतीयते। वस्तुतस्तुशास्त्रसिद्धार्थमिवेतिद्रष्टव्यार्थः। किञ्च। अन्येषाम्प्रतिवादिनामप्रकंप्यतयाअनुमानादिभिरवाध्यत्वात् अप्रत्याख्याततयाआम्नायवचनोपमंवेदवाक्यतुल्यंइव॥ ३९॥ ○○○○॥

प्रसादरम्यमोजस्विगरीयोलाघवान्वितम्। साकांक्षमनुपस्कारंविष्वंगतिनिराकुलम्॥ ३८॥ न्यायनिर्णीतसारत्वान्निरपेक्षमिवागमे। अप्रकंप्यतयान्येषामाम्नायवचनोपमम्॥ ३९॥ अलंघ्यत्वाज्जनैरन्यैःक्षुभितोदन्वदूर्जितम्। औदार्यादर्थसम्पत्तेःशान्तंचित्तमृषेरिव॥ ४०॥

अलंघ्यत्वादिति। अन्यैर्जनैरलंघ्यत्वादनुल्लङ्घनीयत्वात्। क्षुभितोदन्वदूर्जितमुद्वेलाम्भोधिगम्भीरंऔदार्यादुक्तिविशेषत्वात्। श्लाघ्यविशेषणाद्वा। तदुक्तन्दण्डिना। उत्कर्षवान्गुणःकश्चिदुक्तेयस्मिन्प्रतीयते। तदुदाराह्वयन्तेनसनाथाकाव्यपद्धतिरितिश्लाघ्यविशेषणैर्युक्तमुदारङ्कैश्चिदिष्यतइति। अथाम्यार्थत्वादितिकेचिदन्यत्रत्यागित्वादित्यर्थः। अर्थसम्पत्त्याप्रयोजनसम्पत्त्याऽन्यत्राणिमादिसिद्ध्यामुनेश्चित्तमिवशान्तंसौम्यम्॥ ४०॥ ○*○~○*○~○*○॥

इदमिति। इदमीदृग्गुणोपेतंयथोक्तगुणयुक्तम्। इदमुपपदात्दृशेःक्विप्इ

दंकिमोरीशकीतिदृशादेशः । लब्धेप्राप्तेऽवसरसाधनेकालोपाये येनतत्प्रियप्री
तिकरंवाक्यञ्चोवक्ताव्याकुर्यात्व्याहरेत्योवक्ताअनीदृगाशयः । ईदृग्विवक्षावान्न
भवतिअबुद्धिरित्यर्थस्तस्यार्थस्यवक्तुमशक्यत्वादितिभावः ॥ ४१ ॥ ***** ॥
एवमिन्द्रवाक्यमुपश्लोक्यनाहमस्योपदेशस्याधिकारीतिपरिहरति । नेति । हेता
तअमुष्ययत्नस्यतपोरूपस्यास्यमदीययोगस्यपूर्वञ्चापरञ्चपूर्वापरेएवपौर्वापर्य्यं
कारणंफलञ्च । चातुर्वर्ण्यादित्वात्स्वार्थेष्यञ्प्रत्ययः । नैतवनज्ञातःत्वयानज्ञाय
तइत्यर्थः । मतिबुद्धीत्यादिनावर्तमानेक्तः । तद्योगादेवषष्ठी । कुतःयेनकारणे
नमांमुनिभिस्तुल्यंसदृशन्धर्मंमोक्षधर्म्मंशासितुमुपदेष्टुमिच्छसि । शासिःअयंदु

इदमीदृग्गुणोपेतंलब्धावसरसाधनम् । व्याकुर्य्याद्वःप्रि
यंवाक्यंयोवक्तानेदृगाशयः ॥ ४१ ॥ नज्ञातन्तातयत्नस्य
पौर्वापर्य्यममुष्यते । शासितुंयेनमान्धर्म्मंमुनिभिस्तुल्य
मिच्छसि ॥ ४२ ॥ अविज्ञातप्रबन्धस्यवचोवाचस्पतेर
पि । व्रजत्यफलतामेवनयद्रुहइवेहितम् ॥ ४३ ॥

हादित्वात्द्विकर्मकः ॥ ४२ ॥ ॥
अथपौर्वापर्य्यमज्ञात्वाप्युपदेशेदोषमाह । अविज्ञातेति । अविज्ञातःप्रबन्धःपूर्वा
परसङ्गतिर्येनतस्यवाचस्पतेरपि । कस्कादित्वात्सः । अथवाषष्ठ्याःपतिपुत्रपृष्ठपा
रपदपयस्पोषेष्वितिसकारः । एतदेवज्ञापकात्अलुगितिकेचित् । वचउपदे
शेनयद्रुहोनीतिविरुद्धकारिणःपुरुषस्यइहितमुद्योगइवाफलतांनिष्फलत्वं
व्रजत्येवगच्छत्येवेत्यर्थः ॥ ४३ ॥ * ॥
ननुसदुपदेशस्यकुतोवैफल्यमित्याशंक्यसोप्यस्थानेप्रयुक्तश्चेदुपरक्षत्रेशालिबीज

तद्विफलएवेत्याशयेनाह। श्रेयसइति। हेतातश्रेयसोविहितार्थयोगात्प्रशस्ता
तरस्यापिअस्यतेतववचसोऽनेनोपदेशरूपस्यरात्रेर्विपर्य्ययोदिवसःस्फुटतारस्य
व्यक्ततारकस्यनभसइवभाजनम्पात्रन्नास्मिअनधिकारित्वादितिभावः। अत्राह्नोन
भसासम्बन्धसम्भवेपितारासम्बन्धासम्भवात्तद्विशिष्टनभःसम्बन्धविरोधाद्युक्तता
रकितस्यनभसोनपात्रमिति॥ ४४ ॥ ॥ ॥ ॥

कुतस्तेमोक्षोपदेशानधिकारित्वं। किञ्च। तेतपसःपौर्वापर्य्यंकथञ्ज्ञातइत्याकां
क्षायांतत्सर्व्वंस्वजात्यादिकथनपूर्वकन्निरूपयति। क्षत्रियेति। अहंक्षत्रियःक्षत्रिय
कुलेजातः। तत्रापिमहाकुलेप्रसूतःवीरसन्तानश्चेत्याह। पाण्डोस्तनयइति।
तत्रापिकौन्तेयोस्मिनमाद्रेयइत्याह। पार्थइतिपृथाकुन्तीतत्सुनःपार्थःतस्यापत्य

श्रेयसोप्यस्यतेतातवचसोनास्मिभाजनम्। नभसस्स्फुटतारस्यरात्रे
रिवविपर्य्ययः॥ ४४ ॥ क्षत्रियस्तनयःपाण्डोरहम्पार्थोधन
ञ्जयः। स्थितःप्रास्तस्यदायादैर्भ्रातुर्ज्येष्ठस्यशासने ॥ ४५ ॥

मित्यण्। अर्जुनोहम्महावीरश्चेत्याह। धनंजयइति। उत्तरकुरून्विजित्यध
नाहरणाद्धनञ्जयोस्मीतीत्यर्थः। सर्व्वमुगागमइत्युक्तंप्राक्। अथैवञ्चेत्त्वंकि
मर्थंतर्हितपस्यसिभोगार्थम्वाकिन्नतपस्यसितत्राह। स्थितइति। दायम्पैतृक
न्धनमाददतइतिदायादाःज्ञातयः। दायादौज्ञातिपुत्रयोः। विभक्तव्यम्पितृद्र
व्यंदायमाहुर्मनीषिणइतिचविश्वः। स्वामीश्वरादिसूत्रेणसोपसर्गादपिदायादे
तिकप्रत्ययान्तोनिपातनात्साधुः। तैःप्रास्तस्यराज्यान्निरस्तस्यवैरिनिर्यातनार्थिन
इत्यर्थः। ज्येष्ठस्यभ्रातुर्युधिष्ठिरस्यवृद्धशब्दादिष्ठन्प्रत्ययःवृद्धस्यचज्यादेशः।
शासनेनिदेशेस्थितस्तदाज्ञयातपस्यामीत्यर्थः। अन्यथामानहानिःसौभ्रात्रभङ्गः

पूज्यपूजाव्यतिक्रमदोषश्च स्यादिति भावः । अत एव हिंसैकरसिकस्य रागद्वेषक-
षायितचेतसः कुतो मे मोक्षाधिकार इति तात्पर्य्यार्थः । साभिप्रायविशेषणत्वात् परिकराल-
ङ्कारः ॥ ४५ ॥ ॥

यदुक्तं विरुद्धः केवलं वेष इति तत्रोत्तरमाह । कृष्णेति । द्वीपमयनं जन्मभूमिर्य्यस्य
स द्वीपायनः स एव द्वैपायनो व्यासः प्रज्ञादित्वात् स्वार्थेऽण्प्रत्ययः स एव कृष्णवर्णत्वा-
त् कृष्णद्वैपायनस्तस्यादेशादुपदेशादीदृशं विरुद्धवेषमित्यर्थः । व्रतं तपोनियमं
बिभर्म्मि धारयामि न तु स्वेच्छयेति भावः । अथोपास्यान् देवतामाह । भृशमिति । स्वा
राध्यस्य सुखमाराध्यस्य प्रादिसमासः । स्वाराधस्येति पाठे ऽपकृष्टात् खल्प्रत्ययः
। मरुत्वत इन्द्रस्य । भृशं सम्यगाराधनेयत्तः प्रयत्नवानित्यर्थः । तस्य क्षत्रियदैवत-

कृष्णद्वैपायनादेशाद्बिभर्म्मि व्रतमीदृशम् । भृशमाराधने यत्तः स्वा
राध्यस्य मरुत्वतः ॥ ४६ ॥ दुरक्षान् दीव्यता राज्ञा राज्यमात्मा व
यं वधूः । नीतानि पणतां नूनमीदृशी भवितव्यता ॥ ४७ ॥

त्वात् इति भावः ॥ ४८ ॥ ॥

ननु भवादृशभ्रातृसहायस्य महावीरस्य युधिष्ठिरस्य कथमरिपरिभवप्राप्तिरित्य
त आह । दुरक्षानिति । दुरक्षान् कपटपाशकैरित्यर्थः । दिवः कर्म चेति करणे
कर्मसंज्ञा । दीव्यता क्रीडता । आकृतेनानिवर्त्तितद्यूतादपि रणादपि इति शास्त्रा
ननुव्यसनितयेति भावः । राज्ञा युधिष्ठिरेण राज्यं राष्ट्रमात्मा स्वयं वयं चत्वारोऽनुजा
वधूर्जाया द्रौपदी च पणतां ग्लहत्वं । पणोऽक्षेषु ग्लहोऽक्षास्तु देवनापाशकाश्च ते इत्य
मरः । नीतानि पूर्वै द्यूते राज्ञाहारितमित्यर्थः । नीतानीति नपुंसकैकशेषः । नयते
र्द्विकर्मकत्वात् प्रधाने कर्म णि क्तः । ननु सर्वज्ञस्य राज्ञः कथमियमविमृष्यका...रितात्रा

ह । भवितव्यता अनर्थानामवश्यंभाविताई दृशीनूनंनिश्चितंनात्रसंशयइत्यर्थः । बुद्धिरपिभवितव्यतानुसारिण्येवनस्वतन्त्रेत्यर्थः ॥ ४७ ॥ ❀ ❀ * * * ❀ ❀ ॥

ननुतथापितवैवतेषुआसङ्गःकिन्निबन्धनोनतेषांत्वयीत्यत्राह । तेनेति । अनुजाःसहायायस्यतेनानुजयुक्तेनेत्यर्थः । तृतीययोगःसहायार्थःतेनयुधिष्ठिरेणद्रौपद्याच । मयाविनामद्विरहादित्यर्थः । आयामिनोदीर्घाःयामाःप्रहराःयासांतासु । दुःखितस्यतस्यादुःसहत्वादितिभावः । यामिनीष्वभितप्यते । भावेलट् । तेषुमदृत्तेषांमय्यासङ्गान्नवैराग्यावकाशइत्यर्थः ॥ ४८ ॥ ❀*~*❀ ॥

अथवैरनिर्यातनस्यावश्यम्भावद्योतनायचतुर्भिःपरापकृतिन्दर्शयन्परनिकारान्वर्णयति । हृतेत्यादि । अरातयःशत्रवःसभायाम्प्रसभम्बलात्कारेणहृतोत्तरीयान् । अतएवागतह्रियःसम्प्राप्तलज्जान् । नोऽस्मान्मर्मच्छिदामर्मच्छेदिनावचसानिरतक्षन् शातयन् । वस्त्रापहारवाक्पारुष्याभ्यान्तथाव्यथयामासुरित्यर्थः । तक्षणशब्दसामर्थ्याद्वचसांवास्यौपम्यंगम्यतइतिवस्तुनालङ्कारध्वनिः ॥ ४९ ॥ ❀*❀~❀*❀~❀*❀~❀*❀~❀*❀~❀*❀ ॥

अथातिदुःसहनिकारान्तरमाह । उपाधत्तेति । अन्तकोमृत्युर्गुरुसन्निधौभीष्मद्रोणादिसमक्षमेवसत्याःपतिव्रतायाःकृष्णायाःद्रौपद्याःआनयनेकेशाऽऽकर्षणेभावश्चित्ताभिप्रायंइतःपरमनेनपाण्डवाभिभवेनैतान्स्वनगरंनेष्यामीतिएवं

तेनानुजसहायेनद्रौपद्याचमयाविना । भृशमायामियामासु यामिनीष्वभितप्यते ॥ ४८ ॥

हृतोत्तरीयान्प्रसभंसभायामागतह्रियः । मर्मच्छिदानोवचसानिरतक्षन्नरातयः ॥ ४९ ॥

उपाधत्तसपत्नेषुकृष्णायागुरुसन्निधौ । भावमानयनेसत्याःकर्त्यंकारमिवान्तकः ॥ ५० ॥

भूतंसत्यंकारमिव। क्रियतेऽनेनेतिकारः। करणेघञ्। सत्यस्यकारःसत्यंकारःस
त्यापनंक्रियादौसत्यदार्ढ्यायप्रागदीयमानोमूल्यैकदेशः। क्लीबेसत्यापनंसत्यंका
रःसत्याकृतिःस्त्रियामित्यमरः। कारेसत्यागदस्येतिमुमागमः। तमिवसपत्नेषुरूपा
धत्तनिहितवान्। तेषांविनाशकालेविपरीतबुद्धिमुत्पादितवानित्यर्थः॥ ५०॥ *

किंनेयमाक्रोशन्तीसभ्यैर्वाकिंकृतमत्राह। तामिति। दुःशासनःपुरःसरोयस्यास्तान्ता
येतांदुःशासनेनसभांप्रत्याकृष्यमाणामित्यर्थः। अनुपसर्जनादितिनङीप्। तां
कृष्णाम्। सभायांसाधवःसभ्याःसभायायइतियप्रत्ययः। अभिसायार्कंदिनान्त
सूर्याभिमुखंस्थितस्येतिशेषः। सायोनाशदिनान्तयोरितिविश्वः। लक्षणेनाभि
प्रतिआभिमुख्यइत्यव्ययीभावः। महातरोःसम्बन्धिनीप्रावृत्ताछायामिव क्षणमैक्ष

> तामैक्षन्तक्षणंसभ्यादुःशासनपुरःसराम्। अभिसायार्कमावृ
> त्तांछायामिवमहातरोः॥ ५१॥ अयथार्थक्रियारम्भैःपतिभिःकि
> न्तवेक्षितैः। अरुन्धेतामितीवास्यानयनेबाष्पवारिणा॥ ५२॥

न्तनचिरंजुगुप्सितत्वात्। नापिकिञ्चिद्व्याप्रियन्तमाध्यस्थ्यभङ्गभयात् नेत्वर्कंव
देवसाक्षित्वमात्रमास्थिताइत्यर्थः। अत्राकृष्यमाणायाःकृष्णायाःआकृष्टारम्प्र
तिपराङ्मुखत्वादावृत्तच्छायौपम्यम्। तथापितान्नमुञ्चतीतिदुःशासनस्यतरुसा
म्यम्॥ ५१॥ ❀✻❀〜❀❀〜❀❀〜❀❀〜❀❀〜❀❀〜❀✻❀ ॥

अथास्यास्तात्कालिकमानर्थ्यंवर्णयति। अयथार्थेति। अयथार्थामिथ्याभूताःक्रिया
रम्भाःपतिशब्दप्रवृत्तिनिमित्तभूतकर्मोद्योगायेषांतैस्तामरक्षद्भिरित्यर्थः। तव
सम्बन्धिभिःपान्तिरक्षन्तीतिपतयोभर्तारःपातेर्डतिरित्यौणादिकोडतिप्रत्ययः। तै
रीक्षितैरवेक्षितैःकिन्नकिञ्चित्फलमस्तीत्यर्थः। इतीवेत्यंविचार्यैवेत्युत्प्रेक्षा। वा

घ्वारिणाश्वस्याःकन्यायानयनेऽरुन्धेतामावृत्ते। रुन्धेःकर्मणिलङ्। अशरणा
रणेदेव्यर्थः ॥ ५२ ॥ ॥
ननुभवद्भिःकिमर्थमसमर्थैरिवोपेक्षितंतत्राह। सोढवानिति। गुणाप्रियायस्यसगु
णप्रियः। गुणेवाप्रियोयस्येतिपरनिपातःज्यायानग्रजोयुधिष्ठिरएववृद्धशब्दादि
यसुनिज्यायादीयसइत्याकारादेशःनोस्माकमन्तेभवामन्त्यान्निकर्षंदशांसोढ
वान्ननुदयम्। किन्तुतदवरुद्धाइतिभावः। ननुशत्रूपेक्षामहानर्थकारिणीत्या
शंक्याह। सुलभेति। द्विषांविद्विषाम्भङ्गःसुलभःकालान्तरेपीतिशेषः। स
त्सुसज्जनेषुअवाच्यतानिन्द्यतादुर्लभाननुशत्रूपेक्षा। हिप्रसिद्धः। शत्रूपेक्षातो
लोकापवादएववलवान्तस्योत्पन्नस्यपुनरप्रतिविधेयत्वात्सचसमयोल्लङ्घनेस्यादे

सोढवान्नोदशामन्त्यांज्यायानेवगुणप्रियः। सुलभोहिद्विषाम्भ
ङ्गोदुर्लभासत्स्ववाच्यता ॥ ५३ ॥ स्थित्यतिक्रान्तिभीरूणिस्वच्छान्या
कुलितान्यपि। तोयानितोयराशीनांमनांसिचमनस्विनाम् ॥ ५४ ॥

वेतिभावः ॥ ५३ ॥ ॥
ननुशत्रुवधेराज्ञांकोनामापवादः। प्रत्युतकीर्तिरेवेत्याशंक्यसत्यंसएवसमयोल्ल
ङ्घनकलङ्कितकीर्त्यामहानिन्दानिदानमित्याशयेनाह। स्थितीति। तोयराशी
नांसमुद्राणान्तोयानिमनस्विनांमनांसिचसमानिभवन्ति। उभयंविशिनष्टि।
स्थित्यतिक्रान्तेर्मर्यादोल्लङ्घनाद्भीतानिभीरूणि। अतएवाकुलितानिसंक्षोभितान्य
पिस्वच्छान्यकलुषाणितत्वरन्तइत्यर्थः। मनस्वीअयंयुधिष्ठिरइतिभावः। अत्रतो
यानांसामान्यतोमनस्विनामुपहतानामेवगुणतौल्यादौपम्यस्यगम्यत्वयातुल्ययो
गितालङ्कारः। गुणश्चात्रभीरुत्वंस्वच्छताच ॥ ५४ ॥ ॥

नन्वज्ञातशत्रोःस्वजनेवैरेकिङ्कारणमित्याशंक्यासत्सौहार्दमेवेत्याह । धार्त्तराष्ट्रै
रिति । धार्त्तराष्ट्रैर्धृतराष्ट्रपुत्रैःसहप्रीतिःसौहार्दमेवास्मासुविषयेवैरमसूयत
सूतवती । सूयतेर्दैवादिकात्कर्त्तरिलङ् । ननुसौहार्दंवैरजनकञ्चेत्विप्रतिषि
द्धमत्राह । असदिति । हियस्मादसन्मैत्रीदुर्जनेनसङ्गतिःकूलस्यासन्नपात
स्यनदीतटस्यछायेवसेविताश्रितासतीदोषायानर्थायभवति । नखलुदुर्जनःसु
जनवन्मित्रद्रोहपातकम्पश्यतीतिभावः । उपमाप्राणितोयमर्थान्तरन्यासाल
ङ्कारः ॥ ५५ ॥ * * ॥ ○ ○ ○ ॥ * * * ॥ ○ ○ ○ ॥ * * * ॥ ○ ○ ॥
नन्वादावेवतेषांवृत्तमविज्ञायकथंमैत्रीकृतेत्याशंक्यकिंकुर्मोदुर्जनवृत्तंदुर्विज्ञेयमि

धार्त्तराष्ट्रैःसहप्रीतिर्वैरमस्मास्वसूयत । असन्मैत्रीहि
दोषायकूलच्छायेवसेविता ॥ ५५ ॥ अपवादादभीत
स्यसमस्यगुणदोषयोः । असद्वृत्तेरहोवृत्तंदुर्विभाव्यंवि
धेरिव ॥ ५६ ॥ ध्वंसेतहृदयंसद्यःपरिभूतस्यमेपरैः
। यद्यमर्षःप्रतीकारम्भुजालम्बन्नलम्भयेत् ॥ ५७ ॥

त्याह । अपवादादिति । अपवादाज्जनाक्रोशादभीतस्याजुगुप्समानस्येत्यर्थः ।
गुणदोषयोःसमस्यतुल्यबुद्धेःनिग्रहानुग्रहैर्गुणदोषावननुरुंधतइत्यर्थःविधा
वप्येतद्विशेषणंयोज्यम् । असद्वृत्तेर्दुराचारस्यधूर्त्तस्यवृत्तंईहितंविधेर्दैवस्यवृत्त
मिवदुर्भाव्यंविभावितुमशक्यम् । किन्तुकार्य्यैकसमधिगम्यमित्यर्थः । भवतेर्ण्यन्ता
त्कृच्छ्रार्थेखल्प्रत्ययः ॥ ५६ ॥ * ○ * ○ ○ * ○ ○ * ○ * ॥
नन्वेवंमानीकथंपरिभूतोजीवतितत्राह । ध्वंसेतेति । परैःशत्रुभिःपरिभूतस्यमे
हृदयंसद्योध्वंसेतभ्रंश्येदित्यर्थः । अमर्षःकर्त्ताप्रतीकारम्प्रतिक्रियारूपंभुजालम्बं

हस्तावलम्बनमवलम्भयेत्। नयाहृयेद्युदिहृदयेनेतिशेषः। सत्यंजीवमभिप्रतिविधित्सयानतुनिर्लज्जतयेतिभावः ॥५७॥

ननुतवैवकोयमभिमानस्तत्राह। अवधूयेति। अरिभिःअवधूयपरिभूयहरिणैर्मृगैस्तुल्यवृत्तितान्तुल्यवृत्तिजीवनत्वंवन्याहारतामित्यर्थः। नीताःप्रापिताःवयम्पत्त्रापीतिशेषःअन्योन्यस्यापिजिह्रीमोलज्जयामहे। सहवासिनांसहचारिणांकिम्पुनःप्रागेवजिह्रीमइतिकिमुवक्तव्यमित्यर्थः। क्रियायोगेसम्बन्धसामान्येषष्ठी। अत्रवयम्पत्त्रापितुल्याभिमानाएवइदंतुमदेकसाध्यङ्कर्मेतिमुनिनाखनाम्नयानुस्थीयतइतिभावः ॥५८॥

ननुतर्हिदुःखैःकनिदानमन्तःशत्रुमानमेवत्यज्यतामित्याशंक्यतत्त्यागेदोषमाह।

अवधूयारिभिर्नीताहरिणैस्तुल्यवृत्तिताम्। अन्योन्यस्यापिजिह्रीमःकिम्पुनःसहवासिनाम् ॥५८॥ शक्तिवैकल्यनम्रस्यनिःसारत्वाल्लघीयसः। जन्मिनोमानहीनस्यतृणस्यचसमागतिः ॥५९॥

शक्तीति। शक्तिवैकल्येनोत्साहादिशक्तिवैधुर्य्येणावष्टंभसामर्थ्यविरहेणचनम्रस्यविधेयभूतस्यनिःसारत्वाद्दुर्बलत्वात्स्थिरांशरहितत्वाच्च। सारोबलेस्थिरांशेचेत्यमरः। लघीयसोगौरवहीनस्यनीरसस्येत्यर्थः। मानहीनस्यजन्मिनःजन्तोः। व्रीह्यादिन्यादिनिःतृणस्यचगतिरवस्थासमेति। मानहीनस्यतृणादपिनिकृष्टत्वान्नातस्त्याज्योमानइतिभावः। श्लेषालङ्कारोयन्तदनुप्राणितेयमुपमेत्यनेकार्थदीपिकेतिव्यज्यते ॥५९॥

मानत्यागेदोषमुक्त्वातत्सद्भावेषड्भिर्गुणमाह। अलंघ्यमिति। महीभृतांपर्वतानांसम्बन्धियदुन्नतशृङ्गादिकमुच्चैरुन्नतन्तन्तदलंघ्यमुद्वीक्ष्योत्प्रेक्ष्यतर्कयित्वेतियावत्। म

द्भृतांमहतांमानान्तुङ्गतामानोन्नत्यंज्यायसीम्प्रियतामपिप्रियत्वंकेनहेतुनामागात्न

केनापिप्रियत्वंगच्छत्वित्यर्थः। किन्तुतुङ्गत्वेनेत्यर्थः आशिषिमाङिलुङ् अट् अपवादः

एवमनिच्छतोपिइच्छामुत्पादयत्यौषधवदित्यर्थः। उदयंवान्धवदस्मिन्नर्थइ

तितदाशंसायोगान्नार्थमाशीःप्रयोगः। उद्वीक्ष्येत्यसमानकर्तृत्वनिर्देशःक्वचित्प्रयो

गदर्शनात्सोढव्यः। केचिदुद्वीक्ष्यमितिपठन्ति। यद्यदुच्चैस्तदलंघ्यमुद्वीक्ष्यमवलो

कनीयंनचेल्लङ्घनीयमिति। अतोमहतामित्यादियोजयन्ति॥ ६०॥ * * ॥

तावदिति। किञ्च। तावदेवासौलक्ष्म्या आश्रीयतेतावदस्यपुंसोयशःस्थिरन्ता

वदेवासौपुरुषःपुरुषत्वेनगण्यतइत्यर्थः। यावन्मानादभिमानान्नहीयतेनभ्रंश्य

अलंघ्यन्तत्तदुद्वीक्ष्ययद्यदुच्चैर्महीभृताम्। प्रियतांज्याय

सीमागान्महतांकेनतुङ्गता॥ ६०॥ तावदाश्रीयतेल

क्ष्म्यातावदस्यस्थिरंयशः। पुरुषस्तावदेवासौयावन्माना

न्नहीयते॥ ६१॥ सपुमानर्थवज्जन्मायस्यनाम्निपुरःस्थि

ते। नान्यामंगुलिमभ्येतिसंख्यायामुद्यताङ्गुलिः॥ ६२॥

ति। मानहीनस्यनकिञ्चिच्छुभमस्तीत्यर्थः॥ ६१॥ * ॥ * ॥ * ॥ * ॥ * ॥

सइति। सपुमानर्थवज्जन्मासार्थकजन्मायस्यपुंसोनाम्निपुरोग्रेस्थितेसतिसंख्या

याम्पुरुषगणनाप्रस्तावेउद्यता। गुणमधिकृत्योन्नमिताऽङ्गुलिरन्यांद्वितीयाम

ङ्गुलिमुद्यतामितिशेषः। नाभ्येतिनप्राप्नोति। अद्वितीयत्वादस्येत्यर्थः। एतन्मा

नरहितस्यनसम्भवतीतिभावः॥ ६२॥ * * * * * * ॥

दुरासदेति। दुरासदैर्वनैर्ज्यायान्प्रवृद्धःतथातुङ्गोपिभूधरोगम्योगन्तुंशक्यएव

प्रसिद्धस्तैनदितिभावः। महौजस्कम्प्रतापसम्पन्नंमानप्रांशुम्मानेनोन्नतम्पुरुष

र्मितिशेषः । अलंघ्यतानजहातिनकदाचिन्मानोलङ्घयितुंशक्यतइत्यर्थः । गि
रेरपिगरीयान्मानाधिकइतिभावः । अत्रोपमानाद्भूधरादुपमेयस्यमानिनोधर्म्मा
न्तरसाम्येप्यलंघ्यत्वेनाधिक्यकथनाद्व्यतिरेकालङ्कारः ॥ ६३ ॥ ❀❀ ॥
गुरूनिति । येनशवंश्यानन्वयेभवान् । गुरून्कुर्वन्तिप्रथयन्तिस्वनाम्नाव्यपदे
शयन्ति । रघुदिलीपादिवदित्यर्थः । तैर्नरैर्वसूनिधनानिधरतीतिवसुन्धरात्वं
ज्ञायांभृतृवृजीत्यादिनाखच्प्रत्ययेखचिह्रस्वइतिह्रस्वः । अन्वर्थाअनुगार्था । ते
षांवसुभूतानान्धारणादितिभावः । येषांशुभ्राणियशांसिइन्दुमण्डलंह्रेपयन्ति
निःकलङ्कत्वादितिभावः । ईदृशंहियशोमानमहतएवसम्भवतीतितात्पर्यार्थः

दुरासदवनज्यायान्गम्यस्तुङ्गोपिभूधरः । नजहातिमहौ
जस्कंमानप्रांशुमलंघ्यता ॥ ६३ ॥ गुरून्कुर्वन्तितेवंश्या
नन्वर्थातैर्वसुन्धरा । येषांयशांसिशुभ्राणिह्रेपयन्तीन्दुम
ण्डलम् ॥ ६४ ॥ उदाहरणमाशीःषुप्रथमेतेमनस्वि
नाम् । शुष्केऽशनिरिवामर्षोयैररातिषुपात्यते ॥ ६५ ॥

। ह्रीधातोर्ण्यन्ताल्लट् । अर्तिह्रीत्यादिनापुगागमः । अत्रह्रेपणस्यसादृश्यप
र्यवसानादुपमालङ्कारः ॥ ६४ ॥ * * * * * * * * * * * ॥
उदाहरणमिति । यैरमर्षःक्रोधःशुष्केनीरसेऽशनिरिवारातिषुपात्यतेप्रक्षिप्य
ते । मनस्विनांमानिनांप्रथमेऽग्रेसरास्तेआशीःषुविजयस्तेत्याद्याशीर्वादेषुउदा
हरणंनिदर्शनम्भवतीतिशेषः । रामादिवदुपमानंभवतीत्यर्थः । अतोनत्याज्यो
मानइतिसन्दर्भार्थः ॥ ६५ ॥ * * * * * * * * * * * * * * ॥
यदुक्तं । अभिद्रोहेणभूतानामित्यादितत्त्रयुग्मेनोत्तरमाह । नेत्यादि । उद्व

त्वद्वीचिरिवचञ्चलंसमुद्रतरङ्गमिवास्थिरंसुखंकामंनप्रार्थयेनेच्छामि । तथाच
ञ्चलमर्थञ्चनप्रार्थयेकिन्त्वनित्यताविनाशितासैवाशनिस्तस्यास्त्रस्यन्बिभ्यन्वाभ्रा
शेत्यादिनाश्यन्प्रत्ययः । विविक्तंनिर्बाधंब्रह्मणोवेधसआत्मनःपदन्तदितिपदंस्था
नमैक्यलक्षणंमुक्तिञ्चनप्रार्थये । एतेनयदुक्तमुच्छेदञ्जन्मनःकर्त्तुमित्यादिनातत्
समाहितम् ॥ ६६ ॥ * ॥
प्रमार्ष्टुमिति । किन्तुछद्मनाकपटेनकृतंशत्रुभिरितिशेषः । अयशएवपङ्कमि
तिरूपकालङ्कारः । वैधव्येनतापितानांदुःखीकृतानामरातिवनितानांलोचनाम्बु
भिःप्रमार्ष्टुंक्षालयितुमिच्छेयमभिलषेयम् । इषिधातोर्लिङिरूपं । वैरिनि

नसुखंप्रार्थयेनार्थमुदन्वद्वीचिचञ्चलम् । नानित्यताश
नेस्त्रस्यन्विविक्तंब्रह्मणःपदम् ॥ ६६ ॥ प्रमार्ष्टुमयशःप
ङ्कमिच्छेयञ्छद्मनागतम् । वैधव्यतापितारातिवनितालोच
नाम्बुभिः ॥ ६७ ॥ अपहस्येयवासद्भिःप्रमादोवास्तुमेधि
यः । अस्थानविहितायासःकामञ्जिह्रेतुवाभवान् ॥ ६८ ॥

र्थेनातिरिक्तंनकिञ्चिदिच्छामीत्यर्थः ॥ ६७ ॥
एवन्तर्हियःकरोतिवधोदर्कादित्युक्तदोषःस्यादित्याशङ्कामङ्गीकृत्याग्लानिर्नदो
षायेतिन्यायमाश्रित्ययुग्मेनोत्तरमाह । अपहस्यइत्यादि । अथवासद्भिःपण्डि
तैरपहस्येऽपहसयिष्ये इत्यर्थः । वर्त्तमानसामीप्येवर्त्तमानवद्वेतिलट् । ण्यन्त
न्तुभ्रान्तपाठः मेधियःप्रमादोऽनवधानत्वंवाऽस्तु । भवानपिअस्थानेऽयोग्यविष
येविहितआयासोहितोपदेशप्रयासोयेनसतथोक्तोविकलप्रयत्नःसन्नित्यर्थःकाम
ञ्जिह्रेतुलज्जतु ॥ ६८ ॥ * ॥

वंशेति। अहन्तु विद्विषां शत्रूणां समुच्छेदेन विनाशेन करणेन वंशलक्ष्मीमनुद्धृत्य निर्वाणं मोक्षमपि जयश्रियोऽन्तरायं विघ्नं मन्ये न तु पुरुषार्थमित्यर्थः। किमुतान्यो स्वर्गादिकमिति भावः॥ ६९॥ ॥ नन्वयन्ते दुराग्रह इत्यत आह। अजन्मेति। पुरुषो यावदरिभिर्विलुप्तं संहृतं यशः इषुभिर्नादत्ते अरिवधेन न प्रत्याहरतीत्यर्थः। तावदजन्मा अजातप्राय इत्यर्थः। नन्वजातोऽपि जननानन्तरमुपयुज्यत एवेत्यरुच्या पक्षान्तरमाह। गतासुर्मृतो मृततुल्य इत्यर्थः। मृतोऽपि प्रागुपयुक्तवानित्यरुच्याह। तृणमेवेति। तत्तुल्य इत्यर्थः। अकिञ्चित्करस्य त्रैकाल्यानुपयोगात् जीवन्मृत इत्यर्थः। अतो नाहमायच्छंवशी

वंशलक्ष्मीमनुद्धृत्य समुच्छेदेन विद्विषाम्। निर्वाणमपि
मन्येहमन्तरायञ्जयश्रियः॥ ६९॥ अजन्मा पुरुषस्ता
वद्गतासुस्तृणमेव वा। यावन्नेषुभिरादत्ते विलुप्तमरिभि
र्यशः॥ ७०॥ अनिर्जयेन द्विषतां यस्यामर्षः प्रशाम्य
ति। पुरुषोक्तिः कथन्तस्मिन्ब्रूहि त्वं हि तपोधन॥ ७१॥

प्रि किन्तु वीरधर्ममनुपालयामीत्यर्थः॥ ७०॥ ॥ सर्वथा वैरिनिर्यातनं कर्तव्यमित्युक्तं तदकरणे पुरुषगुणानां हानिदोषमाह। अनिर्जयेनेति। यस्यामर्षः क्रोधो द्विषतां शत्रूणामनिर्जयेन निर्जयं विनैव प्रशाम्यति। उपलक्षणे तृतीया। तस्मिन् कथं पुरुष इत्युक्तिः पुरुषशब्दः न कथञ्चित्प्रवर्तेत इति शेषः। प्रवृत्तिनिमित्तस्य पुरुषकारस्याभावादिति भावः। हे तपोधन त्वं हि त्वमेव ब्रूहि कथय। न च ते किञ्चिदविदितमस्तीति भावः। हि हेतावऽवधारणे इत्यमरः॥ ७१॥ ॥

ननु पुरुषत्वजात्यैव पुरुषोक्तिप्रवृत्तेः किम्पुरुषकारेणेत्यत्राह । कृतमिति द्वयेन । जो[illegible]त्वं विना जातिमात्राभिधायिना पुरुषशब्देन कृतमलं न तेन किञ्चित्साध्यत इत्यर्थः । अत्र गम्यमानसाधनक्रियापेक्षया करणत्वात् तृतीयेत्युक्तम्प्राक् । कृतमिति निषेधार्थमव्ययं चादिषु पठ्यते । सत्यं जातिमात्रेऽपि पुरुषशब्दः प्रवर्तते परन्तु नासौ पुंस्त्वमाशास्यः पश्वादिसाधारण्यादिति तात्पर्यार्थः । तर्हि कीदृक् श्लाघ्य इत्याशंक्याह । य इत्यादिनार्थत्रयेण । अङ्गीकृतगुणैर्गुणपक्षपातिभिर्यः पुमान् श्लाघ्यः स्तुत्यः सन् सविस्मयं ससम्भ्रममुदाहृतः कथितः । पुंसा ईदृशेन भवितव्यमिति निदर्शितः ॥ ७२ ॥ ○○○ * ○○○ * ○○○ * ○○○ * ○○○ * ॥

कृतम्पुरुषशब्देन जातिमात्रावलम्बिना । योऽङ्गीकृतगुणैः श्ला
घ्यः सविस्मयमुदाहृतः ॥ ७२ ॥ असमानमिवौजांसि सद
सा गौरवेरितम् । नाम यस्याभिनन्दन्ति द्विषोऽपि स पुमान्पुमा
न् ॥ ७३ ॥ युग्मम् ॥ यथाप्रतिज्ञं द्विषतां युधि प्रतिचिकीर्ष
या । मामेवाध्येति नृपतिस्तृष्यन्निव जलाञ्जलिम् ॥ ७४ ॥

असमानमिति । किञ्च सदसा सभया गौरवेण ईरितं कथाप्रसंगेषु गौरवपूर्वमुच्चारितं सदोजांसि शृण्वतां तेजांसि असमानं ग्लपयदिव स्थितं यस्य पुंसो नाम द्विषोऽप्यभिनन्दन्ति अनुमोदन्ते किमुत सुहृद इति भावः । स पुमान्पुरुषत्वेन गण्यत इत्यर्थः । प्रथमः पुरुषशब्दो जातिवचनः द्वितीयो गुणवचनः स एव श्लाघ्यः । अत्र पुमान्पुमानिति तात्पर्यमात्रभेदभिन्नशब्दार्थपौनरुक्त्यलक्षणो लाटानुप्रासोऽलङ्कारः । तथा च सूत्रम् । तात्पर्यभेदयुक्तो लाटानुप्रास इति ॥ ७३ ॥ ** ~ * ~ ** ॥

ननु सन्तु भीमादयस्तत्र वैवायत्कोऽभिनिवेश इत्यत्राह । यथेति । नृपतिर्युधिष्ठिरोप

थाप्रतिज्ञंयुधिद्विषताम्प्रतिचिकीर्षयाद्विषतःप्रतिकर्त्तुमिच्छयाप्रतिज्ञानुसारेणैव
जिघांसयेत्यर्थः । तृष्यन्पिपासुर्जलाञ्जलिमिवमामेवाध्येतिकार्य्य[illegible]मेदा
यत्तत्वान्मामेवस्मरति अतोयंममाभिनिवेशइत्यर्थः ॥ अधिगर्थेतिकर्म्मणिषष्ठी
॥ ७४ ॥

ननुयुधिष्ठिरःस्वार्थंसाधयतित्वयाचस्वार्थमात्रमनुसन्धीयतामित्यत आह । स इति
। सनरोऽवदातस्यस्वच्छस्यवंशस्यशशाङ्कस्येवलाञ्छनंकलङ्कःयत्रयस्मिन्पुरुषेकृच्छ्रे
षुव्यसनेषुभर्त्तुःस्वामिनःआज्ञयाव्यर्थयाभूयते । भावेलट् । आपदिस्वार्थसाधकः
कुलघातकस्तत्कथंस्वार्थनिष्ठकार्यंयुक्तमित्यर्थः ॥ ७५ ॥
यदुक्तंविजहीहिरणोत्साहमित्यादितत्रोत्तरमाह । कथमिति । धर्मरोधिनोध

सवंशस्यावदातस्यशशाङ्कस्येवलाञ्छनम् । कृच्छ्रेषुव्यर्थयायत्र
भूयतेभर्त्तुराज्ञया ॥ ७५ ॥ कथम्वादीयतामर्वाङ्मुनिताधर्म्मरो
धिनी । आश्रमानुक्रमःपूर्वैःस्मर्य्यतेनव्यतिक्रमः ॥ ७६ ॥

र्मविरोधिनीअर्वाग्गार्हस्थ्यात्प्रागेवमुनितावानप्रस्थत्वंचतुर्थाश्रमोवावर्णप्रक्रमेणात
स्यविधानात्त्रयाणांवर्णानांवेदमधीत्यचत्वारआश्रमाइतिसूत्रकारवचनाच्चक्ष
त्रियस्यापिकैश्चिदिष्टत्वात्तथैवतत्सम्यग्विवेचितमस्माभीरघुवंशसञ्जीविन्यांस
किलाश्रममन्त्यमाश्रितइत्यत्र । कथंवादीयतां । सम्प्रश्नेलोट् । तथाहिपूर्वैर्मन्वा
दिभिराश्रमानुक्रमःस्मर्य्यते । ननुव्यतिक्रमः । ब्रह्मचारीभूत्वागृहीभवेत्गृहीभू
त्वावनीभवेत्वनीभूत्वाप्रव्रजेदितिश्रुत्यनुसारादित्यर्थः । एतदपिचत्वारआश्र
माइत्येतत्पक्षमाश्रित्योक्तम् । यदिचेद्वैराग्यंतदाब्रह्मचर्यादेवप्रव्रजेत् । गृहा
द्वनाद्वेति । व्युत्क्रमपक्षस्यापिश्रवणात् । सामान्येनविशेषसमर्थनरूपोऽर्थान्त

रन्योऽर्थः ॥ ७६ ॥ * ॥

नेतुं भवान्गृहस्थ एव तत्कथमयं वाक्मुनित्वविरोध इत्याशंक्य सत्यं गृहस्थोऽस्मि तथापि कृतानि खिलगृहस्थकर्तव्यस्यैव वानप्रस्थाधिकारो न गृहस्थमात्रस्य न चाहमद्यापि कृतकृत्य इत्युत्तरमाह। आसन्नेति। आसन्ना लग्नाऽवश्यकर्तव्या रूढा प्रसिद्धा महती धूः कर्तव्येति शेषः। इयम्पूर्वोक्ता धूर्वैरिनिर्यातनरूपा। दूरगा दूरवर्तिनी जननी च। तथा नृपोऽपि आचारवान्तपोधिक इत्यर्थः। तत्रापि ज्यायान्ज्येष्ठो नृपो युधिष्ठिरश्च मे मम स्वातन्त्र्यं स्वाच्छन्द्यं तिरस्करोति दूरीकरोति। आश्रमम्प्रतिबध्नातीत्यर्थः। तिरस्करोतीति प्रत्येकमभिसम्बध्यते। अन्यथा बहुवचनप्रसङ्गात् ॥ ७७ ॥

आसन्ना धूरियं रूढा जननी दूरगा च मे। तिरस्करोति स्वातन्त्र्यं
ज्यायांश्चाचारवान्नृपः ॥ ७७ ॥ स्वधर्ममनुरुन्धन्ते नातिक्रम
मरातिभिः। पलायन्ते कृतध्वंसा नाहवान्मानशालिनः ॥ ७८ ॥

उक्तमर्थमुपसंहरति। स्वधर्मेति। मानशालिनः स्वधर्मं क्षात्रधर्ममनुरुन्धन्ते अनुवर्तन्ते अतिक्रमं स्वधर्मातिक्रमं नानुरुन्धन्ते ततः किमत आह। अरातिभिरिति। अरातिभिः कृतध्वंसाः कृतापकाराः सन्तः आहवान्न पलायन्त अयमेव स्वधर्मानुरोध इत्यर्थः। उपसर्गस्यायतौ विनिरेफस्य लत्वं। अत्र मनुः। न निवर्तेत संग्रामात्क्षात्रधर्ममनुस्मरन्निति। अत्रोत्तरवाक्यार्थम्प्रति पूर्ववाक्यार्थस्य हेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ७८ ॥ * ॥ * ॥ * ॥

कि... नाम मायन्निश्चयः श्रूयतामित्याह। विच्छिन्नेति। विच्छिन्नं वातहतं यदभ्रन्तदिव विलीयेति विच्छिन्नाभ्रविलायं उपमाने कर्मणि चेति कर्तर्युपपदे णमुल्। नग

मूर्द्ध्न्यस्मिन्गिरिशृङ्गे विलीये विशीर्यै । वाकषादिषु यथाविध्यनुप्रयोगः । यद्वा । सहस्राक्षमाराध्याय शूर एव शल्यन्तदुद्धरे उद्धरिष्यामि न तु गन्यंतर म्यत्यर्थः । वा शब्दो विकल्पे ॥ ७९ ॥ * ॥ ० ॥ * ॥ ० ॥ * ॥ ० ॥ * ॥ ० ॥ * ॥ ० ॥

इतीति । मघवा इन्द्र इत्युक्तवन्तन्तनूजम्पुत्रमर्जुनं आविष्कृता प्रकटिता दिव्यमूर्तिर्निजरूपं येन स तथोक्तः सन् दोर्भ्यां बाहुभ्यां परिरभ्य विभूत्यै श्रेयसे उपहन्यते ऽनेनेति उपघातः । करणे घञ्प्रत्ययः । अघानान्दुःखानां उपघात भ्भवः संसारःत

विच्छिन्नाभ्रविलायं वा विलीयेन गमूर्द्धनि । आराध्य वा सहस्राक्षमयशः शल्यमुद्धरे ॥ ७९ ॥ इत्युक्तवन्तम्परिरभ्य दोर्भ्यान्तनूजमाविष्कृतदिव्यमूर्तिः । अघोपघातं मघवा विभूत्यै तस्मै भवाराधनमादिदेश ॥ ८० ॥ प्रीते पिनाकिनि मया सह लोकपालैर्लोकत्रयेऽपि विहिताप्रतिवार्य्यवीर्यः । लक्ष्मीं समुत्सुकयितासि भृशम्परेषामुच्चार्य वाचमिति तेन तिरो बभूवे ॥ ८१ ॥ ॥ ० ॥ इति महोपाध्यायश्रीभारविकृतौ किराताऽर्ज्जुनीये महाकाव्ये इन्द्रसमागमो नाम एकादशः सर्गः ॥ ११ ॥ ० ॥

स्योद्भवः कारणमिव भवेद्भवः शिवस्तस्याराधनं उपासनमादिदेश शिवमुद्दिश्य तपश्चरेत्याज्ञापयामासेत्यर्थः ॥ ८० ॥ ००००००००००००००००००००० ॥

प्रीत इति । पिनाकिनि शिवे प्रीते सति लोकपालैः सह मया लोकत्रयेऽपि विहितं अप्रतिवार्य्यमनिवार्य्यं वीर्यं यस्य स तथोक्तः सन्परेषां शत्रूणां लक्ष्मीं भृशं समुत्सुकयितासि समुत्सुकान्करिष्यसि अनुरक्तां कर्त्तासि पुनराहरिष्यसीत्यर्थः । वीरभोज्याः सम्पद इतिभावः । उत्सुकशब्दात्तत्करोतीति ण्यन्तात्कर्तरि लुट् । इति वाचमुच्चार्य तेने

न्द्रेण तिरोबभूवेऽन्तर्दधे। भावे लिट्॥ ८१॥ ॥ इति श्रीमहोपाध्यायकोला
चलमल्लिनाथसूरिविरचितायां किराताऽर्जुनीयव्याख्यायां घण्टापथसमाख्यायां
एकादशः सर्गः ॥ ११॥ ॥

अथेति। अथेन्द्रतिरोधानानन्तरं रुचिरवदनइन्द्रवाक्याकारसन्तोषात्प्रसन्न
मुखोधनञ्जयोऽर्जुनः। वासवस्यैववचनेनोपदेशेनत्रिलोचनंशिवंक्लान्तिरहितं
यथातथाअभिराधयितुम्प्रसादयितुन्तपांसिविधिवद्विध्यर्हंयथाशास्त्रमित्यर्थः।
तदर्हमितिवतिप्रत्ययः। विदधेचक्रे। अस्मिन्सर्गेउद्गतावृत्तम्। सजगादिमे
सलघुकेचनसजगुरुकेष्वथोद्गता। अथिमेभनजलागहतासजसाजौचरण
मेकतःपठेत्इतिलक्षणात्॥ १॥ ✿ ✿ ~ * ~ * ~ * ~ * ~ ✿ ॥
अभिरश्मीति। अभिरश्मिमालिअभिसूर्य्यंसूर्य्याभिमुखंभुविएकचरणंनिषीद

अथवासवस्यवचनेनरुचिरवदनस्त्रिलोचनम्। क्लान्तिर
हितमभिराधयितुंविधिवत्तपांसिविदधेधनञ्जयः॥ १॥
अभिरश्मिमालिविमलस्यधृतजपधृतेरनाशुषः। तस्यभु
विबहुतिथास्तिथयःप्रतिजग्मुरेकचरणन्निषीदतः॥ २॥
वपुरिन्द्रियोपतपनेषुसततमसुखेषुपाण्डवः। व्यापनग
पतिरिवस्थिरतांमहतींहिधैर्यमविचिन्त्यवैभवम्॥ ३॥

तःएकचरणेनतिष्ठतःविमलस्यबाह्यान्तरशुद्धिमतः। धृताजपधृतिर्जपेच्छाये
नतस्यअनाशुषोऽनश्नतः। उपेयिवाननाश्वाननूचानश्चेतिनिपातःतस्यार्जुनस्यब
हूनांपूरणाबहुतिथाः। बहुसंख्याकाइत्यर्थः। तस्यपूरणेडट्बहुपूगगणस
ङ्घस्यतिथुगितितिथुगागमः। तिथयोदिनानिप्रतिजग्मुःअत्रतिथिशब्दःपुल्लिङ्गः।
तदाह्लास्तिथयोर्द्वयोरित्यभिधानात्। अन्यथाबहुतिथाइत्यत्रटित्वात्ङीप्स्या
त्॥ २॥ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ॥
वपुरिति। पाण्डवोऽर्जुनःसततंवपुषःइन्द्रियाणाञ्चोपतपनेषुसन्तापकरेषु। क

रणे युद्द। असुखेष्वनशनादिदुःखेष्वपिनगपतिर्गिरीन्द्रइवस्थिरतान्दाढ्यंव्या
पपाप तथाहि। महतान्धैर्य्यंअविभाव्यन्दुर्वोधंवैभवंसामर्थ्यंयस्यतत्तथोक्तम्।
धीराणामकिञ्चित्करंदुःखमितिभावः॥३॥ ✿✱✱✿ ॥ ✿✱✱✿ ॥ ✿✱✱✿ ॥
नेति। तस्यार्जुनस्यमानसंमनःसन्निहितानिसमीपस्थानियानिपक्तिसुरभीणिपा
कसुगन्धीनितेषुफलेषु। तथाशुचिनिस्वच्छेशिशिरेशीतलेपयसिचनपपात। न
किञ्चिदाकांक्षतीतिभावः। प्राणधारणन्तुतस्यतपएवेत्याह। तथाहिसुकर्म्मणां
सुचरितानांशोभनन्तपःसुतपएवाऽमृतायतेअमृतवदाचरति। किन्तपस्तृप्तानां
फलाहारैरितिभावः। लोहितादिडाज्भ्यःक्यष्। वाक्यषइत्यात्मनेपदं। लोहिता

नपपातसन्निहितपक्तिसुरभिषुफलेषुमानसम्। तस्यशुचि
निशिशिरेचपयस्यमृतायतेहिसुतपःसुकर्मणाम्॥ ४॥
नविसिस्मियेनविषसादमुहुरलसतान्नचाददे। सत्त्वमु
रुधृतिरजस्तमसीनहतस्तनस्यहतशक्तिपेलवे ॥ ५ ॥

दिरक्तोनिगमः॥४॥ ✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿॥
नेति। सोऽर्जुनोनविसिस्मिये। अहोमहत्तपस्तप्तमितिनविस्मयञ्जगाम। तपः
क्षरतिविस्मयादितिस्मृतेरितिभावः। नविषसादफलविलम्बात्गतोत्साहोनबभूव
। विषादश्चेत्तपोभङ्गइतिलक्षणात्। खदिरप्रतेरितियत्वम्। मुहुरलसतान्त
पसिमन्दोद्यमत्वञ्चनागमत्। किञ्चहतशक्तीहतसारेऽतएवपेलवेभंगुरेने
हतशक्तिपेलवेरजस्तमसीगुणौउरुधृतिमहासारन्तस्यार्जुनस्यसत्त्वंसत्त्वगुणंन
[illegible]नहतवती। हन्तेर्लिटस्मेतिभूतार्थेलट्॥५॥ ✿✿✿✿✿✿✿॥
तप[illegible]ति। सोऽर्जुनस्तपसाकृशस्तथापिविजितोजगत्त्रयस्त्रिभुवनत्रयस्योदयउद्

र्थं। येन तत्तथोक्तं। किञ्च तत्त्वविदामपि लोकहितार्थत्वं जानतामपि त्रासजननमभ्
यङ्करं वपुरुवाह वहति स्म। न चैतच्चित्रमित्याह। किमिति। यन्मनस्विभिर्दुस्सु
करं तत्किमिवास्ति न किमपीत्यर्थः। इवशब्दो वाक्यालङ्कारे मनस्विनां इति पाठेऽपि
षष्ठी स्यादेव कृद्योगलक्षणायां न लोकेत्यादिना निषेधात्॥ ६॥ ******॥

ज्वलत इति। विजयी सोऽर्जुनोऽनुनिशीथमर्द्धरात्रे विभक्त्यर्थेऽव्ययीभावः। अ
र्द्धरात्रनिशीथौ द्वावित्यमरः। ज्वलतो दीप्यमानादनलादधिकरुचिस्तथाऽभ्र
संनिधेर्द्धैर्यङ्गाम्भीर्य्यं न तदेव गुणस्तमवजयत्। किञ्च। शैलतः शैलादपि समु

तपसा कृशं वपुरुवाह स विजितजगत्त्रयोदितम्। त्रासजन
नमपि तत्त्वविदां किमिवास्ति यन्न सुकरं मनस्विभिः॥ ६॥
ज्वलतोऽनलादनुनिशीथमधिकरुचिरम्भसान्निधेः। धैर्य्य
गुणमवजयन्विजयी ददृशे समुन्नततरः स शैलतः॥ ७॥
जपतः सदा जपमुपांशु वदनमभितो विसारिभिः। तस्य द
शनकिरणैः शुशुभे परिवेषभीषणमिवार्कमण्डलम्॥ ८॥

न्नततरो ददृशे। अत्र रुच्यादिभिरनलाद्याधिक्यात्संबन्धाभिधानादतिशयोक्तिर
लङ्कारः॥ ७॥ * * * ⁂ ⁂ ⁂ * * * ⁂ ⁂ ⁂ * * * ⁂ ⁂ ⁂ *॥

जपत इति। सदोपांशु रहो गूढमित्यर्थः। रहश्चोपांशु चालिङ्ग इत्यमरः। कर
णवच्छब्दमनुप्रयोगमुपांश्विति कौमारे लक्षणम्। जपत इति जपस्तं जपं मन्त्रमि
त्यर्थः। जपतः पठतस्तस्यार्जुनस्य वदनं तदभितो विसारिभिर्दशनकिरणैर्हेतु
भिः परिवेषभीषणमर्कमण्डलमिव शुशुभे। परिवेषस्तु परिधिरुपसूर्यकमण्ड
ल इत्यमरः॥ ८॥

कवचोमिति। कवचम्वर्म विभ्रत् उपवीतपदे यज्ञोपवीतस्थाने निहितं सज्जङ्कार्म्मुकं येन स तथोक्तः। सोऽर्जुनो महेन्द्रधनुषा परिवीतम्परिवेष्टितम्भीमङ्गहनं वनं यस्य स शैलपतिरिव विदिद्युते शुशुभे॥ ९॥ ◎ ◎ ◎ ◎ ◎ ◎ ◎ ◎ ◎ ◎ ◎ ◎॥

प्रविवेशेति। नियमसवनाय नियमस्नानाय। सवनन्त्वध्वरे स्नाने सोमनिर्द्दलने पिचेति विश्वः। गच्छतः कृशस्य तस्यार्जुनस्य पदैः पादन्यासैर्विनमितो हिमवान् गामभुवम्प्रविशेवेत्युत्प्रेक्षा। ननु कृशस्य कथमियद्गौरवन्तत्राह। गुणाः सारादयो गुरुतां नयन्ति प्रापयन्ति। संहतिः संघातो मूर्त्तिरिति यावत्। न नयति। अन्तःसा

कवचं स बिभ्रदुपवीतपदनिहितसज्जकार्म्मुकः। शैलपति

रिव महेन्द्रधनुःपरिवीतभीमगहनो विदिद्युते॥ ९॥

प्रविवेश गामिव कृशस्य नियमसवनाय गच्छतः। तस्य पद

विनमितो हिमवान् गुरुतान्नयन्ति हि गुणा न संहतिः॥ १०॥

परिकीर्णमुद्यतभुजस्य भुवनविवरे दुरासदम्। ज्योतिरुपरि

शिरसो विततञ्जगृहे निजान्मुनि दिवौकसाम्पथः॥ ११॥

राद्धिकं गौरवम्भवति न तु बाह्यात् स्थौल्यात्। तत्र च हेमपिण्डतूलपिण्डावेव निदर्शनमिति भावः॥ १०॥ ◎ * ◎ ◎ * ◎ ◎ * ◎ ◎ * ◎ ◎॥

परिकीर्णमिति। उद्यतभुजस्योर्द्ध्वबाहोस्तस्य शिरस उपरि। षष्ठ्यदसदर्थप्रत्ययेनेति षष्ठी। विततं विस्तृतम्भुवनयोर्विवरे द्यावापृथिव्योरन्तराले परिकीर्णं व्याप्तम्। दुरासदन्दुर्द्धर्षं ज्योतिस्तेजो मुनीनान्दिवौकसाञ्च निजान्नियतान्पथो मार्गान्तजगृहे जग्राह। प्रतिबन्धेत्यर्थः॥ ११॥ *॥ *॥ *॥ *॥ ◎॥

रजनीष्विति। वकुलसमयेकृष्णपक्षेपि रजनीषु राजतनयस्य धामभिः तेजोभिभि

भासामिरनिकरो यस्य तन्नभः शशिरश्मीनां सङ्गमेन हेतुना युजा सङ्गतया श्रि[या] । ज्यो-त्स्नातुल्यया श्रियेत्यर्थः । अत एव निदर्शनालङ्कारः । न जहे न त्यक्तम् । जहातेः कर्म-णि लिट् । ज्योत्स्नातुल्यज्योतिरित्यर्थः ॥ १२ ॥

महतेति । जिष्णोरर्जुनाज्जन्म यस्य तेन जन्मोत्तरपदत्वाद्व्यधिकरणो बहुव्री-हिः महता मयूखनिचयेन शमितरुचि हृतप्रभमंशुमालिनो वपुर्बिम्बं ह्रीतं जि-त्वा लज्जितमिवेत्युत्प्रेक्षा । वीतमले मेघनीहाराद्यावरणरहितेऽपीत्यर्थः । नभसि न विराजते स्म ॥ १३ ॥

रजनीषु राजतनयस्य बहुलसमयेऽपि धामभिः । भिन्नतिमिर-
निकरं न जहे शशिरश्मिसङ्गमयुजा नभः श्रिया ॥ १२ ॥
महता मयूखनिचयेन शमितरुचि जिष्णुजन्मना । ह्रीत-
मिव नभसि वीतमले न विराजते स्म वपुरंशुमालिनः ॥ १३ ॥
तमुदीरितारुणजटांशुमधिगुणशरासनं जनाः । रुद्रम-
नुदितललाटदृशं ददृशुर्मिमन्थिषुमिवासुरीः पुरीः ॥ १४ ॥

तमिति । उदीरिता उद्गता अरुणा जटानामंशवो यस्य तमधिगुणमधिज्यं शरास-नं यस्य तमर्जुनं जनाः सङ्घगणाः । आसुरीरसुरसम्बन्धिनीः पुरीस्त्रिपुराणि मम-थितुमिच्छुं मथेः सन्नन्तादुप्रत्ययः । तथानुदितललाटदृक् यस्य तं साक्षात्त्रिपुरवि-जयोद्यतमभालाक्षं रुद्रमिव ददृशुः । अत्राभालाक्षरुद्रस्यासम्भवात्तत्र सिद्धो-पमानासिद्धेर्नेयमुपमा किन्तूत्प्रेक्षा । सा च भालाक्षत्व्युपमानादुपमेयस्यान्यूनत्वक-थनार्थेऽन्वयव्यतिरेकेणोज्जीवितेत्यनयोरङ्गाङ्गिभावेन सङ्करः । उपमानाव्य-ज्यत इत्यलङ्कारध्वनिः ॥ १४ ॥

मरुतामिति । मरुतांपतिःस्विद्देवेन्द्रोवा । अहिमांशुरुतसूर्य्योवा । पृथुशिखःम
हाज्वालःशिखीपावकोवा । असुकरन्दुष्करन्तपस्तप्तुमुपक्रमते । अयंपुरुषोऽज
नःकश्चित्प्राकृतोनेतिसोऽर्जुनस्तापसैस्तपस्विभिः । अणवेतिमत्वर्थीयोऽण्प्रत्ययः
। अवययेऽवगतः यातेरवपूर्वात्कर्म्मणिलिट् । अत्रेन्द्रत्वादिकंधर्ममारोप्यजनत्वा
पवादात्साम्यमारोप्यापह्नवालंकारः । सामान्यलक्षणन्तुनिषिद्धविषयंसाम्यारोपो
ह्यपह्नवइतिलक्षणात् ॥ १५ ॥ ॥
नददाहेति । दूरगंव्याप्यकमित्यर्थः । हरितनयस्यइन्द्रसुतस्यार्जुनस्यधामते

मरुतांपतिःस्विदहिमांशुरुतपृथुशिखःशिखीतपः । तप्तु
मसुकरमुपक्रमतेनजनोयमित्यवययेसतापसैः ॥ १५ ॥
नददाहभूरुहवनानिहरितनयधामदूरगम् । नस्मनय
तिपरिशोषमपःसुसहम्बभूवनचसिद्धतापसैः ॥ १६ ॥
विनयगुणाइवविवेकमपनयभिदोनयाइव । न्यायमवध
यइवाशरणाःशरणंययुःशिवमथोमहर्षयः ॥ १७ ॥

जोभूरुहवनानिनददाह । अग्निवदित्यर्थः । तथाऽपःपरिशोषंननयतिस्मअर्क
वदितिभावः । तथापीतिशेषः । सिद्धाश्चतापसाश्चतैःसुसहंनबभूव । अतोऽस्यअ
लौकिकन्तेजइतिभावः । अतएवदुःसहत्वदाहाद्यजनकत्वयोर्विरोधाद्विरोधाभा
सोलङ्कारः । आभासत्वेविरोधस्यविरोधालङ्कृतिर्म्मतेतिलक्षणात् ॥ १६ ॥ ॥
विनयमिति । अथोऽनन्तरमशरणामुनयःविनयंशिक्षांगुणाआचारादयइवअशि
क्षितस्यतदभावादितिभावः । अपनयभिदन्दुर्नीतिवारकंविवेकंसदसज्ज्ञानंनयाः
नीतयइव । अविवेकिनोनीत्यभावादितिभावः । नीतिःषाड्गुण्यप्रयोगः । नीयतेऽ

नेनेतिन्यायेनियामकप्रमाणंश्रदधयःसमयाइव। अप्रामाणिकस्यसमयेऽनङ्गी
कृतत्वादितिभावः। शिवंशरणंरक्षितारं। शरणंगृहरक्षित्रोरित्यमरः। ययुःश
रणत्वेनप्रापुरित्यर्थः। अशरणंशरणमितिचोपमास्वपियथायोग्यंयोज्यम्। उ
पमालङ्कारः॥ १७ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥

परिवीतमिति। उदस्तान्निरस्तांदिनकरमयूखमण्डलंयैस्तैस्सूर्य्यतेजोविजयिभि
रित्यर्थः। अंशुभिस्तेजोभिःपरिवीतंव्याप्तंशम्भुंशिवमुपहतदृशःप्रतिहतदृष्टयस्ते
महर्षयःसहसाझटितिनिचाययितुंनिश्चेतुंद्रष्टुमित्यर्थः। चायृपूजानिशामन

परिवीतमंशुभिरुदस्तदिनकरमयूखमण्डलैः। शम्भुमु
पहतदृशःसहसानचतेनिचाययितुमभिप्रसेहिरे॥ १८ ॥
अथभूतभव्यभवदीशमभिमुखयितुंकृतस्तवाः। तत्रमह
सिददृशुःपुरुषङ्कमनीयविग्रहमयुग्मलोचनम्॥ १९ ॥
ककुदेवृषस्यकृतबाहुमकृशपरिणाहशालिनि। स्पर्शसु
खमनुभवन्तमुमाकुचयुग्ममण्डलइवार्द्रचन्दने॥ २० ॥

योरितिधातोःशकधृषेत्यादिनातुमुन्। नाभिप्रसेहिरेनशेकुः॥ १८ ॥ ❁ ❁ ॥
अथेति। अथदृगुपघातानन्तरम्भूतभव्यभवताम्भूतभविष्यद्वर्तमानानामीश
न्देवमभिमुखयितुंअभिमुखीकर्तुंकृतस्तवाःकृतस्तोत्राःसन्तःनत्वन्यथेतिभावः। स्त
वस्तोत्रंनुतिस्तुतिरित्यमरः। तत्रपूर्वोक्तेमहसितेजसिकमनीयविग्रहंरम्यमू
र्तिमयुग्मानिनेत्राणिलोचनानियस्यतम्पुरुषन्ददृशुः॥ १९ ॥ ❁ ❁ ❁ ❁ ❁ ॥
अथपञ्चभिःपुरुषंविशिनष्टि। ककुदइत्यादिना। कीदृशंपुरुषम्। अकृशेनम
हतापरिणाहेनविशालतयाशालतइतितथोक्ते। परिणाहोविशालतेत्यमरः। वृ

धस्यवृषभस्यककुदेअंसकूटेउपाश्रयेक्तनइतिश्लेषः। आर्द्रचन्दनेउमायाःकुचयु
ग्ममण्डलेइवक्ततत्राङ्गंन्यस्यसहसंसक्तएवस्पर्शसुखमनुभवन्तङ्ककुदस्य तथावि
धस्पर्शसुखवत्त्वादितिभावः। उपमालङ्कारः॥ २० ॥ * ✿ * ✿ * ✿ * ॥
स्थितमिति। उन्नतेतुहिनशैलशिरसिहिमवतःशिखरेस्थितंकाचित्कोणेस्थित
मित्यर्थः। तथात्रिभुवनातिवर्तिनासर्वलोकातिशायिनाओजसातेजसाअद्रिभिःप
र्वतैर्जलधिभिस्समुद्रैर्जलवाहपथेनाकाशेनचसहवर्ततइतितथोक्तम्। दिग्भिस्सा
हवर्ततइतिसदिक्। उभयत्रापितेनसहेतितुल्ययोगइतिबहुव्रीहिः। विश्वमश्नु

स्थितमुन्नतेतुहिनशैलशिरसिभुवनातिवर्तिना। साद्रिजल
धिजलवाहपथंसदिगश्नुवानमिवविश्वमोजसा ॥ २१ ॥
अनुजानुमध्यमवसक्तविततवपुषामहामहाहिना। लोकम
खिलमिवभूमिभृतारवितेजसामवधिनाधिवेष्टितम् ॥ २२ ॥
परिणाहिनातुहिनराशिविशदमुपवीतसूत्रताम्। नीतमुर
गमनुरञ्जयताशितिनागलेनविलसन्मरीचिना ॥ २३ ॥

वानंव्याप्नुवन्तमिवस्थितमित्युत्प्रेक्षा। अश्नूङ्व्याप्तावितिधातोःशानच् ॥ २१ ॥ *
अनुजान्विति। जानुनोर्मध्ये अनुजानुमध्यंविभक्त्यर्थेऽव्ययीभावः। अवसक्तंल
ग्नंविततमायतंवपुर्यस्यतेनमहाहिनाअवसक्तिकाबन्धभूतेनेत्यर्थः। अभिवेष्टितंअ
नस्ववरवितेजसामवधिनापर्यन्तभूतेनभूमिभृतालोकाचलेनाभिवेष्टितमखिलंलो
कमिवस्थितमित्युत्प्रेक्षा। अस्त्यर्थपरभागेलोकाचलइत्यागमः ॥ २२ ॥ * * ॥
परिणाहिनेति। पुनश्चतुहिनराशिवद्विशदंशुभ्रमुपवीतसूत्रतांयज्ञोपवीतत्वंनीतं
प्रापितमुरगंशेषाहिमनुरञ्जयतास्वगुणोपरक्तंकुर्वताश्यामीकुर्वतेत्यर्थः। परि

णाहिना विशालेन विलसन्मरीचिना प्रत्नमरकिरणेन शितिना नीलेन गरलेन कण्ठेमोपलक्षितम्। कण्ठो गलोऽथ ग्रीवायामित्यमरः। अत्रोरगस्य स्वधवलिमत्यागेन नीलिमग्रहणात्तद्गुणालङ्कारः। तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणग्रहादिति लक्षणात्॥ २३॥ * ✿ * ~ * ✿ * ~ * ✿ * ~ * ✿ * ॥

स्रुतेति। पुनश्च मालतीजातीकुसुमम्। सुमना मालती जातिः। पुष्पे जातीप्रभृतयः स्वलिंगा व्रीहयः फल इत्यमरः। तद्वत्सितं यत्कपालमेव कमुदन्तत्स्रुतं स्रस्तं येन तत्तथोक्तम्। अवरुद्धमूर्द्धजं व्याप्तशिरोरुहं। अतएव सुरसरित्पयसां शेषमिव निर्यातावशिष्टं गाङ्गमम्भ इव स्थितमित्यर्थः। उत्प्रेक्षालङ्कारः। विकाशि वि

स्रुतमालतीसितकपालकुमुदमुपरुद्धमूर्द्धजम्। शेषमिव
सुरसरित्पयसां शिरसा विकाशिशशिधाम बिभ्रतम्॥ २४॥
बहुभिश्च बाहुभिरहीनभुजगवलयैर्विराजितम्। चन्दन
तरुभिरिवालघुभिः प्रबलायतैर्मलयमेदिनीभृतम्॥ २५॥

स्त्वरं शशिधाम शिरसा बिभ्रतम्पुरुषं ददृशुरिति पूर्वेणान्वयः॥ २४॥ ** ॥

बहुभिरिति। अहीनां सर्पाणां मध्ये ये इनाः श्रेष्ठास्त एव वलयानि येषान्ते तैः सर्पाभरणैरित्यर्थः। बहुभिः अनेकैर्बाहुभिः सहस्रभुजत्वात्तस्येति भावः। विराजितं शोभितञ्चन्दनतरुभिरनेकैर्मलयमेदिनीभृतमिव स्थितम्। चन्दनतरवोऽपि अहीना महान्तो भुजङ्गास्त एव आवेष्टनं येषान्तैरिति। अलघुभिः प्रबलाश्च ते आयताश्च तैरुभयविशेषणाम्प्रबलदीर्घैरित्यर्थः। अथवा अमलायतैरमलानि निर्मलानि ते आयताश्च तैः। उपमालङ्कारः॥ २५॥ बहुटीकायामयं श्लोको नास्तीत्यतो नव्योऽयमित्यवधेयम्॥ ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ ॥

मुनय इति । ततो दर्शनानन्तरं मुनयोऽभिमुखमेत्य नयनविनिमेषेण नेत्रसंज्ञयानोदिताः प्रेरिताः सन्तः पाण्डुतनयस्यार्जुनस्य तपसा जनितन्तत्पूर्वोक्तं जगतामशर्म्म असुखं दुःखमित्यर्थः । शर्म्म शान्तिः सुखानि चेत्यमरः । भृशं सम्यक् आचचक्षिरे ॥ २६ ॥ ॥

नरस्येति । हे भुवनैकपुरुष हे पुरुषोत्तम वृत्रो वृत्रासुर इव भीमविग्रहः कोऽप्यविज्ञात इत्यर्थः । पुरुषस्तरसा बलात्कारेणैव । नरस्येव त्वरं हसीति विग्रहः । अमलवपुषः उज्ज्वलमूर्त्तेः रवेरपि ज्योतिरभिभूय तपस्यतीति तपश्चरति । कर्मणो रोमन्थ

मुनयस्ततोऽभिमुखमेत्य नयनविनिमेषनोदिताः । पाण्डुतनयत
पसा जनितं जगतामशर्म्म भृशमाचचक्षिरे ॥ २६ ॥ कुलकम् ॥
नरसैव कोऽपि भुवनैकपुरुष पुरुषस्तपस्यति । ज्योतिरम
लवपुषोऽपि रवेरभिभूय वृत्र इव भीमविग्रहः ॥ २७ ॥
सधनुर्म्महेषुधि बिभर्त्ति कवचमसितमुत्तमं जटाः । वल्कमजि
नमिति चित्रमिदं मुनिताविरोधि न च नास्य राजते ॥ २८ ॥

तपोभ्यां वर्त्तिचरोरिति क्यङ् ॥ २७ ॥ ॥

स इति । किञ्च । स पुरुषो महान्ताविषुधी यस्य तन्महेषुधि धनुः कवचञ्चर्म्मोत्तमम् असितं कृष्णं जटाः वल्कञ्चीरम् अजिनञ्चर्म्म बिभर्त्ति । इत्येवंरूपमिदं चिह्नं द्वयधारणं मुनिताविरोधि मुनित्वप्रतिबन्धकं तथापि अस्य न राजत इति न किन्तु राजत एवेत्यर्थः । चित्रमाश्चर्य्यम् । सम्भाव्यनिषेधनिवर्त्तने द्वौ प्रतिषेधाविति वामनः ॥ २८ ॥ ॥

चलन इति । किञ्च । तस्य पुंसश्चलनेऽवनिः पृथिवी चलति । तथाक्रमणे नियमे

समधिष्ठितेन्द्रियसंयमे सति । करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपीत्यमरः । प्रा
णैरसिमितैर्मरुतां वायूनां ग्रहाणां सूर्यादीनान्तारकाणान्नक्षत्रादीनाञ्च गणैर्युतं
नभस्तलं सदिङ्मुखं दिक्सहितं स्तम्भं निश्चलतामनुभवतीत्यर्थः । अतो विश्वातिश
यिनी तस्य शक्तिरुपलभ्यत इति भावः । असङ्गमित्यलङ्कारः ॥ २९ ॥ ॥
न चैतदुपेक्ष्यमित्याशयेनाह । स इति । स पुमानोजसा विजितसारं निरस्तसत्व
म् । अमरदितिजोपसंहृतं सुरासुरसहितन्तदिदं विश्वम्पुरं अपिदधाति अपि
धास्यतीत्यर्थः । शीघ्रमेव हरिष्यतीति भावः । निकटागामिके पुरेत्यमरः । या

चलनेऽवनिश्चलति तस्य करणनियमे सदिङ्मुखम् । स्तम्भ
मनुभवति शान्तमरुद्ग्रहतारकागणयुतन्नभस्तलम् ॥ २९ ॥
स तदोजसा विजितसारममरदितिजोपसंहितम् । विश्व
मिदमपिदधाति पुरा किमिवास्ति यन्न सुकरं खलु तेन ॥ ३० ॥
विजिगीषते यदि जगन्ति युगपदथ सञ्जिहीर्षति । प्राप्तुम
भवमभिवाञ्छति वा वयमस्य नो विषहितुं क्षमा रुचः ॥ ३१ ॥

वत्सु सन्निपातयोर्भविष्यदर्थे लट् । तथा यत् खलु तेन पुंसा न सुकरं कर्म तत्किमि
वास्ति न किञ्चित् । न दुःकरमस्तीत्यर्थः । सामान्येन विशेषसमर्थनरूपोऽर्थान
रन्यासः ॥ ३० ॥ ॥
न चैतदन्यफलकन्तप इत्याह । विजिगीषत इति । स पुरुषो जगन्ति भुवनानि
युगपज्जिगीषते यदि विजेतुमिच्छति वा । पूर्ववत्सन इत्यात्मनेपदम् । अथवा युगप
त्संजिहीर्षति संहर्तुमिच्छति वा । अभवं अपवर्गम्प्राप्तुमभिवाञ्छति वा । न विद्म इ
ति शेषः । किन्तु । वयमप्यस्य रुचस्तेजांसि विषहितुं सोढुम् । तिषसहलुभरुष

रिषइतिविकल्पादिडागमः । नोऽक्षमाः नसक्ताः । केचिद्रुन्वः कामितानिविषहिंतु मवधारयितुमितिव्याचक्षते तत्रसंहेरवधारणार्थत्वंविचार्य्यम् ॥ ३१॥ ❁✻❁ ॥

किमिति । हेनाथकिमर्थमुपेक्षसे कथयत्वमितिशेषः । तवनविदितन्त्वयाऽज्ञा तमित्यर्थः । क्तस्यचवर्तमानइतिषष्ठी । नकिञ्चनकिमपिन । हेऽभयदनोऽस्मानलन्त्रातुमर्हसि । त्वयिशासतिसतिपराभवोमास्मभवन्माभूत् । स्मोत्तरेलुङ्चेतिलङ् ॥ ३२॥ ✻ ✻ ॥ ❁ ❁ ॥ ✻ ✻ ॥ ❁ ❁ ॥ ✻ ✻ ॥ ❁ ❁ ॥ ✻ ॥

इतीति । इतीत्थंगांवाचंविधायअभिधायेत्यर्थः । सामान्यस्यविशेषपर्यवसानात्

किमुपेक्षसेकथयनाथनतवविदितन्नकिञ्चन । त्रातुमल
मभयदार्हसिनस्त्वयिमास्मशासतिभवत्पराभवः ॥ ३२ ॥
इतिगांविधायविरतेषुमुनिषुवचनंसमाददे । भिन्नजल
धिजलनादगुरुध्वनयन्दिशांविवरमन्धकान्तकः ॥ ३३ ॥
बदरीतपोवननिवासनिरतमवगातमन्यथा । धातुरुद
यनिधनेजगतांनरमंशमादिपुरुषस्यगाङ्गतम् ॥ ३४ ॥

। मुनिषुविरतेषुतूष्णींभूतेषुसत्सुअन्धकान्तकःशिवोभिन्नस्योद्धतस्यजलधेर्जलस्यनादमिवगुरुङ्गम्भीरं । यथातथादिशांविवरमन्तरालंध्वनयन्वचनंसमाददेस्वीचकारउवाचेत्यर्थः ॥ ३३ ॥ ❁〰❁〰❁〰✻〰❁〰❁〰❁ ॥

वदरीति । वदरीतपोवनेवदरिकाश्रमेनिवासनिरतंनित्यनिवासिनङ्गाङ्गतम्भुवमवतीर्णञ्जगतामुदयनिधनेसृष्टिसंहारौधातुस्तयोःकर्तुरित्यर्थः । तृन्निति धातेस्तृन्प्रत्ययः । अतएवनलोकेत्यादिनाकर्मणिषष्ठीप्रतिषेधः । आदिपुरुषस्यविष्णोरंशंअंशभूतंनरंनरसंज्ञकमित्यर्थः । योनारायणसंज्ञकइतिभावः । अ

न्यथात्वकृतवैपरीत्येन त्वं मा अवगात मनुष्यमात्रं मा ज्ञासीरित्यर्थः । इङ्गोगालु
ङिति गाटेशः ॥ ३४ ॥ *** ॥ **०** ॥ *** ॥

अथ तत्तपसो निमित्तमाह । द्विषत इति । एष नरः सकलम्भुवनानि अभितापयन्ति अभीक्ष्णमिति तथोक्तान् । बकुलमाभीक्ष्ण्ये इति णिनिः । कान्ते आक्रान्ते कुलिशकरस्य इन्द्रस्य वीर्य्यं वरो यैस्तान् द्विषतः शत्रून् पराशिशिषुः पराशितुमिच्छुः अस्यतेः सन्नन्तादुप्रत्ययः । मदुपासनं मदाराधनं चक्रे रणे ल्युट् । महत्तपो विहितवान् । अत्र निमित्तं शत्रुजय एवेति ॥ ३५ ॥

द्विषतः पराशिशिषुरेष सकलभुवनाभितापिनः । कान्तकु
लिशकरवीर्य्यबलान्मदुपासनं विहितवान्महत्तपः ॥ ३५ ॥
अयमच्युतश्च वचनेन सरसिरुहजन्मनः प्रजाः । पातुम
सुरनिधनेन विभूर्भुवमभ्युपेत्य मनुजेषु तिष्ठतः ॥ ३६ ॥
सुरकृत्यमेतदवगम्य निपुणमिति मूकदानवः । हन्तुमभि
पतति पाण्डुसुतं त्वरया तदत्र सह गम्यतां मया ॥ ३७ ॥

अथास्य मानुषावतारे कारणमाह । अयमिति । विभूः प्रभुः अयं नरो ऽच्युतः कृष्णश्च सरसिरुहजन्मनो ब्रह्मणो वचनेन प्रार्थनया असुराणां निधनेन मरणेन करणेन प्रजाः पातुं रक्षितुं भुवमभ्युपेत्य मनुजेषु मनुष्येषु तिष्ठतः । वस्तुतस्तु साक्षान्नरनारायणावेतौ कृष्णार्जुनावित्यर्थः ॥ ३६ ॥

अथास्य सत्त्वसम्पदं प्रकाशयितुमाह । सुरेति । मूकदानवः मूकाख्यः कश्चिदसुरः एतत् पाण्डवकृत्यं सुरकृत्यमिति निपुणमवगम्य साधु निश्चित्य पाण्डुसुतमर्जुनं हन्तुमभिपतति । ततस्तत्कारणात् अत्र अर्जुनाश्रमे विषये आश्रमं प्रतीत्यर्थः । मया

सहचर्य्यागम्यतान्द्रष्टुमितिशेषः ॥ ३७ ॥ ❁❁❁***❁❁❁***❁❁❁ ॥

विवरइति । पापेनिरतिर्य्यस्यसएषदानवोविवरेरंध्रेपिएकान्तेपीत्यर्थः । ए
नंपाण्डवंअनिगूढम्प्रकटंअभिभवितुन्नपारयन्नशकुवन् । विभाषायांनञितिनञ्
समासः । अविशङ्कितयास्वरूपगूहनान्निःशङ्कतयावराहमाययावराहभूमिक
याविजयंव्यवस्यति । विजयम्प्रत्युद्युक्तइत्यर्थः ॥ ३८ ॥ ** ~ * ~ ** ॥
ततःकिम्भविष्यतीत्यत्राह । निहतइति । विडम्बितमनुकृतंकिरातन्नृपतिवपुर्य्ये
नतद्रूपधारिणेत्यर्थः । मयानिहतेरिपौवराहेमुक्तनिशितविशिखस्सन्नयम्पाण्ड

विवरेपिनैनमनिगूढमभिभवितुमेषपारयन् । पापनिर
तिरविशङ्कितयाविजयंव्यवस्यतिवराहमायया ॥ ३८ ॥
निहतेविडम्बितकिरातनृपतिवपुषारिपौमया । मुक्तनिशि
तविशिखःप्रसभम्मृगयाविवादमयमाचरिष्यते ॥ ३९ ॥
तपसानिपीडितकृशस्यविरहितसहायसम्पदः । सत्त्ववि
हितमतुलम्भुजयोर्बलमस्यपश्यतमृधेऽधिकुप्यतः ॥ ४० ॥

वःप्रसभम्प्रसह्यमृगयाविवादम्मृगप्रहारकलहमाचरिष्यतिकरिष्यति । मत्प्रह
तमेवमृगम्प्रहृत्यस्वयमहमेवप्रहर्त्तेतिकलहिष्यतइत्यर्थः ॥ ३९ ॥ ❁ ~ ❁ ॥
ततोपिकिम्भावीत्यत्राह । तपसेति । तपसानितराम्पीडितोऽतएवकृशस्तस्यत
पसानिपीडितकृशस्यपूर्वकालेत्यादिनासमासः । तथाविरहितासहायसम्पद्यस्य
तस्यैकाकिनोमृधेरणे । मृधमास्कन्दनंसंख्यमित्यमरः । अधिकुप्यतोऽधिकंकुप्य
तोऽस्यपाण्डवस्यसत्त्वविहितंस्वभावकृतंस्वाभाविकमित्यर्थः । सत्त्वोऽस्त्रीजन्तुषु
क्लीवेव्यवसायेपराक्रमे । आत्मभावेपिशाचादौद्रव्येसत्तास्वभावयोः । प्राणेबलेऽ

न्यक्कारणेइतिवैजयन्ती । अतुलन्निरुपमम्भुजयोर्बाह्वोर्बलंशक्तिम्पश्यत । बलं शक्तिर्बलंसैन्यमितिशाश्वतः ॥ ४० ॥ ॥

अथत्रिभिरस्यकिरातभावंवर्णयति । इतीत्यादि । शिवःइतीत्यन्तान्मुनीनुदारं युक्तंयथास्यात्तथाऽनुनीयशिक्षयित्वाउक्त्वेतियावत् । वनचरःकिरातपृतनापतिः संववृतइत्यन्वयः । किरातसेनापतिवेषधारीबभूवेत्यर्थः । कथम्भूतः । विषमा विकृतविन्यासाहरिचन्दनस्यालयोरेखायस्मिंस्तेनघर्मेणस्वेदेनजनिताःपुलका रोमाञ्चायस्मिन्तेन । पुलकःपुनः । रोमाञ्चःकण्टकोरोमविकारोरोमहर्षणमिति हेमचन्द्रः । घर्मःस्यादातपेग्रीष्मेऽप्युष्णस्वेदाम्बुसारयोरिति विश्वः । लसन्तःशोभन्तो

इतितानुदारमनुनीयविषमहरिचन्दनालिना । घर्मज
नितपुलकेनलसद्गजमौक्तिकावलियुतेनवक्षसा ॥ ४१ ॥
वदनेनपुष्पितलतान्तनियमितविलम्बिमौलिना । बिभ्रदरु
णनयनेनरुचंशिखिपिच्छलाञ्छितकपोलभित्तिना ॥ ४२ ॥

गजमौक्तिनांकरिकुम्भोद्भवमौक्तिकनांआवलयएवगुणाःसूत्राणियस्मिन्तेनवक्षसावक्षस्थलेनउपलक्षितः । करिणाम्मुक्तायोनित्वेप्रमाणमाहाऽगस्त्यः । जीमूतकरिमत्स्याहिवंशशङ्खवराहजाः । शुक्त्युद्भवाश्चविज्ञेयाअष्टौमौक्तिकयोनय इति ॥ ४१ ॥ ॥

वदनेनेति । पुष्पितैर्लतान्तैर्विकसितलताग्रैर्नियमिताःसंयताःविलम्बिनश्चतेमौलयःकेशाःयस्यतेन । चूडाकिरीटंकेशाश्चसंयतामौलयस्त्रयइत्यमरः । शिखिपिच्छलाञ्छितैर्बर्हिबर्हाङ्कितेकपोलभित्तीयस्यतेनअरुणनयनेनारक्तनेत्रेणवदनेन रुचंशोभांबिभ्रत् ॥ ४२ ॥ ॥

वृहदिति । पुनश्च जलद इव नदतीति जलदनादि । कर्त्तर्य्युपमान इति णिनिः । उपहितैकमार्गणां संहितैकबाणान्धनुरुद्वहन् । अत एव मेघनिचय इव स्थित इत्युपमा । कुलकेतुसमासोक्तिरलङ्कारः । स्वभावोक्तिरसौ चारुयथावद्वस्तुवर्णनमिति लक्षणात् ॥ ४३ ॥ ❂ * * * * * * ❂ ॥

अनुकूलमिति । अस्य शिवस्यानुकूलं विचिन्त्य प्रियमिति निश्चित्य आत्तविग्रहैर्गृहीतकिरातदेहैः । तथा मूलानि परश्वः कुठाराः शराश्चापानि च तानि भृतानि यैस्तैः । प्रहरणार्थेभ्यः परे निष्ठासप्तम्याविति निष्ठायाः परनिपातः । गणपतिभिः प्रमथमुख्यैर्महती

वृहदुद्वहन् जलदनादि धनुरुपहितैकमार्गणम् । मेघनिचय इव संववृते रुचिरः किरातपृतनापतिः शिवः ॥ ४३ ॥

अनुकूलमस्य च विचिन्त्य गणपतिभिरात्तविग्रहैः । मूलपरशुशरचापभृतैर्महती वनेचरचमूर्विनिर्ममे ॥ ४४ ॥ विशेषकम् ॥

विरचय्य काननविभागमनुगिरमथेश्वराज्ञया । भीमनिनदपिहितोरुभुवः परितोऽपदिश्य मृगयां प्रतस्थिरे ॥ ४५ ॥

वनेचरचमूः सेना विनिर्ममे निर्मिता । माङ्ग्यानेकर्म्मणि लिट् । ह्रस्व इत्यन्यास ह्रस्वत्वम् ॥ ४४ ॥ * * * ❂ ❂ ❂ * * * ❂ ❂ ❂ * * * ❂ ❂ ❂ ॥

विरचय्येति । अथेश्वराज्ञया अनुगिरं गिरौ विभक्त्यर्थेऽव्ययीभावः । गिरेश्च सेनकस्येति समासान्तः । काननविभागं विरचय्य अस्यायमिति देशविभागं कृत्वेत्यर्थः । भीमैर्निनदैः कलकलैः पिहिता उरवो भुवो यैस्ते तथोक्ताः सन्तः मृगयामपदिश्य व्याजीकृत्य परितः प्रतस्थिरे प्रस्थिताः ॥ ४५ ॥ ❂ ❂ ❂ ❂ ❂ ❂ ❂ ❂ ❂ ❂ ❂ ❂ ॥

क्षुभितेति । क्षुभिताः त्रस्ता अभिनिःसृताः स्वस्थानान्निर्गताः विभिन्ना मुक्तसंघाश्च ये

शकुन्तयः पक्षिणो मृगाश्च तेषां यूथानि तानि तेषां निःस्वनैः पूर्णानि पृथूनि वनानि गु
हाविवराणि च यस्य स भूधरः सहसा भयादिवेत्युत्प्रेक्षा। रराससचुक्रोश। रसशब्दा
क्रोशे लिट् ॥ ४६ ॥ * ❁ ❁ * ❁ ❁ * ❁ ❁ * ❁ ❁ * ॥

नेति। पथि पलायनमार्गे विरोधिनी जातिवैरिणी मृगादीनां सिंहव्याघ्रादीनां वि
हङ्गानां काकोलूकानाञ्च संहतिस्संघो रूयं परस्परक्रोधं न इयायनप्राप किन्तु सहै
व चचारेत्यर्थः। तथाहि भूरि प्रभूता भीर्येषान्ते तादृशाः समं साधारणेनागतास्त्वापदो विप
त्तयः सहजमपि वैरं सपदि घ्नन्ति। नहि सङ्घातव्यसनेषु प्रातिस्विकजातिवैरानुब

क्षुभिताभिनिःसृतविभिन्नशकुनिमृगयूथनिस्वनैः। पूर्णपृथु
वनगुहाविवरः सहसाभयादिव ररास भूधरः ॥ ४६ ॥
न विरोधिनी रुषमियाय पथि मृगविहङ्गसंहतिः। घ्नन्ति स
हजमपि भूरिभियः सममागताः सपदि वैरमापदः ॥ ४७ ॥
चमरीगणैर्गणबलस्य बलवति भयेऽप्युपस्थिते। वंशवित
तिषु विषक्तभृशप्रियबालबालधिभिरादधे धृतिः ॥ ४८ ॥

न्धइति भावः ॥ ४७ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥

चमरीति। वंशविततिषु वेणुगुल्मेषु विषक्ता लग्ना भृशं प्रियत्वात्प्रियरोमाणो बालध
यः पुच्छानि येषां ते। पुच्छोऽस्त्री लूम लांगूले वालहस्तश्च बालधिरित्यमरः। च
मरीगणैः मृगविशेषैः गणबलस्य शिवबलस्य सम्बन्धिनि तच्छेतुके इत्यर्थः। सम्ब
न्धमात्रविवक्षायां षष्ठी। अन्यथा भीत्रार्थानां भयहेतुरिति पञ्चमी स्यात्। बलवति
प्रबले भये उपस्थिते प्राप्तेऽपि धृतिराददे स्वीकृता। वालच्छेदभयात्प्राणहानिमप्य
वगणय्य स्थितमित्यर्थः ॥ ४८ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥

ह्वर इति। प्रतिभयेभयहेतौ। भयङ्करम्प्रतिभयमित्यमरः। प्राप्नेपीतिशेषः। गजमदैःसुगन्धयःसुरभयःकेसराःसटायेषान्तैः। हतानेकगजैरित्यर्थः। सह सासेनाकलकलश्रवणानन्तरमेवप्रतिबोधेननिद्रापगमेनजृम्भितानिव्यात्तानिमुखानियेषान्तैर्मृगाधिपैःसिंहैःस्वस्थंनिःशङ्कमेवहरसैनिकाःअभिदद्दृशिरेईक्षिताः। नतुकिञ्चित्क्षुभितमित्यर्थः। युक्तंचैतद्राजनामकेसरिणामितिभावः॥ ४९॥ ०

विभरामिति। अपवृत्तजठरैस्त्यक्तालक्षुभितान्लुण्ठितोदरैःशफरीकुलैराकुलाः व्याप्ताःपंकैर्विषमितानिदुर्गमीकृतानिकूलानियासान्ताःसरितःकरिभिःपलायमा

हरसैनिकाःप्रतिभयेपिगजमदसुगन्धिकेसरैः। स्वस्थम
भिददृशिरेसहसाप्रतिबोधजृम्भितमुखैर्मृगाधिपैः॥ ४९॥
विभराम्बभुवुरुपवृत्तजठरशफरीकुलाकुलाः। पङ्कविषमि
ततटाःसरितःकरिरुग्णचन्दनरसारुणाम्पयः॥ ५०॥
महियक्षतागुरुतमालनलदसुरभिःसदागतिः। व्यस्तशु
कनिभशिलाकुसुमःप्रणुदन्ववौवनसदाम्परिश्रमम्॥ ५१॥

नैरितिशेषः। रुग्णानांमार्गरोधितयाभग्नानाम्। उदितश्चेतिनिष्ठानत्वम्। चन्दनानांरसैरुणाम्पयोविभराम्बभूवुः। भृधातोःश्लुः। भीह्रीभृहुवांश्लुवच्चेतिविकल्पादाम्प्रत्ययः। कृञ्चानुप्रयुज्यतेलिटीतिभुवोऽनुप्रयोगः॥ ५०॥ ० ० ०॥

महियेति। महिषैःक्षतानिविदलितानियैरगुरुभिस्तमालैर्नलदैरुशीरैश्चसुरभिःव्यस्तानिविक्षिप्तानिशुकनिभानिशुकवर्णानिशिलाकुसुमानिशैलेयाख्यौषधिविशेषायेनसः। अतःशीतलइत्यर्थः। कालानुसार्य्यंवृद्धाश्मपुष्पशीतशिवानितु। शैलेयमित्यमरः। शुकनिभेतिस्वरूपकथनम्। सदागतिर्वायुर्वनसदांव

नेचराणांपरिश्रमम्प्रणुदन्श्वनैर्मन्दइत्यर्थः। मातरिश्वासदागतिरित्यमरः। व
वैवातिस्म ॥ ५१॥ ॥
मथिताम्भसइति। सत्त्वसंप्लवःप्राणिसंक्षोभोनिदाघोग्रीष्मइवसरसीःसरांसि।
कासारःसरसीसरइत्यमरः। मथितांभसःसंक्षुभितोदकाःरयेनपलायनवेगेनवि
कीर्णाव्याकीर्णायथातथामृदितानिष्पीडिताःकदल्योगवेधुकास्तृणधान्यविशेषाश्च
यासांतास्तथोक्तातृणधान्यानिनीवाराःस्त्रीगवेधुर्गवेधुकाइत्यमरः। मृदितइति।
क्लितिचेतिगुणप्रतिषेधः। क्लान्ताजलरुहलतापद्मिन्योयासुताःएवम्भूताबि

मथिताम्भसोरयविकीर्णमृदितकदलीगवेधुकाः। क्लान्तज
लरुहलताःसरसीर्विदधेनिदाघइवसत्त्वसंप्लवः॥ ५२॥
इतिचालयन्नचलसानुवनगहनजानुमापतिः। प्रापमुदि
तहरिणीदशनक्षतवीरुधंवसतिमैन्द्रसूनवीम्॥ ५३॥
सतमाससादघननीलमभिमुखमुपस्थितम्मुनेः। पोत्रनि
कषणविभिन्नभुवन्दनुजन्दधानमतिसौकरंवपुः॥ ५४॥

दधेविहिताः॥ ५२॥ ॥
इतीति। इतीत्थमुमापतिरचलसानुषुवनेषूपभोज्यवृक्षेषुगहनेषुदावेषुचजा
तांस्तथोक्तान्सत्त्वानितिशेषःचालयन्। मुदितानांहरिणीनान्दशनैःक्षताविरुधो
लतायस्यान्ताइन्द्रसूनोरिमामैन्द्रसूवींवसत्यत्रेतिवसतिमाश्रमम्। वहिवस्यर्ति
भ्यश्चेतिणादिकोवसतेरतिप्रत्ययः॥ ५३॥ ॥
सइति। सशिवोघननीलंमेघमेचकंमुनेरर्जुनस्याभिमुखमुपस्थितनागतं। पोत्र
स्यमुखाग्रस्यनिकषणेनोल्लेखनेनविभिन्नाविदारिताभूर्येनतम्। मुखाग्रेक्रोडह

लयोः पोत्रमित्यमरः । हलसूकयोः पुव इति ष्ट्रन्प्रत्ययः । सूकरस्येदं सौकरं वाराहं वपुर्दधानन्दनुजं समाससाद प्राप ददर्श इति यावत् ॥ ५४ ॥ * * * * ॥

कच्छान्त इति । लक्ष्मीवान्मादुपधायाश्च मतोर्वोऽयवादिभ्य इति मतुपो मकारस्य वकारादेशः । स श्रीवः । सुरसरितः कच्छान्तेऽनूपप्रान्ते । जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविध इत्यमरः । सेनां निधाय स्थापयित्वेत्यर्थः । कतिपयैः किरातवर्यैरन्वीतोऽनुगतः सन् । इण्गताविति धातोरनुपूर्वात्कर्म्मणि क्तः । सगुल्मजालैर्लता

कच्छान्ते सुरसरितो निधाय सेनामन्वीतः स कतिपयैः किरातवर्य्यैः

। प्रच्छन्नस्तरुगहनैः सगुल्मजालैर्लक्ष्मीवाननुपदमस्य सम्प्रतस्थे

॥ ५५ ॥ ● ॥ इति महोपाध्यायश्रीभारविकृतौ किरातऽर्ज्जुनीये महाकाव्ये ईश्वराभिगमनो नाम द्वादशः सर्गः ॥ १२ ॥ ● ॥

प्रतानसहितैस्तरुगुल्मैः प्रच्छन्नश्छादितः च्छादिनेत्यादिना निपातः । अस्य वराहस्य पदमनु अनुपदं पादानुसारेणेत्यर्थः । सम्प्रतस्थे प्रस्थितः । समवप्रविभ्यः स्थ इत्यात्मनेपदम् । प्रहर्षणीवृत्तम् ॥ ५५ ॥ * ॥ इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किराताऽर्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायां द्वादशस्सर्गः ॥ १२ ॥ ● * ● * ● * ● * ● * ● * ● * ● * ● ॥

वपुषेति। अथेश्वरप्रस्थानानन्तरं महेन्द्रसूनुरर्जुनः परमेण महता वपुषा देहेन भूधराणां विभेदे विदारणे सम्भाव्यपराक्रमं क्षमोऽयमिति प्रतर्क्यपौरुषम्। स्थिरा भ्यां दृढाभ्यां दंष्ट्राभ्यामुग्रं मुखं यस्य तं मृगं वराहमित्यर्थः। आशु तदागमनानन्तरं अविलम्बेनेत्यर्थः। विलोकयाञ्चकार ददर्श। अस्मिन् सर्गे प्राक् पञ्चत्रिंशत् श्लोकाद्वैपच्छन्दसिकं वृत्तम्॥१॥

स्फुटेति। स्फुटाः स्पष्टा वक्रा विरचिताः सटानां केसराणामुन्नतिरुन्नतिर्यस्य स तथोक्तः। धाद्धर्षितलोमेत्यर्थः। सटा जटाकेसरयोरित्यमरः। दूराद्भिधावन्। तथा

> वपुषा परमेण भूधराणामथ सम्भाव्यपराक्रमं विभेदे। मृगमा
> शु विलोकयाञ्चकार स्थिरदंष्ट्रोग्रमुखं महेन्द्रसूनुः॥१॥
> स्फुटवक्रसटोन्नतिः स दूरादभिधावन्नवधीरितान्यकृत्यः। ज
> यमिच्छति तस्य जातशङ्के मनसीमं मुहुराददे वितर्कम्॥२॥
> घनपोत्रविकीर्णशालमूलो निविडस्कन्धनिकायरुग्णवप्रः।
> अयमेकचरोऽभिवर्तते मां समराये व समाजुहूषमाणः॥३॥

अवधीरितान्यकृत्यः अनन्यकर्मा सवराहो जयमिच्छति जयार्थिनि अत एव जातश
ङ्के त्वर्याद्धियां सौहित्यामेकलक्ष्यत्वादिति भावः। तस्य मुनेर्मनसि मुहुरिमं वित
र्कं वक्ष्यमाणमूहम्। अध्याहारस्तर्क ऊह इत्यमरः। आददे उत्पादयामा
स॥२॥

अथैकादशभिर्वितर्कमेव निरूपयति। घनपोत्रेति। घनेन कठिनेन पोत्रेण मुखा
ग्रेण विकीर्णानि विदलितानि शालमूलानि वृक्षवध्नानि येन सः। मूलं वध्नोऽङ्घ्रिनामक इ
त्यमरः। निविडस्य स्कन्धस्य निकायेन कर्षणेन रुग्णवप्रो भग्नसानुः अतो महासत्त्व

तिभावः। एकश्चासौचरश्चेत्येकचरःएकाकीयूथादपेतइत्यर्थः। अतोयं वरा[illegible]समरायसमरङ्कर्तुं। क्रियार्थोपपदस्यचकर्मणिस्थानिनइतिचतुर्थी। समाजुहूषमाणइवसमाह्वातुमिच्छन्निव। इवशब्दःसम्भावनायां। समाह्वयतेःसन्नन्ताच्छानच्प्रत्ययः। स्पर्द्धायामाङ्पूर्ववत्समइत्यात्मनेपदम्। अभ्यस्तस्येति सम्प्रसारणं। मामभिवर्त्ततेमामभिधावति। उपसर्गवशात्सकर्मकत्वम्। अतः सर्वथानायमुपेक्ष्यइतिभावः ॥ ३ ॥

इहेति। इहाश्रमेतपोनुभावात्वीतभयाविगतवैराइत्यर्थः। अतएवव्यालमृगाःक्रूरमृगाः। व्यालोभुजङ्गमेक्रूरेश्वापदेदुष्टदन्तिनीतिविश्वः। परेषुप्रा

इहवीतभयास्तपोनुभावाज्जहतिव्यालमृगाःपरेषुवृत्तिम्। म
यितांसुतरामसौविधत्तेविकृतिःकिन्नुभवेदियन्नुमाया ॥ ४ ॥
अथवैषकृतज्ञयेवपूर्वम्भृशमासेवितयारुषानमुक्तः। अव
धूयविरोधिनीःकिमारान्मृगजातीरभियातिमाञ्जवेन ॥ ५ ॥

ण्यन्तरेषुवृत्तिञ्जीविकाञ्जहतिहिंसयानजीवन्तीत्यर्थः। अयंवराहोमयिविषयेतांवृत्तिंसुतरांविधत्तेजिघांसतीत्यर्थः। तदियंविकृतिःतपःसामर्थ्यभङ्गरूपाभवेत्। किंनुवा। मायाकस्यचिद्दैत्यस्यवराहभूमिकाभवेत्नु। किन्नुशब्दोवितर्के ॥ ४ ॥

अथवेति। अथवेतिपक्षान्तरेएषमृगःपूर्वञ्जन्मान्तरेषुभृशमत्यर्थमासेवितयात्रतिपरिचितयारुषामन्योश्चरविषयेकृतज्ञयेवपूर्वकृतंवैरानुबन्धंसम्प्रतिजानत्येवेत्युत्प्रेक्षा। नमुक्तस्त्याज्यापिनूनमितिशेषः। नूनमयम्प्राग्भवीयवैरानुबन्धीकश्चित्सं प्रतिवैरबीजासम्भवात्इतिभावः। कुतोयम्पुतःआरात्समीपतः। आराद्दूरसमी

पयोरित्यमरः । विरोधिनीमृगजातीरवधूयत्यक्त्वाजवेनमामभियाति

अन्यथानाभिधावेदितिभावः ॥ ५ ॥ * ● ~ ● * ● ~ ● * ● ~ ● ॥

नकेवलमभियानमेवकिन्तुमनोवृत्तिरप्यत्रप्रमाणमित्याह । नमृगइति । अयं मृगोनखलुकिन्तुकोपिजिघांसुःहन्तुमिच्छुःहन्तेस्सन्नन्तादुप्रत्ययः । अभ्यासाच्चेतिकुत्वं । अञ्झनगमांसनितिदीर्घःकुतःहियस्मात् । अत्रास्मिन्मृगविषयेमेमनस्तथाभृशंस्खलतिक्षुभ्यति । यथायञ्जिघांसुरितिबुद्धिरुत्पद्यतेत्यर्थः । तथाहि । विमलम्प्रसन्नं । तथाकलुषीभवत्क्षुभ्यच्चेतएवहितैषिणंमित्रन्तथारिपुञ्चाकथयतिइतिभावः ॥ ६ ॥ ● ● ॥ * * ॥ ● ● ॥ * * ॥ ● ● ॥ * * ॥

नमृगःखलुकोप्ययञ्जिघांसुःस्खलतिह्यत्रतथाविधम्मनोमे ।
विमलङ्कलुषीभवच्चचेतःकथयत्येवहितैषिणंरिपुंवा ॥ ६ ॥
मुनिरस्मिनिरागसःकुतोमेभयमित्येषनभूतयेऽभिमानः । प
रवृद्धिषुबद्धमत्सराणांकिमिवह्यस्तिदुरात्मनामलंघ्यम् ॥ ७ ॥

ननुमुनेःकिमनयादुःशङ्कयातत्राह । मुनिरिति । मुनिरस्मिनिरागसोनिरपराधस्यमेकुतोभयमित्येषोऽभिमानोऽहंकारः । गर्वोभिमानोऽहङ्कारइत्यमरः । अनपकारिणंमांकोपिकिङ्करिष्यतीतिबुद्धिःभूतयेश्रेयसेनभवति । तथाहिपरबुद्धिषुविषयेबद्धमत्सराणांदुरात्मनामलंघ्यङ्किमिवअस्ति । नकिञ्चिदकार्य्यमस्तीत्यर्थः । इवशब्दोवाक्यालङ्कारे ॥ ७ ॥ ● ● ● ● ● ● ● ● ● ● ● ● ॥

अस्तुजिघांसुरपिक्षुद्रःकिङ्करिष्यतीत्यत्राह । दनुजइति । अयन्दनुजःस्वित् दानवोवाक्षपाचरोराक्षसोवानतुमृगइत्यर्थः । कुतः । वनजेसत्त्वेवन्यप्राणिनिईदृशम्बलन्नास्तिवतेत्याश्चर्य्ये । बलमेवसमर्थयते । तथाहि । मेघनीलोयंवराहःसक

मभिभूयाक्रम्य कम्पयतीव पदविष्टम्भयात्‌ तथा प्रतीयत इत्यर्थः । अत्र क
म्पयतीत्युत्प्रेक्षागर्भायं शैलकम्पनरूपकार्य्येण तत्कारणबलातिरेकसमर्थनात्‌
कार्य्येण कारणसमर्थनरूपोऽर्थान्तरन्यासः ॥ ८ ॥ ❁ ❁ * ❁ ❁ ॥

किञ्चायं शैलेर्मृगयाकलकलः श्रूयते सोऽप्येतन्मायापरिकल्पित एवेत्याह । अय
मिति । अयमेव शमस्थे शान्तिनिविष्टे निरंध्रे मयि । अधिकरणविवक्षायां सप्तमी
। मायया प्रहरिष्यन्‌ प्रहर्तुमिच्छन्नित्यर्थः । लृट्‌ शेषे चेति चकारात्‌ क्रियार्थे क्रियायां
लृट्‌ शतृ प्रत्ययः । मृगव्यं मृगया तस्य सत्रं वनं तदर्थं वनमित्यर्थः । तत्कामयते इ
ति मृगव्यसत्रकामो मृगयाभूमिपरिग्रहार्थी सन्निहित्यर्थः । कर्मण्यण्‌ आखेटनं मृग

> दनुजस्त्विदयं क्षपाचरो वा वनजे नेति बलं बतास्ति सत्त्वे । अभि
> भूय तथा हि मेघनीलः स कलङ्कम्पयतीव शैलराजम्‌ ॥ ८ ॥
> अयमेव मृगव्यसत्रकामः प्रहरिष्यन्मयि मायया शमस्थे । पृथु
> भिर्ध्वजिनीरवैरकार्षीच्चकितोद्भ्रान्तमृगाणि काननानि ॥ ९ ॥

व्यं स्यादाखेटो मृगया स्त्रियामित्यमरः । सत्रमाच्छादने यज्ञे सदादाने वनेऽपि चेत्य
मरः । पृथुभिर्बृहद्भिर्ध्वजिनीरवैः सेनाकलकलैः स्वमायया कल्पितैरेवेत्यर्थः ।
काननानि चकितोद्भ्रान्तास्त्रस्ता मृगा येषु तानि चकार । अयं रन्ध्रान्वेषी मत्प्रहार
र्थी स्वयमेव मृगयुर्भूत्वा वनावरोधाय सेनाघोषं कल्पयामास । स मृगरूपेणागच्छ
तीत्यर्थः ॥ ९ ॥ * ❁ ❁ ❁ ❁ ❁ ❁ ❁ * ॥

वितर्कान्तरमाह । बहुश इति । अथवा बहुशः कृतासत्कृतिः सत्कारो येन तस्य सु
योधनस्य प्रियं भद्रधरूपं विधातुं कर्तुमिच्छन्‌ यः कश्चिदिति शेषः । वनं गोचरं
स्थानं येषां तेषां वनगोचराणामभियोगादवरोधात्‌ क्षुभितं आकुलं निरस्त्राङ्गणं अ

शिश्रयत् । वराहरूपेणाविशत् । णिश्रिद्रुस्रुभ्यः कर्तरि चङ् । च
वः ॥ १० ॥ ॥

वितर्कान्तरमाह । अवलीढेति । खाण्डवजातवेदसा खाण्डववनाग्निना प्रसभमव
लीढसनाभिर्दग्धबन्धुः । सपिण्डास्तु सनाभयः । सगोत्रबान्धवज्ञातिबन्धुस्वस्व
जनाः समा इत्यमरः । अत एव समन्युर्बद्धवैरः मम अपकारयितृत्वादिति भावः ।
अश्वसेनस्तक्षकपुत्रः कश्चिन्महासर्पः प्रतिकर्तुं वैरनिर्यातनार्थमुपागतः वराहमाय
येति शेषः । पक्षान्तरमाह । यदि वा वृकोदरेण भीमसेनेन कृतमन्युः जनितक्रो

बहुशः कृतसत्कृतेर्विधातुं प्रियमिच्छन्नथवा सुयोधनस्य । क्षु
भितवनगोचराभियोगाद्गणमाशिश्रियदाकुलं तिरश्चाम् ॥१०॥
अवलीढसनाभिरश्वसेनः प्रसभं खाण्डवजातवेदसा वा । प्रति
कर्तुमुपागतः समन्युः कृतवैरो यदि वा वृकोदरेण ॥ ११ ॥
बलशालितया यथा तथा वा धियमुच्छेदपरामयं दधानः । नि
यमेन मया निबर्हणीयः परमं लाभमरातिभङ्गमाहुः ॥ १२ ॥

धो वा कश्चिदिति शेषः । पुरा किल पाण्डवः खाण्डवदाहे पावकभयात् पलायमा
नांस्तक्षकपुत्रानश्वसेनस्य बन्धून् बाणैरवरुध्य दाहयामासेति भारतकथाऽनुसन्धे
येति ॥ ११ ॥ ॥

अथ द्वाभ्यामनन्तरकरणीयमध्यवस्यति । बलेत्यादिना । किम्बहुना । यथा त
था वा अस्तु अयं मायिकः पारमार्थिको वास्त्वित्यर्थः । बलशालितया बलदृप्ततयेत्य
र्थः । उच्छेदपरां धियं दधानो मां जिघांसुरित्यर्थः । अयं नियमेनावश्यं मया
निबर्हणीयो वध्यः । प्रमापणं निबर्हणमित्यमरः । तथा हि अरातिभङ्गं शत्रुक्षय

माऽ॥१२॥ *** ॥ ❁ ❁ ॥ *** ॥ ❁ ❁ ॥ *** ॥

ननुतपोविरोधिनीहिंसेत्याशंक्याह। कुर्विति। हेतात वत्समार्गदायीनभवतीति अमार्गदायीरंध्रान्वेषिणाम्प्रवेशमयच्छन्नित्यर्थः। कुतःजयार्थित्वादित्याह। विजयाय तपांसिकुर्विति मुनिर्व्यासोमामलंभृशमन्वशात् अनुशिष्टवान्। अनुशासेर्लङ्। ननुमुनिर्वाकथमधर्म्ममन्वशात्तत्राह। बलिनइति। अस्यबलिनःप्रबलस्यवधादृतेवधम्विना। अन्यारादितरर्त्तेइदिनापञ्चमी। अन्यथाउपायान्तरेणव्रतसंरक्षणन्तपोरक्षणंकर्त्तुन्नशक्यम्। हिंसापिदुष्टनिग्रहात्मिकानाधर्म्म इत्यर्थः॥१३॥ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ॥

कुरुतातत पांस्यमार्गदायीविजयायेत्यलमन्वशान्मुनिर्म्माम्।
बलिनश्चवधादृतेऽस्यशक्यंव्रतसंरक्षणमन्यथानकर्त्तुम्॥१३॥
इतितेनविचिन्त्यचापनामप्रथमम्पौरुषचिह्नमाललंबे। उ
पलब्धगुणःपरस्यभेदेसचिवःशुद्धइवाददेचबाणः॥१४॥

इतीति। तेनअर्जुनेनइतीत्थंविचिन्त्यवितर्क्यचापनामचापाख्यंप्रथमपौरुषचिह्नन्तस्यमुख्यायुधत्वादितिभावः। आलम्बेगृहीतम्। कर्म्मणिलिट्। अथपरस्यशत्रोर्भेदेविदारणेउपलब्धगुणोजातशक्तिःबाणस्तुप्राप्तमौर्विकश्चेतिशेषः। शुद्धोऽनृजुदिग्धत्वादिदोषरहितोवा। नकर्णिभेदैर्न्नोदिग्धैर्नाग्निज्वलिततेजसैरिति निषेधादन्यत्रोपदाशुद्धोनिर्म्मलचित्तइतियावत्। बाणःसचिवइवाददे। अत्रबाणसचिवयोःशब्दमात्रसाधर्म्यात्श्लेषालङ्कारःप्रकृतविषयइतिसर्वस्वकारःउपमैवेतिकेचित्॥१४॥ ❁ ❁ ॥ ❁ ❁ ॥ ❁ ❁ ॥ ❁ ❁ ॥ ❁ ❁ ॥ ❁ ❁ ॥ ❁ ॥

आनुभावेति। गुरुमहत्पूज्यंचस्थिरत्वात्सारवत्त्वादविसम्वादिअभङ्गमन्यप्रति

ष्ठितत्वादसत्वरहितं गुणवत् सज्यमन्यत्रौदार्यादिवद्धनुर्मित्रमिवञ्
निश्चयबुद्धिमता। अनुभावः प्रभावे च सतां च मतिनिश्चय इत्यमरः। धनञ्जये
न स्वबलव्यसनेऽपि तपसा क्षीणबलेऽपि। अन्यत्र स्वं धनं तदेव बलं तस्य ह्रासेऽपि पीड्य
मानमवरुध्यमानं आकृष्यमाणं सन्मित्रमिवानतिं नम्रतामानुकूल्यं च प्रपेदे। अल
ङ्कारस्तु पूर्ववत्॥ १५॥ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀॥
प्रविकर्षेति। तदानीं तस्मिन्काले महेषौ गाण्डिवं अर्जुनधनुरधिरोहति सति।
कपिध्वजस्य गाण्डीवगाण्डिवौ पुन्नपुंसके इत्यमरः। गाण्डिजाकान्संज्ञायामिति व

अनुभाववता गुरु स्थिरत्वादविसम्वादि धनुर्धनञ्जयेन। स्व
बलव्यसनेऽपि पीड्यमानं गुणवन्मित्रमिवानतिम्प्रपेदे॥ १५॥
प्रविकर्षनिनादभिन्नरंध्रः पदविष्टम्भनिपीडितस्तदानीं। अ
धिरोहति गाण्डिवं महेषौ सकलः संशयमारुरोह शैलः॥ १६॥
ददृशेऽथ सविस्मयं शिवेन स्थिरपूर्णायतचापमण्डलस्थः। रचि
तस्त्रिसुरापुरन्विधातुं वधमात्मैव भयङ्करः परेषाम्॥ १७॥

प्रत्ययः। प्रविकर्षेण ज्याविकर्षणयोनिनादस्तेन भिन्नरंध्रो विदारितगह्वरः तथा प
दविष्टम्भेन पादक्रमणेन निपीडितः नुन्नः सकलः समूलः शैलः संशयं जीवितसन्दे
हमारुरोह प्रापेत्यर्थः। अत्र शैलस्य संशयासम्बन्धेऽपि सम्बन्धकथनादतिशयो
क्तिरलङ्कारः॥ १६॥ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀॥
ददृश इति। अथ बाणसन्धानानन्तरं शिवेन स्थिरं निश्चलं पूर्णं च यथा तथा आय
ते आकृष्टे चापमण्डले तिष्ठतीति तथोक्तः चापमण्डलमन्तर्मध्ये यस्य स्थित इत्यर्थः। त्रि
सुराणां न तिस्रश्च तस्रू इति दीर्घप्रतिषेधः पुरां वधं संहारं विधातुं रचितः कल्पितः।

स्थानेविशेषेस्थापितइतियावत्।आत्मास्वयमेवपराणांभयानकोभयङ्करः।सो
ऽर्जुनःसविस्मयंस्वयन्ददृशेदृष्टःउपमालङ्कारः॥१७॥ ❀❀❀❀❀❀॥

अथापिनाकिवृत्तान्तमाह।विचकर्षेति।अथशम्भुश्चसंहितेषुउच्चैर्भृशंस्वरणा
स्कन्दनेनपदविष्टम्भेननामितःअधोनीतःअचलेन्द्रोयेनःसतथोक्तः।आयतभो
गःआकृष्टकायःवासुकिरेवज्यातस्यवदनमेवग्रन्थिस्तेनविमुक्तःउत्सृष्टोवह्निर्ये
स्यतद्धनुर्विचकर्षेतिस्वभावोक्तिः॥१८॥ ❀❀॥❀❀॥❀❀॥❀❀॥

सइति।सहसम्भूयार्थेअरिवधरूपप्रयोजनमभिधास्यतोःकरिष्यतोःअन्यत्रस

विचकर्षचसंहितेषुरुच्चैश्चरणास्कन्दननामिताचलेन्द्रः।ध
नुरायतभोगवासुकिज्यावदनग्रन्थिविमुक्तवह्निशम्भुः॥१८॥
सभवस्यभवक्षयैकहेतोःसितसप्तेश्चविधास्यतोःसहार्थे।रि
पुरापपराभवायमध्यंप्रकृतिप्रत्यययोरिवानुबन्धः॥१९॥
अथदीपितवारिवाहवर्त्मारववित्रासितवारणाददवार्य्यः।निप
पातजवादिषुःपिनाकान्महतोऽभ्रादिववैद्युतःकृशानुः॥२०॥

हार्थमभिधास्यतोरित्यर्थः।प्रकृतिप्रत्यययोःसहार्थंब्रूतइतिवचनात्।भवक्षयै
कहेतोःसंसारोच्छेदनिदानस्यभवस्यशिवस्यसितसप्तेरर्जुनस्यमध्यंरिपुर्वराहः।
यस्मात्प्रत्ययोविधीयतेसाप्रकृतिःधात्वादिःप्रत्ययःसनादिः।तयोर्मध्यमनुबन्धइ
त्संज्ञकोवर्णोयथाभूतंभूतिरित्यादौककारःसइवपराभवायलोपार्थमेवायंनतुस्थि
त्यर्थमित्यर्थः॥१९॥ **॥❀❀❀॥***॥❀❀❀॥***॥

अथेति।अथरिपोर्मध्यप्रवेशानन्तरन्दीपितंवारिवाहवर्त्मआकाशंयेनसअवार्य्यो
दुर्वारःइषुःशरःरववित्रासितवारणात्स्वघोषभीषितगजात्पिनाकात्।शिव

धनुषः। पिनाकोऽजगवन्धनुरित्यमरः। महान्ते भ्रान्तमेघात्विद्युतोयं वैद्युतः कृ
शानुरग्निरिव जवात्वेगादभिपपात आदधाव ॥ २० ॥
व्रजत इति। व्रजतो धावतोऽस्य बाणस्य वृहद्भ्यः पतत्रेभ्यः पक्षेभ्यः जन्म यस्य स त
थोक्तः कृततार्क्ष्योपनिपातवेगशङ्का गरुडागमभ्रमो येन सः। अत एव महोरगा
णां हृदयानि श्रोत्राणि च भिनत्तीति हृदयश्रोत्रभित्। समुद्राभ्राद्घ इति घत्वादे
वव्यभिचारात् श्रोत्रशब्दस्य पूर्वनिपातव्यभिचारः। प्रतिनादैः प्रतिध्वनिभिर्महान्
संमूर्च्छितो नादः। उत्पपात उत्थितः। अत्र नादस्य उरगहृदयभेदकत्वासम्बं
धेऽपि सम्बन्धकथनादतिशयोक्तिः। सा च तार्क्ष्यवेगभ्रमोत्थापितेति तयोरङ्गाङ्गिभा

व्रजतोऽस्य वृहत्पतत्रजन्मा कृततार्क्ष्योपनिपातवेगशङ्कः। प्र
तिनादमहान्महोरगाणां हृदयश्रोत्रभिदुत्पपात नादः॥२१॥
नयनादिव शूलिनः प्रवृत्तैर्मनसोऽप्याशुतरं यतः पिशङ्गैः। वि
दधे विलसत्तडिल्लताभैः किरणैर्व्योमनि मार्गणस्य मार्गः॥२२॥

वेन सङ्करः ॥ २१॥
नयनादिति। शूलिनो नयनात्प्रवृत्तैर्निर्गतैरिवेत्युत्प्रेक्षा। नेत्राग्निशिखाकल्पैरि
त्यर्थः। पिशंगैर्विलसत्तडिल्लताभैर्विद्युद्दामतुल्यैरित्युपमा। मनसश्चित्तादपि
आशुतरं शीघ्रतरम्। आशुशब्दात् अव्ययात्तरप्। अतः किमेत्तिङव्ययेत्यादिनाम्
प्रत्ययनिषेधः। क्लीबे शीघ्राद्यसत्त्वे स्यादित्यमरः। यतः गच्छतः। इणः शतृप्र
त्ययः। मार्गणस्य शरस्य। कदम्बमार्गणशरा इत्यमरः। किरणैर्व्योमनि आ
काशे मार्गः उल्कारेखाकारः पन्था। विदधे विरचित इति स्वभावोक्तिरलङ्कारः
॥ २२॥

अपयन्निति। पृषत्को बाणः। पृषत्कबाणविशिखा इत्यमरः। धनुषः पिनाकादपयन् निर्यन् गच्छन्नित्यर्थः। इणः शतृप्रत्ययः। शिवान्तिकस्थैर्नभश्चरैः अभिख्यया शोभया जिहानः शोभनं गच्छन्नित्यर्थः। ओहाङ् गताविति धातोः शानच्। अभिख्या नामशोभयोरित्यमरः। विवरे सीदन्तीति विवरे सदस्तैः विवरे सद्भिः अन्तरालवर्त्तिभिर्नभश्चरैः। सत्सूद्विषेत्यादिना क्विप्। तत्पुरुषे कृति बहुलमित्यलुक्। अथ वराहं विशन् प्रविशन् तदुपोढैस्तं वराहमुपोढैः प्रत्यासन्नैः। वहेः कर्त्तरि क्तः। नभश्चरैर्युगपद् ददृशे दृष्ट इति बाणवेगोक्तिः। अत्र पिनाकिनः क्रमणादिक्रियाविशिष्टस्य बाणस्य शिवान्तिकादिभिन्नदेशस्थनभश्चरकर्तृकदर्शनयौगप

अपयन्धनुषः शिवान्तिकस्थैर्विवरे सद्भिरभिख्यया जिहानः।
युगपद्ददृशे विशन्वराहन्तदुपोढैश्च नभश्चरैः पृषत्कः॥२३॥
स तमालनिभे रिपौ सुराणां घननीहार इवाविषक्तवेगः। भय
विप्लुतमीक्षितो नभस्थैर्जगतीं ग्राह इवापगां जगाहे॥ २४॥

द्यासम्बन्धेऽपि तत्सम्बन्धोक्तिमूलातिशयोक्त्या लोकोत्तरवेगप्रतीतेरलङ्कारेण वस्तुध्वनिः॥ २३॥

स इति। स बाणः तमालनिभे तमालप्रभे। सुराणां रिपौ वराहे घननीहारे सान्द्रतुहिन इव अविषक्तवेगोऽप्रतिबद्धवेगः। तथा नभस्थैः खेचरैर्भयेन विप्लुतं विह्वलं यथा तथा ईक्षितः सन् अपां सम्बन्धि वेग आपः अपां समूहो वा आपं आपेन गच्छतीति आपगा नदी तां। गृह्णातीति ग्राहो जलचर इति। विभाषा ग्रहः इति वक्तव्यात् णप्रत्ययः। स इव जगतीम्। जगती विष्टपे मह्यामिति वैजयन्ती। जगाहे विवेश अन्तर्हित इत्यर्थः॥ २४॥

अथार्जुनबाणप्रयोगमाह । सपदीति । सपदिशिवबाणपातसमयएवप्रियारू
पंआकृतिःपर्वाणिग्रन्थयोरेखारचनाअस्यसः । अंगुलिपक्षेपर्वलेखाःप्रसिद्धाः
लोहाग्रमयःफलन्तन्मुखमिवेत्युपमितसमासः । शितंलोहाग्रंमुखंयस्यसःकुपि
तस्यान्तकस्यमृत्योर्यातर्जनातस्याःअंगुलिःतर्जनागुलिःतर्जनीतस्याःश्रीरिवश्रीर्य
स्यसकपिध्वजेषुःअर्जुनबाणःप्राणभृतोव्यथयन्भीषयमाणःखंआकाशंआससाद
प्राप । उपमालङ्कारः ॥ २५ ॥
परमेति । परमास्त्रपरिग्रहेणदिव्यास्त्राधिष्ठानेनउरुमहदुल्काकृतिउल्काव
द्दीर्घायमाणमित्यर्थः । तेजोवनेषुविक्षिपन्विकिरन्सजवेनपतन्धावन्सबाणः

सपदिप्रियरूपपर्वलेखःशितलोहाग्रमुखःखमाससाद । कुपि
तान्तकतर्ज्जनाङ्गुलिश्रीर्व्यथयन्प्राणभृतःकपिध्वजेषुः ॥ २५ ॥
परमास्त्रपरिग्रहोरुतेजःस्फुरदुल्काकृतिविक्षिपन्वनेषु । स
जवेनपतन्परःशतानाम्पततांव्रातइवारवंवितेने ॥ २६ ॥

शतात्परेपरःशताःतेषांशताधिकसंख्यकानामित्यर्थः । परःशताद्यास्तेयेषाम्परा
सख्याशताधिकेत्यमरः । पञ्चमीयोगविभागात्समासःराजदन्तादिषुपरमित्युप
सर्जनस्यशतशब्दस्यपरनिपातः । पारस्करादित्वात्सुडागमः । पतताम्पतत्रि
णाम् । पतत्पत्ररथाण्डजाइत्यमरः । व्रातःसमूहइवआरवंवितेनेविस्तीर्णंचक्रे
इत्यर्थः ॥ २६ ॥
अविभावितेति । अतिरंहसाअतिवेगेनअविभावितेअलक्षितेनिष्क्रमंगाण्डीवा
न्निःसरणम्प्रयाणमन्तरागमनंचयस्यसः । तथाशमितायामःसंक्षिप्तदैर्घ्यइवस्थि
तइत्युपातवेगगुणनिमित्तादैर्घ्यगुणाभावोत्प्रेक्षा । सशरः । सहनुसंहवाचित्व

वृत्त्येति शेषः। चित्तवृत्तेः पूर्वतरं तु प्रागेव बाण उभयत्रापि लक्ष्ये पतित्वेति शेषः। अथवाऽपतित्वा नु लक्ष्ये इति शेषः। लक्ष्यभेदञ्चकार। अत्रानुपात्तवेगगुणनिमित्तात् बाणस्य चित्तवृत्त्या सह पाते पूर्वपतनाभावोत्प्रेक्षा तिस्रः उत्तरोत्तरोत्कर्षेण वेगातिशयव्यञ्जिका इत्यलङ्कारेण वस्तुध्वनिः ॥ २७ ॥ ॥

स इति। जयहेतुः स शरो वृषध्वजसायकावभिन्नं शिवशरविद्धं एषणीयं वेद्धुमिति शेषः। इषेरिच्छार्थादनीयर् प्रत्ययः। लघु अक्लेशं यथा तथा साधयितुम्। सार्थेणाजन्तानुमुन्। प्रतिकायं वैरिशरीरम्। यथाविधिना दैवेनोदीरितम्फलसा

अविभावितनिष्क्रमप्रयाणः शमितायामइवातिरंहसा सः ।
सह पूर्वतरं नु चित्तवृत्तेरपतित्वा नु चकार लक्ष्यभेदम् ॥ २७ ॥
स वृषध्वजसायकावभिन्नञ्जयहेतुः प्रतिकायमेषणीयम् । लघु
साधयितुं शरः प्रसेहे विधिनेवार्थमुदीरितम्प्रयत्नः ॥ २८ ॥
अविवेकवृथाश्रमाविवार्थं क्षयलोभाविव संश्रितानुरागम् । वि
जिगीषुमिवानयप्रमादाववसादं विशिखौ विनिन्यतुस्तम् ॥ २९ ॥

धनतया प्रतिपादितमर्थयोगादिकम्प्रयत्नः पुरुषव्यापार इव। प्रसेहे शशाक। उपमालङ्कारः ॥ २८ ॥ ॥

अविवेक इति। अविवेकः अनन्तरानभिज्ञत्वं वृथाश्रमो निष्फलप्रयासः तौ अर्थं धनमिव अस्थानविनियोगहेतुत्वादनयोर्धनहानिकरत्वमिति भावः। क्षयोऽनुपचयो लोभोऽदातृत्वन्तौ संश्रितानामनुजीविनां अनुरागमिव। अकिञ्चित्करे स्वामिनि अनुरागस्यानवस्थानादिति भावः। विशिखौ शिवार्जुनबाणौ तं वराहं करणशैथिल्यं निन्यतुः नीतवन्तौ। नयतिर्द्विकर्म्मकः। मालोपमेयम् ॥ २९ ॥ ॥

अथेति । अथसवराहःदीर्घतरन्तमोदीर्घनिद्रांप्रवेक्ष्यन्मरिष्यन्नित्यर्थः । सह
सारुग्णेतिरुग्णरयोभग्नवेगःसंभ्रमेणभ्रान्त्या । संभ्रमोभ्रान्तिहावयोरितिविश्वः । उ
ष्णरश्मिंउर्व्यांनिपतन्तमिवमेनेधराञ्चवलयीभूताःतरवोयस्यास्तान्तथामेने
बभ्रामेत्यर्थः । स्वभावोक्तिरलङ्कारः ॥ ३० ॥ * * * * * ॥
सइति । क्षितिङ्गतःक्षितौपतितःउष्णेनप्रत्यग्रत्वात्शोणितेनार्द्रो । क्षुतःखुराणा
न्दंष्ट्रयोश्चाग्राणान्निपातेनाघातेनदारितोश्मापाषाणःयेनसः । किञ्चक्षणमीइ
क्षितेन्द्रसूनुःस्वार्थविघातरोषादितिभावः । अतएवविहितःअमर्षोगुरुःक्रोधा

अथदीर्घतरन्तमःप्रवेक्ष्यन्सहसारुग्णरयःससंभ्रमेण । नि
पतन्तमिवोष्णरश्मिमुर्व्यांवलयीभूततरुन्धराञ्चमेने ॥ ३० ॥
सगतःक्षितिमुष्णशोणितार्द्रोखुरदंष्ट्राग्रनिपातदारिताश्मा । अ
सुभिःक्षणमीक्षितेन्द्रसूनुर्विहितामर्षगुरुध्वनिर्निरासे ॥ ३१ ॥
स्फुटपौरुषमापपातपार्थस्तमथप्राज्यशरःशरंजिघृक्षुः । न
तथाकृतवेदिनांकिरिष्यन्प्रियतामेतियथाकृतावदानः ॥ ३२ ॥

द्धेतोःध्वनिःक्रन्दितंयेनसतथोक्तःसवराहःअसुभिःप्राणैर्निरासेनिरस्तःत्यक्तइत्यर्थः
। अस्यतेःकर्म्मणिलिट् । इयञ्चस्वभावोक्तिः ॥ ३१ ॥ ॥
स्फुटेति । अथवराहपातानन्तरम्पार्थःप्राज्यशरःप्रभूतशरःसन्नपीत्यर्थः । प्रभूत
म्प्रचुरंप्राज्यमित्यमरः । स्फुटपौरुषंव्यक्तविक्रमंवराहभेदिनंशरंजिघृक्षुःगृही
तुमिच्छुःग्रहेःसन्नन्तादुप्रत्ययः । आपपातआधावतिस्म कृतज्ञतयाशरग्रहणन्नतु
लोभादित्यर्थः । ननुअन्योपिउपकर्त्तारएवकिमत्रादरस्तत्राह- । कृतवेदिनां
कृतज्ञानांकृतावदानःकृतकर्म्मा । अवदानंकर्म्मवृत्तमित्यमरः । यथाप्रियतामे

तितथाकरिष्यन्नुपचरिष्यन्नप्रियतामेतिकृतकरिष्यमाणयोःकृतम्बलीयइतिभा
वः ॥ ३२ ॥

अथयुग्मेनाह । उपकारइति । असतिनीचेप्रयुक्तःउपकारइवमृगेस्थितिमप्रा
प्यप्रणाशमदर्शनङ्गतइत्युपमा । तथाकृतशक्तिःकृतपौरुषःगुरुत्वाल्लोहभरान्मह
त्वात् अधोमुखोनम्रमुखः । अतएवआत्मपौरुषेणजनितव्रीडइवस्थितइत्युत्प्रे
क्षा । तथाप्रतीयतइत्यर्थः ॥ ३३ ॥

सइति । उत्तमांसरुचंकान्तिङ्कीर्तिमिवदधादनइत्युत्प्रेक्षा । किन्त्वविचिन्त्यस

उपकारइवासतिप्रयुक्तःस्थितिमप्राप्यमृगेगतःप्रणाशम् । कृ
तशक्तिरधोमुखोगुरुत्वाज्जनितव्रीडइवात्मपौरुषेण ॥ ३३ ॥
ससमुद्धरताविचिन्त्यतेनस्वरुचङ्कीर्तिमिवोत्तमान्दधानः । अ
नुयुक्तइवस्ववार्त्तमुच्चैःपरिरेभेनुभृशंविलोचनाभ्याम् ॥ ३४ ॥
तत्रकार्मुकभृतम्महाभुजःपश्यतिस्मसहसावनेचरम् । सन्नि
काशयितुमग्रतःस्थितंशासनंकुसुमचापविद्विषः ॥ ३५ ॥

वैथायाह्योयमितिविमृश्यसमुद्धरतातेनअर्जुनेनउच्चैःस्ववार्त्तस्वपाटवं । वार्त्तपा
टवमारोग्यम्भव्यंस्वास्थ्यमनामयमितियादवः । अनुयुक्तःपृष्टइत्युत्प्रेक्षा । आदरा
त्तथाप्रतीयतइत्यर्थः । प्रश्नोऽनुयोगःपृच्छाचेत्यमरः । सबाणोविलोचनाभ्यान्न
यनाभ्याम्भृशम्परिरेभेनुआलिङ्गितःकिमित्युत्प्रेक्षा । तेनात्यादरेणदृष्टइत्य
र्थः ॥ ३४ ॥

तत्रेति । तत्रप्रदेशेमहाभुजोऽर्ज्जुनः । कुसुमचापविद्विषःस्मरारेःशासनम्बध्य
माणमादेशंसन्निकाशयितुम्प्रकाशयितुन्निवेदयितुमितियावत् । अग्रतःस्थितंका

स्वीकृतं वनेचरं महत्सु कटिनिबद्धनिम्न । इष प्रभृतिरपि धूर्तवृत्तम् । एतत्
विहग्रयोद्धतानगाविविक्तसागा ॥ ३५ ॥ ** ॥ ** ॥
स इति । स वनेचरो महीपतेस्तनये राजपुत्रेऽर्जुने आत्मजातिसदृशीं किरातजात्य
नुरूपां किल । किलेति जातेरलीकतां द्योतयति । यतः परमार्थेन प्रथममेव सत्या
नतिं प्रयुज्य सान्त्वपूर्वं सामपूर्वकम् । सामसान्त्वमुभे समे इत्यमरः । अ
भिनीतिहेतुकं प्रिययुक्तिहेतुकं वचः । इत्थं वक्ष्यमाणप्रकारेण वक्तुमुपचक्रमे उद्यु
क्तवान् ॥ ३६ ॥
तत्र तावत् चतुर्भिरात्मानमाह । शान्ततेति । शान्तता बहिरिन्द्रियजयस्तेन विनययो

स प्रयुज्य तनये महीपतेरात्मजातिसदृशीं किलानतिम् । सा
न्त्वपूर्वमभिनीतिहेतुकं वक्तुमित्युपचक्रमे वचः ॥ ३६ ॥
शान्तता विनययोगि मानसं भूरि धाम विमलं तपः श्रुतम् । प्राह
ते नु सदृशी दिवौकसामन्ववायमवदातमाकृतिः ॥ ३७ ॥

गि अन्तरिन्द्रियजययुक्तं मानसं सम्प्राह । नु खलु । तथा भूरि बहु धाम तेजो यस्मिंस्तत्तपः कृ
तं विमलं सम्प्रदायशुद्धं श्रुतं प्राह । किञ्च । द्यौर्दिवि वा ओको येषां तेषां दिवौकसां
देवानाम् । पृषोदरादित्वात्साधुः । दिवं स्वर्गेऽन्तरिक्षे चेति विश्वः । सदृशी तु
ल्या आकृतिर्मूर्तिः अवदातं शुद्धं अन्ववायं वंशं सम्प्राह । वंशोऽन्ववायः सन्तान इत्यम
रः । शान्त्यादिभिर्लिङ्गैर्विनयादयोऽनुमीयन्ते । अन्यथा तादृशं स्यादिति भावः
॥ ३७ ॥
दीपित इति । मुनिरपि ऐश्वर्यरहितोपीत्यर्थः । अनुभावसम्पदा प्रभावातिशये
न दीपितः प्रकाशितः । गौरवेण महत्त्वेन महीभृतो गिरीन् लघयन् लघूकुर्वन् । त्वं

मिहाद्रौ शतमन्योरिदं शातमन्यवं ऐन्द्रं तस्येदमित्यण्प्रत्ययः । शतमन्युर्दिवस्पतिरित्यमरः । अधिपतेःकर्म्म आधिपत्यं त्रैलोक्यरक्षाधिकारः । ब्राह्मणादित्वात् ष्यञ्प्रत्ययः कारयन्निव इन्द्रेणेति शेषः । राजसे तस्याप्युपजीव्य इति प्रतीयसे निजमहिम्नेत्यर्थः ॥ ३८ ॥

तापस इति । विभोर्भावः विभुता तां विभुतां प्रभावमुपेयिवान् उपगतः । अत एव तापसोऽपि त्वं सर्वसम्पदामास्पदं स्थानमसि । आस्पदम्प्रतिष्ठायामिति निपातः । विभुतामेव समर्थयते । हि यस्माद्भवतो जनैर्विनापि एकाकिनोऽपीत्यर्थः । सचिवैर

दीपितस्त्वमनुभावसम्पदा गौरवेण लघयन्महीभृतः । रा
जसे मुनिरपीह कारयन्नाधिपत्यमिव शातमन्यवम् ॥ ३८ ॥
तापसोऽपि विभुतामुपेयिवानास्पदन्त्वमसि सर्वसम्पदाम् । दृ
श्यते हि भवतो विना जनैरन्वितस्य सचिवैरिव द्युतिः ॥ ३९ ॥
विस्मयः क इव वा जयश्रिया नैव मुक्तिरपि ते दवीयसी । ई
प्सितस्य न भवेदुपाश्रयः कस्य निर्जितरजस्तमोगुणः ॥ ४० ॥

न्वितस्येव अमात्यादियुक्तस्येव द्युतिस्तेजो दृश्यते अतः सर्वसम्पदास्पदं त्वं युक्तमित्यर्थः ॥ ३९ ॥

विस्मय इति । किञ्च । जयश्रिया हेतुना प्राप्तयापीति शेषः । क इव वा विस्मयः किमाश्चर्यं न कश्चिदित्यर्थः । विस्मयोऽद्भुतमाश्चर्यं चित्रमित्यमरः । अतो मुक्तिरपि ते न दवीयसी दूरतरा दुर्लभा न भवत्येव । स्थूलदूरेत्यादिना यणादिपरलोपपूर्वगुणश्च । निर्जितौ रजस्तमसी एव गुणौ येन स कस्य ईप्सितस्योपाश्रयः आस्पदन्न भवेत् इत्यर्थः ॥ ४० ॥

अथागमप्रयोजनमुपालम्भमुखेनाह । ह्रेपयन्निति । त्विषा तेजसा अहिमतेजसमुष्णतेजसं ह्रेपयन् लज्जयन् उपपन्नपौरुषः सम्भावितपराक्रमः सप्रविद्धसंवराहभेदिनं कृतोपकारमित्यर्थः । इमं त्वत्करगतं अस्मदधिपस्य सायकं शरं हर्तुं नार्हसि ॥ ४१ ॥ ॥

अनर्हत्वमेवाह । स्मर्यत इति । उत्तमैर्नृभिः सत्पुरुषैः मन्वादिभिः तनुभृतां शरीरिणां सनातनं नित्यं न्याय्यं न्यायादनपेतमाचरितमाचारः । स्मर्य्यते कर्तव्य इति शेषः न त्वनाचार इत्यर्थः । अथाप्यनाचारेण दोषमाह । ध्वंसत इति । भवानिव दृ

ह्रेपयन्नहिमतेजसं त्विषा स त्वमित्थमुपपन्नपौरुषः । हर्तुम
र्हसि वराहभेदिनं नैनमस्मदधिपस्य सायकम् ॥ ४१ ॥
स्मर्य्यते तनुभृतां सनातनं न्याय्यमाचरणमुत्तमैर्नृभिः । ध्वं
सते यदि भवादृशस्ततः कः प्रयातु वद तेन वर्त्मना ॥ ४२ ॥
आकुमारमुपदेष्टुमिच्छवः सन्निवृत्तिमपथान्महापदः । योग
शक्तिजितजन्ममृत्यवः शीलयन्ति मुनयः सुशीलताम् ॥ ४३ ॥

श्यन्ते भवादृशाः ततस्तदाचारात् ध्वंसते भ्रंश्यते यदि तदा तेन वर्त्मना न्यायमार्गेण कः प्रयातु गच्छतु वद कथय न कोऽपीत्यर्थः । तथा च सन्मार्ग एव शीलं कुर्य्यादिति भावः ॥ ४२ ॥ ॥

आकुमारमिति । किञ्च । योगशक्त्या आत्मज्ञानमहिम्ना जिता जन्ममृत्यवो यैस्ते यतयः योगिनः । आकुमारेभ्यः आकुमारं कुमारादारभ्य इत्यर्थः । आङ् मर्यादाभिविध्योरित्यव्ययीभावः । महत्य आपदो यस्मिन् तस्मात् । महापदो महानर्थहेतोरित्यर्थः । अपथादमार्गात् । पथो विभाषेति निषेधविकल्पात् समासान्तः । अपथं नपुंसकम्

। सन्निवृत्तिमपगमं । उपदेष्टुमिच्छवः सन्तः सुशीलतां सद्वृत्तताम् । भावे तल् । शीलं स्वभावे सद्वृत्ते इत्यमरः । शीलयन्ति अभ्यस्यन्ति । अतो मुनिभिर्न त्याज्यं शीलमित्यर्थः ॥ ४३ ॥ ॥

न केवलं सौशील्यादनर्थनिवृत्तिमात्रं । किन्त्वर्थप्राप्तिरपीत्याह । निष्ठतामिति । तपसि निष्ठतान्तपोनिष्ठानान्धर्म्मार्थिनामित्यर्थः । पुण्यन्धर्म्ममासजन् सम्पादयन् । स्याद्धर्म्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृष इत्यमरः । सुखैषिणां सुखार्थिनां सम्पदः सुखसाधनभूतान् अर्थान् । अनुगुणयन् अनुकूलयन् । अर्थकामयोरपि हेतुभूत इत्यर्थः । तथा योगिनां विमुक्तये अपवर्गाय परिणमन् संपद्यमानो

निष्ठतान्तपसि पुण्यमासजन्सम्पदोनुगुणयन्सुखैषिणां । यो
गिनाम्परिणमन्विमुक्तये केन नास्तु विनयः सताम्प्रियः ॥ ४४ ॥
नूनमत्रभवतः शराकृतिं सर्वथायमनुयाति सायकः । सोय
मित्यनुपपन्नसंशयः कारितस्त्वमपथे पदं यया ॥ ४५ ॥

विनयः सौशील्यं केन हेतुना सतां प्रियो नास्तु । सम्भावनायां लोट् । सर्वथा विनय एव चतुर्वर्गसाधन इत्यर्थः । अतस्त्वया नास्मत्स्वामिशरैः चौर्य्यं कार्य्यमिति तात्पर्य्यम् ॥ ४४ ॥ ॥

अथवा किं भवादृशेष्वन्यसम्भावनया भ्रान्तिरपि सम्भाव्यत इति मृदूक्तिमवलंब्याह । नूनमिति । अयं अस्मदीयः सायको अत्रभवतः पूज्यस्येत्यर्थः । पूज्यस्तत्रभवानत्रभवानिति सज्जनः । अन्येभ्योपि दृश्यत इति सार्वविभक्तिकः तसिल्प्रत्ययः सुप्सुपेति समासः । शराकृतिं सर्वथा रूपेण रेखादिना च सर्वप्रकारेण अनुयाति अत्यन्तमनुकरोतीत्यर्थः । नूनमिति वितर्क्के । यया आकृत्या त्वमनुपपन्नसंशयोऽत्यन्तसादृ

श्यादनुत्पन्नतदीयत्वसन्देहः। संशयोयमितियःस्वकीयःसएवायमितिभ्रान्ति
रेवेत्यर्थातेइतिशेयः। अपथेअमार्गेशरहरणरूपेपदङ्कारितःनिधापितइत्य
र्थः। हृक्रोरन्यतरस्यामित्यणिकर्तुःकर्मणण्यन्तेकर्तुश्चकर्मेतितत्रैवाभिहितेकर्त
रिक्तः ॥ ४५ ॥ ***

पुनरपिस्तेयमेवनिरूपयन्दोषान्तरमापादयति। अन्यदीयेति। चेतसासहव
र्ततेइतिसचेतास्तस्यअन्यदीयविशिखेविषयेयदाहृतमाहरणम्भावेक्तः। तस्मि
न्अन्यदीयविशिखस्याहरणेइत्यर्थः। नकेवलंनिःस्पृहस्यकेवलन्निःस्पृहेणैवन
भवितव्यङ्किन्तुपरनिवर्हणम्परेणप्रहृतंमृगन्निघ्नतःप्रहरतस्तेनिघ्नताव्रीडितव्यमित्यर्थः

अन्यदीयविशिखेनकेवलंनिस्पृहस्यभवितव्यमाहृते। नि
घ्नतःपरनिवर्हितंमृगंव्रीडितव्यमपितेसचेतसः ॥ ४६ ॥
सन्ततन्निशमयन्तउत्सुकायैःप्रयान्तिमुदमस्यसूरयः। की
र्तितानिहसितेपितानियंव्रीडयन्तिचरितानिमानिनम् ॥ ४७ ॥

। कृत्यानाङ्कर्तरिवेतिषष्ठी। व्रीडितव्यंलज्जितव्यमपि। भावेतव्यप्रत्ययःसम्प्रति
तुल्ययापरविद्धंमृगम्बिध्यापितव्रीड्यते। प्रत्युतस्तेयञ्चक्रियतइत्यहोमहत्साहस
मित्यर्थः। मृगमित्यत्रशेषत्वाविवक्षणात्। जासिनिप्रहरणाटक्राथपिषांहिंसा
र्थामितियष्ठीनभवतिशेषाधिकारात्। प्रनिहरणेत्यत्रसंघातनिगृहीतविपर्य्यस्ता
नांग्रहणात् ॥ ४६ ॥ ***

अथास्मिन्कृतघ्नताभियोगंस्वीयोपकारत्वंवर्णयितुंविकत्थनदोषस्तावद्युग्मेनप
रिहरन्नाह। सन्ततमित्यादि। सूरयःविद्वांसःअस्यस्वामिनःसम्बंधिभिःयैश्च
रितैःकरणभूतैःसन्ततंसततं। उत्सुकाःसोत्कण्ठाःसन्तोनिशमयन्तः

शवन्तःमुदम्प्रयान्ति। अत्रचरितानांमुत्प्राप्तौशाट्करणत्वमयोतनिशमनकर्म्मेच मितिविवेकः। तानिचरितानिहसितेपिपरिहासेपिकीर्त्तितानिपरैरुच्चारितानि सन्तियंमानिनंव्रीडयन्तिमानित्वात्व्रीडानतुचरितदोषादिति। तेषामलङ्कारदो षत्वादितिभावः। स्वगुणश्रवणादेवयःसलज्जोभवतिसकथंस्वगुणंख्यापयेदित्यु त्तरेणसम्बन्धः॥४७॥ ○○○✳○○○✳○○○✳○○○✳॥

अन्येति। अधृष्टतयाविकत्थनशीलतयाजडःमुग्धःअविकत्थनइत्यर्थः। सोस्म त्वामीअन्यदोषम्परंवगुणमिवस्वकीयङ्गुणङ्कथंख्यापयेत्। प्रकटयेत्आत्मप्रशं सांपरगर्हामिववर्जयेदितिभावः। तथापिकार्य्यवत्तयाकर्म्मार्थितयेत्यर्थः। स्वगु

अन्यदोषमिवसस्वकंगुणंख्यापयेत्कथमधृष्टताजडः। उच्य
तेसखलुकार्य्यवत्तयाधिग्विभिन्नबुधसेतुमर्थिताम्॥४८॥ यु
ग्मं॥ दुर्वचन्तदथमास्मभून्मृगस्त्वय्यसौयदकरिष्यदोजसा
। नैनमाशुयदिवाहिनीपतिःप्रत्यपत्स्यतशितेनपत्रिणा॥४९॥

णमुच्यते। खलुकार्य्यवत्तयाकार्य्यार्थिनःकुतोगर्वइतिभावः। विवर्णइवभिन्नबुध सेतुमतिक्रान्तसुजनमर्यादामर्थितांयाचनान्धिक्निन्द्यामित्यर्थः। विवर्णइवअ यमपीत्थंविकत्थयितुम्प्रवृत्तइतिभावः। धिङ्निर्भत्सननिन्दयोरित्यमरः। अभि सर्वतसोःकार्य्याधिगुपर्यादिषुत्रिषु। द्वितीयाम्रेडितान्तेषुततोन्यत्रापिदृश्यतेइ तिद्वितीया॥४८॥ ○✳○✳○✳○✳○✳○✳○✳○✳○॥

सम्प्रतिस्वकृतोपकारंलक्षयति। दुर्वचइति। वाहिनीपतिःसेनापतिःअस्मत्स्वा मीशितेनपत्रिणाशरेणएनंमृगंआशुप्रत्यपत्स्यत। यदिनाभियुञ्जीतचेत्असौमृ गःत्वामोजसाबलेनत्वयिविपर्ययेयत्। अकरिष्यत्यदनिष्टंकुर्य्यात्ततदुर्वचंदुर्वाच्यं सार्थिनः।

अमङ्गलतया वक्तुन्नशक्यते तदनिष्टमथानन्तरं अपि मास्मभूत् इति सौहार्द्रं कथनन्तदुपेक्षणे वमृगस्त्वां हन्यादितिभावः । लिङ्निमित्ते ऌट्ङ् क्रियातिपत्तौ विति कर्णेतेः पद्यते ऌङ् ॥ ४९ ॥ ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ ॥

ननु मयैव हतो मृगो न तु सेनापतिना तत्राह । क इति । हरितुरङ्गमायुधं इन्द्रायुधात्तद्वत् स्थेयसीं स्थिरतरां अकुण्ठतामित्यर्थः । स्थिरशब्दादियसुन् प्रियस्थिरेत्यादिना स्थादेशः । अङ्गसंहतिं अवयवसंघातन्दधतन्धारयन्तम् । वेगवत्तरन्दुर्वारवेगम् । इमं दंष्ट्रिणन्वराहञ्चमूपतेः किरातवाहिनीपतेर्ऋते चमूपतिं विना । अन्यारादित्यानापञ्चमी । को नु को वा शरेण एकेनेतिभावः । हन्तुं अर्हति न कोपी

कोन्विमं हरितुरङ्गमायुधस्थेयसीन्दधतमङ्गसंहतिम् । वेगवत्तरमृते चमूपतेर्हन्तुमर्हति शरेण दंष्ट्रिणम् ॥ ५० ॥
मित्रमिष्टमुपकारि संशये मेदिनीपतिरयन्तथा च ते । तं विरोध्य भवता निरासि मा सज्जनैकवसतिः कृतज्ञता ॥ ५१ ॥

त्यर्थः ॥ ५० ॥ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ॥

अस्तु स एव मृगस्य हन्ता ततः किमत आह । मित्रमिति । तथा च तस्यैव मृगहन्तृत्वे सतीत्यर्थः । अयं मेदिनीपतिः किरातभूपतिः ते तव संशये प्राणसङ्कटे उपकारि उपकारकारकं इष्टं मित्रन्ततोपि किन्तत्राह । तमिति । तं मित्रभूतं विरोध्य सज्जनैकवसतिः भवादृशसुजनमात्राधारा कृतज्ञता उपकारवेदित्वम्मा निरासि न निराक्रियताम् । अन्यथा जगति कृतज्ञत्वे अस्तं याते कृतघ्नता च ते भवेदित्यर्थः । अस्यतेः कर्मणि णिचि मा ङि लुङ् ॥ ५१ ॥ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ॥

ननु सर्वस्यार्थमूलत्वात्स एवास्तु किं मित्रेणेत्याशंक्य मित्रस्य सर्वाधिक्यं युग्मेनाह । ल

ध्यमिति। जिगीषतां जेतुमिच्छतां जयतेः सन्नन्ताच्छतृप्रत्ययः। दुर्लभाः कृच्छ्रेणा पि लब्धुमशक्याः असुरक्ष्यभूतयः रक्षितुमशक्यमहिमानः। तथापि नित्यं रक्षणा दिक्लेशवहा इति भावः। अन्तविरसा गत्वर्य्य इत्यर्थः। लभ्यं तदिति लाभाः अर्थास्ते षां सम्पदः। एकसुहृत्तेन एकोपकारेण लभ्यं सुलभं न तु दुर्लभं रक्षितारं अनुर क्ष्यं स्वन्तं शुभावसानं न त्वन्तविरसं मित्रलाभं अनु मित्रलाभाद्धीनानि निकृष्टानीत्यर्थः। हीन इत्यनोः कर्मप्रवचनीयसंज्ञा तद्योगे द्वितीया। अत्रोपमेयस्य मित्रलाभस्योप मांतरम्प्रत्याधिक्याभिधानाद्व्यतिरेकालङ्कारः॥ ५२॥ ॥
चञ्चलमिति। किञ्च। वसु धनं नितान्तं चञ्चलं मेदिनीमप्युन्नताः प्रबलाः अरात

लभ्यमेकसुहृतेन दुर्लभा रक्षितारमसुरक्ष्यभूतयः। स्वन्त
मन्तविरसा जिगीषतां मित्रलाभमनुलाभसम्पदः॥ ५२॥
चञ्चलं वसु नितान्तमुन्नता मेदिनीमपि हरन्त्यरातयः। भूध
रस्थिरमुपेयमागतं मावमंस्थाः सुहृदं महीपतिम्॥ ५३॥

यो हरन्ति। मित्रन्तु न तथेत्याह। भूधर इति। भूधरवत् स्थिरं उपेयं अन्विष्यग न्तव्यमागतं स्वतः प्राप्तमपि महीपतिं सर्वधुरीणमित्यर्थः। सुहृदं मित्रं मावमंस्था मा वज्ञासीत्। भवानिति शेषः। अन्यस्लोकगतो भवच्छब्दो विभक्तिपरिणामेनात्र द्रष्टव्यः। अन्यथा मध्यमपुरुषः स्यात्। मन्यतेः कर्त्तरि माङि लुङ्। अलङ्कारस्तु व्यतिरेक एव भूधरस्थिरमित्युपमासङ्गतिसङ्करः॥ ५३॥ ॥
ननु मुमुक्षोः किं मित्रसंग्रहेण तत्राह। जेतुमिति। भवता जेतुं जयार्थमेव तपस्यते त पश्चर्य्यते। कर्मणो रोमन्थेत्यादिना चरणे क्यङ् ततो भावे लट्। कुतः मुमुक्षवः मो क्षार्थिनः। आयुधानि न दधते न धारयन्ति। अतो मित्रसंग्रहः कार्य्य इति भावः। त

थापि किमभवत्तत्राह । प्राप्स्यतइति । महीभृतां सह सङ्गेन तपःफलं सकलमुत्तमं प्राप्स्यते भूतेनैवं समग्रमेवान्वयेऽभ्युदयः फलं भविष्यतीत्यर्थः ॥ ५४ ॥ ❁ * ❁ ॥

तर्हि कि मन्नः कुत्रोपयुज्यते तत्राह । वाजीति । अस्य भूपतेः वाजिभूमिरश्वाकरः इभराजानां काननं तज्जो त्पत्तिस्थानं भूरिशो रत्ननिचयाश्च सन्तीति शेषः । नन्वीदृ ग्गाढ्यः किमेकस्मै काञ्चनपत्रकायसर्वाय कर्तृ हायनेतत्राह । अस्य काञ्चनेन सौवर्णेन पत्रिणाशरेण किमिव न किञ्चित्प्रयोजनमस्तीत्यर्थः । परन्तु केवलं विलङ्घनं व्यतिक्रममसहते । नायं शरलुब्धः किन्त्वाक्षेपासहिष्णुरित्यर्थः । अत्र पूर्वार्द्धे समृ

[illegible]

जेतुमेव भवता तपस्यते नायुधानि दधते मुमुक्षवः । प्राप्स्य
ते च सकलं महीभृता सङ्गतेन तपसः फलं त्वया ॥ ५४ ॥
वाजिभूमिरिभराजकाननं सन्ति रत्ननिचयाश्च भूरयः । का
ञ्चनेन किमिवास्य पत्रिणा केवलं न सहते विलङ्घनम् ॥ ५५ ॥
सावलेपमुपलिप्सिते परैरभ्युपैति विकृतिं रजस्यपि । अर्थित
स्तु न महान्समीहते जीवितुं किमु धनं धनायितुम् ॥ ५६ ॥

[illegible]

द्धिमद्वस्तुवर्णनादुदात्तालङ्कारः ॥ ५५ ॥ ❁ ❁ ॥ * * ॥ ❁ ❁ ॥ * * ॥

नन्वीदृग्लुब्धः किमुपकर्तान तत्राह । सावलेपमिति । महानयं रजस्यपि धूलावपि परैः सावलेपं सगर्वं उपलिप्सिते उपलब्धुमिष्टे जिघृक्षिते सति विकृतिमभ्युपैति । प्रकुप्य तीत्यर्थः । अर्थितो याचितस्तु जीवितं धनायितुं धनीकर्तुं रक्षितुं कथं जन्तानुमन्तं । न समीहते नोत्सहते । जीवितं यथात्मनो नेच्छति किन्त्वर्थिने प्रयच्छतीत्यर्थः । तर्हि ध नं किमु धनमात्मनः एधितुं धनायितुमिति विग्रहः । अत्र इच्छामात्रमर्थः । अन्यथाऽध नमित्यनेन पौनरुक्त्यं स्यात् । सुपआत्मनः क्यच् । अशनायोदन्यधनाया बुभुक्षा पि

पास गङ्गे ष्विति निपातनादाकारः ॥ ५६ ॥ * * ॥ ० ० ॥ * * ॥ ० ० ॥

उक्तनिगमयति त तदिति । ततस्मात्तदीयविशिखस्य अतिसर्जनात्प्रयोगात् वां युवयोः । षष्ठी चतुर्थी द्वितीयास्थयोर्वानाविति वामादेशः । राघवश्च वृत्रराजयोः रामसुग्रीवयोरिवयद्दृच्छयादैवात् आगतं गुरु महत् युक्तमनुरूपं इतरेतराश्रयमन्योन्यविषयं प्रेम सख्यमस्तु ॥ ५७ ॥ ० ० ॥ * * ॥ ० ० ॥ * * ॥ ० ० ॥

ननु शरत्वोधान्मिथ्याभियुज्यसेइत्याह । नेति । त्वमन्दतं मिथ्याभियोक्तुं अभ्याख्यातुं अर्होर्थसहत्वात् द्विकर्मकता । मिथ्याभियोगोभ्याख्यानमित्यमरः । नेघ्यसेनेष्टो

[illegible]

तत्तदीयविशिखातिसर्जनादस्तु वां गुरु यदृच्छयागतम् ।
राघवप्लवगराजयोरिव प्रेमयुक्तमितरेतराश्रयम् ॥ ५७ ॥
नाभियोक्तुमनृतं त्वमिष्यसे कस्तपस्विविशिखेषु चादरः । स
न्ति भूभृति शरा हि नः परे ये पराक्रमवसूनि वज्रिणः ॥ ५८ ॥
मार्गणैरथ तव प्रयोजनं नाथसे किमु पतिं न भूभृतः । त्वद्वि
धं सुहृदमेत्य सोऽर्थिनं किं न यच्छति विजित्य मेदिनीम् ॥ ५९ ॥

सि कुतः तपस्वी मुनिः शोच्यश्च । मुनिः शोच्योतपस्विनाविति शाश्वतः । तस्य विशिखेषु कः आदरः अवस्थानकाचिदित्यर्थः । हि यस्मात् नः अस्माकं भूभृतिशैलेऽपरे अन्येपि शराः सन्ति ये शरावज्रिणः शक्रस्य पराक्रमवसूनि पराक्रमधनानि शौर्यसर्वस्वभूताइत्यर्थः । वज्रिय इत्यनवज्राद्यतिरिच्यत इति सूच्यते । अत्र शरेषु पराक्रमसाधनेषु पराक्रमरूपेण वस्तु व्यज्यते ॥ ५८ ॥ ० ॥ * ॥ ० ॥ * ॥ ० ॥ * ॥

अथ नेशरसुपेक्षा चेत्तर्हि तयोच्यतामित्याह । मार्गणैरिति । अथ तत्तव मार्गणैः शरैः प्रयोजनं चेत् तर्हि भूभृतो गिरेः पतिम् प्रभुं किमुन नाथसे किमिति न याचसे । नाथृ

नाथृयाञ्चोपतापैश्वर्य्यौशीःयुङितिधातोर्लिट् । याञ्चाभङ्गशङ्काकार्यैत्यनञ्चाह । घ
टितिं । सोऽस्मन्स्वामीतवैवंविधाप्रकारोयस्यतन्त्वद्विधन्तादृशंमहानुभावमित्यर्थः ।
तथापिसुहृदंमित्रभूतमर्थिनमेत्यलब्धामेदिनींविजित्यनयच्छतिनददाति
किन्तुद्रास्यत्येवकिम्पुनःशरानितिभावः ॥ ५९ ॥ ॥ ॥ ॥ ॥ ॥
यदुक्तन्त्वद्विधमित्यादितत्रोपपत्तिमाह । तेनेति । तेनकारणेनसूरिर्विद्वानु
तस्यैवोपकारिताधनस्तुंप्रकारकत्वमात्रधनः । सकिरातभूपतिः । याचितं याञ्चा
वृथाव्यर्थंकर्तुन्नेच्छति । कुतःयत्येनकारणेनसीदतांक्लिश्यतांअर्थिनाम्प्रणयभ
ङ्गवेदनांयाञ्चाभङ्गदुःखंस्वयंअनुभवन्निववेदवेत्ति । अतोनवैफल्यशङ्काकार्यै

तेनसूरिरुपकारिताधनःकर्तुमिच्छतिनयाचितंवृथा । सी
दतामनुभवन्निवार्थिनांवेदयत्प्रणयभङ्गवेदनाम् ॥ ६० ॥
शक्तिरर्थपतिषुस्वयंग्रहम्प्रेमकारयतिवानिरत्ययम् । कार
णद्वयमिदन्निरस्यतःप्रार्थनाधिकबलेविपत्फला ॥ ६१ ॥

त्यर्थः ॥ ६० ॥ ** ** ॥

ननुस्वयंग्राहिणःकिंय्याँञ्चादैन्यन्तत्राह । शक्तिरिति । अर्थपतिषुविषयेशक्तिः
सामर्थ्यंस्वयंग्रहंस्वाम्यनुज्ञांविनाग्रहणंकारयतियद्वानिरत्ययंअपराधेपिअविका
रिप्रेमकर्तृस्वयंग्रहंकारयति । प्रबलःप्रियोवापरस्यधनंस्वयंगृह्णातीत्यर्थः । अ
न्यथादोषमाह । इदम्पूर्वोक्तकारणद्वयंनिरस्यतःत्यजतपुंसइतिशेषः । अधि
कबलेप्रबलेविषयेप्रार्थनानतुधनजिघृक्षाविपत्फलाअनर्थफलकाअशक्तस्यापिप्रि
यस्यसतःप्रबलधनग्रहणाशाफणिशिरोमणिग्रहणसाहसवत्अनर्थायकल्पत
इत्यर्थः ॥ ६१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अथशस्त्रार्थसम्पत्याशक्तत्वाभिमानस्तत्राह । अस्त्रवेदमिति । इहजगतिताप
सेषुतपस्विनांमध्ये । यतश्चनिर्द्धारणमितिसप्तमी । जमदग्नेरपत्यम्पुमान्जाम
दग्न्यः । गर्गादिभ्योयञ् । तमपहायपरशुराममेवविनेत्यर्थः । अस्त्रवेदन्तत्त्वतो
धिगम्यभुजवीर्य्येणशालतइतिभुजवीर्य्यशालिनः । उभयसंपन्नस्येत्यर्थः । शा
लिनःक्रियापेक्षयासमानकर्तृकेक्त्वानिर्द्देशः कस्यवाआयुधञ्चरितःप्राप्तोऽर्थोयेन
तत्चरितार्थंनकस्यापीत्यर्थः । अतस्त्वंवापितापसत्वात्किञ्चित्करस्यतेर्नसहस
ख्यमेवमुख्यमितिभावः ॥ ६२ ॥ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ ॥
ननुयुष्मान्मृगशरद्रोहिणोममतेनकथंसख्यंस्यादित्याशंक्यसत्यन्तथापितावन्मृ

अस्त्रवेदमधिगम्यतत्त्वतःकस्यचेहभुजवीर्यशालिनः । जाम
दग्न्यमपहायगीयतेतापसेषुचरितार्थमायुधम् ॥ ६२ ॥
अभ्यघानिमुनिचापलात्त्वयायन्मृगःक्षितिपतेःपरिग्रहः । अ
क्षमिष्टतदयंप्रमाद्यतांसंवृणोतिखलुदोषमज्ञता ॥ ६३ ॥

गवधापराधःक्षमिष्यतइत्याह । अभ्यघानीति । त्वयामुनिचापलाद्रौहाणांचाप
ल्यादित्यर्थः । क्षितिपतेरस्मत्स्वामिनःपरिगृह्यतइतिपरिग्रहःतेनस्वीकृतइत्य
र्थः । परिग्रहःपरिजनेपत्न्यांस्वीकारमूलयोरितिविश्वः । यन्मृगोभ्यघानिअभि
हतइतिहन्तेःकर्म्मणिलुङितद्धननमयंअस्मत्स्वामीअक्षमिष्टसोढवानेव । त
थापि । प्रमाद्यतामविमृष्यकारिणामित्यर्थः । दोषमपराधमज्ञताऽज्ञानितासंवृ
णोतिआच्छादयति । नाज्ञस्यापराधोगण्यतइत्यर्थः ॥ ६३ ॥ ✿ * ✿ * ✿ ॥
अथसुहृद्भावेनहितमुपदिशति । जन्मेति । जन्मसत्कुलेप्रसूतिःवेषोजटाव
ल्कलादिःतपोनियमः । तेषांविरोधिनींविरुद्धांअमूमेवंविधांअपक्रियामपकार

म्पुनः इतःपरमित्यर्थः । माकृथाः नाकुरु करोतेः कर्त्तरि माङि लुङ् । वयोवृद्ध्यर्थवा ग्वेषश्रुताभिजनकर्मणां । आचारे सदृशीं वृत्तिमजिह्मामशठां नयेतिस्मरणात् । उक्तवैपरीत्ये दोषमाह । आपदिति । हि यस्मात् । अपथे वर्त्तमानं दुर्मतिम्पुरुष मितिशेषः । उभौ लोकौ दूषयति हन्तीत्युभयलोकदूषणी । तद्धितार्थ इत्यादिना उत्तरपदसमासः । आपत् एति प्राप्नोति । समासविषये उभशब्दस्थाने उभयश ब्दप्रयोग एव साधुः । यदाह कैय्यटः । उभादुदात्तो नित्यमिति नित्यग्रहणस्येद म्प्रयोजनं वृत्तिविषये उभशब्दस्य प्रयोगो माभूत् । उभयशब्दस्यैव रूपं यथा स्या दित्युभयत्र इत्यादि भवतीति ॥ ६४ ॥ ॥

जन्मवेषतपसां विरोधिनीं माकृथाः पुनरमूमपक्रियाम् । आ
पदेत्युभयलोकदूषणी वर्त्तमानमपथे हि दुर्मतिम् ॥ ६४ ॥
यष्टुमिच्छसि पितॄन्न संवृतो नत्वमर्चिचयिषुर्दिवौकसः । दातु
मेव पदवीमपि क्षमः किं मृगेऽङ्ग विशिखं न्यवीविशः ॥ ६५ ॥

यदुक्तं अभ्यघानीति तदेव स्फुटयति । यष्टुमिति । पितॄन् कव्यवालादीन् यष्टुमर्च यितुं नेच्छसि । यतः संवृतः एकान्तस्थितः । तथा दिवौकसः देवान् । अर्चिचयिषु रपि अर्चितुमिच्छुरपि नासि । अतः पित्रर्थे देवतार्थे वा हिंसायां नापराधो विहितत्वा दिति भावः । अथ सर्वतः आत्मानं गोपायीतेति श्रुतेरात्मरक्षार्थेति चेन्नेत्याह । दातु मिति । अङ्ग हे । पदवीं मार्गं दातुमेव न तु हन्तुं मृगस्य मुनित्वादिति भावः । क्षमो पि योग्यः सन्नपि । किं किमर्थं मृगे विशिखं न्यवीविशः निवेशितवान् । विशतेर्ण्यन्ता त् लुङ् अभिधावतो मृगात् अपसरणेनैव आत्मरक्षणे कर्त्तव्ये यदवधीत्तच्चापलमेव । न हिंस्यात्सर्वभूतानीति श्रुतिनिषेधादिति भावः ॥ ६५ ॥ ॥

किंबहुना। परमार्थःश्रूयतामित्याह। सज्जनइति। सज्जनोसिअतएवचापलञ्च पलस्यकर्म्मजहीहित्यज। जहातेर्लोट्आच्हावितीकारः। सर्वदाकइवकोवा सहिष्यते। इवशब्दोवाक्यालङ्कारेवाशब्दोऽवधारणे। असहनेकारणमाह। वारिधीनिति। अनिभृताश्चपलाःपुनःपुनरकार्य्यकारिणोगुरून्विशालानपियुगा न्तवायवःप्रलयपवनाःवेवारिधीनिवसमुद्रानिवक्षोभयन्ति। उपमानुप्राणितोऽ यमर्थान्तरन्यासः॥ ६६ ॥

नन्वयङ्किरातःक्षुभितःकिङ्करिष्यतितत्राह। अस्त्रेति। अयंमहीपतिःअस्त्रवेद वित्नियहानुग्रहसमर्थइतिभावः। अतःपर्वतेःभवःपार्वतीयइतिहेतोः। पर्वता

सज्जनोसिविजहीहिचापलंसर्वदाकइववासहिष्यते। वा
रिधीनिवयुगान्तवायवःक्षोभयन्त्यनिभृतागुरूनपि॥ ६६ ॥
अस्त्रवेदविदयम्महीपतिःपार्वतीयइतिमाऽवजीगणः। गो
पितुम्मुदमिमांमरुत्वताशैलवासमनुनीयलम्भितः॥ ६७ ॥

च्छइतिछप्रत्ययः। माऽवजीगणःवनेचरबुध्यामावज्ञासीरित्यर्थः। गणयतेर्मा ङिलुङ्इच्गणइतीकारः। नन्वीदृशश्चेत्किमिहवनेवसतितत्राह। गोपितुमि ति। मरुत्वतादेवेन्द्रेणगाम्भुवङ्गोपितुरक्षितुम्। अयादयआर्द्धधातुकेवेतिविक ल्पात्गुपधुपेत्यादिनानआयादेशः। अनुनीयप्रार्थ्यशैलवासंलम्भितःप्रापितः। णयन्तेकर्त्तुश्चकर्म्मणामितिवचनात्। अणिकर्तरिकर्म्मणिक्तःमतिबुद्धीत्यादि नाऽणिकर्तुःकर्म्मत्वम्॥ ६७ ॥

उपसंहरति। तदिति। तत्तस्मान्मुनिचापलत्वान्मुनेःसम्बन्धिइदंमृगवधरूप मयानितिक्षितंसोढमितिवचअमूपतिरवोचत्भरद्वाहस्यप्रत्यर्पणमेवप्रतीकार

इत्याह । अत्रभवते पूज्याय स्वामिने । अत्रभवान्व्याख्यातः निजम्बाणन्तदीयमेव
शरन्दिशन्प्रयच्छन्त्वमपि सर्वसम्पदः आप्नुहि सुखेनेति भावः ॥ ६८ ॥ ० ० ॥
ननु ममैतत्सख्यमेव न रोचते किम्पुनस्तन्मूलास्सम्पदस्तत्राह । आत्मनीनमिति । आ
त्मने हितं आत्मनीनं । आत्मविश्वजनभोगोत्तरपदात्खः । उपतिष्ठते समागच्छते
उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वक्तव्यादात्मनेपदम् । गुणाः वि
नयादयः सम्भवन्ति आपदश्च विरमन्ति । आङ्परिभ्यो रमइति परस्मैपदम् ।
इत्यनेकफलभाजि आर्य्ये सङ्गमे साधुसङ्गतौ अर्थिता अपेक्षा कथमिव मा स्म भूत् स

तन्निति क्षितिभर्त्तुरिमदम्भया मुनेरित्यवोचत वचश्च भूपतिः । बाण
मत्रभवते निजन्दिशन्नाप्नुहि त्वमपि सर्वसम्पदः ॥ ६८ ॥
आत्मनीनमुपतिष्ठते गुणाः सम्भवन्त्युपरमन्ति चापदः । इ
त्यनेकफलभाजि मास्म भूदर्थिता कथमिवार्य्य सङ्गमे ॥ ६९ ॥
दृश्यतामयमनोकहान्तरे तिग्महेतिपृतनाभिरन्वितः । सा
हिवीचिरिव सिन्धुरुद्धतो भूपतिः समयसेतुवारितः ॥ ७० ॥

वेदाभवत्येव ॥ ६९ ॥ ॥
नचायन्दूरे वर्त्तत इत्याह । दृश्यतामिति । तिग्महेतिभिः तीक्ष्णायुधाभिः । हेति
र्ज्वालास्वरूपयोरस्त्रेष्विति हेमचन्द्रः । पृतनाभिर्वाहिनीभिः । पृतनाऽनीकिनी च
मूरित्यमरः । अन्वितो भूपतिः । साहयः ससर्पाः वीचयो यस्य स सिन्धुः समुद्र इवोद्ध
तः किन्तु समयो मर्य्यादा सेतुरिव स समयसेतुः तेन वारितः । हस्तेन निर्दिशन्नाह
। अयमनोकहान्तरे द्रुमान्तर्द्धाने वर्त्तत इति शेषः । दृश्यतां । अनोकहः कुटः शा
लः पलाशी द्रुद्रुमागमा इत्यमरः ॥ ७० ॥ ॥

अथास्यविज्ञापनमेवाह । सख्यमिति । स्थेयान्स्थिरतरः । प्रियस्थिरेत्यादिना स्थादेशः । यश्चभूपतिः हरितुरङ्गमकेतोरिन्द्रध्वजस्यलक्ष्मीं शोभाञ्जयन्अहिप तिःशेषइवस्थवीयःस्थूलतरं । स्थूलदूरेत्यादिनापूर्वगुणादिपरलोपौ । सहज्य यासज्यन्धनुर्वहति । हेमतिमन्अस्यचभूपतेर्मतिमनुकूलयअनुकूलांकुरुसख्यंकु

सज्यन्धनुर्वहतियोऽहिपतिस्थवीयःस्थेयाञ्जयन्हरितुरङ्गमकेतुल
क्ष्मीम् । अस्यानुकूलयमतिंमतिमन्ननेनसख्यासुखंसमुपयास्यसिचि
न्तितानि ॥ ७१ ॥ ❁ ॥ इतिमहोपाध्यायश्रीभारविकृतौकिराता
ऽर्ज्जुनीयेमहाकाव्येदूतवाक्यंनामत्रयोदशःसर्गः ॥ १३ ॥ ❁ ॥

र्वित्यर्थः । मतिमत्तायाःफलमेतदितिभावः । कुतःसख्याअमुनाचभूपतिनाहेतुना सुखमक्लेशेनचिन्तितानिमनोरथानभियास्यसिप्राप्स्यसि । वसन्ततिलकावृत्तम् ॥ ७१ ॥ * ॥ इतिश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायांकिरा ताऽर्ज्जुनीयव्याख्यायांघण्टापथसमाख्यायांदूतवाक्यन्नामत्रयोदशःसर्गः ॥ १३ ॥

ततइति। ततः किरातवाक्यानन्तरम्। उद्धतैः प्रगल्भैः किरातवचोभिरर्णवाम्बुभिः
शैलइवपराहतोऽभिहतः अतएवकुपितोपिपाण्डवोधैर्य्यैर्निर्विकारचित्तत्वन्नज
हौनतत्याज। उत्पन्नमपिकोपंस्तम्भयामासेत्यर्थः। तथाहि। साधवःसज्जनास्सु
दुर्ग्रहंसुष्ठुदुरासदंअप्रतिकंप्यमन्तःकरणंयेषान्तेसुदुर्ग्रहान्तःकरणाहि। अ
र्थान्तरन्यासः॥१॥ * * * * ॥
अशेषमिति। अशेषंसकलंयथातथाउल्लिङ्गितमुद्भूतलिङ्गकमुल्लिङ्गैस्तद्वाक्य
भङ्गिभिरेवसम्यगवज्ञातमित्यर्थः। शक्नुरेवशात्रवःस्वार्थे अण्प्रत्ययः। तस्येङ्गि
तमभिप्रायःतत्उल्लिङ्गितंयेनसः। गिरांवाचांसञ्चिधिर्निविस्तरेतत्त्वसंग्रहे अर्थसं

ततःकिरातस्यवचोभिरुद्धतैःपराहतःशैलइवार्णवाम्बुभिः। जहौ
नधैर्य्यंरुषितोपिपाण्डवःसुदुर्ग्रहान्तःकरणाहिसूरयः॥१॥
अशेषमुल्लिङ्गितशात्रवेङ्गितःकृतीगिरांविस्तरतत्त्वसंग्रहे। इद
म्प्रमाणीकृतकालसाधनःप्रशान्तसंरम्भइवाददेवचः॥२॥

क्षेपे। वैभाषिकोद्वंद्वैकवद्भावः। कृतीकुशलःप्रमाणीकृतम्प्रधानीकृतंकालएव
साधनंयेनसः। अवसरोचितविवक्षुरित्यर्थः। अयम्पाण्डवःप्रशान्तसंरम्भःसंक्षो
भरहितइववचःआददेउवाचेत्यर्थः॥२॥ * * * ॥
सान्त्वम्पूर्वकमेवाह। विविक्तेति। विविक्तास्संयोगादिनाऽश्लिष्टाःवर्णाःअक्षराण्ये
वआभरणानियस्याःसाअन्यत्रतुविविक्तानिशुद्धानिवर्णोरूपमाभरणानिचय
स्याःसा। वर्णौद्विजादौशुक्लादौस्तुतौवर्णन्तुचाक्षरेइत्युभयत्राप्यमरः। सुखा
श्रुतिःश्रवणंयस्याःसासुखश्रुतिःश्राव्येत्यर्थः। अन्यत्रसुखंश्रुयतेइतिसुखावाक्
यस्याःसायुक्तभाषिणीत्यर्थः। द्विषामपिहृदयानिप्रसादयन्तिकिम्पुनः। सुहृ

दामितिभावः। प्रसन्नानिवाचकानिगम्भीराणिगुरूणिचपदानिसुप्तिङन्तरूपाणियस्याःसा। अन्यत्रतुविमलाऽसरलचरणासरस्वतीवाक्। गीर्वाग्वाणीसरस्वतीत्यमरः। नकृतंपुण्यकर्मयैस्तेषांनप्रवर्त्ततेनप्रसरतिकिन्तुसुकृतिनामित्यर्थः। भवद्वाणीचैवंविधेतिधन्योभवानितिभावः। अत्रकाचिन्नायिकावाग्देवताचप्रतीयते। तत्रादौसमासोक्तिरलङ्कारः। विशेषणसाम्येनाप्रस्तुतप्रतीतेःअतएवनश्लेषः॥ ३॥ ॥

भवन्तीति। तेपुरुषाःविपश्चितांविदुषां। विद्वान्विपश्चिद्दोषज्ञइत्यमरः। स

विविक्तवर्णाभरणासुखश्रुतिःप्रसादयन्तीहृदयान्यपिद्विषाम्।
प्रवर्त्ततेनाकृतपुण्यकर्म्मणाम्प्रसन्नगम्भीरपदासरस्वती ॥ ३॥
भवन्तितेसभ्यतमाविपश्चितांमनोगतंवाचिनिवेशयन्तिये । नय
न्तितेष्वप्युपपन्ननैपुणागभीरमर्थङ्कतिचित्प्रकाशताम् ॥ ४ ॥
स्तुवन्तिगुर्वीमभिधेयसम्पदंविशुद्धिमुक्तेरपरेविपश्चितः । इति
स्थितायाम्प्रतिपूरुषंरुचौसुदुर्ल्लभाःसर्वमनोरमागिरः ॥ ५॥

भ्यतमाःसभायांसाधुतमानिपुणाः। साधुःसमर्थौनिपुणश्चेतिकशिकायां। भवन्ति येमनोगतंमनसागृहीतमर्थंवाचिनिवेशयन्तिवाचउद्गिरन्तीत्यर्थः। तेषुवक्तृषु अपितउपपन्ननैपुणाःसम्भावितकौशलाःकतिचिदेवगभीरन्निगूढमर्थम्प्रकाशतां स्फुटतांनयन्ति। लोकेतावत्ज्ञातारएवदुर्ल्लभाःतत्रापिवक्तारः। तत्रापिनिगूढार्थप्रकाशकाःत्वयिसर्वमस्तीतिस्तुतिः। वनेचरवाक्यरहस्यंज्ञातमितिस्वयमपितादृशएवेतिहृदयम् ॥ ४॥ ॥

स्तुवन्तीति। किञ्च। केचित्गुर्वीमभिधेयसम्पदंस्तुवन्ति। अपरेविपश्चितः

उक्तेःशब्दस्यविशुद्धिंसामर्थ्यंस्तुवन्ति । इतिप्रतिपुरुषंरुचेःप्रीतौस्थितायांव्यव
स्थितायांसर्वमनोरमाःसर्वेषांशब्दार्थरुचीनाम्पुंसाम्मनोरमाःगिरःदुर्लभाः । त्व
द्गिरस्तुसर्वमनोरमाःउक्तसर्वगुणसम्पत्त्येतिभावः ॥ ५ ॥ ✿ * ✿ * ✿ * ॥
समस्येति । धुरंवहतीतिधुर्य्यहेकार्य्यनिर्वाहक । धुरोयड्ढकावितियत्प्रत्ययः ।
समस्तसमारोपितभार । स्वामिनानिहितसंध्यादिकार्यभारहे । तदाहमनुः । दू
तेसंधिविपर्ययाविति । इमांशान्ततावितयोत्यादिकाम्भारतींवाचंगुणैर्विविक्तवर्ण
त्वादिभिरितिभावः । समस्यसंयोज्यप्रगल्भन्निर्भीकंयथातथासम्पादयतारचय
ताव्याहरतेत्यर्थः । त्वयावनेचरेणापीत्यर्थः । सतात्वपिशब्दोविरोधद्योतनार्थे

समस्यसम्पादयतागुणैरिमान्त्वयासमारोपितभारभारतीम् । प्र
गल्भमात्माधुरिधुर्य्यवाग्मिनांवनेचरेणापिसताधिरोपितः ॥ ६ ॥
प्रयुज्यसामाचरितम्प्रलोभनम्भयंविभेदायधियःप्रदर्शितम् । तथा
भियुक्तञ्चशिलीमुखार्थिनायथेतरन्न्याय्यमिवावभासते ॥ ७ ॥

म् । आत्मास्वयंवाग्मिनांवाचोयुक्तिपटूनाम् । वाचोयुक्तिपटुर्वाग्मीत्यमरः । वाचो
ग्मिनिरितिमत्वर्थीयोग्मिनिप्रत्ययः । धुर्य्येऽग्रेऽधिरोपितःआस्थापितइत्यर्थः । रुह
पोऽन्यतरस्यामितिपकारः । अत्रमनुः । वपुष्मान्वीतभीर्वाग्मीदूतोराज्ञःप्रशस्य
तइति ॥ ६ ॥ ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ॥
वाग्मितामेवाह । प्रयुज्येति । शान्ततविनययोगीत्यादिनासामसान्त्वंप्रयुज्यविलो
भनम्प्रलोभनंमित्रमिष्टमित्यादिनाआचरितंसम्पादितम् । तथाधियोबुद्धेर्विभे
दायव्यामोहनार्थंशक्तिरर्थपतिष्वित्यादिनाभयंप्रदर्शितंकिञ्चशिलीमुखार्थिनान
तुन्यायार्थिनेतिभावः । त्वयेतिशेषः । नाभियोक्तुमित्यादिनातथाभियुक्तंकथितंय

येतरन्न्याय्यादन्यदन्याय्यमित्यर्थः । न्याय्यंन्यायादनपेतमिवावभावस्तद्वदुपमा । अनेनयाम्मिनाक्षयेसरोसीतिभावः ॥ ७ ॥ ॥

ततःकिमतआह । विरोधीति । किन्तुसिद्धेःफलस्यविरोधिविघातकमितिइदमस्मदास्कन्दनरूपकर्म्मकर्तुमुद्यतोमहीपतिर्भवताधुर्येणेतिभावः । किन्ननिवारितोननिवर्तितः । निवारणेहेतुमाह । भूतिमिच्छताइहामुत्रचश्रेयार्थिनासहचरितावर्थनाशौस्वार्थानर्थौयस्यतेनसहार्थनाशेनसमानसुखदुःखेनेत्यर्थः । अनुजीविनाभृत्येननृपःस्वामीहितेनियोज्योनियम्यःखलु । अन्यथास्वामिद्रोहपातकीश्रेयसोभ्रष्टःस्यादितिभावः ॥ ८ ॥

विरोधिसिद्धेरितिकर्तुमुद्यतःसवारितःकिम्भवतानभूपतिः । हिते
नियोज्यःखलुभूतिमिच्छतासहार्थनाशेननृपोऽनुजीविना ॥ ८ ॥
ध्रुवंप्रणाशःप्रहितस्यपत्रिणःशिलोच्चयेतस्यविमार्गणंनयः । न
युक्तमत्रार्यजनातिलङ्घनन्दिशत्यपायंहिसतामतिक्रमः ॥ ९ ॥

[illegible]कगतःकिमत्रन्याय्यमतआह । ध्रुवमिति । प्रहितस्यप्रयुक्तस्यपत्रिणःशरस्यप्रणाशोऽदर्शनंध्रुवंनिश्चितः । प्रहितश्चेदितिभावः । तस्यनष्टस्यपत्रिणःशिलोच्चयेशैले । अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाइत्यमरः । विमार्गणंवीक्षणंनयोन्याय्यः । समीक्षणंविचयनंमार्गणंमृगणामृगइत्यमरः । अत्रविषयेआर्यजनातिलंघनंगुरुजनव्यतिक्रमोनयुक्तः । हियस्मात्कारणात्सतामतिक्रमोऽपायमनर्थंदिशतिददाति ॥ ९ ॥

यदुक्तंहन्तुमर्हसीतितत्रोत्तरमाह । अतीतेति । खाण्डवंइन्द्रवनंअनुभक्षयितुंइच्छताअग्निनाममातीतसंख्याःअसंख्याःशिलीमुखाःशराःविहिताःदत्ताःखाण्डवदाहे

अक्षयतूणीरदानमुक्तम्भारते। अतोऽमरसायकेष्वपिअनादृतस्यआदररहितस्य। भावेक्तःतेनबहुव्रीहिः। ममकथंशैलजनाशुगेकिरातबाणेधृतिरास्थास्थितानकथञ्चिदित्यर्थः। अतोनापहारशंकाकार्येत्यर्थः॥ १०॥ ॥

यदुक्तंस्मर्य्यतेतनुभृतामित्यादिनासदाचारःप्रमाणमितितत्रोत्तरमाह। यदीति। आर्य्यचेष्टितंसच्चरितम्प्रमाणीकृतंयदिसाधुत्वेनाङ्गीकृतंयदीत्यर्थः। तर्हिअदोषेदोषाभावेपिकश्चित्प्रसज्यप्रतिषेधेपिनञ्समासइतिभाष्यकारःउपलक्षणेतृतीया। वयङ्किमितितिरस्कृताअन्याय्यंयुक्तमित्यर्थः। हियस्मात्परिवादगोचरम्प

अतीतसंख्याविहिताममाग्निनाशिलीमुखाःखाण्डवमत्तुमिच्छता। अनादृतस्यामरसायकेष्वपिस्थिताकथंशैलजनाशुगेधृतिः॥ १०॥
यदिप्रमाणीकृतमार्यचेष्टितंकिमित्यदोषेणतिरस्कृतावयम्। अयातपूर्वापरिवादगोचरंसतांहिवाणीगुणमेवभाषते॥ ११॥
गुणापवादेनतदन्यरोपणाद्भृशाधिरूढस्यसमञ्जसञ्जनम्। द्विधेवकृत्वाहृदयन्निगूहतःस्फुरन्नसाधोर्विवृणोतिवागसिः॥ १२॥

रनिन्दास्पदमयातपूर्वापूर्वंनयाताइत्ययातपूर्वासतांवाणीगुणमेवभाषतेनदोषं अतःस्तेमृषादोषभाषिणोनसदाचारप्रामाण्यबुद्धिरितिभावः। पूर्वंयाताइति यातपूर्वासुप्सुपेतिसमासः। परत्वात्सर्वनाम्नोनिष्ठायाःपूर्वनिपातःस्त्रियाःपुंवदित्यादिनापुम्बद्भावइतिपूर्वलिङ्गता। अर्थान्तरन्यासः॥ ११॥ ॥

ननुप्रत्यक्षाबुद्धिःकथंदुष्टेतिनिश्चयःततस्तत्राह। गुणेति। गुणापवादेनविद्यमानगुणापह्नवेनतदन्यरोपणात्। तस्माद्गुणादन्यस्यदोषस्यारोपणादविद्यमानस्यैवारोपणाच्चसमञ्जसञ्जनंसुजनंभृशाधिरूढस्यअतिमात्रमाक्रम्यस्थित

स्योभिक्षिप्तस्येत्यर्थः । कर्तरिक्तः निगूहतोहृदयंविवृण्वतोपिअसाधोरनार्यस्यहृदयंकर्मस्फुरन्विलसन्वागेवासिःद्विधाकृत्वाभिन्त्वेवविवृणोति । दुष्टयावाचैवतत्पूर्विकायाःबुद्धेरपिदौष्ट्यमनुमीयतइतिभावः । वागसिरित्यत्रद्विधाकरणरूपकसाधकम् ॥ १२ ॥ * * * * * * * * * * * * * * * ॥

यदुक्तमभ्यघानीतितत्रोत्तरमाह । वनेति । वनाश्रयाःअतएवमृगाःकस्यपरिग्रहाःनकस्यापीत्यर्थः । किन्तुयस्तान्मृगान्प्रसभेनबलात्कारेणशृणातिहिनस्ति । शॄहिंसायामितिधातोर्लट् । तेमृगास्तस्यहन्तुःपरिग्रहाःपरिग्राह्याःहन्ताचाहमेवेतिभावः । ननुममायमित्यभिमानान्नृपस्यस्वत्वमित्याशंक्याह । नत्रनृपे

वनाश्रयाःकस्यमृगाःपरिग्रहाःशृणातियस्तान्प्रसभेनतस्यते । प्र
हीयतामत्रनृपेणमानितानमानिताचास्तिभवन्तिचश्रियः ॥ १३ ॥
नवर्त्मकस्मैचिदपिप्रदीयतामितिव्रतंमेविहितंमहर्षिणा । जिघां
सुरस्मान्निहितोमयामृगोव्रताभिरक्षाहिसतामलंक्रिया ॥ १४ ॥

णमानिताममेत्यभिमानिताप्रहीयतांत्यज्यतांकुतइत्याशंक्याह । नेति । मानिताचास्तिश्रियःस्वानिचभवन्तीतिनकिन्तुनभवन्त्येवसत्यामभिमानितायामित्यर्थः । अभिमानमात्रेणस्वत्वेऽतिप्रसङ्गादितिभावः ॥ १३ ॥ * * * * * * * * ॥

यष्टुमिच्छसिपितॄनित्यादिनायद्धिःएकरणमवधीरितमुपालंभितंतत्रोत्तरमाह । नेति । कस्मैचिदपिवर्त्मनप्रदीयतामितिस्वच्छमहर्षिणाव्यासेनमेमह्यंव्रतंविहितमुपदिष्टमित्यर्थः । अस्मात्कारणात् । जिघांसुर्हन्तुमिच्छुरापतन्नभिधावन्नयंमृगोमयानिहितः । हियस्मात्व्रताभिरक्षासतामलंक्रियानतुदोषः अतःआत्मरक्षणार्थमस्यवधोननिःकारणमित्यर्थः ॥ १४ ॥ * * * * * * * * * ॥

दुर्वचनत्वादित्यादिनाऽयतनं जातं बन्धुत्वमुक्तं तत्राचष्टे । मृगानिति । स्वमात्मैव हे-
तुस्तेन स्वहेतुना स्वार्थनिमित्यर्थः । सर्वनाम्नस्तृतीया चेति तृतीया । मृगान्विनिघ्नन्प्र-
हरन् । मृगान्यातीति मृगयुर्व्याधः । मृगय्वादयश्चेत्यौणादिकः कुप्रत्ययान्तो नि-
पातः । व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः इत्यमरः । तपः इच्छतां तपस्विनां
कथं कृतोपकारो न कथंचिदित्यर्थः । अथ कृपेति चेत् व्याधस्यापीति शेषः । अस्तु किं
कलहेनेति भावः । परं तु यदुक्तं निघ्नतः परनिर्वर्हितमित्यादिना । तस्य प्रथम-
प्रहर्तृत्वं तद्युक्तमित्याह । मृगः क्षणात् क्षतः आवाभ्यां युगपदेव विद्ध इत्यर्थः । ए-
वं सति ननेन कृपेणैव पूर्वं हतो मया तु नेत्यत्र का गतिः । किम्प्रमाणम्भो विपर्ययस्य

मृगान्विनिघ्नन्मृगयुः स्वहेतुना कृतोपकारः कथमिच्छतां तपः । त-
थेति चेदस्तु मृगः क्षतः क्षणादनेन पूर्वं न मयेति का गतिः ॥ १५ ॥
अनायुधे सत्त्वजिघांसिते मुनौ कृपेति वृत्तिर्महतामकृत्रिमा । श-
रासनं बिभ्रति सज्यसायकं कृतानुकम्पः स कथं प्रतीयते ॥ १६ ॥

दुर्लक्ष्यत्वादिति भावः । तथा च यदुक्तं व्रीडितव्यमित्युपालम्भः तस्यैव किन्न स्यादिति
भावः ॥ १५ ॥
पूर्वं कृपेति चेदित्युक्तं सम्प्रति तद्दूषयन्नाह । अनायुध इति । अनायुधे
निरायुधे सत्त्वेन केनचित्प्राणिना जिघांसिते हन्तुमिष्टे । हन्तेः सन्नन्तात्कर्मणि क्त-
ः । मुनौ विषये कृपेति वृत्तिर्व्यवहारो महतां महात्मनामकृत्रिमा अकपटा । सह ज्य-
या सज्यः सायको यस्मिन् । तच्छरासनं धनुर्बिभ्रति दधति मयि सन्तपः कथं कृतानुक-
म्पः कृताऽनुकम्पा दया येन स प्रतीयते ज्ञायते । इणः कर्मणि लट् । अस्य मे कृपा
विहितानर्थंम इत्यर्थः ॥ १६ ॥

अथकृपामभ्युपगम्याह। अथोइति। अथोप्रश्ने। मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथोअथेत्यमरः। तेनानेनमदर्थंयथातथा अर्थेनसहनित्यसमासः। उज्झितस्यमुक्तस्यतस्यफलञ्चप्रतिकायस्यप्रतिपक्षस्यसाधनंवधः। साधनंनिवृत्तौमेढ्रेसैन्येसिद्धौवधेगताविति विश्वः। अविक्षतेऽखण्डितेतत्रतस्मिन्फलेमयात्मसात्कृतेस्वाधीनीकृतेसति। तदधीनवचनइतिसातिप्रत्ययः। चमूपतेरधिकाकृतार्थतासाफल्यम्। ननुखलु। स्वायुधस्यपरत्राणशत्रुवधपात्रप्रतिपादनाथएकहेलयासिद्धेरित्यर्थः। तथाप्ययंशरलोभइतिकृपालुतायामूलान्यपिनिकृन्ततीतिभावः ॥ १७ ॥ ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ॥

अथोशरस्तेनमदर्थमुज्झितःफलञ्चतस्यप्रतिकायसाधनम् । अ
विक्षतेतत्रमयात्मसात्कृतेकृतार्थतानन्वधिकाचमूपतेः ॥ १७ ॥
यदात्थकामम्भवतासयाच्यतामितिक्षमन्नैतदनल्पचेतसाम्। कथं
प्रसह्याहरणैषिणांप्रियाःपरावनत्यामलिनीकृताःश्रियः ॥ १८ ॥

मार्गणैरथतवप्रयोजनमित्यादिनायदुक्तन्तन्निराचष्टे। यदिति। हेतपःकामं भवतायाच्यतामितियदात्थमामितिशेषः। एतदनल्पचेतसांमनस्विनान्नक्षमंनयुक्तं। कुतःप्रसह्यबलादाहरणैषिणामाहर्तुमिच्छूनां। क्षत्रियस्यविजितव्यमितिस्मरणादितिभावः। परावनत्यायाच्ञादैन्येनमलिनीकृताःश्रियःकथम्प्रियाःनकथञ्चिदित्यर्थः ॥ १८ ॥ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ॥

अथपरेङ्गितमुद्धाभयन्दर्शयति। अभूतमिति। तदनुरूपोऽभूतमनृतमासज्यमिथ्याभियुज्येत्यर्थः। युक्तेक्ष्मादावृतेभूतमित्यमरः। अलभ्यंलब्धुमशक्यम्बिरुद्धंविपरीतपालकमीहितंमनोरथम्बलाल्लिप्सतेलब्धुमिच्छति। नचैतच्चित्रमित्याह।

॥कि०६०॥ हि यस्मात् अनयस्तद्दुर्नयस्तस्य रौद्रतां भयङ्करत्वं विजानतोऽपि पुरुषस्य मतिर्बुद्धिरप
॥सर्ग१४॥ पाये विनाशकाले परिमोहिनी भवति। परिमुह्यतीति परिमोहिनी। संपृचादिसूत्रे
॥१६७॥ ण ताच्छील्ये घिनुण्प्रत्ययः। तथा चोक्तं। नि र्म्मितः केन न दृष्टपूर्वो हेमः कुर
ङ्गो न च कुत्र वार्ता। तथापि तृष्णा रघुनन्दनस्य विनाशकाले विपरीतबुद्धिरिति। त
स्माद्विनाशकालत्वात् विपरीतबुद्धिर्भवतीति भावः ॥ १९ ॥ ॥
अथ सर्वथा लभ्यस्ते शरणार्हं किमनेन तुच्छविग्रहं याचतां शरोऽन्यद्वेत्याह। अ
सिरिति। असिः खड्गः शरा वर्म कवचम्। उच्चकैरत्युग्रं धनुरेतेन वई श्वरेणत्ता
भिना विविच्य एकैकशो विभज्य किं न प्रार्थितं न याचितं येन प्रयोजनं तद्दास्यामीति भा

अभूतमासज्य विरुद्धमीहितं बलादलभ्यं तव लिप्सतो नृपः। वि
जानतोऽपि ह्यनयस्य रौद्रतां भवत्यपाये परिमोहिनी मतिः ॥ १९ ॥
असिः शरा वर्म धनुश्च नोच्चकैर्विविच्य किं प्रार्थितमीश्वरेण ते। अ
थास्ति शक्तिः कृतमेव याच्ञया न दूषितः शक्तिमतां स्वयंग्रहः ॥ २० ॥

वः। नपुंसकैकशेषः। अथास्य वीराभिमानिनो नृपस्य शक्तिरस्ति चेत् इति शेषः। याच्ञया कृतमेव अलमेव साध्याभावान्न याचितव्यमेवेत्यर्थः। गम्यमानक्रियापेक्षया करणत्वात्तृतीयेत्युक्तम्प्राक्। कृतमिति निषेधार्थमव्ययम्। यतः शक्तिमतां स्वयंग्रहः बलाद्ग्रहणं न दूषितः किन्तु भूषणमेव वीराणामिति भावः। क्षत्रियाणां प्रसह्य वित्ताहरणं न दूषितमिति भारतोक्तम् ॥ २० ॥ ॥
राघवप्लवगराजयोरिवेत्यादिनोपदिष्टं सख्यम्प्रत्याचष्टे। सखेति। सन्नृपः कथ
न्त्वया युक्तो योग्यः सखा कथितः न कथंचित्कथनीय इत्यर्थः। कुतो योऽन्नृपः तपस्यते
तपश्चरते अनपराधिने इत्यर्थः। क्रुधद्रुहेत्यादिना सम्प्रदानत्वाच्चतुर्थी। यदृच्छ

स्वैरवृत्त्या । यदृच्छास्वैरितेत्यमरः । असूयतीति असूयांकरोति । असूयादोषारोपोगुणेष्वपीत्यमरः । प्रत्युतशत्रुरेवायमित्याह । हीयस्माद्गुणानामर्जनेयउच्छायस्तत्क्षयः । तस्मिन्विरुद्धाविमुखाबुद्धिर्येषान्तेतथाऽसाधवोदुष्टाःसतांसज्जनानांप्रकृत्यमित्राःप्रकृत्याशत्रवः । द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवइत्यमरः ॥ २१ ॥ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○

हीनजातिवृत्तिभ्यांसख्यानर्हःसइत्याह । वयमिति । वर्णाश्रमरक्षणोचिताःविशुद्धवृत्तयोवयंराजानःक्व । जातिहीनामृगजीवितच्छिदोहिंसाजीविनोव्याधाःक्व ।

सखासयुक्तःकथितःकथंत्वयायदृच्छयासूयतियस्तपस्यते । गुणा
र्जनोच्छ्रायविरुद्धबुद्धयःप्रकृत्यमित्राहिसतामसाधवः ॥ २१ ॥
वयंक्ववर्णाश्रमपालनोचिताःक्वजातिहीनामृगजीवितच्छिदः । स
हापकृष्टैर्महतांनसङ्गतम्भवन्तिगोमायुसखानदन्तिनः ॥ २२ ॥
परोऽवजानातियदज्ञताजडस्तदुन्नतानांनविहन्तिधीरताम् । स
मानवीर्यान्वयपौरुषेषुयःकरोत्यतिक्रान्तिमसौतिरस्क्रिया ॥ २३ ॥

फलितमाह । सहापकृष्टैरुक्तरीत्याजात्यावृत्त्याचनिकृष्टैःसहमहतांजात्यावृत्त्याचोत्कृष्टानांसङ्गतंसख्यन्नघटते । तथाहि । दन्तिनोगजाःगोमायूनांशृगालानांसखायोगोमायुसखाःनभवन्ति । स्त्रियांशिवाभूरिमायगोमायुमृगधूर्तकाः । शृगालवञ्चुकक्रोष्टुफेरुफेरवजम्बुकाइत्यमरः । अत्रविशेषेणसामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ २२ ॥ ○ * ○ * ○ * ○ * ○ * ○ * ○ * ○ * ॥

नीचस्त्वंकथमधिक्षिप्यतइतिचेत्तत्राह । परइति । अज्ञताजडोमोहान्धःपरोऽवजानातियत्तदवज्ञानमुन्नतानांमहतांधीरतान्नविहन्तिनविकारञ्जनयतीत्यर्थः

। क्रोष्टेर्वा सिंहस्येति भावः । किन्तु समानानि तुल्यानि वीर्य्याण्यन्वयश्चैवारम्भाणि स्वशि कुलविक्रमाः येषां तेषु मध्ये । निर्द्धारणे सप्तमी यः कश्चिदित्यर्थः । अतिक्रान्तिमतिक्रमं करोति चेत् । असौ सदृशजनातिक्रमः तिरस्क्रिया तिरस्कारः । यथा सिंहे सिंहस्येति भावः ॥ २३ ॥

अर्हिं नीचे कीदृशी वृत्तिरित्याशंक्य सोपपत्तिकमाह । यदेति । यथा यदा विगृह्णाति विरुणद्धि पृथक्जनेनेति शेषः । तदा यशो हतं भवेत् । अथ मैत्रीं करोति तदा गुणा दूषिता भवेयुरिति शेषः । इत्युभयथा स्थितिं समीक्ष्य प्रतर्क्य विमृश्य परीक्षको विवेचकः पृथग्जनं नीचजनमवज्ञया अनादरेणोपहतं तिरस्कृतं करोति उपे

यदा विगृह्णाति हतं तदा यशः करोति मैत्रीमथ दूषिता गुणाः । स्थि
तिं समीक्ष्योभयथा परीक्षकः करोत्यवज्ञोपहतं पृथग्जनम् ॥ २४ ॥
मया मृगान्हन्तुरनेन हेतुना विरुद्धमाक्षेपवचस्तितिक्षितम् । श
रार्थमेष्यत्यथ लप्स्यते गतिं शिरोमणिं दृष्टिविषाज्जिघृक्षतः ॥ २५ ॥

क्षत इत्यर्थः ॥ २४ ॥

उपसंहरन्नाह । मयेति । अनेन हेतुना सन्धिविग्रहानर्हत्वेन कारणेन मया मृगान् हन्तुर्व्याधस्य सम्बन्धि हन्तेस्तृण्प्रत्ययः । अत एव न लोकेत्यादिना षष्ठीप्रतिषेधः । विरुद्धमतिपरुषं आक्षेपवचस्तिरस्कारवचनं तितिक्षितं सोढम् । ननु सख्यानङ्गीकारे वलात् शरं ग्रहीष्यतीत्याशंक्याह । शरेति । अथ शरार्थमेष्यति दृष्टौ विषं यस्य तस्मात् दृष्टिविषात्सर्पात् । शिरोमणिं जिघृक्षतो ग्रहीतुमिच्छतो गतिं दशां लप्स्यते प्राप्स्यति ॥ २५ ॥

इतीति । इतीत्थं ईरिताकूतमुक्ताभिप्रायमनीलवाजिनं श्वेताश्वं अर्जुनं दूतो जया

ऽयुतेनत्वसाप्रतापेनप्रतितर्ज्य अस्मान्जित्वाक्वगमिष्यसीतिभीषयित्वेत्यर्थः। ध्वजि
नीमुपेयुषःसेनासङ्गतस्यप्रसन्नरूपस्यार्जुनम्प्रतीतिशेषः। विरूपचक्षुषःत्र्यम्बक
स्यसमीपंययौ॥ २६॥ ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿॥
ततइति। ततःपताकिनीपतेःसेनापतेःअपवादेनादेशेन। अपवादोपिआदेशइ
तिसज्जनः। निह्रादवतीशब्दवतीमहाचमूःसेना। युगान्तवातैःअभिहताऽतएव
निनादंकुर्वतीअम्भोनिधिवीचिसंहतिरर्णवोर्मिसमूहइवचचाल॥ २७॥ *॥
रणायेति। जेतैवजैत्रोजयनशीलोऽनुकूलइत्यर्थः। जयतेःसन्नंतात्प्रज्ञादित्वा

इतीरिताकूतमनीलवाजिनञ्जयायदूतःप्रतितर्ज्यतेजसा। य
यौसमीपंध्वजिनीमुपेयुषःप्रसन्नरूपस्यविरूपचक्षुषः॥ २६॥
ततोपवादेनपताकिनीपतेश्चचालनिह्रादवतीमहाचमूः। युगा
न्तवाताभिहतेवकुर्वतीनिनादमम्भोनिधिवीचिसंहतिः॥ २७॥
रणायजैत्रःप्रदिशन्निवत्वरान्तरङ्गितालम्बितकेतुसंततिः। पुरोव
लानांसघनाम्बुशीकरःशनैःप्रतस्थेसुरभिःसमीरणः॥ २८॥

त्स्वार्थेऽणप्रत्ययः। तरङ्गितंसंजाततरङ्गंयथातथाआलम्बिताअवस्थिताःकेतुसं
न्ततयोयेनसःसहघनैःसान्द्रैःअंबुशीकरैः। सघनाम्बुसीकरःसुरभिःसमीर
णोवायुःरणायत्वराम्प्रदिशन्निवत्वरयन्निवबलानांसैन्यानाम्पुरोग्रेशनैःप्रतस्थेप्रस्थि
तःववावित्यर्थः॥ २८॥ ✿*✿〜✿*✿〜✿*✿〜✿*✿〜✿*✿॥
जयेति। जयारवैर्वन्दीनाञ्जयजयेतिशब्दैःक्ष्वेडितनादैःसिंहनादैस्समूर्च्छितोव
र्द्धितःशरासनज्यानाङ्गुणानाञ्जलवारणानाञ्चध्वनिः। भूधरराजकुक्षिषुगि
रिगुहासुअसम्भवन्अमान्। अवकाशमलभमानइत्यर्थः। अतएवगांभुवंप्रक

म्पयन्। एतेन बलानीवाऊळस्यमुक्तम्। दिशोऽवनस्तरेव्यानशे। चतुस्त्वसंयोगा
द्देशगुणः। अथमूर्च्छापदार्थस्य विशेषणगत्या असम्भवनहेतुत्वात्काव्यलिंगरूपः।
गिरिकुक्षिरूपापेक्षयाध्वनेराधेयस्याधिक्योक्तेरधिकरणाभ्यस्त्वेयसंभवन्निति व्यंजकं
विनोत्थाप्यमानाऽनुपातमूर्च्छागुणनिमित्ताप्रतीयमानाक्रियात्वोत्प्रेक्षा अङ्गाङ्गिभावे
नसङ्कीर्य्यतइतिसंक्षेपः ॥ २९ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥

निशातेति। निशातास्तीक्ष्णाः अतएव रौद्राः भीषणास्त्वयेषु तेषु निशातरौद्रेषु। वि
शेष्यविशेषणयोरन्यतर विशेष्यत्वविवक्षायामिष्टत्वाद्विशेषणसमासः। वनेसी
दन्तीति वनेसदां वनेचराणाम्। सत्सूद्विषेत्यादिना क्विप्। तत्पुरुषेबकृतमित्यलु

जयारवक्ष्वेडितनादमूर्च्छितः शरासनज्यातलवारणध्वनिः। असं
म्भवन्भूधरराजकुक्षिषु प्रकम्पयन्नामवतस्तरे दिशः ॥ २९ ॥
निशातरौद्रेषु विकाशताङ्गतैः प्रदीपयद्भिः ककुभामिवान्तरम्। वने
सदां हेतिषु भिन्नविग्रहैर्विपुस्फुरे रश्मिमतो मरीचिभिः ॥ ३० ॥

क्। हेतिष्वायुधेषु। हेतिशस्त्रेऽपिपुंस्त्रियोरितिकेशवः। भिन्नविग्रहैः संक्रान्तमू
र्तिभिः अतएव विकासतां विस्तृत्वरताङ्गतैरतएव ककुभान्दिशामन्तरम्प्रदीपयद्भिः
प्रज्वालयद्भिरिवस्थितैरित्युत्प्रेक्षा। रश्मिमतः सूर्य्यस्य। मादुपधायाश्चमतोर्वो
ऽयवादिभ्यइतिमतुपोमकारस्यवकारः। मरीचिभिः करैः। भानुः करोमरीचिः
स्त्रीपुंसयोरित्यमरः। विपुस्फुरे बभासे। स्फुरितेर्भावेलिट् ॥ ३० ॥ *—* ॥
उदूढेति। उदूढेनोन्नतेनवक्षसास्थगितमाच्छादितमेकतरन्दिग्मुखं येन सः विकृ
ष्टमाकृष्टमतएव विस्फारितं निर्घोषितं चापमण्डलं येन स विभुः शिवः। आयतं वि
स्तृतम्पक्षद्वयम्पार्श्वद्वयं वितत्य स्वमहिम्ना व्याप्य। पक्षः साध्यगरुत्पार्श्वसहायबल

भिर्निर्मितवैजयन्ती । गणानां मध्यगो मध्यस्थोऽप्युपरिस्थित इव बभौ । सर्वो
न्नतत्वात्तथा लक्षित इत्यर्थः ॥ ३१ ॥ ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ ॥
सुगेष्विति । सुखेन दुःखेन वा गच्छन्ति तिष्ठन्ति । सुगेषु सुगमेषु दुर्गेषु दुर्गमेषु
च समविषमदेशेष्वित्यर्थः । सुदुरोरधिकरणार्थे डो वक्तव्यः । अत एव टिलोपः
। तुल्यविक्रमैर्लाघवात्समसञ्चारैः । जवादहंपूर्विकया अहमहमिकया । अह
म्पूर्वमहं पूर्वमित्यहंपूर्विका स्त्रियामित्यमरः । यियासुभिर्यातुमिच्छुभिः । यातेः
सन्नन्तादुप्रत्ययः । मनोज्ञादित्वाद्वुञ्प्रत्ययः । पृषोदरादित्वाद्वृद्ध्यभावः । ग

उदूढवक्षःस्थगितैकदिङ्मुखो विकृष्टविस्फारितचापमण्डलः । वि
तत्य पक्षद्वयमायतं बभौ विभुर्गणानामुपरीव मध्यगः ॥ ३१ ॥
सुगेषु दुर्गेषु च तुल्यविक्रमैर्जवादहंपूर्विकया यियासुभिः । ग
णैरविच्छेदनिरुद्धमाबभौ वनं निरुच्छ्वासमिवाकुलाकुलम् ॥ ३२ ॥
तिरोहितश्वभ्रनिकुञ्जरोधसः समश्नुवानाः सहसातिरिक्तताम् ।
किरातसैन्यैरपिधाय रेचिता भुवः क्षणं निम्नतयेव भेजिरे ॥ ३३ ॥

णैः प्रमथैः । गणाः प्रमथसंख्यौघा इति वैजयन्ती । अविच्छेदेन निरुद्धं । अत ए
व आकुलाकुलमाकुलप्रकारेण । प्रकारे गुणवचनस्येति द्विर्भावः । वनं निरुच्छ्वासं
निरुद्धप्राणमिव आबभावित्युत्प्रेक्षा ॥ ३२ ॥ ❁ * ❁ * ❁ * ❁ * ❁ * ॥
तिरोहितेति । किरातसैन्यैस्तिरोहितानि छन्नानि श्वभ्राणि कुञ्जरोधांसि गर्तवृक्षतटा
नि यासां ताः । अत एव भुवः प्रदेशाः सहसा अतिरिक्ततामुत्ताननताम् । समश्नुवानाः
आप्नुवत्यः । अपिधाय आच्छाद्य रेचिता रिक्तीकृता मुक्ताः क्षणं निम्नतया गाम्भीर्येण भे
जिरे इव प्राप्ता इवेत्युत्प्रेक्षा । सैन्यैर्या भुवो व्याप्तास्ता उत्तानाः प्रतीयन्ते तैर्मुक्तास्ता

एवन्निम्नाप्रतीयन्तइत्यर्थः ॥ ३३ ॥

पृथ्विति । पृथुभिर्विशालैरूरुभिपर्य्यस्ताःक्षिप्तावृहत्योलतातनयोययासाजवानि लेनवेगमारुतेनचाघूर्णिताःभ्रामिताःशालाःसर्ज्जतरवश्चंदनानिचययासा । प्रा कारवृक्षयोःशालःशालःसर्जतरुःस्मृतइतिशाश्वतः । परितःसर्वत्र । प्रसारि णीप्रसरणशीला । गणाधिपानांसन्ततिस्समूहोवनान्यवाञ्चिन्युब्जानीवनीचा नीवचकारेत्युत्प्रेक्षा । अवाञ्चतिअधोभवति । अवपूर्वादञ्चतेःक्विन् । स्यादवाङ् प्यधोमुखइत्यमरः ॥ ३४ ॥

अथाष्टभिःश्लोकैरर्ज्जुनंविशेषयन्गणानान्तदभियोगमाह । ततइत्यादिना ।

पृथूरुपर्य्यस्तवृहल्लतानतिर्जवानिलाघूर्णितशालचन्दना । गणाधि
पानाम्परितःप्रसारिणीवनान्यवाञ्चीवचकारसंहतिः ॥ ३४ ॥
ततःसदर्पम्प्रतनुन्तपस्ययामदस्रुतिक्षामिवैकवारणम् । परि
ज्वलन्तन्निधनायभूभृतान्दहन्तमाशाइवजातवेदसम् ॥ ३५ ॥

ततःसदर्प्पंसगर्वंसान्तःसारन्तपस्ययातयश्चर्यया । तपस्यतेःक्यवन्तात्स्त्रियाम प्रत्ययेटाप् । प्रतनुंकृशंअतएवमदस्रुत्यामदक्षरणेनक्षामंकृशम् । क्षायोमइ तिनिष्ठातकारस्यमकारः । एकवारणमेकाकिनङ्गजमिवस्थितमित्युपमा । पु नर्भूभृतांराज्ञान्निधनायनाशायपरिज्वलन्तन्तेजस्विनंअतएवदिशोदहंतञ्जातवे दसमग्निमिवस्थितमित्युपमालङ्कारः । कृपीटयोनिर्ज्वलनोजातवेदास्तनूनपादि त्यमरः ॥ ३५ ॥

अनादरेति । पुनश्चअनादरेणअवगणनयाउपात्तोनिषङ्गादुद्धृतश्चैकःसायको येनतन्तथानुकूलेसुहृदीवजयेसस्पृहञ्जयमिच्छन्तमित्यर्थः । पुनःअपूर्णःन्यूनः

प्रतिक्रियाचरणप्रत्यर्थनारूपोयस्यसः। अतएवपेलवोलघुस्तस्मिन्नपूर्णप्र
तिकारपेलवेबलोदधौसेनासमुद्रेशनैरशंभ्रमेणनयनेदृष्टीनिवेशयन्तः इतिवी
रस्वभावोक्तिः। बलमुदधिरिवेत्युपमितसमासः। पेषवासवाहनधिषुचेत्युदकस्यो
दादेशः॥ ३६ ॥ * ❀❀ ❀❀ * ❀❀ ❀❀ * ❀❀ ❀❀ * ❀ ॥
निषण्णमिति। पुनश्चापदाम्प्रतीकारस्यकारणेसाधनेअनपायिनिस्थिरेशरासने
एवम्भूतेधैर्य्यइवनिषण्णांस्थितंप्रकृतौस्वभावेस्थितमपिनिर्विकारमपीत्यर्थः। अ
नएवअलंघनीयंअनतिक्रमणीयंअतएवनिवातनिःकम्पंवाताभाववान्निश्चलं। नि

अनादरेणापातधृतैकसायकञ्जयेनुकूलेसुहृदीवसस्पृहम्। श
नैरपूर्णप्रतिकारपेलवेनिवेशयन्तन्नयनेबलोदधौ॥ ३६ ॥
निषण्णमापत्प्रतिकारकारणेशरासनेधैर्य्यइवानपायिनि। अल
ङ्घनीयम्प्रकृतावपिस्थितन्निवातनिःकम्पमिवापगापतिम्॥ ३७ ॥
उपेयुषींविभ्रतमन्तकद्युतिम्बधाददूरेपतितस्यदंष्ट्रिणः। पुरः
समावेशितसत्पशुंद्विजैःपतिम्पशूनामिवहूतमध्वरे॥ ३८ ॥

वातावाश्रयावाताविन्यमरः। आपगापतिंसमुद्रमिवस्थितम्॥ ३७ ॥ ❀ * ❀ ॥
उपेयुषीमिति। पुनश्चादूरेसमीपेपतितस्यदंष्ट्रिणोवराहस्य। व्रीह्यादित्वादि
निप्रत्ययः। वधाद्धेतोरुपेयुषीम्प्राप्तांअन्तकस्येवयमस्येवद्युतिस्तांविभ्रतन्धार
यन्तम्। तथाचद्विजैर्ब्राह्मणैरध्वरेयज्ञे। यज्ञःसवोध्वरोयागइत्यमरः। हूत
माहूतम्पुरःअग्रेसमावेशितःस्थापितःसत्पशुर्य्यज्ञीयपशुर्येस्तंपशूनांपतिंरुद्रमि
वस्थितम्॥ ३८ ॥ * ❀ * ❀ * ❀ * ❀ * ❀ * ❀ * ❀ * ❀ * ❀ ॥
निजेनेति। पुनश्चनिजेननैसर्गिकेणभूयसाबहुलेनधैर्यमेवगुणस्तेनविजितम

न्येषां गौरवङ्गाम्भीर्यं यस्मिन् कर्म्मणि तथा गम्भीरतां दुरवगाहत्वं नीतम् । अनल्प
घनाः सान्द्रा उरवश्च महत्यश्च वीरुधो लता श्च यस्मिन् तेन घनोरुवीरुधा वनोदये
नारण्यप्रादुर्भावेन समन्धकारीकृतं दुरवगाहीकृतमुत्तमाचलमिव स्थितं समन्ततो
ऽन्धकारो यस्य स इति विग्रहः ॥ ३९ ॥ ✻ ✻ ✻ ✻ ✻ ✻ ✻ ✻ ✻ ✻ ✻ ✻ ॥
महर्षभेति । महर्षभस्य महावृषभस्य स्कन्ध इव स्कन्धो ऽंसो यस्य तम् । उपमा
नपूर्वपदत्वादुत्तरस्कन्धलोपः । ऋषभो वृषभो वृष इत्यमरः । स्कन्धो भुजशिरों ऽसो
ऽस्त्रीत्यमरः । अनूनकन्धरं स्थूलग्रीवम् । अथ ग्रीवायां शिरोधिः कन्धरेत्यपीत्यम

निजेन नीतं विजितान्यगौरवं गभीरतां धैर्यगुणेन भूयसा । वनो
दयेनेव घनोरुवीरुधा समन्धकारीकृतमुत्तमाचलम् ॥ ३९ ॥
महर्षभस्कन्धमनूनकन्धरं बृहच्छिलावप्रघनेन वक्षसा । समु
ज्जिहीर्षुं जगतीं महाभरां महावराहं महतोऽर्णवादिव ॥ ४० ॥
हरिन्मणिश्याममुदग्रविग्रहं प्रकाशमानं परिभूय देहिनः । म
नुष्यभावे पुरुषं पुरातनं स्थितं जलादर्श इवांशुमालिनम् ॥ ४१ ॥

रः । बृहच्छिलावप्रं महच्छिलातटं तद्वद्घनेन कठिनेन वक्षसा उपलक्षितः । म
हाभरां दुष्टैरतिभारवतीं जगतीं महीं समुज्जिहीर्षुं दुष्टराजकार्णवात् समुद्धर्त्तुमि
च्छुम् । अत एव महतोऽर्णवाज्जगतीं समुज्जिहीर्षुमुक्तविशेषणविशिष्टं वराह
मिव स्थितमर्थसाधर्म्यादियमुपमा न श्लेषः शब्दमात्रसाधर्म्ये तस्य विधानादि
ति रहस्यम् ॥ ४० ॥ ✻ ✻ ✻ ✻ ✻ ✻ ✻ ✻ ✻ ✻ ✻ ✻ ✻ ✻ ✻ ✻ ॥
हरिदिति । पुनश्च हरिन्मणिश्यामं मरकतमणिश्यामलं उदग्रविग्रहमुदारमूर्त्ति
न्देहिनः सत्त्वान्परिभूय प्रकाशमानं जलमेवादर्शो मुकुरस्तस्मिन्नंशुमालिनं सू

र्य्येमिवमनुष्यभावेनमनुष्यरूपेणस्थितम्पुरातनम्पुरुषंयोबदरीतपोवननिवासी
नारायणसहचरोनरोनामसएवायमित्यर्थः ॥ ४१ ॥ ॥
गुर्व्वीति । गुरुभिःक्रियारम्भाणाम्फलैरलंकृतंसफलकर्म्मारम्भमित्यर्थः । जग
त्प्रमाथिनःजगद्विजयिनःप्रतापस्यतेजसोगतिंस्थानमतोस्यबहूनामेकलक्ष्यत्वमु
युज्यतइतिसन्दर्भाभिप्रायः । पूर्व्वोक्तविशेषणविशिष्टमनीलवाजिनंश्वेताश्वंअर्ज्जु
नंगणाःप्रमथादयःस्तपात्ययेतोयघनाःतोयभरिताःवार्षिकाइत्यर्थः । घनामेघा
इवब्रचलमितिशेषः । समासेदुरवापुरित्यर्थः ॥ ४२ ॥ ॥

गुरुक्रियारम्भफलैरलंकृतङ्गतिम्प्रतापस्यजगत्प्रमाथिनः । गणाःस
मासेदुरनीलवाजिनंतपात्ययेतोयघनाघनाइव ॥ ४२ ॥ कुलकं ॥
यथास्वमाशंसितविक्रमाःपरेमुनिप्रभावक्षततेजसःपरे । ययुःक्ष
णादप्रतिपत्तिदीनतांमहानुभावःप्रतिहन्तिपौरुषम् ॥ ४३ ॥
ततःप्रजह्रेसममेवतत्रतैरपेक्षितान्योन्यबलोपपत्तिभिः । महोद
यानामपिसङ्घवृत्तितांसहायसाध्याःप्रदिशन्तिसिद्धयः ॥ ४४ ॥

यथास्वमिति । पुरापूर्वंस्वस्वमनतिक्रम्ययथास्वमेकएवजेष्यामीतिआशंसिताःकां
क्षिताःकथिताःवाविक्रमायैस्तेपरेशत्रवःमुनिप्रभावात्क्षततेजसोहतप्रभावाःस
न्तःअप्रतिपत्तिमूढतांमोहान्धतांययुः तथाहिमहानुभावोऽतिप्रतापीपौरुषंपर
स्यचेष्टितम्प्रतिहन्तिनाशयति ॥ ४३ ॥ ॥
ततइति । ततःएकैकस्याशक्तौअपेक्षितावाञ्छिताऽन्योन्यबलोपपत्तिरन्योन्यशक्त्य
वष्टंभोयैस्तैगणैःप्रमथैस्तत्रार्जुने । क्रियाधारत्वात्सप्तमी । समंयुगपदेवप्रजह्रे
प्रहृतःभावेलिट् । तथाहि । सहायसाध्याःसिद्धयःकार्य्यसिद्धयोमहोदया

नामपिमहानुभावानामपि । संघेन वृत्तिर्व्यापारो येयान्ते यासम्भावस्तत्ताम्प्रसङ्गवृत्तितांसम्भूयकारितामप्रदिशन्ति । अतोगणानामपिसम्भूयकारित्वन्दोषइतिभावः ॥ ४४ ॥

किरातेति । उरुभिर्बृहद्भिश्चापैर्नोदिताःप्रक्षिप्ताःउपात्तरंहसः । प्राप्तवेगाःप्रवृत्तपत्रध्वनयःसञ्जातपक्षस्वनाःशिलीमुखाबाणाःमहावनादुन्मनसःक्वापिगन्तुमुत्सुकाः । तथाउक्तविशेषणविशिष्टाश्खगाःपक्षिणइवकिरातसैन्यात्समंसमन्ततउत्पेतुः ॥ ४५ ॥

किरातसैन्यादुरुचापनोदिताःसमंसमुत्पेतुरुपात्तरंहसः । महावनादुन्मनसःखगाइवप्रवृत्तपत्रध्वनयःशिलीमुखाः ॥ ४५ ॥

गभीररंध्रेषुभृशंमहीभृतःप्रतिस्वनैरुन्नमितेनसानुषु । धनुर्निनादेनजवादुपेयुषाविभिद्यमानाइवदध्वनुर्दिशः ॥ ४६ ॥

विधूनयन्तीगहनानिभूरुहान्तिरोहितोपान्तनभोदिगन्तरा । महीयसीवृष्टिरिवानिलेरितारवंवितेनेगणमार्गणावलिः ॥ ४७ ॥

गभीरेति । गभीररंध्रेषुगम्भीरगह्वरेषुमहीभृतःसानुषुयेप्रतिस्वनास्तैर्भृशमुन्नमितेनोत्थापितेनदीर्घीकृतेनजवादुपेयुषाप्राप्तवताधनुषोनिनदेनदिशोविभिद्यमानाविदीर्यमाणाइवदध्वनुःध्वनिञ्चक्रुः ॥ ४६ ॥

विधूनयन्तीति । भूरुहांगहनानिवनानि । अटव्यरण्यंविपिनङ्गहनंकाननंवनमित्यमरः । विधूनयन्तीकम्पयन्तीतिरोहितानिछादितानिउपान्तानिप्रान्तानिनभोन्तरिक्षन्दिगन्तराणिचयासांसागणमार्गणावलिःप्रमथशरसंहतिरनिलेनवायुनाईरिताप्रेरितामहीयसीवृष्टिरिवरवंवितेनेविस्तारयामास ॥ ४७ ॥

त्रयीमिति । ऋतूनां त्रयीं षण्मासान् । कालाध्वनोरत्यन्तसंयोगे द्वितीया । अनि
लाशिनो वायुभक्षकस्य कृशस्येत्यर्थः । तथापि रणाय रणं कर्तुं संप्रहृष्यत उत्साहमान
स्य । क्रियार्थेत्यादिना चतुर्थी । जिष्णोरर्जुनस्य वपुषि पोषं उपचयं प्रयाति गच्छ
ति सति शिथिलेन प्रथममिति शेषः । वर्मणा कवचेन विदुषेव अनन्तरकरणीयज्ञा
नतेवेत्युत्प्रेक्षा । सत्वरं शीघ्रं घनत्वं दृढत्वमीये प्राप्तम् । अन्यथानुपयोगादिति भा
वः । इणः कर्मणि लिट् ॥ ४८ ॥ * * * * ॥
पतत्स्विति । शस्त्रेषु रोदसी द्यावापृथिव्यौ । द्यावापृथिव्यौ रोदस्यावित्यमरः । सम
न्ततो वितत्य प्राप्य पतत्सु सत्सु धनुर्दुधूषतः कम्पितुमिच्छतः आस्फालयत इत्यर्थः

त्रयीमृतूनामनिलाशिनस्ततः प्रयाति पोषं वपुषि प्रहृष्यतः । रणा
य जिष्णोर्विदुषेव सत्वरं घनत्वमीये शिथिलेन वर्म्मणा ॥ ४८ ॥
पतत्सु शस्त्रेषु वितत्य रोदसीं समन्ततस्तस्य धनुर्दुधूषतः । सरो
षमुल्केव पपात भीषणा बलेषु दृष्टिर्विनिपातशंसिनी ॥ ४९ ॥

। धूञः सन्नन्ताच्छतृप्रत्ययः । स्वरतिसूतिसूयतिधूञूदितो वेति विकल्पादिडभा
वः । तस्यार्जुनस्य सम्बन्धिनी भीषयत इति भीषणा । नंद्यादित्वाल्ल्युः । विनि
पातशंसिनी विनाशसूचिका दृष्टिरुक्तविशेषणा उल्केव बलेषु सरोषं यथा तथा पपा
त ॥ ४९ ॥ * * * * ॥
दिश इति । क्षयकालः कल्पान्तकाल इव । संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इ
त्यपीत्यमरः । दारुणो रौद्रः मुनिरर्जुनः इषुभिर्बाणैर्दिशः समूहन्निवैकत्र समा
हरन्निव अन्यथा तासामपारदर्शनत्वस्यादिति भावः । रवेः प्रभां विक्षिपन्निव अधः
प्रक्षिपन्निव अन्यथा सा कथं न दृश्यत इति भावः । तथा अनिलं वायुं व्याकुलयन् इ

षुभिरन्तरालं व्याघूर्णयन्निव तस्य नयागतिविघातादितिभावः। सशैलां क्षितिञ्चा
लयन्निव कम्पयन्निव तथा संक्षोभादितिभावः। मचालगतिमकरोत्। संवेवेङ्वश
हृञ्जप्रेक्षायाम्॥ ५०॥
विमुक्तमिति। आशंसितैः कांक्षितैः शत्रुविजयो यैस्तैः। अहमहमिकया शत्रुवि
जिगीषद्भिरित्यर्थः। वनेचरैरेकावसरं समकालम्। अत्यन्तसंयोगे द्वितीया। वि
मुक्तं प्रयुक्तमनेकमायुधम्। जातावेकवचनम्। सोऽर्जुनः क्रियाफलमतिपातितो
ऽतिक्रान्तः कालः कालइव अतिक्रान्तकालस्य कर्मणो निःफलत्वादितिभावः। अ

दिशः समूहन्निव विक्षिपन्निव प्रभां रवेराकुलयन्निवानिलम्। मुनि
श्चचाल क्षयकालदारुणः क्षितिं सशैलां चलयन्निवेषुभिः॥ ५०॥
विमुक्तमाशंसितशत्रुनिर्ज्जयैरनेकमेकावसरं वनेचरैः। सनिर्ज्जि
घनायुधमन्तरा शरैः क्रियाफलं कालइवातिपातितः॥ ५१॥
गतैः परेषामविभावनीयतान्निवारयद्भिर्विपदं विदूरगैः। भृशं
बभूवोपचितो बृहत्फलैः शरैरुपायैरिव पाण्डुनन्दनः॥ ५२॥

न्तरा मध्ये शरैर्निजघान॥ ५१॥
गतैरिति। पाण्डुनन्दनोऽर्ज्जुनः परेषामविभावनीयतां लाघवप्रयोगादन्यत्र गूढप्र
योगाच्चादृश्यतां अप्रकाश्यतां च गतैः विपदमनर्थं निवारयद्भिः विदूरगैर्दूरलक्ष्य
गैः परमण्डलप्रविष्टैश्च बृहत्फलैरायताग्रैर्महालाभैश्च। फलम्बाणाग्रलाभयोरिति
शाश्वतः। शरैरुपायैः सामादिभिरिव भृशमुपचितः प्रवृद्धो बभूव। अत्र शब्दमात्र
साधर्म्यात्प्रकृताप्रकृतश्लेषः उपमेतिकेचित्॥ ५२॥
दिवइति। श्रा दिवोन्तरिक्षात्पृथिव्या भूगोलात्ककुभां मण्डलान्नु दिङ्मण्डलाद्वा उ

त तिग्मतेजसोऽर्कस्य बिम्बान्मण्डलाद्वा। अथवा सकृद्विकृष्टात्कार्मुकान्मुनेः शरी
राद्वा पतन्तीति ते गणाः अभिमेनिरे ज्ञातवन्तः। अन्यथा कथममी विश्वमन्तकृद्य
शराः सम्भाव्यन्त इति भावः। अत्र सर्वतः शरसंपातदर्शनात्सम्भावनया पृथिव्या
दीनामन्यतमस्योपादानत्वोत्प्रेक्षा। सा च प्रतीयमानाव्यञ्जकाप्रयोगात्। नु शब्दा
द्यस्तु संशये॥ ५३॥ ॥

गणेति। मर्मविदारणैरपि मर्मस्वेव तान्येव दारयद्भिरपीत्यर्थः। गणाधिपानाम्प
रासुतां मरणमविधाय अकृत्वा निर्गतैस्तेषाममर्त्यत्वादिति भावः। तस्य मुनेः पत्रि

दिवः पृथिव्याः ककुभां नु मण्डलात्पतन्ति बिम्बादुत तिग्मतेजसः। स
कृद्विकृष्टादथ कार्मुकान्मुनेः शराः शरीरादिति तेऽभिमेनिरे॥ ५३॥
गणाधिपानामविधाय निर्गतैः परासुतां मर्मविदारणैरपि। ज
वादतीये हिमवानधोमुखैः कृतापराधैरिव तस्य पत्रिभिः॥ ५४॥
द्विषां क्षतीर्याः प्रथमे शिलीमुखाः विभिद्य देहावरणानि चक्रिरे।
न तासु पेते विशिखैः पुनर्मुनेररुन्तुदत्वं महतां ह्यगोचरः॥ ५५॥

भिः शरैः कृतापराधैरिव स्वामिकार्याकरणात्सापराधैरिवेत्युत्प्रेक्षा। अधोमुखैः सद्भि
र्जवात् हिमवान् अतीये अतिचक्रमे प्रविष्ट इत्यर्थः। लज्जितस्य कचिन्निलयनमु
चितमिति भावः॥ ५४॥ ॥

द्विषामिति। प्रथमे प्रथममुक्ता इत्यर्थः। शिलीमुखाः मुनिशराः द्विषान्देहावरणा
नि वर्माणि विभिद्य याः क्षतीः प्रहारान् चक्रिरे तासु क्षतीषु पुनः पश्चात्प्रयुक्तैर्मुनिवि
शिखैर्न पेते न पतितम् पिष्टपेषणेन दोषापातादिति भावः। तथाहि अरुन्तुदत्वं पीडि
तपीडनं सतामगोचरो हि। सन्तः पीडितपीडां न कुर्वन्तीत्यर्थः। न हन्यात्सन्नप्र

म्नं न। नैनातिपरिक्षतमितिनिषेधस्मरणादितिभावः। अरुंअरुणान्तुदतीति अरुन्तुदः। व्रणोमीर्ममरुरित्यमरः। विध्वरुषोस्तुदइतिखप्रत्ययः। अरुर्द्विषदजन्तस्यमुमितिमुमागमः॥ ५५॥ * ○ ○ * ॥ ○ * ○ ॥ * ○ * ॥ ○ * ○ ॥

समुज्झितेति। यावन्तोऽशनयोयावदशनिःयावदवधारणार्थेइत्यव्ययीभावः। यावदशनियथातथासमुज्झिता अशनिसमसंख्ययामुक्तामुनिचापात्सहसम्भूयैवनिर्यती। इतिकामन्तादुक्तस्यकौशलमितिभावः। यातेःशतरिङीप्। मुनिवाणसंहतिरुमापतेस्तमूंहिमांशोःप्रभापङ्कजावलिमिवसङ्कोचंनिनायप्रापयामास। दुहादिपाठान्नयतिर्द्विकर्म्मकः॥ ५६॥ ○〜○〜○〜○〜○〜○○ ॥

समुज्झितायावदशनिनिर्य्यतीसहैवचापान्मुनिबाणसंहतिः। प्रभाहिमांशोरिवपङ्कजावलिन्निनायसङ्कोचमुमापतेस्तमूम्॥ ५६॥
अजिह्ममोजिष्ठममोघमक्लमंक्रियासुवह्वीषुपृथङ्नियोजितम्।
प्रसेहिरेसादयितुन्नसादिताःशरौघमुत्साहमिवास्यविद्विषः॥ ५७॥

अजिह्ममिति। अजिह्मंस्वरूपतोगत्यावावक्रम्। अन्यत्रतुजिह्मस्यानप्रवृत्तोनभवतीत्यजिह्मस्तम्। ओजिष्ठमोजस्विनंसारवत्तमन्ते। उभयत्रापिओजस्विशब्दाद्विन्यन्तादिष्ठन्विन्मतोर्लुगितिलुक्टिलोपश्च। अमोघमवध्यमक्लमंनिरन्तरव्यापारेप्यश्रान्तम्बह्वीषुक्रियासुछेदनभेदेनपातनादिकर्मसुपृथग्भेदेननियोजितंकर्म्मानुगुण्येनविनियुक्तमित्यर्थः। अस्यमुनेःशरौघंउत्साहमिववीरस्यस्थायिभावभूतम्प्रयत्नविशेषमेवेत्यर्थः। सादिताःकर्षिताःविद्विषःशत्रवःसादयितुम्प्रतिकर्त्तुंनप्रसेहिरेनशेकुः। तस्योत्साहवदेवशरवर्षेदुर्द्धर्षमभूदितिभावः॥ ५७॥ ○ * ○ * ○ * ○ * ○ * ○ * ○ * ○ * ○ * ○ ॥

शिवेति । अनेकदेशगानानादेशस्थाः शिवध्वजिन्यो हरसेना उग्रेषवो मयूखा इ
वेत्युपमितसमासः । अन्यत्र तूग्रेषव इव मयूखा इति मयूरव्यंसकादिसमासः । ते
षां माला अस्यास्तीति तमुग्रेषुमयूखमालिनं । व्रीह्यादित्वादिनिः । एकदेश
स्थमेकत्रैवस्थितं मुनिमर्कम्प्रजा इव युगपत्प्रतियोधं योधं योधं प्रति । अव्यये विभ
क्त्यादिना यथार्थे वीप्सायामव्ययीभावः । अग्रतः स्फुरन्तं ददृशुः ददृशुः । यथै
कोऽर्क एकत्रैव स्थितोऽपि नानादेशस्थानामपि प्रतिपुरुषम्ममैवाग्रे वर्तत इति युगपत्
प्रतीयते तद्वद्बाणवर्षी मुनिरपि प्रतियोधन्तथैव प्रत्यय्यादित्यर्थः ॥ ५८ ॥ ❁✻❁ ॥

शिवध्वजिन्यः प्रतियोधमग्रतः स्फुरन्तमुग्रेषुमयूखमालिनम् । त
मेकदेशस्थमनेकदेशगा निदध्युरर्कं युगपत्प्रजा इव ॥ ५८ ॥
मुनेः शरौघेण तदुग्ररंहसा बलम्प्रकोपादिव विष्वगायता । विधू
नितम्भ्रान्तिमियाय सङ्गिनीं महानिलेनेव निदाघजं रजः ॥ ५९ ॥
तपोबलेनैष विधाय भूयसीस्तनूरदृश्याः स्विदिषून्निरस्यति । अमु
ष्य मायाविहतं निहन्ति नः प्रतीपमागत्य किमु स्वमायुधम् ॥ ६० ॥

मुनेरिति । प्रकोपादमर्षादिव विष्वक्समन्तात् आयता आगच्छता उग्ररंहसा तीव्रवे
गेन मुनेः शरौघेण उक्तविशेषणेन महानिलेन वात्यया निदाघजं ग्रीष्मोत्थं रज इव
विधूनितं व्याहतं तत् बलम्प्रमथानां सैन्यं सङ्गिनीमनुबन्धिनीमविच्छिन्नामिति याव
त् भ्रान्तिमनवस्थानमियाय प्राप ॥ ५९ ॥ ❁✻❁✻❁✻ ॥
अथ त्रिभिर्विशेषकमाह । तप इत्यादिना । एष मुनिः तपोबलेन तपःसामर्थ्येन भू
यसीर्बह्वीरदृश्यास्तनूरात्मनः शरीराणि विधाय स्विदृष्ट्वा इषून्निरस्यति क्षिपति
च । किं वा अमुष्य अस्य मुनेर्मायया विहतं प्रतिहतं स्वं स्वकीयमिवायुधं प्रतीपं प्रति

कूलमागत्यप्रत्यावृत्त्येत्यर्थः। नोऽस्माकंवानिहन्तिकिमु। जासिनिप्रहरणेत्यादि
सूत्रेणकर्मणिषष्ठीशेषाविवक्षायान्तुद्वितीया॥ ६०॥ ○ ○ ○ ○ ○ ○ ○॥
हृताइति। यद्वाऽस्यमुनेर्गुणैर्हृताऽऽकृष्टावाभयेनदस्यैवा। भयाद्बिभ्यत्योवे
त्यर्थः। देवतास्तिरोहिताःसत्यःप्रहरन्तिखिन्नत्कुतः। अन्यथाऽस्यमुनेरमीसा
यकाःजलधेरूर्म्मयइवकथंनुसन्ततमनेकसंख्याःभवन्ति। अन्यत्रपक्षासम्भवेन
नसम्भवतीत्यर्थः। किमितिप्रच्छन्नादेवतायुध्यन्तइत्याह। गुणैर्हृताभयेनवाएते
नगुणैरावर्जिताःप्रीत्याबिभ्यन्त्योऽस्मात्कर्तुमानाइत्यर्थः। किमस्यवितर्कत्रयस्यमूल
मित्याह। कथमिति। अस्मात्कथञ्जलधेरूर्म्मयो यथाएकस्यैवसायकाःसन्तत

हृतागुणैरस्यभयेनवामुनेस्तिरोहिताःस्वित्प्रहरन्तिदेवताः। कथं
न्वमीसन्ततमस्यसायकाभवन्त्यनेकेजलधेरिवोर्म्मयः॥ ६१॥
जयेनकच्चिद्विरमेदयंरणाद्भवेदपिस्वस्तिचराचरायवा। ततापं
कीर्णान्नृपसूनुमार्गणैरितिप्रतर्काकुलितापताकिनी॥ ६२॥

मतिवहवोभवन्ति। एकशब्दस्यएकशेषेकृतेएकइतिरूपमितिकेचित्। नश
ब्दस्त्वन्यार्थे॥ ६१॥ * ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ *॥
जयेनेति। कच्चिदयंरणस्यजयेनविरमेत्। अस्मान्जित्वाकच्चिदयंयुद्धंउपसं
हरेदित्यर्थः। अपिचस्चराचरायस्वस्तिभवेत्। कच्चित्स्थावरजङ्गमञ्जगन्नविनश्ये
दित्यर्थः। कच्चिदपिहसम्भावनायांप्रार्थनायांलिङ्। इतिप्रतर्काकुलिता। पूर्वो
क्तायेप्रतर्कास्तैराकुलिताविह्वलाः। अत्रसहेतुकंविशेषणमाह। नृपसूनुमार्ग
णैरऽर्जुनबाणैःकीर्णाक्षिप्ताऽऽपताकिनीततापतापम्प्राप॥ ६२॥ * ~~ *॥
अमर्षिणेति। जिष्णुनानिरस्तंबलंनरराज। किमिवकेनक्षिप्तन्नशोभते। क्षमा

अयंकार्य्येऽमर्षिणानिरस्तंयथाक्षमासाध्यंहिकृत्यमिवसामयैर्न्निरस्यते। तच्च
निरस्तन्नशोभतेयथाचमदोद्धतेनपुंसाहितंप्रियवचनन्निरस्तन्नराजते। म
दःपौरुषादिधर्म्मःतेनउद्धतोज्वलितोयथावलीयसाविधिनापौरुषन्निरस्तंसत्
नराजते। वलीयसादैवेनप्रतिपुरुषव्यापारस्यनैःफल्यादेःजिष्णुरपिवलीयोऽनि
तिभावः॥ ६३ ॥

प्रतिदिशमिति। प्लवगानामधिपोऽधीशस्तस्येवलक्ष्मणंयस्याःसातथोक्ता। कपि
प्लवङ्गप्लवगइत्यमरः। चिह्नंलक्ष्मचलक्षणमित्यमरः। स्तुतिरूपाइत्यर्थः। विशि
खसंहतितापितमूर्तिभिरिति। विशिखावाणास्तेषांसंहतयःसमूहाः। स्त्रियान्तुस

अमर्षिणाकृत्यमिवक्षमाश्रयंमदोद्धतेनेवहितम्प्रियंवचः। ब
लीयसातद्विधिनेवपौरुषम्बलन्निरस्तंनरराजजिष्णुना॥ ६३ ॥
प्रतिदिशंप्लवगाधिपलक्ष्मणाविशिखसंहतितापितमूर्तिभिः। र
विकरग्लपितैरिववारिभिःशिववलैःपरिमण्डलतादधे॥ ६४ ॥

हितिर्वृन्दमित्यमरः। ताभिःतापिताःपीडितामूर्तयोदेहाःयेषान्तैस्तथाभूतैःशर
निकरकर्त्तितकलेवरैरित्यर्थः। शिववलैःप्रमथसैन्यैःकर्तृभिःरविकरग्लपितैःसू
र्य्यरश्मितप्तैर्वारिभिरुदकैरिवप्रतिदिशंदिक्षुपरिमण्डलतापरितश्चक्राकारम
ण्डलतेतियावत्। आदधेअधारिप्रतिदिशंमण्डलाकारेणस्थितमित्यर्थः। धाञः
कर्मणिलिट्आतपतप्तंहिनीरम्परिभ्रमतितद्वन्मुनिपीडितंसैन्यंवभ्रामेत्यर्थः। द्रु
तविलम्बितंछन्दः। द्रुतविलम्बितमाहनभौभरौइतिलक्षणात्॥ ६४ ॥ ॥
प्रविततेति। प्रवितताविस्तृताविशरजालानितैश्छन्नमाच्छादितंविश्वान्तरालं
येनतस्मिन्शरपूरितब्रह्माण्डोदरेपाण्डुसूनौआविर्म्मण्डलंआविर्भूतमण्डलश्चनुः

आविर्भूतं मण्डलं यस्य धनुष इति वृत्तौ भूतार्थस्यानुप्रवेशाद्भूतशब्दस्याप्रयोगः । विधुवति कम्पयति आस्फालयति सति भीतभीताद्भवभीतप्रकारेव जयलक्ष्मीः विजयश्रीः कथमपि केनचित्प्रकारेण विषमनयनसेनापक्षपातं विहातुमत्यक्तुं विषेहे श

प्रविततशरजालच्छन्नविश्वान्तराले विधुवति धनुराविर्मण्डलम्पाण्डुसूनौ । कथमपि जयलक्ष्मीर्भीतभीता विहातुं विषमनयनसेनापक्षपातं विषेहे ॥ ६५ ॥ * ॥ इतिमहोपाध्यायश्रीभारविकृतौ किराताऽर्ज्जुनीये महाकाव्ये अर्ज्जुनाभिगमनो नाम चतुर्द्दशः सर्गः ॥ १४ ॥ * ॥

शाकेत्यर्थः ॥ ६५ ॥ * ॥ इतिश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किराताऽर्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायां चतुर्द्दशः सर्गः ॥ १४ ॥ * ॥

अथेति । अथानन्तरन्तत्ररणेभूतानिसर्वप्राणिनःवृत्रंहतवान्वृत्रहाइन्द्रः । ब्र
ह्मभ्रूणवृत्रेषुक्विप् । तस्यापत्यंपुमान्वार्त्रघ्नोऽर्जुनः । तस्यापत्यमित्यणप्रत्ययः ।
तस्यशरेभ्यःतत्रसुःविभ्युः । वाजृभ्रमुत्रसामितिविकल्पादेत्वभ्यासलोपाभावः । सा
ध्वमूस्वइषवोस्यन्तेएभिरितीष्वासाःधनूंषि । धनुश्चापोऽस्त्रमिष्वासइतिहेमच
न्द्रः । अकर्तरिचकारकेसंज्ञायामितिकरणेघञ् । परित्यक्तामहान्तइष्वासाः
ययासापरित्यक्तायुधेत्यर्थः । दिशोभेजेपलायांचक्रेइत्यर्थः । अत्रभूतत्राससेना
पलायनयोस्समुच्चयकथनाद्भिन्नविषयःक्रियासमुच्चयोलङ्कारः । गुणक्रियायौ
गपद्यंसमुच्चयइतिसामान्यलक्षणन्तस्ययमकेनसंसृष्टिः ॥ १ ॥ * * * * ॥

अथभूतानिवार्त्रघ्नशरेभ्यस्तत्रतत्रसुः । भेजेदिशःपरित्यक्तमहेष्वा
साचसाचमू ॥ १ ॥ अपश्यद्भिरिवेशानंरणान्निववृतेगणैः । मुह्यत्ये
वहिकृच्छ्रेषुसंभ्रमज्वलितमनः ॥ २ ॥ खण्डिताशंसयातेषाम्प
राङ्मुखतयातया । आविवेशकृपाकेतौकृतोच्चैर्वानरन्नरम् ॥ ३ ॥

अपश्यद्भिरिति । गणैःप्रमथैःईशानंस्वामिनंशिवंपुरोवर्तिनमितिभावः । अपश्य
द्भिरिवरणान्निववृतेनिवृत्तम् । भावेलिङ् । तथाहिकृच्छ्रेष्वापत्सुसंभ्रमेणसाध्व
सेनज्वलितन्तप्तं । संभ्रमःसाध्वसेपिस्यादितिविश्वः । मनोमुह्यत्येवअतःपुरोवर्ति
नोप्यदर्शनमुपपद्यतइतिभावः ॥ २ ॥ ॥

खण्डितेति । खण्डिताध्वस्ताआशंसाजयाशायस्यास्तयातेषाङ्गणानांसम्बन्धिन्या
तयाऽतिनिकृष्टयेत्यर्थः । पराङ्मुखतयारणवैमुख्येनपलायनेनेत्यर्थः । केतौध्व
जेकृतःआरोपितःउच्चैरुन्नतोवानरोहनूमान्येनतन्नरंपुरुषङ्कपिध्वजमित्यर्थः । कृ
पाकरुणाआविवेश । तदीयदुर्दशांदृष्ट्वाकृपाविष्टोऽभूदित्यर्थः । यमकालङ्का

रः ॥ ३ ॥ ॥

ननुशत्रवस्तुकथङ्करुणातत्राह । आस्थामिति । आस्थांयत्नंआलंब्य । आस्थाल्वा
लम्बनात्स्थानयत्नापेक्षामुक्ष्यतइतिविग्रहः । वशंनीते क्षुद्रेषुक्षुद्रेष्वरातिषुश
त्रुषुविषयेअनुकम्पयाकृपयामहतांवीराणांमाहात्म्यंमहानुभावत्वंव्यक्तंस्फुटता
मायातिप्राप्नोति । स्वपौरुषनिर्जितेष्वरातिषुअपिकरुणाभूषणमेवमहतामिति
भावः ॥ ४ ॥ ॥

ससासिरिति । सहअसिनावर्तमानःसासिःसखड्गः असूनसुवतिप्रेरयतीतिअसु
सूर्बाणः । षूप्रेरणेइतिधातोःसत्सूद्विषेत्यादिनाक्विप् । असुसूभिःसहवर्तमा
नःसासुसूःसबाणः । अस्यन्तेक्षिप्यन्तेशराअनेनेतिआसःधनुः । अकर्तरिचका

आस्थामालंब्यनीतेषुवशंक्षुद्रेष्वरातिषु । व्यक्तिमायातिमहतांमाहा
त्म्यमनुकम्पया ॥ ४ ॥ ससासिःसासुसूःसासोयेयायेयाययाययः ।
ललौलीलांललोऽलोलःशशीशशिशुशीःशशन् ॥ ५ ॥ एकाक्षरपादः ॥

रकेसंज्ञायामितिघञ् । आसेनसहवर्ततइतिसासःसचापः । सर्वैरतेनसहेतितु
ल्ययोगइतिबहुव्रीहिः । येयाःयातव्याःयानसाध्याः । अयेयाःअयातव्याःयानं
विनैवसाध्याःअचोयदितियत्प्रत्ययः । येयाश्चअयेयाश्चयेयायेयाःतेषांइयानां
आयेस्वर्गगजादिलाभेयातिप्राप्नोतीतियेयायेयाययःअयःशुभावहदैवंयातीत्य
ययः । येयायेयाययश्चासौअययश्चेतियाधातोरुभयत्रापिआतोनुपसर्गेकःइति
कप्रत्ययः । अतोललतिविलसतीतिललः । ललविलासेपचाद्यच् । अलोलोऽच
पलःशशिनःईशःशिवःतस्यशिशुःस्कन्दःतंशृणातिहिनस्तीतिशशीशशिशुशीःक्वि
प् । शशन्प्लुतगतिंकुर्वन् । शशप्लुतगतावितिधातोःशतृप्रत्ययः । सोऽर्जुनोली

लांशोभांलवौप्रापलाआदाने । कर्त्तरिलिट् । एकाक्षरपादः ॥ ५ ॥ ॥

त्रासेति । सोऽर्जुनःत्रासजिह्मम्भयक्लिष्टंयथातथायतोगच्छतःपलायमानानि
त्यर्थः । एतान्गणान्मन्दमेवान्वियायअनुजगाम । तथाहिमहौजसोमहानुभा
वाःभग्नानतिपीडयितुन्नेच्छन्ति ॥ ६ ॥ ॥

अथेति । अथाग्रेहसतावलानामित्यर्थः । तद्भङ्गदर्शनात्स्मयमानेनसाचिस्थिते
नतन्निवक्ररूपायतिर्य्यग्व्यवस्थितेन । तिर्य्यगर्थेसाचितिरइत्यमरः । स्थिरकीर्त्ति
नाअक्षयमभङ्गत्यादिनिभावः । किञ्चिदीषदायस्तंखिन्नंचेतोयस्यतेनस्वकीयगण
भङ्गादीषत्खिन्नचित्तेनसेनान्यास्कन्देन । पार्वतीनन्दनःस्कन्दःसेनानीरग्निभूर्गुह

त्रासजिह्मंयतश्चैतान्मन्दमेवान्वियायसः । नातिपीडयितुंभग्नानिच्छन्ति
हिमहौजसः ॥ ६ ॥ अथाग्रेहसतासाचिस्थितेनस्थिरकीर्त्तिना । सेना
न्यातेजगदिरेकिञ्चिदायस्तचेतसा ॥ ७ ॥ निरोष्ठ्यः ॥ माविहासिष्ट
समरंसमरंतव्यसंयतः । क्षतंक्षुण्णासुरगणैरगणैरिवकिंयशः ॥ ८ ॥

इत्यमरः । तेगणाःप्रमथादयोजगदिरेउक्ताः । ओष्ठ्यवर्णाभावान्निरोष्ठ्यमेत
त् ॥ ७ ॥ ॥

अथैकविंशतिभिःश्लोकैःस्कन्दवाक्यमेवाह । माविहासिष्टेत्यादिना । रन्तव्यंर
मणंक्रीडा । बहुलग्रहणाद्भावेतव्यप्रत्ययः । संयद्युद्धं । समुदायःस्त्रियांसंय
त्समित्याजिसमिद्युधइत्यमरः । समेरन्तव्यसंयतीयेषान्तेसमरन्तव्यसंयतःतु
ल्यक्रीडासङ्ग्रामाइतितेषांसम्बोधनम् । यूयंसमरंमाविहासिष्टनत्यजत । जहा
तेर्माङिलुङ्मध्यमबहुवचनम् । क्षुण्णाःपराजिताअसुरगणायैस्तैर्भवद्भिरितिशे
षः । अगणैरिवगणेभ्योऽन्यैरिवकिंकिमर्थंयशःक्षतंनाशितन्नैतद्युक्तमहाम्पूराणा

म्भवाद्दृशानामित्यर्थः ॥ ८ ॥ ०*०*०*०*०*०*०*० ॥
विवस्वदिति । विवस्वदंशुसंश्लेषेणाद्रव्यैकिरणसम्पर्केणद्विगुणीकृतानितेजां
सियेषान्तेतथोक्ताः मोघंव्यर्थंउद्गूर्णाः उद्यताः गुरीउद्यमनेइतिधातोःकर्मणि
क्तः । वोयुष्माकममीमहासयःखड्गाः हसन्तीवेत्युत्प्रेक्षा । किम्पलायमानानांख
ड्गैरितिहासः ॥ ९ ॥ *०*०*०*०*०*०*०*० ॥
वनइति । वनसदांवनेचराणांश्ववनेरक्षकेवनेमार्गेमृगसम्बन्धिनंमार्गंपन्थानं
उपेयुषांपलायमानानामित्यर्थः । युष्माकमितिशेषः । वाणोध्वनिरेयामस्तीतितै
र्वाणैर्ध्वनियुक्तैः । वणसंशब्दनेइतिधातोःघञ् । ततोऽर्शआदिभ्यइत्यच्प्रत्ययः ।

विवस्वदंशुसंश्लेषद्विगुणीकृततेजसः । अमीवोमोघमुद्गूर्णाहसन्ती
वमहासयः ॥ ९ ॥ वनेवनेवनसदांमार्गम्मार्गमुपेयुषाम् । वाणै
र्वाणैःसमासक्तंशंकेशंकेनशाम्यति ॥ १० ॥ पातितोत्तुङ्गमाहात्म्यैःसं
हृतायतकीर्तिभिः । गुर्वीकामापदंहन्तुंकृतमावृत्तिसाहसम् ॥ ११ ॥

एकत्वात्ववयोरभेदः । उक्तंच । रलयोर्डलयोस्तद्वज्जययोर्ववयोरपि । शसयो
र्मनयोश्चान्तेसविसर्गाविसर्गयोः । सबिन्दुकाबिन्दुकयोःस्यादभेदेनकल्पनमिति
। वाणैःशरैःसमासक्तंसमासंजितंश्रशंदुःखन्तत्केनशाम्यति । इतिशंकेकेनोपा
येनशाम्येदितिविचारयामीत्यर्थः ॥ १० ॥ ०००००००००००० ॥
पातितेति । पातितंभ्रंशितंउत्तुङ्गंमहात्म्यंउन्नतभावोयैस्तैःसंहृताःसंक्षिप्ताःआय
ताःविस्तृताःकीर्तयोयैस्तैर्युष्माभिरितिशेषः । कांगुर्वीमापदंहन्तुन्नकाचिदपीत्य
र्थः । आवृत्तिःयुद्धान्निवृत्तिःसैवसाहसंकृतंअतःपापादन्यन्नकिञ्चित्फलमस्तीति
भावः । तदुक्तम्मनुना । यस्तुभीतःपरावृत्तःसंग्रामेहन्यतेपरैः । भर्तुर्यद्दुष्कृतंकि

ञ्चितत्सर्वं प्रतिपद्यते । यच्चास्य सुकृतं किञ्चिदमुत्रार्थमुपार्जितम् । भर्त्ता तत्सर्वमा
दत्ते परावृत्तहतस्य तु इति ॥ ११ ॥ * ० * ० * ० * ० * ० * ० * ॥

नेति । किञ्च । अयमसुरो दैत्योन । नागोवापन्नगश्चन । धरसंस्थः पर्वताकारः ।
आहार्य्यधरपर्वताइत्यमरः । संस्थाव्यवस्थाप्रणिधिस्थितिसाकारमृत्युष्विति वै
जयन्ती । राक्षसोन किन्त्वयं सुखयतीति सुखः सुखसाध्यइत्यर्थः । नवाभोगोऽभि
नवप्रयत्नोमहोत्साहइत्यर्थः । आभोगोवरुणच्छत्रे पूर्णतायत्नयोरपीति विश्वः । ध
रणिस्थो भूतलचारी राजसो रजोगुणप्रधानोनापुरुषोहिकश्चिन्मानुषइत्यर्थः ।
पुरुषापूरुषानरः । मानवामनुजानराइत्यमरः । अतोनपलायनमुचितमितिभा

॥ गोमुत्रिकाबन्धः ॥

ना सु रो यं न वा ना गो ध र सं स्थो न रा क्ष सः ।
ना सु खो यं न वा भो गो ध र णि स्थो हि रा ज सः ॥
१२ ॥ मन्दमस्यन्निषुलतां घृणयामुनिरेषवः । प्रणुदत्यागतावज्ञं ज
घनेषु पशूनिव ॥ १३ ॥

वः । गोमूत्रिकाबन्धः वर्णानामेकरूपत्वं यद्येकान्तरमर्द्धयोः । गोमुत्रिकेति तत्प्रा
हुः करन्तद्विदोविदुरिति लक्षणात् । योडशकोष्ठद्वये द्वयंक्रमेण विलिख्यैकान्त
रविनिमयेन तदेव श्लोकमियन्तीत्युद्धारः ॥ १२ ॥ ०~० * ०~० ॥

मन्दमिति । एषमुनिः घृणयाकृपयाइषुलतां शाखामिवमन्दमस्यन् क्षिपन्वोयुष्मा
न्पशूनिव आगतावज्ञं यथातथा जघनेषु प्रणुदति चोदयति किमतः परं कष्टमस्ती
तिभावः ॥ १३ ॥ ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ॥

नेति । पदच्छेदस्तावत् । न ना ऊननुन्नः नुन्नोनः ना अना नानानना ननु

नुन्नः अनुन्नः ननुन्नेनः ना अनेनाः नुन्ननुन्ननुत्। हेनानाननाःनानाप्रकाराणिआ ननानियेषांतेनानाविधास्याइत्यर्थः। ऊनेननिकृष्टेननुन्नोविद्धऊननुन्नःयःसः नानापुरुषोन। तथानुन्नःऊनोयेनसनुन्नोनःनापुरुषःअनानन्नुअपुरुषःखलु। ऊनाद्भीतःपलायमानस्तुकिंवक्तव्यमितिभावः। किञ्च। नुन्नःईनःस्वामीयस्यसनु न्नेनःसनभवतीतिननुन्नेनः। नञर्थस्यनशब्दस्यसुप्सुपेतिसमासः। सनुन्नोविद्धो प्यनुन्नोऽविद्धएववयमनुन्नस्वामिकत्वादनुन्नाएवेतिभावः। तथानुन्ननुन्ननुदति शयेननुन्नान्नुन्ननुन्नान्नुदतीतिनुन्ननुन्ननुत्अतिपीडितपीडकःनापुरुषःअनेनाःन निर्दोषोनभवतीति। किन्तुसदोषएवेति। नार्तन्नातिपरिक्षणमितिनिषेधादित्य र्थः। अयन्तुनैतादृशइतिनपलायितव्यमितिभावः। अयमेकव्यञ्जनः। अन्यस्तु

ननोननुन्नोनुन्नोनोनानानानाननानन्नु। नुन्नोनुन्नोननुन्नेनोनाने नानुन्ननुन्ननुत्॥ १४॥ एकाक्षरः॥ वरंकृतध्वस्तगुणादत्यन्तम गुणःपुमान्। प्रकृत्याह्यमणिःश्रेयान्नालङ्कारश्च्युतोपलः॥ १५॥

कारस्तुनदोषावहःनान्यवर्णस्तुभेदकइत्यनुज्ञानात्॥ १४॥ ॥ वरमिति। कृताःपूर्वमुत्पादिताःध्वस्ताःपश्चान्नष्टाःतेकृतध्वस्ताःपूर्वकालेत्यादिना समासः। कृतध्वस्ताःगुणाःयस्यतस्मात्पुंसोत्यन्तमतिशयेनागुणःनिर्गुणःपुमान्व रं। मनाक्प्रियःकिञ्चित्प्रियः। वरंक्लीवेमनाक्प्रियमित्यमरः। तथाहिप्रकृत्या स्वभावेनअमणिःमणिरहितोऽलङ्कारःश्रेयान्। च्युतोपलःभ्रष्टरत्नोनश्रेयान्। उपलःप्रस्तररत्नेइत्यमरः। पलायितुःसमरादसमरएववरमितिभावः। अत्रस मासविरोधयोःप्रतिविम्बकरणाद्दृष्टांतालङ्कारः॥ १५॥ ॥ स्यन्दनाइति। स्यन्दन्तिप्रद्रवन्तीतिस्यन्दनाःजवनाःस्यन्दनारथानोसन्ति। नं

द्यादित्वात्त्युः। चतुरंगच्छन्तीतिचतुरगाःतुरगाःअश्वानोसन्ति। सुरेभाःशो
भनबृंहणाःसुरेभाःसुरगजाअनोसन्ति। अविपत्तयोविपत्तिरहिताःविपत्तयो
विशिष्टाःपदातयोनोसन्ति। अनेनभैन्यमितिभावः। अत्रपूर्वोक्तराजाङ्गतानांवि
शेषणानामुद्देशीभूतानांयथासंख्यसम्बन्धकथनात्यथासंख्यालङ्कारोयमकेनसं
सृष्टः॥ १६॥ ॥

भवद्भिरिति। अधुनाअरातिभिः। परिहापितानित्याजितानिपौरुषाणियैस्तैर्भ
वद्भिरर्कनिष्पीतैः। अर्कणसंशोषितैर्ह्रदैरिवदुरुत्तरःदुस्तरःपङ्कइवपङ्कोदुःकी
र्तिःप्राप्तः॥ १७॥ ॥

स्यदनानोचतुरगाःसुरेभावाविपत्तयः। स्यदनानोचतुरगाः
सुरेभावाविपत्तयः॥ समुद्गकः॥ १६॥ भवद्भिरधुनारातिप
रिहापितपौरुषैः। ह्रदैरिवार्कनिःपीतैःप्राप्तःपङ्कोदुरुत्तरः
॥ १७॥ वेत्रशाककुजेशैलेलेशैजेकुकशात्रवे। यातकिंविदि
शोजेतुंतुंजेशोदिविकिंतया॥ १८॥ प्रतिलोमानुलोमार्द्धः॥

वेत्रेति। वेत्राणिवंशाःफलिन्योवाशाकाःवर्वराअकुजावृक्षायस्मिन्तस्मिन्वेत्रशा
ककुजेदुःप्रवेश्येइत्यर्थः। वेत्रंवंशफलिन्योश्चेतिविश्वः। शाकवर्वरवन्दकाइ
त्यमरः। लेशेनस्तोकेनाप्येजतेकम्पतेइतिलेशैजःसनभवतीति। अलेशैजे। अ
त्यन्ताकम्पनइत्यर्थः। एजृकम्पनेपचाद्यच्। नकोकतेनादत्तेइतिअकुकोनिग्रह
णासमर्थःशत्रवोयस्मिन्तस्मिन्। अकुकशात्रवे। कुकआदानेइगुपधेतिकः।
शैलेपर्वतेकोर्थोभावःकिन्ताकुत्सिततातयाउपलक्षिताःसन्तः। कुत्सानिन्दावितर्को
दुःस्पर्शइत्युच्यतइतिशाश्वतः। विदिशोजेतुंयातगच्छतकिंयातःसम्प्रश्नेवा

ट्। मध्यमपुरुषबहुवचनं। दिविस्वर्गेपितुज्ञेशा इतितेषांसम्बोधनं। तुजन्तीति
इतितुजाः दैत्याःतुजिहिंसायाम्पचाद्यच्। तेभ्यईशेः क्विप्। दैत्येभ्योपिशक्ताःइ
त्यर्थः। स्वर्गेप्यसुरविजयिनांयुष्माकमत्रक्षुद्रस्थलेक्षुद्रशत्रौपलायनमनुचित
मितिभावः। अनुलोमप्रतिलोमपादः॥ १८॥ * ❁ ❁ ❁ ❁ ❁ ❁ ❁ * ॥
अथेशेतिष्ठतिपलायनमेतच्चनयुक्तंइत्याह। अयमिति। अयमीशःशिवःक्लैव्यंनिः
पौरुषंआपन्नान्प्राप्तान्। तथाअरातिनादृष्टपृष्ठान्पलायमानानित्यर्थः। वोयु
ष्मान्च्युताचारान्स्खलितव्रतान्दारान्कलत्राणीव। अयपुम्भूम्निदाराइत्यम
रः। निगोपितुंगोप्तुम्। ऊदितत्वादिड्विकल्पः। दारदोषंभर्तैवस्वमहिम्नायु
ष्मद्दोषंसंवरितुमिच्छति। अतःकुतोयुष्माकमनर्थइत्यर्थः॥ १९॥ ❁ ❁॥

अयंवःक्लैव्यमापन्नान्दृष्टपृष्ठानरातिना। वांछतीशश्च्युताचा
रान्दारानिवनिगोपितुम्॥ १९॥ ननुहोमथनाऽघोघोरना
थमहोनुन। तयदातवदा भीमामाभीदावतदायत॥ २०॥

नन्विति। ननुइत्यामन्त्रणे। होइत्याह्वाने। हिहेव्यस्तौसमस्तौचदूरात्सम्बोध
नार्थयोः। होहैचैवंविधौज्ञेयौसंबुध्याह्वानयोरपिइतिविश्वः। मथन्तीतिमथ
नाःमथेविलोडनेकर्तरिल्युट्। अघन्तीत्यघः अघ्सामर्थ्यात्क्विप्। घोराःक्रूराःश
त्रूणामितिभावः। नाथंमहयन्तिपूजयन्तीतिनाथमहःवृभिरुपग्रहणात्कर्मणि
उपपदेक्विप्। तयन्तेरक्षन्तीतितयाःरक्षकाःपचाद्यच्। दायतीतिदाताःशुद्धा
दैप्शोधनेकर्तरिक्तःवदन्तीतिवदाःवक्तारःपचाद्यच्। तेषांद्वन्द्वःतयदातवदाःभी
माःभयङ्कराःमाभीःअभीः। नञर्थमाशब्दस्यसुप्सुपेतिसमासःतान्ददतीतिमाभी
दाः अभयप्रदाःएवंविधाःयूयमितिशेषः। बतेतिखेदेबवयोरभेदः। [illegible]

नुनश्शुद्धाःकिं। नपृच्छायांकिन्तुशुद्धाएवनकाकुरत्रानुसन्धेयः। दैप्शोधनेलोट्। मध्यमपुरुषबहुवचनं। अनुलोमप्रतिलोमाद्धः॥ २०॥ ॥

किमिति। अपास्तोऽवधीरितःदेवत्वमानुष्यकयोःपरिग्रहःस्वीकारोयैस्तैःअतिदेवमानुषैरित्यर्थः। मनुष्याणाम्भावोमानुष्यकं। योपधाद्गुरूपोत्तमाद्वुञ्। ज्वलितान्यगुणैःउज्ज्वलिताःसदृशगुणैः। अन्यौविभिन्नसदृशौइतिवैजयन्ती। ईदृशैर्भवद्भिरितिशेषः। तेजस्विप्रतापेस्थिताप्रतापैकशरणामानिताभूरत्वाभिमानिताकिमितिव्यक्ता। निर्लज्जैःपलायतइतिभावः॥ २१॥ ॥

निशितेति। हेअमरणाःमरणरहिताःनिशितासिरतःअतितीक्ष्णखड्गरतःअभी

प्रतिलोमानुलोमाद्धः॥ किन्व्यक्तापास्तदेवत्वमानुष्य
कपरिग्रहैः। ज्वलितान्यगुणैर्गुर्वीस्थितातेजसिमा
निता॥ २१॥ निशितासिरतोभीकोन्येजतेमरणारु
चा। सारतोनविरोधीनस्वाभासोभरवानुत॥ २२॥

कोनिर्भीकःरुचातेजसाउपलक्षितःसुष्ठुआभासतेइतिस्वाभासोरमणीयःपचाद्यच्। उतात्यर्थंभरवान्रणभरसहिष्णुरित्यर्थः। उतात्यर्थविकल्पयोरितिविश्वः। ईदृशोनोस्माकंविरोधीशत्रुःसारतोबलतोनन्येजतेनकम्पतेनप्रचलतइत्यर्थः। एजृकम्पनेलट्। अतोभवद्भिरपिस्थातव्यमेवनचलितव्यमितिभावः॥ २२॥ अन्मतेविरोधीनइत्यत्रसविसर्गपाठःप्रतिलोमेनिर्विसर्गपाठेयदान्तेसविसर्गाविसर्गयोरित्येतादृशकाव्येऐक्यस्वीकारात्। अन्येतुईनःसूर्य्यइवस्वाभासःईनस्वाभासइत्येकंपदमाहुः। केचित्तु। विरोधीशत्रुःपूर्वविशेषणविशिष्टःनअपितुपूर्वविशेषणविशिष्टएवेतिकाक्वर्थेनकारमाहुः। परेतु। सारतो

नविरोधीननरतंश्वरतंश्चरतेनसहवर्तमानाःसरंनाःमुनयःतान् जनयनिमार णेनन्यूनान्कुर्वन्तीतिसारतेनादैत्याःतेषांविरोधीविष्णुःसतावन्नायंअतःकथंपलायन्ते। नस्वाभासःस्वेनधनेनभासतेइतिस्वाभासःकुबेरःसोपिनायम्। नभरवान् भंनक्षत्रंरातिश्चातोनुपसर्गेकःभरश्चन्द्रःतद्वान्शिवोपिन। अतःपलायनंनोचितमित्याहुः। इत्युपरिष्टात्॥ २२॥

नन्वयन्नचलतीतिकथंज्ञायतेतत्राह। तन्विति। ननुमावृणोत्याच्छादयतीति ननुवारंवर्म। कर्मण्यण्। तेनवर्मस्विभासतेइतिननुवारभसःपचाद्यच्। भास्वान्तेजस्वान्चारणाभास्वताश्चविनतेनोनन्नेनोरसाउपलक्षितः। एवंविधोप्यधी

ननुवारभसोभास्वानधीरोविनतोरसा। चारणारमते
जन्येकोऽभीतोरसितानिशि॥२३॥ प्रतिलोमानुलो
मेनश्लोकद्वयम्॥ विभिन्नपातिताश्वीयनिरुद्धरथव
र्त्मनि। हतद्विपनगष्ठ्यूतरुधिराम्बुनदाकुले॥२४॥

सोयुद्धायचञ्चलःरसितेनशब्दितेनैवाभीक्ष्णंनिश्यतीतिरसितानिशीतस्मिन्। रवेणैवविश्वप्राणहारिणीत्यर्थः। आभीक्ष्ण्येणिनिः जन्येयुद्धे। युद्धमायोधनंजन्यमित्यमरः। कःअभीतःसन्रमतेक्रीडतिनिर्भयसंचारादेवास्यनिश्चलत्वन्निश्चीयतइत्यर्थः। पूर्वश्लोकस्यायम्प्रतिलोमः॥ २३॥

अथपञ्चभिःकुलकमाह। विभिन्नेत्यादिना। आहवंविशिनष्टि। विभिन्नानिविदारितानिअतएवपातितानिआश्वीयानिअश्वसमूहाश्चनेतथापूर्वकालेतिसमासः। तैरश्वसमूहैर्निरुद्धानिरथानांवर्त्मानियस्मिन्तथोक्ते। वृन्देत्वाश्वीयमाश्ववदित्यमरः। केशाश्वाभ्यायञ्छावन्यतरस्यामितिछण्प्रत्ययः हताःद्विपागजाएव

नगाःशैलाः । शैलवृक्षौनगावगावित्यमरः । तैःष्ठ्यूतानिष्ठिवतेःकर्मणिक्तः । छ्वोःशूडनुनासिकेचेतिऊठादेशः । तानिरुधिराण्येवाम्बूनितेषांनदैःप्रवाहैःस्रा कुलेव्याप्ते ॥ २४ ॥ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ ॥

देवेति । पुनश्चदेवान्द्याकनयन्युद्दीपयन्त्युत्साहयन्तीतिदेवाकानीतस्मिन्देवाका निनि । कनदीप्ताविति धातोर्ण्यन्तात्णिनिः । कावादःईषद्वादोवाक्कलहः । ईषदर्थेचेतिकुशब्दस्यकादेशः । तद्वतिकावादे । अर्शआद्यच् । वाहिकाप र्य्यायेणरणभारोद्वहनम् । वहेःपर्य्यायेधात्वर्थनिर्देशेण्वुल्वक्तव्यः । वाहिक याक्रमप्राप्तरणक्रिययासुष्ठुशोभनंयथातथाअखकान् । पराना जिहीतेअभि

॥ सर्वतोभद्रः ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| दे | वा | का | नि | नि | का | वा | दे |
| वा | हि | का | ख | ख | का | हि | वा |
| का | का | रे | भ | भ | रे | का | का |
| नि | ख | भ | व्य | व्य | भ | ख | नि ॥ २५ ॥ |

युङ्क्तेयोजयतीतियावत् वाहिकाखखकाहास्तस्मिन्वाहिकाखखकाहि । योधृध र्मौयुद्धेउपचर्य्यते । ओहाङ्गताविति धातोःविच्प्रत्ययः । सोमपाशब्दवत् प्रक्रिया । वाशब्दश्चार्थे । कंमदोदकमाकिरन्तीतिकाकाराःमदश्राविणःकि रतेराङ्पूर्वात्कर्म्मण्यण् । एवंविधाइभभराःगजघटाःयत्रतस्मिन्काकारेभभ रे । काकाइवकाकाःगर्ह्या इतिलक्षणयातेषामामन्त्रणम् । निखाःनिरुत्साहाःभ व्याःसोत्साहाःतानुभयान्व्ययन्तिसंवृण्वन्तीतिनिखभव्यव्याः व्येञ्संवरणेधातोरु पसर्गकः । तैर्वभस्तिभासतेयःतस्मिन्निखभव्यव्यभखनि । अन्येभ्योपिदृश्यतेइति

क्वनिप्। सर्वतोभद्रम्। सर्वतोभ्रमणात्सर्वतोभद्राख्यश्चित्रबन्धः। यथाह दण्डी तदिदं सर्वतोभद्रं भ्रमणं यदि सर्वतः इति। उद्धारस्त्वष्टकोष्ठचतुष्टयं लिखित्वा तत्र श्लोकं क्रमेण लिखित्वा सर्वतो वाचना सर्वतोभद्र इति ॥ २५ ॥ ❁ ❁ ❁ ❁ ॥

प्रन्त्तेति। प्रन्तनश्वेभ्योऽन्त्यत्यक्तबन्धेभ्यः त्रस्तैः क्षुभितैः तुरगैराक्षिप्ता अवधूता सारथयो यत्र तस्मिन्। तथा मारुतेनापूर्णैर्व्याप्तैः तूणीरैर्निषङ्गैर्विकृष्टाः शब्दायमाना हतास्ताडिताः सादिनः सौरङ्गिका यत्र तस्मिन् पाठान्तरे मारुतापूर्णतूणीरे। विकृष्टा आकर्षिता अत एव हता मारिताः सादिनोऽश्ववारा यत्र तस्मिन् ॥ २६ ॥ *

प्रन्तनश्वविन्नस्तुरगाक्षिप्तसारथौ। मारुतापूर्णतूणीरवि
कृष्टहतसादिनि ॥ २६ ॥

॥ अर्द्धभ्रमकः ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| स | स | त्व | र | ति | दे | नि | त्यं |
| स | द | रा | म | र्ष | ना | शि | नि |
| त्व | रा | धि | क | क | सं | ना | दे |
| र | म | क | त्व | म | क | र्ष | ति ॥ २७ ॥ |

ससत्वेति। ससत्वानां सत्ववतां रतिदे रागप्रदे नित्यं सदराणां सभयानाममर्षनाशिनि क्रोधहारिणि। त्वरया उत्साहेनाधिकाः कसन्तो विकसन्तो नादाः यत्र तस्मिन्। रमयतीति रमकः रमधातोः क्वुन् तस्याकादेशः तद्भावो रमकत्वं रणकर्मणा पररञ्जकत्वं अकर्षति अपनुदति। वीराणाम्परस्परमुत्साहं रणकर्मणा स्फोरयतीत्यर्थः। अर्द्धभ्रमकम् ॥ २७ ॥ ❁✱❁ ❁✱❁ ❁✱❁ ❁✱❁ ॥

आसुरेति। एवंविधे आसुरे असुरसम्बन्धिनि लोकविचासविधायिनि लोके

भयंकरे महाहवे महायुद्धे युष्माभिरुन्नतिं वृद्धिं नीतम्प्रापितम्पौरुषं पुरुषकर्म्म निरस्तं नाशितमिह संग्रामे ॥ २८ ॥

इतीति । इतीत्थं सेनान्यां स्कन्दे । शास्ति आज्ञापयति अनेकधा गच्छतः पलायमानान् तान् गणान् निषिध्य निवार्य्य अन्धकारिणा हरेण किञ्चिद्धसता नस्थेऽस्थितं । भावे लिट् । निरोष्ठ्यम् ॥ २९ ॥

मुनीति । मुनेरिषव एव दहनः तेन आतप्तान् । तथा लज्जया रणभङ्गशालीत्वेन विवृत्स्यतो निवर्त्तिष्यमाणान् । वृद्भ्यः स्यसनोरिति विकल्पात्परस्मैपदम् । तान् गणा

आसुरे लोकवित्रासविधायिनि महाहवे । युष्माभिरुन्नतिं नीतन्नि
रस्तमिह पौरुषम् ॥ २८ ॥ कुलकम् ॥ इति शास्ति सेनान्या
गच्छतस्ताननेकधा । निषिध्य हसता किञ्चित्तस्थे तत्रान्धकारिणा
॥ २९ ॥ मुनीषुदहनातप्तान् लज्जया निविवृत्स्यतः । शिवः प्रह्ला
दयामास तान्निरोधहिमाम्बुना ॥ ३० ॥ दूनास्तेऽरिबलादूनानि
रेभावज्ञमेनिरे । भीताः शितशराभीताः शङ्करन्तत्र शङ्करम् ॥ ३१ ॥

न् शिवः निरोधं माभैष्ट मा पलायनेति निवारणवचनं स एव हिमाम्बु शीतोदकन्तेन प्रह्लादयामास । रूपकालङ्कारः ॥ ३० ॥

दूना इति । दूनाः शरतप्ताः । ल्वादिभ्यश्चेति निष्ठानत्वं । अरिबलाद्दूनाः अरिबलाच्छत्रुबलात् ऊनाः ऊनबलाः पञ्चमी । निरेभाः निःशब्दाः कुतः भीताः त्रस्ताः कुतोयतः शितैस्तीक्ष्णैः शरैरभीताः अभिव्याप्ताः इणः कर्मणि क्तः । ते गणास्तत्र रणे शंकरं अभयवचनेन सुखकरं शङ्करं शिवमवज्ञमेनिरे । वज्ञिति क्रियाविशेषणम् । वज्ञं यथा तथा मेनिरे । आद्यपादयमकम् ॥ ३१ ॥

महेष्विति । दुरुत्तरे दुस्तरे शत्रोः सम्बन्धिनि महेषुजलधौ महति बाणसागरे वर्त्तमाना पताकिनी सेना ईशानं शिवं पारं परतीरमिव । पारावारे परार्वाचीत्यमरः । प्राप्याश्वासं प्राणिति स्म ॥ ३२ ॥ ० * ० * ० * ० * ० * ० * ० ॥

स इति । स शिवो रणापेतां रणादपवृत्तां पराङ्मुखीभूतामत एव पश्चात्पृष्ठभागे अवस्थितां चमूं पुरोऽग्रे स्थितः सूर्यः सूर्य्यकिरणोपमानमेव । तस्मादपवृत्तां परावृत्तां छायां महातरुरिव बभार । छायान्तरुरिव आत्मैकशरणान्तां चमूमुमोचेत्यर्थः ॥ ३३ ॥ ०० ००  ** ००  ** ०० ॥

महेषुजलधौ शत्रोर्वर्त्तमाना दुरुत्तरे । प्राप्य पारमिवेशानमाश्वासं पताकिनी ॥ ३२ ॥ स बभार रणापेतां चमूं पश्चादवस्थिताम् । पुरः सूर्य्यादपावृत्तां छायामिव महातरुः ॥ ३३ ॥ मुञ्चतीशे शरान् जिष्णौ पिनाकस्वनपूरितः । दध्वान ध्वनयन्नाशाः स्फुटन्निव धराधरः ॥ ३४ ॥ तद्गणा ददृशुर्भीमं चित्रसंस्था इवाचलाः । विस्मयेन तयोर्युद्धं चित्रसंस्था इवाचलाः ॥ ३५ ॥ यमकम् ॥

मुञ्चतीति । ईशे हरे कर्त्तरि जिष्णावर्जुने विषये शरान्मुञ्चति सति पिनाकस्य शिवकार्मुकस्य स्वनेन ध्वनिना पूरितः धराधर इन्द्रकीलः स्फुटन्निव विदार्यमाण इवेत्युत्प्रेक्षा । आशा दिशः ध्वनयन् शब्दयुक्ताः कुर्वन् दध्वान शब्दमाकरोत् । दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ता इत्यमरः ॥ ३४ ॥ ०  ०  ०  ०  ० ॥

तदिति । भीमं तयोर्हरपाण्डवयोः तत् प्रसिद्धं युद्धं गणाः प्रमथाः चित्रसंस्थाः चित्राकाराः अचलाः शैला इव । तथा चित्रे आलेख्ये संस्था स्थितिर्येषां ते चित्रसंस्थाः चित्रलिखिता इवाचलाश्चाश्चर्य्यवशान्निश्चलाः सन्तो ददृशुः ॥ ३५ ॥ ०  ० ॥

परीति । शिक्षालाघवलीलया अभ्यासपाटवातिशयेन हेतुना परिमोहयमाणेन व्यामोहयता । अणावकर्मकाच्चित्तवत्कर्तृकादिति परस्मैपदे प्राप्ते न पादमित्यादिना तत्प्रतिषेधादात्मनेपदे शानच् । णेर्विभाषेति कृत्स्थस्य नस्य वा णत्वम् । पिनाकिना हरेण जिष्णोरर्जुनस्येयं जैष्णवी विशिखश्रेणी बाणसंहातः परिजह्रे निरस्ता ॥ ३६ ॥ ॥

अवद्यन्निति । पाण्डवः अर्जुनः अवसायकैः अवसानकरैः स्यतेर्ण्यन्तात् ण्वुल्प्रत्ययः । सायकैर्बाणैः शम्भोः पत्त्रिणः शरानवद्यन् खण्डयन् । द्यतेः शतृप्रत्ययः ओतः श्यनीत्योकारलोपः । शिक्षया शक्तुम्प्रभवितुमिच्छया उत्साहेनेत्यर्थः । अथ रणे शिक्षया

परिमोहयमाणेन शिक्षालाघवलीलया । जैष्णवी विशिखश्रेणी परिजह्रे पिनाकिना ॥ ३६ ॥ अवद्यन्पत्त्रिणः शम्भोः सायकैरवसायकैः । पाण्डवः परिचक्राम शिक्षया रणशिक्षया ॥ ३७ ॥ चारचुञ्चुश्चिरारेची चञ्चच्चीररुचा रुचः । चचार रुचिरश्चारु चारैराचारचञ्चुरः ॥ ३८ ॥ द्व्यक्षरः ॥

ऽभ्यासेन परिचक्राम उत्साहनैपुण्याभ्यां सञ्चचारेत्यर्थः ॥ ३७ ॥ ॥

चारैरिति । चारैर्गतिविशेषैर्वित्त इति चारचुञ्चुः । तेन वित्तः चुञ्चुप्चणपाविति चुञ्चुप्प्रत्ययः । चिरमारेचयति रिक्तीकरोति शत्रूनिति चिरारेची । चञ्चतः चलतः चीरस्य वल्कलस्य रुचा प्रभया रोचत इति रुचः शोभमानः । इगुपधेति कः । रुचिरः सुन्दरः चञ्चूर्यते भृशं चरतीति चञ्चुरः । चरतेर्यङ्लुगन्तात्पचाद्यच् । चरफलोश्चेति नुमागमः यङोऽचि चेति यङो लुक् । आचारस्य युद्धव्यवहारस्य चञ्चुरोऽभ्यासमाचरितः स मुनिः चारु यथा तथा चारैः गतिविशेषैः चचार । चारः पियालवृक्षे स्याद्गतौ बन्धापसर्पयोरिति विश्वः । द्व्यक्षरः ॥ ३८ ॥ ॥

स्फुरदिति। समुनिःअर्ज्जुनःस्फुरतीपिशङ्गीपिशङ्गवर्णामौर्वीज्यायस्यतत्तथोक्तम्
। नद्यृतश्चेतिकप्प्रत्ययः। बृहद्धनुःगाण्डीवंधुनानःकम्पयन्। उल्कैवानलःतेन
धृतोयोगोयेनतेनांशुमताअर्केणसूर्य्येणतुल्योबभौ। उपमा॥ ३९ ॥ ॥
पार्थेति। पार्थबाणाःअर्जुनशराःपशुपतेर्विशिखावलींशरसंहातंसवितुरिमां
सावित्रींअंशुसंहतिंकिरणसमूहं अरंध्राःनिबिडाःपयोमुचोमेघाइवाववुःतिरो
दधुः॥ ४० ॥ ॥
शरेति। त्रिलोचनःशिवःसव्येनसचतिसमवैतीतितेनसव्यसाचिनाअर्जुनेनोद

स्फुरत्पिशङ्गमौर्वीकंधुनानःसबृहद्धनुः। धृतोल्कानलयोगे
नतुल्यमंशुमताबभौ ॥ ३९ ॥ पार्थबाणाःपशुपतेराववुर्विशि
खावलीम्। पयोमुचइवारंध्राःसावित्रीमंशुसंहतिम्॥ ४० ॥
शरवृष्टिंविधूयोर्वीमुदस्तांसव्यसाचिना। रुरोधमार्गणैर्मार्गं
तपनस्यत्रिलोचनः ॥ ४१ ॥ तेनव्यातेनिरेभीमाभीमार्जनफ
लाननाः। ननानुकंप्यविशिखाःशिखाधरजवाससः ॥ ४२ ॥

स्तांक्षिप्तांउर्वीम्महतींशरवृष्टिंमार्गणैःशरैःविधूयनिरस्यतपनस्यमार्गंरुरोधाव
व्रे॥ ४१ ॥ ॥
तेनेति। तेनशिवेनभीमाःभयङ्कराःभियोभयस्यमार्जनन्निरासःतदेवफलंप्रयोज
नंयेषांतानिआननानिअग्राणियेषान्तेभीमार्जनफलाननाः। तथा। शिखाधराः
मयूराःतेषुजातानिशिखाधारजानिबर्हाणितानिवासांसिपक्षायेषान्तेशिखाध
रजवाससःमयूरपक्षिणइत्यर्थः। विशिखाःबाणाअनुकंप्यकृपांकृत्वानव्यातेनिरे
इतिनकिन्त्वनुकंप्यैवेत्यर्थः। अनुजिघृक्षित्वादितिभावः। संभाव्यनिषेधनिर्द्देशोप्र

तिषेधाविच्युतम् । शृङ्खलायमकम् ॥ ४२ ॥ ✿ * ✿ * ✿ * ✿ * ✿ * ॥

द्युवियदिति । द्यौः स्वर्गे वियदन्तरिक्षं गच्छतीति द्युवियद्गामिनी व्यापिनी । द्वितीयाप्रकरणे श्यादीनामुपसंख्यानात्समासः । तारेणोच्चैःस्वरेण विरवेण विहता स्ताडिता विद्धाः श्रुतयः कर्णा यया सा तथोक्ता । हैमी हेममयी इषुमाला शिवशरावलिः विद्युतां संहतिरिवोक्तविशेषणा कांस्यमालेव शुशुभे । चतुर्थपादवर्णानां त्रिपाद्यां सम्भवात् गूढचतुर्थमाहुः ॥ ४३ ॥ ✿ ~ * ~ ✿ ~ * ~ * ॥

विलंघ्येति । शिवशिलीमुखैः पत्रिणां पंक्तिं निजशरावलिं विलंघ्य अतिक्रम्य भिन्नो विद्धः कपिध्वजः ज्यायः प्रशस्तः । वृद्धप्रशस्ययोर्ज्यायानित्यमरः । वीर्यं सत्त्वं उपाश्रित्य आस्थाय न चकम्पे न चचाल किन्तु सहन् अवतस्थावित्यर्थः ॥ ४४ ॥ ✿ * ✿ ॥

द्युवियद्गामिनी तारसंरावविहतश्रुतिः । हैमीषुमाला शुशुभे विद्युता
मिव संहतिः ॥ ४३ ॥ गूढचतुर्थपादः ॥ विलंघ्य पत्रिणां पंक्तिं भिन्नः
शिवशिलीमुखैः । ज्यायो वीर्यमुपाश्रित्य न चकम्पे कपिध्वजः ॥ ४४ ॥

जगतीति । अर्थत्रयवाची श्लोकोऽयम् । तत्रादौ अगराज इति पदच्छेदमाश्रित्य एकैकार्थोऽभिधीयते । ईशस्य रणे युक्तः सज्जः अन्यत्र जगतीशरणे भूरक्षणे युक्तः स्थितः । विधिनेति शेषः हरिः सिंह इव कान्तः मनोहरः अन्यत्र हरीणां सिंहानां कान्तः आवासदाता प्रियः सन् सुष्ठु दधाति प्रजाः पुष्णातीति सुधाः विजनाः असितः अश्मवर्णः ततो विशेषणसमासः । अन्यत्र सुधालेपद्रव्यविशेषः तद्वत् सितो धवलः दानवर्षी विक्रमप्रदः अतापसः ज्वलज्ज्वालिकायः अन्यत्र दानवैः दैत्यैः नष्टधीभिः हता आशंसा नाना फलाभिलाषो यस्मिन् स नानरोऽर्जुनः । अगराजो हिमवानिव जगत्या मावेभ्या दिव्येकार्थः ॥ * ॥ अथैरावणसाम्यमुच्यते । जगतीं भुवं स्वन्तितनूकुर्वन्ती

तिनेजगतीशाःराक्षसाःतेषांरणःतत्रयुक्तःविहितःसमर्थः। हरिकान्तःइन्द्रप्रियः उभयत्रापिसमानमेतत्। सुधासितःअमृतस्वच्छःएकत्रशीतलः अन्यत्रवर्णितइतिविवेकः। दानवर्षीधनप्रदोमदश्चाविचकृताशंसःउभयत्रजिगीषःपार्थः। नागराजइवऐरावणइवआवभाविति द्वितीयोऽर्थः॥ * ॥ अथशेषोपम्यमुच्यते। जगतीशरणेभूरक्षणेयुक्तःनियुक्तः। देवेनेतिशेषः। शरणंगृहरक्षित्रोरित्यमरः हरिकान्तःकृष्णप्रियःउभयत्रापितुल्यम्। सुष्ठुदधातिसुधावसुधेतिकेचित्एकदेशग्रहणात्समुदायग्रहणम्। तत्रसितोवद्धःपित्रन्त्यनेकः। अन्यत्रसुधयाअमृतेनसितोवद्धःअमृतप्रियइत्यर्थः। दानवाःचदययस्तैःकृताशंसोविहितप्रशंसो

जगतीशरणेयुक्तोहरिकान्तःसुधासितः। दानवर्षिकृताशंसो नागराजइवाबभौ॥ ४५॥ अर्थत्रयवाची॥ विफलीकृतयत्नस्य क्षतबाणस्यशम्भुना। गाण्डीवधन्वनःखेभ्योनिश्चक्रामहुताशनः॥ ४६॥ सपिशङ्गजटावलिःकिरन्नुरुतेजःपरमेणमन्युना। ज्वलितौषधिजातवेदसाहिमशैलेनसमंविदिद्युते॥ ४७॥

उभयत्रापितुल्यमेतत्सोऽर्जुनःनागराजःशेषइवबभाविति तृतीयोऽर्थः॥ ४५॥ ◎ विफलेति। शम्भुनाक्षतबाणस्यअतएवविफलीकृतयत्नस्यनिष्फलप्रयत्नस्यगाण्डीवन्धनुर्यस्यतस्यगाण्डीवधन्वनोऽर्जुनस्य। वासंज्ञायामित्यनङादेशः। खेभ्यः इन्द्रियरंध्रेभ्यः। खमिन्द्रियेसुखेस्वर्गेइतिविश्वः। हुताशनोऽग्निर्निश्चक्रामनिःक्रान्तःक्रोधादितिभावः॥ ४६॥ * ॥ ◎ ॥ ◎ ॥ ◎ ॥ ◎ ॥ ◎ ॥ ◎ ॥ * ॥ सइति। पिशङ्गजटावलिःपिशङ्गजटाजूटःपरमेणोत्कृष्टेनमन्युनाक्रोधेनउरु महत्तेजःकिरन्विक्षिपन्सोऽर्जुनःज्वलिताःओषधयःतृणज्योतींषिजातवेदः

वाग्निश्चयोऽस्मिन्तेनहिमशैलेनसमन्तुल्यंहिमाद्रिरिवविदिद्युते हिमाद्रिवत्शुशु
भेइतिबिम्बप्रतिबिम्बभावोपमा ॥ ४७ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥
शतशइति । शिवःशतशोविशिखानवद्युतेखण्डयतेरणवेगशालिनेअस्मैपार्थाय
भृशमनिवार्य्यवीर्य्यतां[illegible]तिशेषः । तस्मैप्रथयन्दर्शयन् । किन्तुअघातु
कममारकंलपपतेत्यादिनाहंतेरुकञ् । इयुञ्ज्ञातावेकवचनम्प्रजिघायप्रयुयु
जे । हिगतावितिधातोर्लिट् । हेरचङीतिकुत्वम् ॥ ४८ ॥ ❁ * * ❁ ॥
शम्भोरिति । सिताश्वोऽर्जुनःशंभोर्धनुर्मण्डलतःधनुर्मण्डलात्प्रवृत्तन्निःक्रान्तंतंइषुं

शतशोविशिखानवद्युतेभृशमस्मैरणवेगशालिने । प्रथयन्ननि
वार्य्यवीर्य्यतांप्रजिघायेषुमघातुकंशिवः ॥ ४८ ॥ शम्भोर्धनुर्म
ण्डलतःप्रवृत्तन्तम्मण्डलादंशुमिवांशुभर्तुः । निवारयिष्यन्
विदधेसिताश्वःशिलीमुखच्छायवृतान्धरित्रीम् ॥ ४९ ॥ घ
नम्विदार्य्यार्ज्जुनबाणपूगंससारबाणोयुगलोचनस्य । घन
म्विदार्य्यार्ज्जुनबाणपूगंससारबाणोयुगलोचनस्य ॥ ५० ॥

अंशुभर्तुरर्कस्यमण्डलात्प्रवृत्तंअंशुमिवअत्रापिइयुञ्ज्ञातावेकवचनन्निवारयि
ष्यन्निवारयितुङ्कामः । क्रियार्थेक्रियायांलृटिशतृप्रत्ययः । धरित्रीम्भुवंशिलीमु
खानांछायाशिलीमुखच्छायंछायायाबाहुल्यइतिनपुंसकत्वन्तेनवृतांव्याप्तांविद
धेकृतवान् । शरजालच्छायावृतान्धरित्रीमकरोदित्यर्थः ॥ ४९ ॥ ❁ ❁ ॥
घनमिति । अयुग्लोचनस्यविषमनेत्रस्येशस्यत्र्यलोचनस्य । लोच्यतेऽसौलोचनः
कर्मणिल्युट्नलोचनःअलोचनःतस्यअलोचनस्यअचाक्षुषज्ञानविषयस्यसम्बन्धी
[illegible]बाणःशब्दःताभ्यांसारबाणाभ्यांस्थिरशब्दाभ्यांसहवर्ततेइतिससारबाणः

बवयोरभेद इत्युक्तम् । नयुज्यते कुत्रापीत्ययुक् संगरहितः । क्विप् । वाणाः शराः
जातावेकवचनम् घनं सान्द्रमर्जुनस्य बाणपूगं शरव्रातं विदार्य्य विभिद्य घनं निबिडम्
विदार्य्यां भूमिकूष्माण्डां लताविशेषाः अर्जुनाः ककुभवृक्षाः बाणानीलसैरेयकाः पू
गाः क्रमुकाः तेषां विभाषा वृक्षैकेति द्वन्द्वैकवद्भावः । विदार्य्यर्जुनबाणपूगं ससारवि
वेशेत्यर्थः । यद्वा तदानीमेव यगत्तो च तस्यार्जुनस्य बाणाः ससारेत्यर्थः ॥ ५० ॥ ❁
रुजन्नित्यादि । वज्रधाम्नाश्रुपातिनः शीघ्रतापततो महेषून् मुञ्चः शरौघैः रुजन् भं
जयन् । तथा दिशश्चापवारयन्नाच्छादयन् क्रियावशात् युद्धकर्म्माय तत्तया चलाच
लोऽतिचञ्चलो धनंजयो महर्षिसंघैरनेकोऽवक्रविधः बुबुधे ददृशे ॥ ५१ ॥ ❁ ❁ ॥

रुजन्महेषून्बहुधाश्रुपातिनो मुहुः शरौघैरपवारयन्दिशः । चला
चलोऽनेक इव क्रियावशान्महर्षिसंघैर्बुबुधे धनंजयः ॥ ५१ ॥ विकाश
मीयुर्जगतीशमार्गणा विकाशमीयुर्जगतीशमार्गणाः । विकाशमीयुर्ज
गतीशमार्गणा विकाशमीयुर्जगतीशमार्गणाः ॥ ५२ ॥ महायमकम् ॥

विकाशमिति । जगतीशस्य अर्जुनस्य मार्गणा बाणाः विकाशम्प्रकाशमीयुः तथा जग
ति लोके ईशमार्गणाः शम्भुशराः विकाशम् वियमगतिमीयुः [?] प्रापुरित्यर्थः । तथा जं
गतीं पृथ्वीं श्यन्ति तनूकुर्वन्तीति जगतीशाः दानवाः आतोऽनुपसर्गे कः तान् मारयन्ती
ति जगतीशमारः क्विप् । ते च ते गणाश्च जगतीशमार्गणाः प्रमथाः विकाशं त्वक्लाद [?]
हर्षमीयुः प्रापुरित्यर्थः । अहो देवेप्यस्य पराक्रमप्रसर इति विस्मयादिति भावः ।
तदानीं मार्गयन्तीति मार्गणाः अन्वेषणाः कर्त्तरि ल्युट् । जगतीशस्य मार्गणाः अन्वे
षका शिवद्रष्टारो देवर्षादयो वीनाम्पक्षिणामाकाशो गतिरत्रेति विकाशं आकाशमीयुः
दिदृक्षयेति भावः ॥ ५२ ॥ ❁❁ ❁❁ * ❁❁ ❁❁ * ❁❁ ॥

संपश्यतामिति। इत्तीत्थंशिवेनवितायमानंविस्तार्य्यमाणम्। तनोतेर्य्यकीतिवैक ल्पिकःआकारादेशः। लक्ष्मीवतोजयश्रीमतः। मादुपधायाइत्यादिनावकारः क्षितिपतेस्तनयस्यार्जुनस्यवीर्य्यंशौर्य्यंसम्पश्यतान्तत्त्वविदामपिहरेरंशावतारोय मितिविदुषामपिकिमुतान्येषामितिभावः। मुनीनामङ्गानिगात्राणिअभिन्नंअवि

सम्पश्यतामितिशिवेनवितायमानंलक्ष्मीवतःक्षितिपतेस्तनयस्यवीर्य्यम्। अङ्गान्यभिन्नमपितत्त्वविदाम्मुनीनांरोमाञ्चमञ्चिततरंविभराम्बभूवुः॥ ५३ ॥ ❁ ॥ इतिमहोपाध्यायश्रीभारविकृतौकिराताऽर्जुनीयेमहाकाव्येयुद्धवर्णनंनामपञ्चदशःसर्गः॥ १५ ॥ ❁ ॥

रलंअञ्चिततरमतिरुचिरतरंरोमाञ्चंरोमहर्षंविभराम्बभूवुःवभ्रुः। भृञ्ह्रीत्यादिना विकल्पादाम्प्रत्ययः॥ ५३ ॥ * ॥ इतिश्रीमहोपाध्यायकोलाचलमल्लिनाथ सूरिविरचितायांकिराताऽर्जुनीयव्याख्यायाङ्घण्टापथसमाख्यायाम्पञ्चदशःस र्गः॥ १५ ॥ ❁❁ ❁❁ * ❁❁ ❁❁ * ❁❁ ❁❁ * ❁❁ ❁ ॥

ततइति । ततोऽनन्तरङ्किरताधिपतेःसम्बन्धिनीमलघ्वीगुर्वीमाजिक्रियांरणकर्म
र्म्मंवीक्ष्यविवृद्धमन्युःविवृद्धकोपःविविक्तःनिकलङ्कःतर्कैःऊहापोहैःनंवायस्यरोऽ
र्जुनःकारणानिरणभरकारणानिविचिन्वन्विमृषन् । इतीत्थंवक्ष्यमाणमेवंतर्क
यामासञ्चाभ्यूहितवान् ॥ १ ॥ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ॥

अथत्रयोविंशतिश्लोकैर्वितर्कमेवाह । मदेत्यादि । इहयुद्धे मदस्रुतिभिःमदप्र
वाहैःश्यामाःकृताइतिश्यामिताःगण्डलेखाःकपोलभागायेषान्तेविक्रान्ताःपराक्रमं
कुर्वन्तःकर्तरिक्तः । शूरोवीरश्चविक्रान्तइत्यमरः । तैर्नरैरधिरूढाःसहिष्णवोरण

ततःकिराताधिपतेरलघ्वीमाजिक्रियांवीक्ष्यविवृद्धमन्युः ।
सतर्कयामासविविक्ततर्कश्चिरंविचिन्वन्नितिकारणानि ॥ १ ॥
मदस्रुतिश्यामितगण्डलेखाःक्रामन्तिविक्रान्तनराधिरूढाः । स
हिष्णवोनेहयुधामभिज्ञानागानगोच्छ्रायमिवाक्षिपन्तः ॥ २ ॥
विचित्रयाचित्रयतेवभिन्नांरुचंरवेःकेतनरत्नभासा । महा
रथौघेननसन्निरुद्धापयोदमन्द्रध्वनिनाधरित्री ॥ ३ ॥

भरक्षमाःयुधांयुद्धानामभिज्ञाःशिक्षिताइत्यर्थः । कर्तृयोगात्कर्म्मणिषष्ठीकिञ्चन
गानामुच्छ्रायम्पर्वतानामौन्नत्यम् । घञन्तेनोपसर्गस्यसमासेनोपसृष्टात्घञ्प्र
त्ययः । श्रिणीभुवोनोपसर्गइतिनिषेधात् । आक्षिपन्तःप्रतिषेधयन्तइवस्थि
ताःतथोन्नताइत्यर्थः । नागाःगजाःइहसंग्रामेनाक्रामन्तिनचरन्ति । यथायुद्धा
न्तरेष्वितिशेषः । एवमुत्तरत्रापिसर्वत्रद्रष्टव्यन्तथापिकथमेषांशक्तिह्रासइतिस
र्वत्रतात्पर्यार्थश्च ॥ २ ॥ * ○ * ○ * ○ * ○ * ○ * ○ * ○ * ○ * ॥
विचित्रेति । विचित्रयानानावर्णयाकेतनानांरत्नानितेषांभासाप्रभयाभिन्नांस्व

लिलांरवैः स्वं कान्तिं विचित्रयता विचित्रवर्णां कुर्वतेव स्थितेनेति केतनेनान्यनिमित्ते यमुत्प्रेक्षा । पयोदमन्द्रध्वनिना मेघगम्भीरघोषेण महतां रथानामोघेन समूहेन धरित्री न सन्निरुद्धा नावृता ॥ ३ ॥ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ ॥

समुल्लसदिति । इह युद्धे प्रासाः कुन्ताः । प्रासस्तु कुन्त इत्यमरः । ते महोर्मय इव तेषां मालाः समुल्लसन्त्यो यत्र तत्समुल्लसत्प्रासमहोर्मिमालं । चामराणि फेना इव परिस्फुरन्त्यश्चामरफेनानां पङ्क्तयो यत्र तद्वयोक्तं । आश्वीयमश्वसमूहः । वृन्दे त्वाश्वीयमाश्ववदित्यमरः । जलधेरम्भ इव भिन्नमर्य्यादं उन्मर्यादमुच्छृङ्खलं च थान तथा आशा आशा दिशो नातनोति नावृणोति ॥ ४ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥

समुल्लसत्प्रासमहोर्म्मिमालमतिस्फुरच्चामरफेनपङ्क्ति । विभि-
न्नमर्य्यादमिहातनोति नाश्वीयमाशा जलधेरिवाम्भः ॥ ४ ॥
हताहतेत्युद्धतभीमघोषैः समुज्झिता योद्धृभिरभ्यमित्रम् ।
न हेतयः प्राप्ततडित्त्विषः खे विवस्वदंशुज्वलिताः पतन्ति ॥ ५ ॥

हतेति । हत प्रहरत आहत विध्यत । हन्तेर्लोट् मध्यमपुरुषबहुवचनं । अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः । आहतेत्यत्र कर्मणः प्रयोगेऽपि हन्तेः स्वाभाविकसकर्मकत्वस्यानपायात् । अकर्मकत्वस्य चात्र विवक्षितत्वेन तन्निवृत्त्यैव निवृत्तेः । आङो यमहन इत्यात्मनेपदं । इत्येवमुद्धताः प्रगल्भाः भीमाः च घोषा येषां तैर्योद्धृभिः योधैः अभ्यमित्रं अमित्रानभि समुज्झिता मुक्ता विवस्वतोंऽशुभिः प्रतिफलितैरिति भावः । ज्वलिताः दीपिता अत एव प्राप्ताः तडितां त्विषो यैस्ते याभिस्ता हेतयः शस्त्राणि खेन पतन्ति । हेतिः स्त्रीपुंसयोरिति विश्वः ॥ ५ ॥ ❁ * ❁ * ❁ * ॥

अभीति । अभ्यायतो वीरान् हन्तुमागच्छतः । इणः शतृप्रत्ययः । अन्तकस्य कालस्य

सम्बन्धिसन्ततंसततन्धूमवत्धूम्रंव्यापिव्यापकम्प्रभाजालमिवस्थितम्प्रतूर्णैरश्वैःर
थांगैःरथचक्रैश्चनुन्नंप्रेरितंरजोमातरिश्वामरुत्व्योम्निअन्तरिक्षेनतनोतिनवि
स्तारयति ॥ ६ ॥ ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ ॥

भूरेणुनेति । अत्राहवेरासभोगर्दभःतद्वत्धूसरेणईषत्पाण्डुना । ईषत्पाण्डुस्तुधू
सरइमरः । रासभोगर्दभःखरइत्यमरः । भूरेणुनारजसालोचनानांवर्त्मनिच
क्षुर्मार्गेतिरोहितेसतितेजस्विभिःतेजस्विषुवीरेषुउत्सुकानांवीरवरणार्थमागता
नामित्यर्थः । प्रसितोत्सुकाभ्यांतृतीयाचेतिविकल्पात्तृतीयासुरसुन्दरीणामह्नि

अभ्यायतःसन्ततधूमधूम्रंव्यापिप्रभाजालमिवान्तकस्य । र
जःप्रतूर्णाश्वरथाङ्गनुन्नन्तनोतिनव्योमनिमातरिश्वा ॥ ६ ॥
भूरेणुनारासभधूसरेणतिरोहितेवर्त्मनिलोचनानाम् । नास्त्र
स्ततेजस्विभिरुत्सुकानामह्निप्रदोषःसुरसुन्दरीणाम् ॥ ७ ॥
रथाङ्गसंक्रीडितमश्वहेषावृंहन्तिमत्तद्विपवृंहितानि । सङ्घर्ष
योगादिवमूर्च्छितानिह्रादन्निगृह्णन्तिनदुन्दुभीनाम् ॥ ८ ॥

दिवसेएवप्रदोषोरात्रिर्नास्तिअन्धकारवत्वात्दृष्टेस्तिरोधानात्रात्रिभ्रमःस्यादि
तिभावः ॥ ७ ॥ ❁ * ❁ * ❁ ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ॥

रथाङ्गेति । रथाङ्गविक्रीडितंरथचक्रकूजितंअश्वानाञ्चहेषाह्रेषितानिशब्दिता
नि । अश्वानांह्रेषाहेषाचनिःस्वनइत्यमरः । वृंहन्तिमहान्तिमत्तद्विपानांवृंहि
तानि । वृंहितंकरिगर्जितमित्यमरः । संघर्षयोगादिवपरस्परसङ्घर्षसम्बन्धा
दिवमूर्च्छितानिवृद्धिङ्गतानिसन्ति । नपुंसकमनपुंसकेत्यादिनानपुंसकैकशेषः
। दुन्दुभीनांह्रादंनिर्घोषम् । स्वाननिस्वाननिह्रादइत्यमरः । नगृह्णन्तिनति

कुर्वन्ति ॥ ८ ॥

अस्मिन्निति । अस्मिन्रणेयशःपौरुषयोर्लोलुपानांगृध्नूनंअतएवअरातिभिःप्रत्यु

रसमुरसि । प्रतेरुरसःसप्तमीस्थादितिसमासान्तः । क्षतानांविद्धानांसम्बधिनं

मूर्च्छैवान्तरायोरणविघ्नस्तंआसारशीतंवर्षधाराशीतलं । धारासम्पातआसारइ

त्यमरः । करिणांसीकरएवाम्भःकर्तृमुहुर्मुहुरुच्छिनत्तिनाशयति ॥ ९ ॥ ॥

अस्रगिति । अस्रक्नदीनान्तटानिउपचीयमानैरुपचयंनीयमानैः । तथाध्व

जिन्याःपदवींविदारयद्भिः । विदूरयद्भिरितिपाठेविदूरांदूरसञ्चारांकुर्वद्भिः

अस्मिन्यशःपौरुषलोलुपानामरातिभिःप्रत्युरसंक्षतानाम् । मू

र्च्छान्तरायंमुहुरुच्छिनत्तिनिरासारशीतङ्करिशीकराम्भः ॥ ९ ॥

अस्रङ्नदीनामुपचीयमनैर्विदारयद्भिःपदवींध्वजिन्याः । उ

च्छायमायान्तिनशोणितौघैःपङ्कैरिवाश्यानघनैस्तटानि ॥ १० ॥

परिक्षतेवक्षसिदन्तिदन्तैःप्रियाङ्कशीतानभसःपतन्ती । नेह

प्रमोहम्प्रियसाहसानाम्मन्दारमालाविरलीकरोति ॥ ११ ॥

आश्यानाईयत्शुष्काः । संयोगादेरातोधातोर्यण्वतइतिश्यायतेर्निष्ठानत्वम् । घ

नाःसान्द्राःतैराश्यानघनैःशोणितौघैःपङ्कैरिवोच्छ्रायंवृद्धिंनायान्तिनप्राप्नुवन्ति

॥ १० ॥

परीति । इहरणेदन्तिदन्तैःगजदन्तैःपरिक्षतेताडितेवक्षसिनभसःपतन्तीप्रि

याया[illegible]इवोरुशीतलाःसुखकरामन्दारमालासुरैःमुक्तेतिशेषः । प्रियंसाहसं

येषांतेषांप्रियसाहसानांयतोगजाभियायिनइतिभावः । प्रमोहम्प्रहारमूर्च्छा

नविरलीकरोतिनमन्दीकरोति ॥ ११ ॥

निषादीति । करिणां सीकरेण पुष्करतुषारेण परीयमाणे व्याप्यमाने निषादिनो हस्त्यारोहाः । हस्त्यारोहा निषादिन इत्यमरः । तेषां सन्नहिः कवचानि तेषां मणिप्रभौघे रत्नांशुजाले अर्कस्य त्विषा तेजसा उन्मीलि । तमुन्मीलितमाखण्डलकार्मुकस्येन्द्रधनुषः । आखण्डलः सहस्राक्ष इत्यमरः । खण्डं नाभ्युदेति ॥ १२ ॥ ० ॥

महीति । पक्षवता महीभृता मैनाकेनेव परवारणेन शत्रुगजेन मध्यं विगाह्य प्रविश्य भिन्नाः क्षोभिताः ध्वजिन्यः सेनाः । ध्वजिनी वाहिनी सेनेत्यमरः । अपां निधेः सागरस्य आपइव । आवर्तमानाः भ्रमन्त्यः सत्यः । स्यादावर्तोम्भसां भ्रम इत्यमरः

निषादिसन्नाहमणिप्रभौघे परीयमाणे करिसीकरेण । अर्क-
त्विषोन्मीलितमभ्युदेति न खण्डमाखण्डलकार्मुकस्य ॥ १२ ॥
महीभृता पक्षवतेव भिन्ना विगाह्य मध्यं परवारणेन । नाव-
र्तमाना निनदन्ति भीममपां निधेरापइव ध्वजिन्यः ॥ १३ ॥
महारथानां प्रतिदन्त्यनीकमधिस्यदस्यन्दनमुत्थितानाम् ।
आमूललूनैरतिमन्युनेव मातङ्गहस्तैर्व्रियते न पन्थाः ॥ १४ ॥

। भीमं न नर्दन्ति ॥ १३ ॥ ० * ० * ० * ० * ० * ० * ० * ० * ॥

महारथानामिति । प्रतिदन्त्यनीकं इति सैन्यं सैन्यं प्रति । अनीकन्तु रणे सैन्ये इति विश्वः । अधिस्यदाः महारयाः स्यन्दनाः रथाः यत्र तत्तथा रतरसो तु रयः स्यद इत्यमः । । उत्थितानां प्रस्थितानां महारथानां रथिकविशेषाणां । तदुक्तं । आत्मानं सारथिं चाश्वान् रक्षन् युध्येत यो नरः । स महारथसञ्ज्ञः स्यादित्य ऊर्नीतिको[illegible]इति लक्षणात् । पन्था मार्गः । आमूलाल्लूनैः छिन्नैः मातङ्गहस्तैर्नागकरैरतिमन्युनातिक्रोधेनेव न व्रियते न निरुध्यते ॥ १४ ॥ ० ० ० ० ० ० ० ० ० ० ० ० ॥

धृतेति । पतितस्य वक्षसि मग्नस्य शङ्कोस्तोमरस्य सम्बन्धी । वा पुंसि शल्यं शङ्कुर्ना सर्वला तोमरो स्त्रियामित्यमरः । बर्हभारस्तन्मूलबद्धो लांछनपिच्छकलापः धृत उत्पलापीडः कुवलयशेखरो यस्मिन् सः प्रियायाः सम्बन्धी शिथिलः स्रस्तः शिरोरुहाणां कलापः केशपाश इव निषादिनो हस्त्यारोहस्य वक्षःस्थलं नाततनोतिनव्याप्नोति ॥ १५ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥

उज्झन्त्विति । तत्राहवे संहारे कल्पान्त इव तेजस्विषु वीरेषु निरस्तसंख्यमसंख्यं यथा तथा अह्नाय झटिति । स्राक् झटित्यञ्जसाह्नाय इत्यमरः । जीवितानि उज्झ

धृतोत्पलापीड इव प्रियायाः शिरोरुहाणां शिथिलः कलापः । नव
र्हभारः पतितस्य शंकोर्न्निषादिवक्षःस्थलमाततनोति ॥ १५ ॥ उज्झ
न्तु संहार इवास्तसंख्यमह्नाय तेजस्विषु जीवितानि । लोकत्रयास्वा
दनलोलजिह्वं नव्याददात्वाननमत्र मृत्युः ॥ १६ ॥ इयञ्च दुर्वा
रमहारथानामाक्षिप्य कीर्तिम्महतां बलानाम् । शक्तिर्ममावस्य
ति हीनयुद्धे सौरीव ताराधिपधाम्नि दीप्तिः ॥ १७ ॥ कुलकम् ॥

न्तु त्यजन्तु सन्तु मृत्युर्लोकत्रयस्यास्वादने भक्षणे लोला गृध्नुर्जिह्वा यस्मिन् । तदाननं न व्याददाति न विवृणोति । आङो दोनास्यविहरण इति निषेधान्नात्मनेपदम् ॥ १६ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥

सत्यमेव तथापि किं ते कुत्सितन्तत्राह । इयमिति । इयं मम शक्तिश्च दुर्वाराः पराक्रमिणो [illegible]यायेषु तेषां महतां बलानां वीर्यमाक्षिप्य निरस्य ताराधिपधाम्नि चन्द्रतेजसि [illegible]स्थं सौरी । सूर्येतिष्यागस्त्यमत्स्यानां य उपधाया इति स्त्रियां ङीप्यकारस्य लोपः । दीप्तिरिव हीनयुद्धे किरातरणे अवस्यति अवसीदति । एतच्च विरुद्ध

नत्यद्भुतंचेतिभावः । योन्तकर्मणीइतिधातोर्लिट् ॥ १७ ॥ ० ० ० ० ० ०
मायेति । एवाशक्तिरूपा स्वरूपामायाखित्देवताक्षोभनंनाम्नुमतिविभ्रमोबुद्धिविप
र्ययोवा । अथवामेवीर्यंध्वस्तंनष्टंनुउताहमन्यःअर्जुनोनवा । कुतः हियस्मात्
गाण्डिवमुक्ताःमेशराःपुरायथापूर्वंपरिपन्थिष्विवेत्यर्थः । किरातेनपराक्रमन्तेअ
प्रतिबन्धेनप्रवर्त्तन्ते । उपपराभ्यामितिआत्मनेपदंवृत्तिःप्रतिबन्धा ॥ १८ ॥ ०
पुंसइति । किन्तुउत्तमस्यपुंसःपुरुषोत्तमस्यमध्यमपदनाकाशन्धनुषःप्रणादैः
। उपसर्गात्समासेपिणोपदेशस्येतिणत्वम् । द्विधाकुर्वन्निवविदारयन्निवस्थि

मायाखिदेयामतिविभ्रमोवाध्वस्तंनुमेवीर्यमुताहमन्यः । गा
ण्डीवमुक्ताहितथापुरेवपराक्रमन्तोनशराःकिराते ॥ १८ ॥
पुंसःपदंमध्यममुत्तमस्यद्विधेवकुर्वन्धनुषःप्रणादैः । नून
न्तथानैषयथास्यवेषःप्रच्छन्नमप्यूहयतेहिचेष्टा ॥ १९ ॥
धनुःप्रबन्धध्वनितंरुषेवसकृद्विकृष्टाविततेवमौर्वी । सन्धा
नमुत्कर्षमिवव्युदस्यमुष्टेरसम्भेदइवापवर्गे ॥ २० ॥

तःसएषकिरातोनूनन्तथातथाभूतोन । कीदृशस्तत्राह । अस्यपुरुषस्ययथायथाभू
तोवेषोवर्त्ततइतिशेषः । अतोनायंकिरातस्वरूपइत्यर्थः । कुतोहियस्मात्चे
ष्टाव्यापारःप्रच्छन्नमपिनिगूढमपिस्वरूपंऊहयतेतर्कयतेतस्यस्वभावात्व्यभि
चारादितिभावः ॥ १९ ॥ ०० ॥ ०० ॥ ०० ॥ ०० ॥ ०० ॥ ०० ॥ ०० ॥
अथचतुर्भिश्चेष्टामेवाचष्टे । धनुरिति । धनुःरुषेवप्रबन्धेनाविच्छेदेनध्वनितं
ध्वनतेःकर्त्तरिक्तः । मौर्वीचसकृद्विकृष्टाविततेवएकवाराकर्षणादेवविस्तृतेवस्थि
तासन्धानंबाणसन्धानं । उत्कर्षमुद्धरणंव्युदस्येववर्जयित्वाकिमुक्तमितिशेषः

अपवर्गेबाणमोक्षेपिमुष्टेरसम्भेदोऽसम्भेदनमिवमुष्टिबन्धंविनैवबाणमोक्षः कृतइवइतिहस्तलाघवोक्तिः ॥ २० ॥ ॥

अंसाविति। किञ्चअंसौअवष्टब्धौस्थिराववस्थापितौचनतौचावष्टब्धनतौशिरोधरायाःकन्धरायाःसमाधिःसंस्थानविशेषःरहितःप्रयासोयस्यसतथोक्तःनिःप्रयासइत्यर्थः। तथाविकारांस्त्यजताअमृतत्वान्निर्विकारेणेत्यर्थः। मुखेनशशलाञ्छनस्यइन्दोःप्रसादलक्ष्मीर्धृता। असम्भवत्सम्बन्धोनिदर्शनालङ्कारः ॥ २१ ॥ ॥

प्रहीयतइति। तस्यदेहःकार्य्यवशेनप्रयोजनवशेनागतेषुस्थानेषुआलीढादि

अंसाववष्टब्धनतौसमाधिःशिरोधरायारहितप्रयासः। धृतावि
कारांस्त्यजतामुखेनप्रसादलक्ष्मीश्शशलाञ्छनस्य ॥ २१ ॥
प्रहीयतेकार्य्यवशागतेषुस्थानेषुविष्टब्धतयानदेहः। स्थितप्र
यातेषुससौष्ठवश्चलक्ष्येषुयातःसदृशःशराणाम् ॥ २२ ॥ पर
स्यभूयान्विवरेभियोगःप्रसह्यसंरक्षणमात्मरंध्रे। भीष्मेप्यस
म्भाव्यमिदंगुरौवानसम्भवत्येववनेचरेषु ॥ २३ ॥ कुलकम् ॥

स्थानकेषुविष्टब्धतयास्थिरतयाकर्त्र्यानप्रहीयतेनत्यज्यतेकिन्तुस्थिरएवतिष्ठतीत्यर्थः। सुष्ठुभावःसौष्ठवंलाघवं। उद्गात्रादिपाठादण्प्रत्ययः। तेनसहवर्त्तमानःससौष्ठवःशराणांपातःअस्थितान्यचलानिप्रयातानिचलानितेषुस्थितप्रयातेषुविषयेचलाचलेषुलक्ष्येषुसदृशःएकरूपः ॥ २२ ॥ ॥

परस्येति। किञ्च। परस्यविवरेरंध्रे। अल्पेपीतिशेषः। भूयान्भूयिष्ठंप्रसह्यझटितिअभियोगःज्ञातृत्वम्परस्यरंध्रज्ञातृत्वात्प्रहारोद्योगइत्यर्थः। आत्मरंध्रेविवरेअनल्पेपीतिशेषःप्रसह्यझटितिसंरक्षणंगोपनंइदंद्वयम्भीष्मेपिगुरौवाद्रोणे

॥कि०टी०॥
॥सर्ग१६॥
॥१७१॥

वाप्यसम्भाव्यन्तु वितर्क्यं वनेचरेषु न सम्भवत्येव अतो नायं किरातः किन्त्वेषस्तिरोहितवेषः कोप्यमानुषः अपुरुष इति भावः ॥ २३ ॥

अप्राकृतस्येति। अप्राकृतस्य उत्कारीत्या असाधारणस्य आवहदुर्मदस्य रणमदस्य अस्य किरातस्य वीर्य्यं तेजः अस्त्रबलेन दिव्यशस्त्रमहिम्ना निवार्य्यं निवारणीयं अन्यथाऽनिवार्यसत्त्वमस्येति भावः। तथा हि अल्पीयसोऽपि अल्पस्यापि आमयतुल्यवृत्तेः रोगसमानविक्रियस्य। रोगव्याधिगदामया इत्यमरः। वृद्धिः महापकाराय किन्तु अयं महानुभाव इति भावः ॥ २४ ॥

अप्राकृतस्याहवदुर्म्मदस्य निवार्य्यमस्यास्त्रबलेन वीर्य्यम्॥ अल्पीयसोप्यामयतुल्यवृत्तेर्म्महापकाराय रिपोर्विवृद्धिः ॥ २४ ॥ कुलकम्॥ स सम्प्रधार्येदमहार्य्यसारः सारं विनेष्यन्सगणस्य शत्रोः। प्रस्वापनास्त्रं द्रुतमाजहार ध्वान्तं घनारब्ध इवार्द्धरात्रः ॥ २५ ॥
प्रसक्तदावानलधूमधूम्रा निरुन्धती धाम सहस्ररश्मेः। महावनानीव महातमिस्रा छायाततानेशबलानि काली ॥ २६ ॥ युग्मम्॥

स इति। अहार्यसारः अनिवार्य्यवीर्य्यः सोऽर्जुनः एवं सम्प्रधार्य निर्धार्य सगणस्य सानुगस्य शत्रोः सारं सत्त्वं विनेष्यन् अपनेष्यन्। प्रस्वाप्यते शाय्यते अनेनेति प्रस्वापनन्तदेवास्त्रं घनारब्धः मेघावरुद्ध अर्द्धरात्रः निशीथः। अर्द्धरात्रनिशीथौ द्वौ इत्यमरः। अर्द्धं नपुंसकमिति समासः। अहःसर्वैकदेशेत्यादिना समासान्तः। रात्राह्नाहाः पुंसीति पुल्लिङ्गता। ध्वान्तमिवाजहार चकर्ष ॥ २५ ॥

प्रसक्तेति। प्रसक्तः सन्ततो यो दावानलधूमस्तद्वद्धूम्राः धूसराः सहस्ररश्मेर्धाम तेजो निरुन्धती आवृण्वती काली कृष्णवर्णा। जनपदेत्यादिना ङीप्। छाया कान्तिः

। ईशवलानि महान्ति मिस्रा महती तमःसन्ततिः । तमिस्रा तु तमस्ततौ इति विश्वः ।
महावनानीव तता नव्यानशे ॥ २६ ॥ ○ ○ ○ ○ ○ ○ ○ * ○ ○ ○ ○ ॥
आशादितेति । तदेवासादनं प्रथमन्तत्प्रथमं यथा तथा प्रसह्य आसादिता कल्पि
ताप्रगल्भतायाः व्यवहारधाष्ट्र्यस्य पदवीं हरन्ती भीमा भयङ्करी निद्रा उक्तविशेष
णा सभा संसद्विगणानां प्रतिभा प्रज्ञा शक्तिः । सैव गुणः तस्य निरासं प्रतिभाक्षयं वि
दधे चक्रे ॥ २७ ॥ * ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ * ॥
गुर्वीति । केचिदुत्तमवंशजत्वात् । वंशो वेणुः कुलं च । वंशो वेणौ कुले च इति विश्वः

आसादिता तत्प्रथमं प्रसह्य प्रगल्भतायाः पदवीं हरन्ती । स
भेव भीमा विदधे गणानां निद्रा निरासं प्रतिभागुणस्य ॥ २७ ॥
गुरुस्थिराण्युत्तमवंशजत्वाद्विज्ञातसाराण्यनुशीलनेन । केचि
त्समाश्रित्य गुणान्वितानि सुहृत्कुलानीव धनूंषि तस्थुः ॥ २८ ॥
कृतान्तदुर्वृत्त इवापरेषां पुरः प्रतिद्वन्द्विनि पाण्डवास्त्रे । अत
र्कितं पाणितलान्निपेतुः क्रियाफलानीव तदायुधानि ॥ २९ ॥

। गुरूणि महान्ति स्थिराणि दृढानि च गुरुस्थिराणि अनुशीलनेन परिचयवत्त्वेन
विज्ञातः सारो बलं येषां तानि गुणैर्मौर्वीभिः शौर्यादिभिश्चान्वितानि धनूंषि सुहृत्कुला
नि मित्रकुलानीव समाश्रित्य तस्थुः धनुंष्यवष्टभ्य निदध्युरित्यर्थः ॥ २८ ॥ * ॥
कृतान्तेति । कृतान्तदुर्वृत्ते दैवदुश्चेष्टिते इव । कृतान्तो यमसिद्धान्तदैवाकुश
लकर्मस्विति विश्वः । पाण्डवास्त्रे पुरः प्रतिद्वन्द्विनि सति प्रतिकूलवर्तिनि सति तदा
तस्मिन्काले अपरेषां आयुधानि क्रियाफलानीव कृष्यादिफलानीव अतर्कितमवि
चारितमेव पाणितलान्निपेतुः ॥ २९ ॥ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ॥

अंसेति । अभिन्नधैर्य्यास्तदानीमप्यक्षतधैर्याःकेचित्अंसस्थलैरंसभागैःसहवे
श्लेषवतांतरूणांस्कन्धेषुप्रकाण्डेषुमदेनमीलन्तिनयनानियेषान्तेनागाःगजाइ
वस्रस्तकराःस्रस्तहस्ताःसन्तोनिषेदुःनिषण्णाः ॥ ३० ॥ **~⁂~** ॥
तिरोहितेति । अथतिरोहितेन्दोःकिरातमाययाच्छन्नचन्द्रात् शम्भुमूर्द्धःसकाशात्सु
मेरुशृङ्गात् अर्कविम्बमिवतपसान्निवासैःतापसैःप्रणम्यमानंअभिवंद्यमानम्पिश
ङ्गन्तेजःउच्चैरूर्द्धंउदियायप्रकटीबभूवतत्रतत्राटन्निति भावः ॥ ३१ ॥ ⁂ ॥

अंसस्थलैःकेचिदभिन्नधैर्य्याःस्कन्धेषुसंश्लेषवतान्तरूणाम् । म
देनमीलन्नयनाःसलीलन्नागाइवस्रस्तकरानिषेदुः ॥ ३० ॥
तिरोहितेन्दोरथशम्भुमूर्द्धःप्रणम्यमानन्तपसान्निवासैः । सु
मेरुशृङ्गादिवविम्बमार्कंपिशङ्गमुच्चैरुदियायतेजः ॥ ३१ ॥
छायांविनिर्द्धूयतमोमयीन्तांतत्त्वस्यसंवित्तिरिवापविद्याम् । य
यौविकाशंद्युतिरिन्दुमौलेरालोकमभ्यादिशतीगणेभ्यः ॥ ३२ ॥
त्विषान्ततिःपाटलिताम्बुवाहाःसासर्वतःपूर्वसरीवसंध्या । नि
नायतेषान्द्रुतमुल्लसन्तीविनिद्रतांलोचनपङ्कजानि ॥ ३३ ॥

छायामिति । इन्दुमौलेःद्युतिःकान्तिःतत्त्वस्यसंवित्तिर्ज्ञानन्तत्त्वज्ञानंअपविद्यामवि
द्यामिवतान्तमोमयीञ्छायांनिद्रांविनिर्धूयनिरस्यगणेभ्यःआलोकंवस्तुप्रकाशञ्चि
रंअतिदिशतीवितरन्तीविकाशंविस्तारंययौ ॥ ३२ ॥ ~*~~* ॥
त्विषामिति । पाटलिताःपाटलीकृताःअम्बुवाहाःययासातथोक्तात्विषान्तेजसान्ततिः
पूर्वंसरतीतिपूर्वसरी । पूर्वेकर्तरिटइतिटप्रत्ययेङीप् । सर्वनाम्नोवृत्तिमात्रेपुंव
द्भावइतिपूर्वशब्दस्यपुंवद्भावः । संध्याप्रातःसंध्येवउल्लसन्तीप्रसरन्तीतेषांगणा

लाम्बिलोचनपङ्कजानिद्रुतंविनिद्रतांविकासन्निनाय ॥ ३३ ॥ *○* ॥
पृथगिति । अस्त्रविरामेणप्रस्वापनास्त्रोपरमेणबुद्धाविनिद्रास्तेगणावलाहकानां
वितानेनमेघपटलेनमुक्ताअतएवरम्यादिग्विभागादिगन्ताःज्योतींषिनक्षत्राणी
व । ज्योतिस्ताराग्निभाज्वालादृक्प्रकाशस्मात्मस्विवैजयन्ती । पृथग्विधानिनाना
विधानिशस्त्राणिभूयःप्रतिपेदिरेजगृहुरित्यर्थः ॥ ३४ ॥ ○○○○○○ ॥
द्यौरिति । तदायामवत्यांरात्रौक्षयङ्गतायांविभातायामिवद्यौरन्तरिक्षमुन्ननामेव
ऊर्द्ध्वमुत्पपातेवेत्युत्प्रेक्षा । दिशःप्रसेदुःसवितुर्मयूखैःस्फुटंस्पष्टंविसस्रेविस्तृत

पृथग्विधान्यस्त्रविरामबुद्धाःशस्त्राणिभूयःप्रतिपेदिरेते । मुक्ता
वितानेनवलाहकानांज्योतींषिरम्याइवदिग्विभागाः ॥ ३४ ॥
द्यौरुन्ननामेवदिशःप्रसेदुःस्फुटंविसस्रेसवितुर्म्मयूखैः । क्षय
ङ्गतायामिवयामवत्यांपुनःसमीयायदिनन्दिनश्रीः ॥ ३५ ॥
महास्त्रदुर्गेशिथिलप्रयत्नेदिग्वारणेनेवपरेणरुग्णे । भुजङ्ग
पाशान्भुजवीर्यशालीनिबन्धनायप्रजिघायजिष्णुः ॥ ३६ ॥

म्भावेलिट् । दिनश्रीःपुनर्घस्रकान्तिःदिनंसमीयायसञ्जगाम । अत्रवैयधिकर
ण्येनगुणक्रिययासमुच्चयेनसमुच्चयालङ्कारः । तस्यचसमुन्नमनोत्प्रेक्षयैकवाचका
नुप्रवेशेलक्षणसङ्करः । दिक्प्रसादोगुणःशेषाःक्रियाः ॥ ३५ ॥ ○○ ॥
महास्त्रेति । भुजवीर्यशालीजिष्णुरर्जुनोमहास्त्रम्प्रस्वापनाख्यन्तद्दुर्गमिवतस्मि
न्महास्त्रदुर्गेदिग्वारणेनदिग्गजेनेवपरेणशत्रुणाशिथिलप्रयत्नमल्पप्रयासं
यथातथारुग्णेभग्नेसति । रुजोभङ्गेकर्म्मणिक्तःओदितश्चेतिनिष्ठातकारस्य
नत्वम्प्रबन्धनायप्रकर्षेण बन्धनायभुजङ्गमाएवपाशास्तान्प्रजिघायप्रहितवा

न् ॥ ३६ ॥ ॥

जिह्वेति । लसन्तस्तडिल्लोलाविद्युत्चञ्चलाविषानलाविषाग्नयोयेषुतानिजिह्वा
शतान्यजस्रंउल्लसयन्तीचालयन्ती । भुजङ्गेन्द्रसेनात्रासात्भयात् । नभश्चरैर्नि
रस्तात्यक्तातेषान्नभश्चराणाम्पदवींमार्गम्बिवव्रेविशेषेणरुरोध ॥ ३७ ॥ * * ॥
दिङ्नागेति । दिङ्नागहस्ताकृतिमुद्वहद्भिःदिक्करिकराकारैःतथाप्रशस्तानिंसमीची
नान्यसितरत्नानिइन्द्रनीलमणयःतद्वन्नीलैःभोगैःकायैःउपलक्षितासर्पावलिरु

जिह्वाशतान्युल्लसयन्त्यजस्रंलसत्तडिल्लोलविषानलानि । त्रा
सान्निरस्ताभुजगेन्द्रसेनानभश्चरैस्तत्पदवींविवव्रे ॥ ३७ ॥
दिङ्नागहस्ताकृतिमुद्वहद्भिर्भोगैःप्रशस्तासितरत्ननीलैः । र
राजसर्पावलिरुल्लसन्तीतरङ्गमालेवनभोर्णवस्य ॥ ३८ ॥
निःश्वासधूमैःस्थगितांशुजालःफणावतामुत्फणमण्डलानाम् ।
गच्छन्निवास्तंवपुरभ्युवाहविलोचनानांसुखमुष्णरश्मिः ॥ ३९ ॥
प्रतप्तचामीकरभासुरेणदिशःप्रकाशेनपिशङ्गयन्त्यः । निश्चक्र
मुःप्राणहरेक्षणानांज्वालामहोल्काइवलोचनेभ्यः ॥ ४० ॥

ल्लसन्तीप्रक्षुभ्यन्तीनभसएवअर्णवस्तस्यतरङ्गमालेवरराज । रूपकोत्थापितेयमु
त्प्रेक्षा ॥ ३८ ॥ ॥
निःश्वासेति । उष्णरश्मिरस्तङ्गच्छन्निवोन्नमितानिफणामण्डलानियेषां । तेषां
फणावतांसर्पाणांनिःश्वासेषुयेधूमास्तैस्थगितमाच्छादितमंशुजालंयस्यसतथोक्तः
। अतएवविलोचनानांसुखंसुखकरम्वपुरुवाह ॥ ३९ ॥ * ○ * ○ * ○ ॥
प्रतप्तेति । प्राणहराणिईक्षणानियेषान्तेषांप्राणहरेक्षणानांदृष्टिविषाणांलोचने

र्थः। लोचनन्नयनन्नेत्रमित्यमरः। प्रतप्तञ्च चामीकरं सुवर्णन्तद्वद्भासुरेण।
भङ्गभार्सि मिदोघुरच्प्रत्ययः। प्रकाशेन तेजसा दिशः पिशङ्गयन्त्यः ज्वालामहो
ल्का इव निश्चक्रमुः निर्जग्मुः ॥ ४० ॥ * * * ०* ० * ० ० * ० * ० ॥

आक्षिप्तेति। आक्षिप्तः प्रतिषिद्धः सम्पातः संचारो यस्मिन्तत्सिद्धानाम्पक्षिणामिति
शेषः अपेतागता शोभा यस्मात्तत् अपेतशोभं गतश्रीकं उद्भूतधूमवह्निभ्यां आकुलाः दि
गन्ताः यस्मिन् तत् भोगिकुलैः सर्पकुलैः वृतं नभः परोपरुद्धस्य शत्रुवेष्टितस्य पुरस्या
वस्थामिवावस्थान्दशां भेजे अङ्गीकरोत्यात तत्साधर्म्यं प्राप्तमित्यर्थः। निदर्शनालङ्कारः

आक्षिप्तसम्पातमपेतशोभमुद्वह्निधूमाकुलदिग्विभागम्। वृ
तन्नभो भोगिकुलैरवस्थाम्परोपरुद्धस्य पुरस्य भेजे ॥ ४१ ॥
तमाशु चक्षुःश्रवसां समूहमन्त्रेण तार्क्ष्योदयकारणेन। नेता
नयेनेव परोपजापन्निवारयामास पतिः पशूनाम् ॥ ४२ ॥
प्रतिघ्नतीभिः कृतमीलितानि द्युलोकभाजामपि लोचनानि। ग
रुत्मतां सन्ततिभिर्विहायः क्षणप्रकाशाभिरिवावतेने ॥ ४३ ॥

॥ ४१ ॥ ० * ० ० * ० * ० * ० * ० * ० * ० * ० * ० * ० ॥

तमिति। पशूनाम्पतिः शिवः तं चक्षुःश्रवसां सर्पाणां समूहन्तार्क्ष्योदयकारणेन ग
रुडाविर्भावहेतुना मन्त्रेण नेता नायको नयेन नीत्या परेषामुपजापम्परोपजापम्परो
पकृतं स्वमण्डलभेदमिव। भेदोपजापावुपधे इत्यमरः। निवारयामास ॥ ४२ ॥ ०
घ्नतीति। द्युलोकभाजामपि अनिमेषाणामपि कृतं मीलनं निमेषो येषान्तानि लोच
नानि दृष्टीः प्रतिघ्नतीभिः प्रतिबध्नतीभिः हन्तेः शतरि ङीप्। गरुत्मतान्तार्क्ष्याणां सं
ततिभिः समूहैः क्षणप्रकाशाभिः विद्युद्भिरिव तासां सौवर्णत्वादिति भावः। विहायो

ऽन्तरिक्षं प्लवते नेत्यानशे ॥ ४३ ॥ ॥

तत इति । ततः सुपर्णप्रजानां तार्क्ष्यकुलानां पक्षेभ्यो जन्म यस्य स नानागतिः विचि-
त्रगतिर्वायुर्वनस्पतीनां वृक्षाणां गहनानि जरत्तृणानि जीर्णतृणानीव जवेन मण्ड-
लयन् वियदन्तरिक्षं निनाय ॥ ४४ ॥ ॥

मनःशिलेति । मनःशिला धातुविशेषः तस्याः भङ्गः छेदः तन्निभेन तत्सदृशेन भासां
निकरेण कान्तिपुञ्जेन पश्चाद्भागे निरुध्यमानमाव्रियमाणं व्यूढैर्विशालैरुरोभिर्व-
क्षोभिश्च । उरो वत्सं च वक्षश्चेत्यमरः । विनुद्यमानं प्रेर्यमाणं नभः खगानां गरुडा-

ततः सुपर्णव्रजपक्षजन्मा नानागतिर्मण्डलयन् जवेन । ज-
रत्तृणानीव वियन्निनाय वनस्पतीनां गहनानि वायुः ॥ ४४ ॥
मनःशिलाभङ्गनिभेन पश्चान्निरुध्यमानं निकरेण भासाम् । व्यू-
ढैरुरोभिश्च विनुद्यमानं नभः ससर्पेव पुरः खगानाम् ॥ ४५ ॥
दरीमुखैरासवरागताम्रं विकासि रुक्मच्छदधाम पीत्वा । जवा-
निलाघूर्णितसानुजालो हिमाचलः क्षीब इवाचकम्पे ॥ ४६ ॥

नां पुरः ससर्पेव ससारेव । उत्तरोत्तरदेशातिरोधानेन गच्छतां खगानां । अपूर्वा-
पि पुरोभागः स्वादृश्यात् पूर्ववदुपलभ्यमानतया नभसः स्वच्छेदनात् पुरः ससर्पेवेत्युत्प्रे-
क्षालङ्कारः ॥ ४५ ॥ ॥

वस्वरागो दरीति । जवानिलेन घूर्णितानि भ्रामितानि सानुजालानि यस्य स हिमाच-
लः आसवरक्तता तद्वत्ताम्रं गुणयोरेवोपमानोपमेयभावः । विकासि विकस्वरं रुक्म-
च्छदाः सुवर्णपक्षास्तार्क्ष्यास्तेषां धाम तेजो दरीमुखैरिव दरीमुखैः पीत्वा क्षीबो मत्त
इवाचकम्पे चचाल उपमाव्यापितेयमुत्प्रेक्षा ॥ ४६ ॥ ॥

प्रवृत्तेति। नक्तञ्च दिवा च नक्तन्दिवं अचतुरेत्यादिना सप्तम्यर्थे द्वयोरप्यव्यययोर्द्व
न्द्वैकवद्भावनिपाते समासान्तः। लक्षणया त्वहोरात्रमात्रवाची। प्रवृत्तः प्रादुर्भू
तो यो नक्तंदिवस्य सन्धिः संध्या तद्वद्दीप्तैः शोभितैः नभस्तलं गाम्भुवञ्च पिशङ्गयद्भिः
पिशङ्गीकुर्वद्भिः अन्तर्हितः आच्छादितोऽर्को यैस्तैः पतद्भिः पक्षिभिः परितः सर्वतो व
नानां छायास्समाचिक्षिपिरे समाक्षिप्ताः अंतर्वह्निस्वतेजः प्रकाशात्क्वापि अन्तर्हिता
इत्यर्थः ॥ ४७ ॥ ॥
सइति। सभोगिसङ्घः सर्पसमूह उग्रधाम्ना तेजस्विनां विनतासुतानां तार्क्ष्याणां पक्षि

प्रवृत्तनक्तंदिवसन्धिदीप्तैर्नभःस्थलं [illegible]पिशङ्गयद्भिः। अन्त
र्हितार्कैः परितः पतद्भिश्छायाः समाचिक्षिपिरे वनानाम् ॥ ४७ ॥
सभोगिसङ्घश्च यमुग्रधाम्नां सैन्येन निन्ये विनतासुतानाम्। म
हाध्वरे विध्यपचारदोषः कर्म्मान्तरेणेव महोदयेन ॥ ४८ ॥
साफल्यमस्त्रे रिपुपौरुषस्य कृत्वा गते भाग्य इवापवर्गम्। अनि
न्धनस्य प्रसभं समन्युः समाददेऽस्त्रं ज्वलनस्य जिष्णुः ॥ ४९ ॥

णां सैन्येन महाध्वरे महाक्रतौ। विध्यपचारदोषः कर्म्मस्खलनदोषः महोदयेन
महासामर्थ्येन अथवा महताफलेन तन्मूलेन प्रकृतक्रियासिद्धेरिति कर्म्मान्तरेण
प्रायश्चित्तेनेव क्षयं शान्तिं निन्ये प्रापितः ॥ ४८ ॥ ॥
साफल्यमिति। अस्त्रे सर्पास्त्रे भाग्ये प्राग्भवीये शुभे कर्म्मणीव रिपुपौरुषस्य रिपुप
राक्रमस्य साफल्यं कृत्वा अपवर्गमवसानं समाप्तिं गते सति स्वनिवृत्त्या परसाफल्या
न्सफलीकरणोपचारः समन्युः सक्रोधो जिष्णुरर्जुनः अनिन्धनस्य इन्धनं विनै
वोत्पादितस्य ज्वलनस्य ज्वलनप्रतीकमस्त्रमाग्नेयास्त्रं प्रसभं शीघ्रं समाददे जग्राह

 ॥ ४९ ॥ ❁❁ ॥ ❁❁ ॥ ❁❁ ॥ ❁❁ ॥ ❁❁ ॥ ❁❁ ॥ ❁❁ ॥ ❁❁ ॥ ❁❁ ॥

 ऊर्ध्वमिति । ऊर्ध्वन्तिरश्चीनं तिर्यक् । विभाषाञ्चेरदिक्स्त्रियामिति खप्रत्ययः ।

 अधश्च कीर्णैः विक्षिप्तैः ज्वाला एव सटाः केसराः । सटा जटाकेसरयोरिति विश्वः । तै

र्लङ्घितमेघपङ्क्तिः अतिक्रान्तमेघपङ्क्तिः आयस्तस्य संरब्धस्य संघनो वृतस्य सिंहस्येवाकृतिर्य

स्य स जातवेदा अग्निः प्राणान्तं नाशमिच्छन्निवोत्पपात ॥ ५० ॥ ❁ ❁ ॥

भित्त्वेति । भाभिर्दीप्तिभिः सवितुर्मयूखान् किरणान् । किरणोस्रमयूखांशुरित्य

मरः । भित्त्वेव अभिहत्येव स्थितमित्यूहमन्तात् विसृताः स्फुलिङ्गा यस्य स स्फुलिङ्गो

ऊर्ध्वन्तिरश्चीनमधश्च कीर्णैर्ज्वालासटैर्लङ्घितमेघपङ्क्तिः । आ

यस्तसिंहाकृतिरुत्पपात प्राणान्तमिच्छन्निव जातवेदाः ॥ ५० ॥

भित्त्वेव भाभिः सवितुर्मयूखान् जज्वाल विष्वग्विसृतस्फुलिङ्गः । वि

शीर्य्यमाणाश्मनिनाद धीरं ध्वनिं वितन्वन्नकृशः कृशानुः ॥ ५१ ॥

चयानिवाद्रीनिव तुङ्गशृङ्गान् क्वाचित्पुराणीव हिरण्मयीनि । म

हावनानीव च किंशुकानान्ततान वह्निः पवनानुवृत्त्या ॥ ५२ ॥

दयस्य मयूखाभिघातहेतुकत्वमुत्प्रेक्षते । त्रिषु स्फुलिङ्गोऽग्निकण इत्यमरः । अ

कृशः अतनुः कृशानुः वह्निः विदीर्यमाणस्य विदलतोऽश्मनो निनादमिव धीरमुद्धतध्व

निं वितन्वन् जज्वाल ॥ ५१ ॥ ❁ ✱ ❁ ✱ ❁ ✱ ❁ ✱ ❁ ✱ ❁ ✱ ❁ ✱ ❁ ॥

चयानिति । वह्निः पवनानुवृत्त्या वायुवशेन चयानिव हिरण्मयान्प्राकारानिव । च

यः समूहे प्राकारे इति विश्वः । तुङ्गशृङ्गानद्रीनिव क्वाचित् । हिरण्मयानि । दा

ण्डिनायनेत्यादिना निपातनात्साधुः । पुराणि नगराणीव तथा किंशुकानाम्पलाश

तरूणां । पलाशे किंशुकः पर्ण इत्यमरः । महावनानीव पुष्पितानीति भावः । ततान

विंतस्तारतदाकारेणजज्वालेत्यर्थः ॥ ५२ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥

मुक्तैरिति । सान्द्राञ्जनश्यामरुचः पयोदाः स्फुरन्त्यस्चलन्त्यस्ताः पल्लववल्लोहिन्यो
लोहितवर्णास्ताभिः स्फुरत्पल्लवलोहिनीभिः । वर्णादनुदात्तोपधात्तोनइति ङी
प् । तकारस्य नकारः । शिखिनोऽग्नेरुच्चैरुन्नताभिः शिखाभिर्ज्वालाभिरवलीढाः
दग्धा इत्यर्थः । स्वतलेषु अधोभागेषु मुक्ताविशदा मौक्तिकधवला बभूवुः जल
संशोषणादिति भावः । अधःस्वरूपयोरस्त्री तलमित्यमरः ॥ ५३ ॥ ** ॥
लिलिक्षतीति । क्षयकालरौद्रे कल्पान्तकालभयावहे विलोलार्चिषि चलज्ज्वाले

मुक्तस्फुरत्पल्लवलोहिनीभिरुच्चैः शिखाभिः शिखिनोऽवलीढाः । तले-
षु मुक्ताविशदा बभूवुः सान्द्राञ्जनश्यामरुचः पयोदाः ॥ ५३ ॥
लिलिक्षतीव क्षयकालरौद्रे लोकं विलोलार्चिषि लोहिताश्वे । पि-
नाकिनाहूतमहाम्बुवाहमस्त्रं पुरः पाशभृतः प्रणिन्ये ॥ ५४ ॥
ततो धरित्रीधरतुल्यरोधसस्तडिल्लतालिङ्गितनीलमूर्तयः । अ-
धोमुखाकाशसरिन्निपातिनीरपः प्रसक्तं मुमुचुः पयोमुचः ॥ ५५ ॥

लोहिताश्वे ज्वलने । लोहिताश्वो वायुसख इत्यमरः । लोकं लिलिक्षति लेढुमिच्छति
सति जिघत्सति सतीव । लिहेः सन्नन्तात् शतृप्रत्ययः । पिनाकिना पुनः आहूताः
आकृताः आकारिताः महाम्बुवाहा येन तत् पाशभृतो वरुणस्यास्त्रं प्रणिन्ये प्रयुक्त
म् ॥ ५४ ॥ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ ॥
तत इति । ततो वरुणास्त्रप्रयोगानन्तरं धरित्रीधरतुल्यरोधसः पर्वतसमप्रान्ताः
। रोधः स्यात् प्रान्तकूलयोरिति विश्वः । तडिल्लताभिरालिङ्गिता नीलमूर्तयो नीला
ङ्गानि येषां ते पयोमुचो मेघाः अधोमुखा आकाशसरितः दिवो निपतन्ती अधोमुखाकाश

सरिन्निपातिनीः। कर्त्र्युपमानादितिणिनिः। अपोढानिप्रसक्तंअनुबन्धंअविच्छिन्नंयथातथामुमुचुः। इतःप्रभृतिवंशस्थवृत्तम्॥ ५५॥

पराहतेति। पराहताःअभिहताःअतोध्वस्तानिर्वापिताःशिखाज्वालायस्यतस्मिन्पराहतध्वस्तशिखे। अधिक्षिप्तंप्रहारैस्तंनाशितन्ताडितमितियावत्। अतःसमिद्धंझटितिप्रदीप्तन्तेजोयस्यतस्मिन्शिखावतोऽग्नेःवपुषिप्रतप्तेआयसिलोहेइवकृतास्पदाःकृतस्थितयः। आस्पदंप्रतिष्ठायामितिनिपातःप्रथमेपयोनिपाताःजलपाताध्वनिंवितेनिरेविस्तारयामासुः॥ ५६॥

पराहतध्वस्तशिखेशिखावतोवपुष्यधिक्षिप्तसमिद्धतेजसि। कृता
स्पदास्तप्तइवायसिध्वनिम्पयोनिपाताःप्रथमेवितेनिरे॥ ५६॥
महानलेभिन्नसिताभ्रपातिभिःसमेत्यसद्यःक्वथनेनफेनताम्। व्र
जद्भिरार्द्रेन्धनवत्परिक्षयञ्जलैर्वितेनेदिविधूमसन्ततिः॥ ५७॥
स्वकेतुभिःपाण्डुरनीलपाटलैःसमागताःशक्रधनुःप्रभाभिदः। असं
स्थितामादधिरेविभावसोर्विचित्रचीनांशुकचारुतांत्विषः॥ ५८॥

महानलइति। महानलेऽग्नौभिन्नानिखण्डितानिसिताभ्राणीवपतन्तीतिभिन्नसिताभ्रपातिभिः। कर्त्र्युपमानादितिणिनिप्रत्ययः। अतएवसद्यःक्वथनेनपाकेनफेनताम्प्राप्यसमेत्यपरिक्षयंनाशंव्रजद्भिःजलैःआर्द्रेन्धनवत्आर्द्रकाष्ठैस्तुल्यम्। तेनतुल्यंक्रियाचेद्वतिरितिवतिप्रत्ययः। दिविगगनेधूमसन्ततिः। वितेनेविस्तारिता फेनादिकमार्द्रेन्धनेपितुल्यम्॥ ५७॥

स्वकेतुभिरिति। पाण्डुरैःनीलैःपाटलैश्चपाण्डुरनीलपाटलैःविचित्रैःस्वकेतुभिःधूमैःसमागताःसङ्गताःअतएवशक्रधनुषःप्रभाभिदोद्युतिभाजःविभावसोरग्नेःत्वि

यःस्वसंस्थितामस्थिरांविचित्रस्यचीनांशुकस्यपट्टदुकूलस्यचारुतांसमादधिरेदधुः ॥ ५८ ॥

जलौघेति। जलौघानामुदकप्रवाहाणांसंमूर्च्छनेनमेलनेनमूर्च्छितस्वनःप्रवृद्धघोषः। मूर्च्छनंमेलनेप्रोक्तंवृद्धौमूर्च्छितमेववेत्तिसज्जनः। प्रसक्तैःसङ्गतैःविद्युतांतडिल्लतानांलसितैःस्फुरणैरेधितावर्द्धिताद्युतिर्यस्यसः। धृतधूममण्डलःजलाघातसंभूतधूमपटलःपावकःप्रशान्तिमेष्यन्तत्रदेशेभूयानिवबभूवभूयस्तयास्थापितइवेत्युत्प्रेक्षा ॥ ५९ ॥

जलौघसंमूर्च्छनमूर्च्छितस्वनःप्रसक्तविद्युल्लसितैधितद्युतिः। प्र
शान्तिमेष्यन्धृतधूममण्डलोबभूवभूयानिवतत्रपावकः ॥ ५९ ॥
प्रवृद्धसिन्धूर्मिचयस्थवीयसांचयैर्विभिन्नाःपयसांप्रपेदिरे। उ
पात्तसंध्यारुचिभिःसरूपताम्पयोदविच्छेदलवैःकृशानवः ॥ ६० ॥
उपैत्यनन्तद्युतिरप्यसंशयंविभिन्नमूलोनुदयायसक्षयम्। तथा
हितोयौघविभिन्नसंहतिःसहव्यवाहःप्रययौपराभवम् ॥ ६१ ॥

प्रवृद्धेति। प्रवृद्धानांसिन्धोर्मीणाञ्चयाराशयइव। स्थवीयसांस्थूलतराणांपयसांचयैःपूरैर्विभिन्नाविश्लेषिताःकृशानवोऽग्नयउपात्तसंध्यारुचिभिःप्राप्तसंध्यारागैःपयोदानांविच्छिद्यन्तेइतिविच्छेदाःविच्छिन्नाविक्षिप्ताःलवाःशकलाःयैस्तैःसरूपतांसमानरूपतांप्रपेदिरेइत्युपमा ॥ ६० ॥

उपैतीति। अनन्तद्युतिर्महातेजाःअपिविभिन्नमूलोऽसंशयंयथातथाअनुदयायपुनरनुत्थानायनाशमुपैति। तथाहि। तोयौघैर्विभिन्नासंहतिःसंघातोयस्यसतथोक्तःसहव्यवाहोऽग्निःपराभवन्नाशम्प्रययौविशेषेणसामान्यसमर्थनरूपोऽ

र्थान्तरन्यासः ॥ ६१ ॥ ० * ० ० * ० * ० * ० * ० * ० * ० * ०
अथेति । अथाग्निनिर्वाणानन्तरं विहितविधेयैः कृतकृत्यैः असितनगस्थाञ्जनाद्रेर्नि
तम्बः कटकः तद्वत् श्यामभासां घनानां वितानैः पटलैर्मुक्ता द्यौराकाशो वह्निदाहादि
वेत्युत्प्रेक्षा । विकसन्ति च तान्यमलधामानि स्वच्छकान्तीनि च तेषां नीलोत्पलानां
अधिकविशुद्धानां अत्युज्ज्वलानां श्रियं प्राप इति निदर्शनालङ्कारः ॥ ६२ ॥ * ॥
इतीति । वक्तुः समरनयान् अनेकरणोपायान् जानातीति वक्तुसमरनयज्ञः अतेरु
पसर्गे क इति कप्रत्ययः । नचिगुपधेत्यादिना आकारान्तादनुपपदात्कर्मण्युपपदे
भवतीति विप्रतिषेधेनेति वार्तिकव्याख्याने भाष्यकारेणार्थज्ञ इदमुदाहृतं अस्यार्थस्य ।

अथ विहितविधेयैराशुमुक्ता वितानैरसितनगनितम्बश्यामभासां घ
नानाम् । विकसदमलधाम्नां प्रापनीलोत्पलानां श्रियमधिकविशु
द्धां वह्निदाहादिव द्यौः ॥ ६२ ॥ इति विविधमुदासे सव्यसाची यद
स्त्रं वक्तुसमरनयज्ञः सादयिष्यन्नरातिम् । विधिरिव विपरी
तः पौरुषं न्यायवृत्तेः सपदि तदुपनिन्ये रिक्ततां नीलकण्ठः ॥ ६३ ॥

सव्यसाची अर्जुनः अरातिं सादयिष्यन् अवसादयितुकामः सन्नित्यर्थः । क्रियार्थ
स्थ्लटि शतृप्रत्ययः । इति पूर्वोक्तप्रकारेण विविधं यदस्त्रमुदासे प्रयुक्तवानित्यर्थः ।
व्युपसर्गादस्यत्यूह्योर्वेति वचनमित्यात्मनेपदम् । विपरीतः विधिः प्रतिकूलं दैवम्
क्रियायां । धिर्विधाने दैवेपीत्यमरः । नयेन नीत्या वृत्तिर्वर्तनं यस्य तस्य नीतिनिष्ठ
स्य पौरुषमिव नीलकण्ठः शिवः । सपदि तदस्त्रं व्यर्थतामुपनिन्ये संहृतवान् । मा
लिनीवृत्तम् ॥ ६३ ॥ ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ॥
वीलेति । भूतपतिना शम्भुना अनुगृह्यत इति शेषः । अस्त्रेषु अपहृतेषु सत्सु तर्पि

घ्नताऽन्तरत्नसहस्रगुणान्वितारिघ्नतादिनक्षताह्व्यैर्गजलेष्वपहृतेषुसत्सुनो
कइववीतप्रभावोगतास्वमहिमाअन्यत्रगतशक्तिः अतएवतनुक्षीणोवीतप्रभाव
तनुःतथापिअतनुप्रभावोनिसर्गतःसामर्थ्यादधिकःअन्यत्रोद्योगत्रान्ततोजिष्णुर
र्जुनःजयिनींजयनशीलाम् । जिघृक्षीत्यादिनाइनिप्रत्ययः । भुजवीर्यलक्ष्मीं
भुजपराक्रमसम्पदम् । उभयत्रापिपुरुषकारमितियावत् । तत्कालकुण्ठि

वीतप्रभावतनुरप्यतनुप्रभावःप्रत्याचकाङ्क्षजयिनीम्भुजवीर्यलक्ष्मी
म् । अस्त्रेषुभूतपतिनापहृतेषुजिष्णुर्वर्षिष्यतादिनकृतेवजलेषु
लोकः ॥ ६४ ॥ * ॥ इतिमहोपाध्यायश्रीभारविकृतौकिराताऽ
र्ज्जुनीयेमहाकाव्येकिरातार्ज्जुनयुद्धंनामषोडशःसर्गः ॥ १६ ॥ * ॥

तामितिशेषः । प्रत्याचकाङ्क्षप्रत्याहर्तुमियेषेत्यर्थः । यथालोकोनद्यादिजला
पहारेपिउपायान्तरेणकूपादिनाजीवितुमिच्छतितद्वत् । अस्त्रबलापहारेऽ
पिभुजबलेनैवजेतुमियेषेतिभावः । वसन्ततिलकावृत्तम् ॥ ६४ ॥ * ॥ इतिश्री
म्होपाध्यायकोलाचलमल्लिनाथसूरिविरचितायांकिराताऽर्ज्जुनीयव्याख्यायांघ
ण्टापथसमाख्यायांषोडशःसर्गः ॥ १६ ॥ * * * * * * * * * * * ॥

अथपञ्चभिःपार्थंविशेषयन्षड्भिःकुलकमाह । अथेत्यादिना । अथजयल
क्ष्मीप्रत्याकांक्षानन्तरंआपदामुद्धरणक्षमेषुआपन्निवारणसमर्थेषुअस्त्रेषुप्रस्वा
पनादिषुतादृशेषुमित्रेष्विवतिरोहितेष्वन्तर्हितेषुसत्सुगुरूणामहतांस्वपौरुषे
णैवतादृशेनशरासनेनधृतिंधैर्य्यंअभिपुष्यन्वर्द्धयन्अद्यापिधनुषिपौरुषेचसति
कियानयंकिरातइतिधैर्य्यमवलंबमानइत्यर्थः । अतएवगुरुश्रियःप्रवृद्धशोभास
म्पत्तिः । पद्मातुलक्ष्मीःश्रीर्निगद्यतइतिशाश्वतः ॥ १ ॥ ❁ * ❁ ❁ * ❁ ॥
भूरीति । पुनश्चभूरिप्रभावेनमहानुभावेनसहरणाभियोगात्युद्धलाभात्प्रीतः ।

अथापदामुद्धरणक्षमेषुमित्रेष्विवास्त्रेषुतिरोहितेषु । धृ
तिंगुरुश्रीर्गुरुणाभिपुष्यन्स्वपौरुषेणैवशरासनेन ॥ १ ॥
भूरिप्रभावेनरणाभियोगात्प्रीतोविजिह्मश्चतदीयवृत्त्या । स्प
ष्टोप्यविस्पष्टवपुःप्रकाशःसर्पन्महाधूमइवाद्रिवह्निः ॥ २ ॥
तेजःसमाश्रित्यपरैरहार्य्यंनिजंमहन्मित्रमिवोरुधैर्य्यम् ।
आसादयन्नस्खलितप्रभावेभीमेभुजालम्बमिवारिदुर्गे ॥ ३ ॥

तदीयवृत्त्याशत्रुवृत्त्याविजिह्मोविस्मयश्चतथास्पष्टःदीप्तश्चतथाप्यविस्पष्टव
पुःप्रकाशोयस्यसःकुतःसर्पन्प्रसरन्महान्धूमोयस्यससर्पन्महाधूमोऽद्रिवह्नि
रिवास्थितः ॥ २ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥
तेजइति । पुनश्चपरैररिभिरहार्य्यंनिजंस्वकीयंमहत्तेजोवीर्य्यंमित्रमिवस
माश्रित्य । अतएवभीमेभयानकेअरिरेवदुर्गन्तस्मिन्अरिदुर्गेशत्रुसङ्कटेअस्ख
लितप्रभावमचलशीलमुरुमहद्धैर्य्यंभुजालम्बमिवहस्तावष्टम्भमिवआसाद
यन्प्राप्नुवन्ईदृशेसङ्कटेपिमहावीर्य्यत्वात्धैर्य्यंनत्यजतीत्यर्थः ॥ ३ ॥ * * ॥

वंशेति । एनश्चाभिमानोममताबुद्धिःतद्वत्याविषयतयाकर्मणिकर्तृत्वोपचारःअ
भिमानास्पदेनेत्यर्थः । अन्यत्रकुलशीलाद्यभिमानवत्यावंशोचितत्वात्स्वकुलानु
रूपत्वात्असुभ्यःप्राणेभ्योपिसम्प्रियतांसंप्राप्नयापरेणशत्रुणासमक्षंअक्ष्णोस्स
मीपेसमक्षमयतः । अव्ययीभावेशरत्प्रभृतिभ्यइतिसमासान्तःटच्प्रत्ययः । आ
दातुंगृहीतुमिष्टतयाआदित्सितयाआजिहीर्षयेत्यर्थः । आङ्पूर्वाद्ददातेःसन्न
न्तात्कर्मणिक्तः । वध्वेवकीर्त्याहेतुनापरितप्यमानः । कर्तरिशानच्हेताविति तृ
तीया कन्ययाशोकइतिवत् ॥ ४ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥
पतिमिति । एनम्नगानाम्पतिंहिमवन्तमिवबद्धमूलंविपक्षंशत्रुन्तरसाबलेनोन्मू

वंशोचितत्वादभिमानवत्यासम्प्राप्नयासम्प्रियतामसुभ्यः । स
मक्षमादित्सितयापरेणवध्वेवकीर्त्यापरितप्यमानः ॥ ४ ॥
पतिन्नगानामिवबद्धमूलमुन्मूलयिष्यन्तरसाविपक्षम् ।
लघुप्रयत्नन्निगृहीतवीर्यस्त्रिमार्गगावेगइवेश्वरेण ॥ ५ ॥

लयिष्यन् । किञ्च । त्रिभिर्मार्गैर्गच्छतीतित्रिमार्गगागङ्गाउत्तरपदसमासःतस्याः
वेगइवईश्वरेणलघुप्रयत्नंअल्पप्रयासंयथातथाहिगृहीतवीर्यःप्रतिबद्धशक्तिः
हृतास्वशक्तिरितियावत्पुराकिलहिमाद्रिविदलनायगगनात्पतन्तङ्गङ्गाप्रवाहङ्ग
ङ्गाधरोनिजटाजूटेननिजग्राहेतिपौराणीकथातद्वदित्यर्थः ॥ ५ ॥ ❁ ❁ ॥
संस्कारेटिति । एवम्भूतःपार्थःसंस्कारवत्त्वात्संस्कारश्चित्ररचनाअन्यत्रसाधुत्वं
असाधूनाम्प्रयोगनिषेधादितिभावः । अथवासंस्कारोव्युत्पत्तिःतद्वत्त्वाच्चेतोरमय
न्नुप्रयोगंसन्धानमोक्षादिशिक्षाअभ्यासोगुणस्तदाहितोऽतिशयःमौर्वीवा । अ
न्यत्रतुप्रयोगोभियुक्तव्यवहारःशिक्षाअभ्यासःगुणाःस्वस्थानकरणादयःस्तेपप्रसा

दादयो वा ते भूषणं येषां तेषु यथायथाभूता अर्था येषां तेषु यथार्थेषु । अन्यत्र निय
तार्थेषु भृणन्ति हिंसन्तीति शराः तेषु जयन्तन्निर्वाहकत्वात्तदाधारत्वविवक्षायां सप्तमी
। शब्देषु उपपदेषु भावः प्रवृत्तिनिमित्तं सामान्यादि स एवार्थः । तमिवाशशंसे आशा
च्छकांक्षे शास्तिशंसत्योराङ्पूर्वयोरिच्छायामात्मनेपदं उपसंख्यानात् । यथा शाब्दि
काः शब्दैरर्थं साधयन्ति । तद्वत् स्वयं शरैर्जयं साधयितुमियेषेत्यर्थः ॥ ६ ॥ * ॥
भूय इति । भूयः पुनरपि समाधानेन युद्धाय मनोव्यवस्थापनेन विवृद्धतेजाः प्रवृद्ध
प्रतापः पुरा पुरातनं युद्धं एवमित्थं शक्तिसादकरं न भवतीति हेतोर्व्यथावान् परितापव

संस्कारवत्त्वाद्रमयत्सु चेतः प्रयोगशिक्षागुणभूषणेषु । ज
यं यथार्थेषु शरेषु पार्थः शब्देषु भावार्थमिवाशशंस ॥ ६ ॥
भूयः समाधानविवृद्धतेजा नैवम्पुरा युद्धमिति व्यथावान् । स
निर्ववामास्त्रममर्षनुन्नं विषं महानाग इवेक्षणाभ्याम् ॥ ७ ॥
तस्याहवायासविलोलमौलेः संरम्भताम्रायतलोचनस्य । नि
र्वापयिष्यन्निव रोषतप्तं प्रस्नापयामास मुखं निदाघः ॥ ८ ॥

वान् सोऽर्जुनः ईक्षणाभ्यां दृष्टिभ्यां महानागो महासर्पो विषमिव अमर्षनुन्नं क्रोधो
त्थापितं अस्त्रं अश्रु निर्ववाम निर्जगार । सात्विकानां वीररससाधारण्याद्रौद्ररसे अ
श्रूदयोक्तिः । स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभेदोऽथ वेपथुः । वैवर्ण्यमश्रु प्रलय इत्यष्टौ
सात्विका मताः ॥ ७ ॥

तस्येति । आहवायासेन युद्धायासेन विलोलमौलेः स्रस्तकेशबन्धस्य चूडाकिरीट
केशास्तु संयता मौलयस्त्रियामित्यमरः । संरम्भताम्रे कोपारुणे आयते लोचने य
स्य तस्य । संरम्भः सम्भ्रमे कोप इति विश्वः । तस्यार्जुनस्य रोषतप्तं मुखं निदाघो घर्मः

निर्वापयिष्यन् शिशिरीकरिष्यन्निवेत्युत्प्रेक्षा । प्रस्नापयामास सिषेच स्वेदञ्जनया
मासेत्यर्थः । स्नातेर्मित्वविकल्पितत्वात् ह्रस्वविकल्पः ॥ ८ ॥ ❀ ❀ ❀ ❀ ❀ ॥

क्रोधेति । क्रोधोऽन्धकारइवतेनान्तरितश्चावृतःसोऽर्जुनःघनोपरुद्धोमेघावृतः
तिग्मरश्मिःरविःवृष्टेःप्रभवायवर्षणायतिस्रःऊर्द्ध्वाभ्रूनाराजीरिवअर्कस्योर्द्ध्वांशो
रेवोदयेवृष्टिलिङ्गमित्यागमः । रणायरणप्रवृत्तयेतिस्रःत्रिसंख्याःभ्रूभेदोभ्रूभ
ङ्गःतस्यरेखाबभार ॥ ९ ॥ ❀ * ❀ * ❀ * ❀ * ❀ * ❀ * ❀ * ❀ * ॥

सइति । सोऽर्जुनःअम्बुदवन्नदतीतिअम्बुदनादिकर्त्तर्य्युपमानइतिणिनिः ।
चापन्दिङ्नागःदिग्गजःअद्रिशृङ्गमिवहस्तेनकरेणप्रध्वनय्यप्रध्वनयन्शम्भोर्वला

क्रोधान्धकारान्तरितोरणायभ्रूभङ्गरेखाःसबभारतिस्रः । घनो
परुद्धःप्रभवायवृष्टेरूर्द्ध्वांशुराजीरिवतिग्मरश्मिः ॥ ९ ॥
सप्रध्वनय्याम्बुदनादिचापंहस्तेनदिङ्नागइवाद्रिशृङ्गम् । बला
निशम्भोरिषुभिस्ततापचेतांसिचिन्ताभिरिवाशरीरः ॥ १० ॥

निअशरीरोऽनङ्गःकामःचेतांसियुवमनांसिचिन्ताभिःप्रयोजनध्यानैरिवइषुभिस्त
तापतापयामास । तपतिःसकर्मकः । अत्रेषुशब्दःस्त्रीलिङ्गःअन्यथाऽउपमानोपमे
ययोर्भिन्नलिङ्गतादोषात् । पत्रीरोपइषुर्द्वयोरित्यमरः ॥ १० ॥ * ~ * ॥

सदिति । अभिनिविष्टाशास्त्रनिश्चिताबुद्धिर्य्यस्यसतस्मिन्अभिनिविष्टबुद्धौशा
स्त्रनिश्चितमनोविषयेसद्वादिताप्रामाणिकार्थसमर्थकतेवनहिसम्यगभ्यस्तशास्त्र
म्प्रतिसद्वाद्यपिशक्नोतीतिव्याचक्षतेइतिकेचित् । अन्येतुअभिनिविष्टबुद्धौआ
ग्रहाविष्टचित्तेविषयेसद्वादिताहितोपदेष्टृत्वमिवनह्याग्रहीहितंगृह्णातीतिभा
वः। विपक्षपातेवीतरागेविषयेगुणाभ्यसूयागुणासहिष्णुताइवसहिसमदर्शीति

यन्तमपिनद्वेष्टियतइतिभावः । अगोचरेअवाङ्मानसगोचरेब्रह्मणिवागिव ।
यतोवाचोनिवर्तन्तेअप्राप्यमनसासहइतिश्रुतेरितिभावः । शराणांशक्तिःशिति
कण्ठकायेशिवशरीरेउपरमेउपरता । तस्याक्षोभ्यमहिमत्वादितिभावः । विभा
षासंकर्मकादितिविकल्पादात्मनेपदम् । अत्रमालोपमा ॥ ११ ॥
उमेति । पाण्डुसुतेनप्रणुन्नाःप्रक्षिप्ताःशिलीमुखाबाणाःउमापतिंशिवंअभ्युत्थित
स्याभ्युन्नतस्याद्रिपतेर्नितान्तमुत्कटकंहेमन्तोभवस्यहैमनस्य । सर्वत्राण्तलोपश्चेत्यण्
प्रत्ययःतकारलोपश्च । अर्कस्यपादारश्मयइव । पादारश्म्यङ्घ्रितुर्यांशाइत्यम

सह्यादिनेवाभिनिविष्टबुद्धौगुणाभ्यसूयेवविपक्षपाते । अगो
चरेवागिवचोपरमेशक्तिःशराणांशितिकण्ठकाये ॥ ११ ॥
उमापतिम्पाण्डुसुतप्रणुन्नाःशिलीमुखानव्यथयांबभूवुः । अ
भ्युत्थितस्याद्रिपतेर्नितान्तमर्कस्यपादाइवहैमनस्य ॥ १२ ॥
सम्प्रीयमाणानुबभूवतीव्रम्पराक्रमन्तस्यपतिर्गणानाम् । वि
षाणभेदंहिमवानसह्यंवप्रानतस्येवसुरद्विपस्य ॥ १३ ॥

रः । नव्यथयांबभूवुः । नध्येस्थितस्यांशुमतांसमूहमर्कस्येतिपाठान्तरेमध्येस्थि
तस्यहैमनस्यार्कस्यपादाःकिरणाःअंशुमतांप्राणिनांसमूहमिवेतिनदुःखमुत्पा
दयामासुरिति ॥ १२ ॥
सम्प्रीति । गणानाम्पतिःशिवःतीव्रन्तयार्जुनस्यपराक्रमंवप्रेरोधसिस्नानतस्यपरि
णतस्यवप्रप्रहारिणइत्यर्थः । सुरद्विपस्याऽसह्यंविषाणभेदन्दन्तप्रहारंहिमवा
निवसंप्रीयमाणःसंहृष्यन्अनुबभूवानुभवतिस्म । तस्याक्षोभ्यत्वादनुजिघृक्षुत्वा
च्चेतिभावः ॥ १३ ॥

तस्मैहीति । तस्मैपार्थायभारस्यभूभारस्योद्धरणेउद्वहनेसमर्थम्प्रतापम्बाहु
मिवस्ववष्टंभनतयेतिशेषः । अन्यथाभारोद्वहनस्यदुष्करत्वादितिभावः । सप्रता
पः प्रभावश्चयत्तेजःकोषदण्डजमित्यमरः । प्रदास्यताविततरिष्यताकारणानां
ब्रह्मादीनामपिकारणेनजनकेनदेवेनसोऽर्ज्जुनोऽभिभवस्तदानीञ्चिरम्प्रसेहे
सोढवान्सह्यादितिभावः ॥ १४ ॥

अथत्रिभिर्भगवदभिप्रायमाविष्कुर्वन्चतुर्भिःकलापकमाह । प्रत्याहतेति । प्रत्या
हतौजाःपरेणप्रतिहतबलःसन्नपिक्षतसत्त्ववेगःक्षतोत्साहातिशयःसन्यःपुमान्

तस्मैहिभारोद्धरणेसमर्थंप्रदास्यताबाहुमिवप्रतापम् । चिर
म्बिषेहेभिभवस्तदानींसकारणानामपिकारणेन ॥ १४ ॥
प्रत्याहतौजाःकृतसत्त्ववेगःपराक्रमञ्ज्यायसियस्तनोति । तेजां
सिभानोरिवनिष्पतन्तियशांसिवीर्य्यज्वलितानितस्य ॥ १५ ॥
दृष्टावदानाद्व्यथतेरिलोकःप्रध्वंसमेतिव्यथिताच्चतेजः । तेजो
विहीनंविजहातिदर्पःशान्तार्चिषंदीपमिवप्रकाशः ॥ १६ ॥

ज्यायसितस्मादप्यधिकेपराक्रमन्तनोतितस्यपुंसःभानोरर्कस्यतेजांसीववीर्य्ये
णशौर्य्येणज्वलितानिप्रकाशितानियशांसिनिष्पतन्तिउद्भवन्तीत्यर्थः । हीनस्या
धिकाभियोगोयशस्करइतिभावः ॥ १५ ॥
ततःकिमित्यतआह । दृष्टेति । दृष्टमवदानंमहत्कर्म्मयस्यतस्मात् दृष्टावदा
नात् दृष्टपौरुषात् अरिलोकःशत्रुजनःव्यथतेबिभेति । धूर्ज्जटिविजयिनःतस्या
न्यःकियान्नामेतिमन्वानइतिभावः । व्यथितात्भीतात्तेजःप्रध्वंसन्नाशमेति । ते
जोविहीनन्दर्पःउत्साहःशान्तार्चिषन्निर्वाणज्वालन्दीपम्प्रकाशइवप्रजहातिव

जति ॥ १६ ॥ ❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁❁ ॥

तत इति। ततोदर्पहान्यनन्तरं अस्तौक्षयङ्गतौमदावलेपौमदगर्वौयस्यसःबोऽरिलोकःगन्धेनमदगन्धेनैवजेतुर्ज्जयनशीलस्यशत्रुप्रवेकः। प्रमुखागतस्याभिमुखागंतस्यगन्धद्विपस्यप्रतिद्विपस्यान्योमतङ्गजौघःमत्तगजसमूहइवजिगीषोर्नायकस्यजय्यतायाःपदवीम्प्रयातिप्राप्नोतिविजिगीषुणाजेतुंशक्योभवतीत्यर्थः। क्षय्यजय्यौशक्यार्थइतिनिपातः। अत्रश्लोकद्वयेनत्र्यायम्भिपराक्रमकारणादीनांपूर्वपूर्वस्योत्तरोत्तरंप्रतिकारणत्वकथनात्कारणमालाख्योलङ्कारः। वसग

ततःप्रयात्यस्तमदावलेपःसजय्यतायाःपदवीञ्जिगीषोः। गन्धेनजेतुःप्रमुखागतस्यगन्धद्विपस्येवमतङ्गजौघः॥ १७ ॥ एवम्प्रतिद्वंद्विषुतस्यकीर्त्तिंमौलीन्दुलेखाविशदांविधास्यन्। इयेषपर्य्यायजयावसादांरणक्रियांशम्भुरनुक्रमेण॥ १८ ॥ मुनेर्विचित्रैरिषुभिःसभूयान्निन्येवशंभूतपतेर्बलौघः। सहात्मलाभेनसमुत्पतद्भिर्ज्जातिस्वभावैरिवजीवलोकः॥ १९ ॥ कलापकम्॥

न्तृत्तम्॥ १७ ॥ ❁❁~**~❁❁~**~❁❁~**~❁❁ ॥

एवमिति। एवमुक्तरीत्याप्रतिद्वंद्विषुप्रत्यर्थिमध्येतस्यार्जुनस्यमौलीन्दुलेखाविशदाङ्कीर्तिंविधास्यन्करिष्यन्अनुक्रमेणाविपर्यासेनपर्य्यायेणजयोवसादोभङ्गश्चतौजयावसादौयस्यास्तांपर्य्यायजयावसादांरणक्रियामियेषइच्छतिस्मजयानन्तरम्भङ्गोभङ्गानन्तरञ्जयः। इतिपर्य्यायार्थःतस्यविपर्य्यासोन्यतरनैरन्तर्य्यंतदभावोऽनुक्रमइत्यपौनरुक्त्यम्॥ १८ ॥ ❁~❁~❁~❁~❁ ॥

मुनेरिति। मुनेर्विचित्रैरिषुभिःसभूयान्असंख्योभूतपतेर्बलौघः। आत्मलाभे

जन्मनासहजा…रिरविभैर्वद्भिराजन्मसिद्धैरित्यर्थः । जातयःगोत्वमनुष्यत्वा
दयःस्वभावाःजातिनियताःधर्मास्तैर्जातिस्वभावैर्जीवलोकःप्राणिजातमिववशंनि
न्येनीतःकर्मणिविह । प्रमाणेनोजातिधर्मानिवगणान्मुनिःशरजालातिक्रमितुंशेकु
रित्यर्थः ॥ १९ ॥ ○ * ○ * ○ * ○ * ○ * ○ * ○ * ○ * ○ * ○ ॥

वितन्वन्निति । त्रस्तानिसैन्यानिसन्ततवेपथूनिनिरन्तरकम्पानिगवांकुलानिवृ
न्दानिप्रवर्षतोवृष्टिंकुर्वतःक्षपाघनस्यरात्रिमेघस्येवशरैर्योऽन्धकारस्तंवितन्वतः
विस्तारयतःतस्यमुनेःसम्बन्धिनंरवंशरवर्षघोषंनिशेमुःशुश्रुवुःननुकिंचिद्दृष्टु

वितन्वतस्तस्यशरान्धकारंत्रस्तानिसैन्यानिरवन्निशेमुः । प्र
वर्षतःसन्ततवेपथूनिक्षपाघनस्येवगवांकुलानि ॥ २० ॥
सस्सायकान्साध्वसविप्लुतानांक्षिपन्परेषामतिसौष्ठवेन । श
शीवदोषावृतलोचनानांविभिद्यमानःपृथगाबभासे ॥ २१ ॥
क्षोभेणतेनाथगणाधिपानांभेदंययावाकृतिरीश्वरस्य । तर
ङ्गकम्पेनमहाह्रदानांछायामयस्येवदिनस्यभर्तुः ॥ २२ ॥

न्त्रेष्टानुदूरांपास्तेतिभावः ॥ २० ॥ ** ~ * ~ * ~ * ~ * ~ ** ॥

सइति । अतिसौष्ठवेनातिलाघवेनसायकान्शरान्क्षिपन्सोऽर्जुनःसाध्वसेनविप्लु
तानांभ्रान्तानांसाध्वसविप्लुतानांपरेषांद्विषान्दोषेणरोगादिनाआवृतलोचनानांदु
ष्टचक्षुषांशशीवपृथग्विभिद्यमानोआवभासे । यथासदोषचक्षुषःएकश्चन्द्रो
नानेवलक्ष्यतेतद्वदेकोप्यनेकइवदृष्टइतिभावः ॥ २१ ॥ ○ ○ ○ ○ ○ ○ ॥

क्षोभणेति । अथगणाधिपानांसम्बन्धिनातेनक्षोभेणकम्पेनईश्वरस्याकृतिराकारो
म…महाह्रदानान्तरङ्गकम्पेनछायामयस्यप्रतिबिम्बरूपस्यदिनस्यभर्तुःदिवा

करस्येवाकृतिरिवभेदंविकारंययौप्रापत्स्वयंनिर्विकारोपिप्रतिरूपैर्वासंसर्गात्तथा
प्रतीयतइत्यर्थः ॥ २२ ॥ ॥
यदिदेवोपिविकृतस्तर्हिकोपःकिन्नकृतस्तत्राह । प्रसेदिवांसमिति । प्रसेदिवां
समर्ज्जुनम्प्रतिप्रसन्नचित्तन्तंदेवंकोपोनापनप्रापत्तत्रहेतुःपरस्मिन्पुरुषेपरात्मनि
देवेसतोनिर्विकारत्वमित्यर्थः । तत्राप्यनुग्रहंययावितिभावः । विकारःकोपरूपः
कुतःनकुतश्चिदित्यर्थः । नहिएतस्यनिर्विकारस्यकथम्बाह्याकारभेदःकारणा
भावादितिचेत्तन्नविद्मइत्याह । इदंपूर्वोक्तंआकारवैषम्यञ्चभेजेकेनापिकारणेन
नकुप्यतीत्यर्थः । ननुनिर्विकारेकुतःकोपस्तत्रहेतुमाह । महतांवृत्तिश्चेष्टादुर्ल

प्रसेदिवांसन्नतमापकोपःकुतःपरस्मिन्पुरुषेरजोवा । आ
कारवैषम्यमिदंचभेजेदुर्लक्ष्यचिह्ना महतांहिवृत्तिः ॥ २३ ॥
विस्फार्यमाणस्यततोभुजाभ्याम्भूतानिभर्त्राधनुरन्तकस्य । भि
न्नाकृतिंज्यान्ददृशुःस्फुरन्तींक्रुद्धस्यजिह्वामिवतक्षकस्य ॥२४॥

क्ष्यचिह्नादुर्ग्रहहेतुकाहि ॥ २३ ॥ ॥
विकारमेवाह । विस्फार्य्यमाणस्येति । ततोऽनन्तरम्भूतानिभर्त्ताभूतपतिनाभृ
ञस्तृन्प्रत्ययः । अतएवनलोकेत्यादिनाषष्ठीप्रतिषेधः । भुजाभ्यांकर्तृकरणयो
स्तृतीया । विस्फार्य्यमाणस्याकृष्यमाणस्यधनुरन्तकइवतस्यधनुरन्तकस्यस
म्बन्धिनींस्फुरन्तींचलन्तींअतएवभिन्नाद्विधेवदृश्यमानाआकृतिर्य्यस्यास्तांज्यांध
नुर्गुणंक्रुद्धस्यतक्षकस्यनागविशेषस्यजिह्वामिवददृशुःद्विधाभावाद्भयङ्करत्वाच्चे
तिभावः ॥ २४ ॥ ॥
रव्येति । पार्थःसव्यापसव्याभ्यांध्वनितन्नादितमुग्रचापंयेनतद्विरतांधिपंञ्चपे

ङ्गःप्रमत्तेनायन्तापर्य्यायेणायोगपट्टेनसम्पादितःकर्णयोस्तालंआस्फालनंयेनतं
व्यालन्दुष्टं । भेद्यलिङ्गेशठेव्यालइत्यमरः । गजमिवाशशंकेतच्चापचातुर्यदर्श
नात्दुर्जयःकोप्ययमनर्थकरस्स्वेतिशङ्कितवानित्यर्थः ॥ २५ ॥
निजघ्निरेइति । हरेषुजालैस्तस्यार्जुनस्यपतन्तिधावन्तिशिलीशल्यंमुखंयेषान्ते
षांशिलीमुखानांशराणांवृन्दानि । तेजस्विभिःप्रबलैःअम्बुराशेर्यादोभिर्जलग्राहैः
सिन्धुमुखेननदीमुखेनआगतानियादांसीवजलजन्तूनिव । यादांसिजलजन्त
वइतिवैजयन्तीनिजघ्निरेहतानि ॥ २६ ॥

सव्यापसव्यध्वनितोग्रचापम्पार्थंकिराताधिपमाशशंके । पर्य्या
यसम्पादितकर्णतालंयन्तागजंव्यालमिवापराद्धः ॥ २५ ॥
निजघ्निरेतस्यहरेषुजालैःपतन्तिवृन्दानिशिलीमुखानाम् । ते
जस्विभिःसिन्धुमुखागतानियादांसियादोभिरिवाम्बुराशेः ॥२६
॥ विभेदमन्तःपदवीनिरोधम्प्रध्वंसनञ्चाविदितप्रयोगः । नेता
रिलोकेषुकरोतियद्यत्तत्तच्चकारास्यशरेषुशम्भुः ॥ २७ ॥

विभेदमिति । अन्तर्विभेदंव्यूहविश्लेषणंउपजापञ्चपदवीनिरोधंमार्गएवप्रतिब
न्धनमन्यत्रचासारप्रसारप्रतिबन्धंविध्वंसनंखण्डनन्दुर्घटनदाहादिकञ्चेत्यादि
। यद्यन्नेतानायकोजिगीषुरविदितप्रयोगःसंवृतमन्त्रत्वादविज्ञातोपायप्रयोगः
सन्अरिलोकेषुशत्रुकुलेषुकरोति । तत्तत्शम्भुरविदितप्रयोगःअज्ञातप्रधान
मोक्षादिकःसन्अस्यअर्ज्जुनस्यशरेषुचकारकृतवान् । कर्त्तरिलिट् । श्लेषाल
ङ्कारः ॥ २७ ॥
सोढेति । सोढानिपरैरवगीतानिगर्हितानिप्रमथायुधानिपूर्वैस्त्वष्टवाणाःयस्य

णस्यार्जुनस्यसम्बन्धिभिःक्रोधोज्झितैःक्रोधाभिविक्तैःपूर्ववाणवैफल्यात्कोपनत्व
त्कैः। अतएववेगितयावेगेनपतद्भिःगतिंकुर्वद्भिः। अतएवछिन्नैरपित्रासिता
वाहिन्योयैस्तैरतएवकृतार्थैरिववाणैःपेतेपतन्तिभावेलिट्। वस्तुतस्तुअकृतार्था
एवेत्यर्थः॥ २८ ॥ ॥

अलमिति। ऋजुताऽवक्राकारत्वंअवक्रशीलत्वंचसैवगुणस्तेनालंकृतानांगुरुभिर्ध
नुर्विद्यागुरुभिःधर्मशास्त्रगुरुभिश्चोपदिष्टान्दर्शितांगतिंगमनमाचारञ्चास्थिता
नांप्राप्तानांमार्गणानांशराणांसतांसाधूनामिवापर्वण्ययन्थौअन्यत्राप्रस्तावेअका

सोढावगीतप्रथमायुधस्य क्रोधोज्झितैर्वेगितयापतद्भिः। छि
न्नैरपित्रासितवाहिनीकैःपेतेकृतार्थैरिवतस्यबाणैः ॥ २८ ॥
अलंकृतानामृजुतागुणेनगुरूपदिष्टांगतिमास्थितानाम्। स
तामिवापर्वणिमार्गणानाम्भङ्गःसजिष्णोर्धृतिमुन्ममाथ ॥ २९ ॥
बाणच्छिदस्तेविशिखाःस्मरारेरवाङ्मुखीभूतफलाःपतन्तः। अ
खण्डितम्पाण्डवसायकेभ्यःकृतस्यसद्यःप्रतिकारमापुः ॥ ३० ॥

ण्डइत्यर्थः। पर्वस्यादुत्सवेग्रन्थौप्रस्तावेलक्षणान्तरेइतिविश्वः। सईश्वरकृतः
भङ्गःछेदोव्यसनञ्चजिष्णोरर्जुनस्यकस्यचित्जित्वरस्य। जिष्णुःशक्रेधनञ्जये
जित्वरइतिविश्वः। धृतिर्धैर्य्यमुन्ममाथजहारेत्यर्थः। अकाण्डेसाधुविपन्निदर्श
नादिवशरभङ्गदर्शनाद्धैर्य्यभङ्गोभूदित्यर्थः ॥ २९ ॥ ॥
बाणेति। बाणच्छिदःपार्थशरच्छेदिनस्तेस्मरारेर्विशिखाःअवाङ्मुखीभूतफलाः
विमुखाग्राःविफलाश्चसन्तःपतन्तःपाण्डवसायकेभ्यः। क्रियाग्रहणाच्चतुर्थी। पाण्ड
वसायकानांकृतस्यफलभङ्गरूपस्यस्वकर्मणःसद्योऽखण्डमखण्डितम्प्रतीकारमा

पुःस्वयुक्तं टङ्कमेसङ्गः फलं दर्शयतीतिभावः ॥ ३० ॥

पुनरर्जुनस्य जयमाह ॥ चित्रीयमाणानिति । अरातिरर्जुनः अतिलाघवेन अतिशीघ्रत्वात् । चित्रीयमाणान् आश्चर्यमाश्चर्यं कुर्वाणान् । नमो वरिवश्चित्रङः क्यच् । भवमार्गणानां प्रमाथिनः खण्डयतः तान्बाणान् । शङ्काकुलायाः संकुलितायाः संक्षुभितायाः ध्वजिन्याः सेनायाः हृदयेषु दूरं गाढं निचखान निखातवान् ॥ ३१ ॥

तस्येति । तस्यार्जुनस्य पराक्रमेऽतियत्नात् इतरेतरान्योन्यस्य विशेषणेनातिशयकर

चित्रीयमाणानतिलाघवेन प्रमाथिनस्तान्भवमार्गणानाम् । शंका
कुलायानिचखान दूरम्बाणान्ध्वजिन्या हृदयेष्वरातिः ॥ ३१ ॥
तस्यातियत्नादतिरिच्यमाने पराक्रमेन्योन्यविशेषणेन । ह
न्तापुरांभूरिपृषत्कवर्षं निरासनैदाघमिवाम्बुमेघः ॥ ३२ ॥
अनामृशन्तः क्वचिदेव मर्म प्रियैषिणानुप्रहिताः शिवेन । सु
हृत्प्रयुक्ता इव नर्मवादाः शरा मुनेः प्रीतिकरा बभूवुः ॥ ३३ ॥

णेनातिरिच्यमाणे उद्रिच्यमाणे सति पुरां हन्ता त्रिपुरविजयी हरो भूरि प्रभूतम्पृषत्कवर्षं बाणवर्षम् । पृषत्कबाणविशिखाः इत्यमरः । निदाघे भवो नैदाघो मेघो ऽम्बुवाहो अम्बुजलमिव निरास मुमोच । अस्यतेर्लिट् । निदाघग्रहणं वर्षणस्यातितीव्रत्वद्योतनार्थम् ॥ ३२ ॥

अनामृशन्त इति । प्रियैषिणा प्रियचिकीर्षुणा शिवेनानुप्रहिताः प्रयुक्ताः । अत एव क्वचिदपि मर्म अनामृशन्तो ऽस्पृशन्तः ते शराः सुहृन्मित्रं सोपि प्रियैषीतेन प्रयुक्ताः उच्चारिताः नर्मवादाः प्रियवादाः इव मुनेरर्जुनस्य प्रीतिकराः प्रीतिजन

काबभूवुः ॥ ३३ ॥ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ॥

अस्त्रैरिति । अस्त्रैः स्वायुधैः समानान्तुल्यामतिरेकिणीं ततोऽधिकाम्मात्तस्य मुनेः रिपूणामपि शक्तिं पश्यन्विषादेनोत्साहभङ्गेन वक्तव्यानि निर्वाच्यानि बलानि यस्य सः प्रमाथी शत्रुमर्दनः इन्दुमौलिः महादेवः स्वबलमात्मीयं बलमालम्बे सामर्थ्येनाव लम्बितवान् ॥ ३४ ॥ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ॥

तत इति । ततो महिमाप्रादुर्भावानन्तरं देवः तपोवीर्य्याभ्यां समुद्धतस्य प्रगल्भस्य समरस्यार्णवस्य पारमन्तं यियासोर्जिगमिषोर्जिष्णोरर्जुनस्याखिलानिम

अस्त्रैस्समानामतिरेकिणीं वा पश्यन्रिपूणामथ तस्य शक्तिम् ।
विषादवक्तव्यबलः प्रमाथी स्वमाजलम्बे बलमिन्दुमौलिः ॥ ३४ ॥
ततस्तपोवीर्य्यसमुद्धतस्य पारं यियासोः समरार्णवस्य । महे
षुजालान्यखिलानि जिष्णोरर्कः पयांसीव समाचचाम ॥ ३५ ॥
रिक्तेसविश्रम्भमथार्जुनस्य निषङ्गवक्त्रे निपपात पाणिः । अ
न्यद्विपापीतजले सतर्षं मतङ्गजस्येव नगाश्मरंध्रे ॥ ३६ ॥

हेषुजालानि समग्रवाणसमूहानर्कः सूर्य्यः पयांसीव जलानीव समाचचाम संज हारेत्यर्थः ॥ ३५ ॥ * ○ ○ * ○ * ○ * ○ * ○ * ○ * ○ * ○ * ॥

रिक्त इति । अथ वाणान्तर्द्धानानन्तरं अर्जुनस्य पाणिः करः रिक्ते बाणशून्येऽपि नि षङ्गवक्त्रे तूणीरमुखे अन्यद्विपेन गजान्तरेण पीतजले पीततोये नगस्याचलस्या श्मरंध्रे शिलागर्त्ते प्रदरइत्यर्थः । सतर्षं सतृष्णं यथा स्यात्तथेति क्रियाविशेषणम् । मतङ्गजस्य पाणिः लक्षणया कर इव सविश्रम्भं सन्त्येव वाणा इति सविश्वासं निपपा त ॥ ३६ ॥ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ॥

ध्युरिति । शरा एवार्थो धनं यस्य तस्माच्च्युते भ्रष्टे तस्मिन्निषुधौ निषङ्गे सहसा त्रुटि-
तिध्वस्तार्थसारे अकाण्डे नष्टधनसारे बन्धाविव तत्कालममोघः वितथः प्रणयः प्रीतिर्य-
स्य स व्यर्थप्रार्थनः पूर्वं कृतार्थ एवेति भावः । स पाणिर्निर्वाच्यतां कृतघ्नत्वापवादरा-
हित्यं कामयत इति निर्वाच्यताकामः शीलिकामिभक्ष्याचरिभ्यो णः । सद्वेत्युत्प्रे-
क्षा । आभिमुख्यं प्रपेदे । यथा कश्चित्कृतज्ञः तत्कालाकृतमपि बन्धुं पूर्वोपकारस्म-
रणात्पुनः पुनः अनुबध्नाति तद्वदित्यर्थः ॥ ३७ ॥ ✿ * ✿ * ✿ * ✿ * ✿ * ॥
आघट्टयामासेति । अस्य मुनेः अग्रं चासावंगुलिश्चेति अग्रांगुलिः हस्ताग्रहस्तयोर्गु-

च्युते स तस्मिन्निषुधौ शरार्थाद्ध्वस्तार्थसारे सहसैव बन्धौ । तत्का-
लमोघप्रणयः प्रपेदे निर्वाच्यताकाम इवाभिमुख्यम् ॥ ३७ ॥
आघट्टयामास गतागताभ्यां सावेगमग्राङ्गुलिरस्य तूणौ । वि-
धेयमार्गे मतिरुत्सुकस्य नयप्रयोगाविव गां जिगीषोः ॥ ३८ ॥
बभार शून्याकृतिरर्जुनस्तौ महेषुधी वीतमहेषुजालौ । युगा-
न्तसंशुष्कजलौ विजिह्मः पूर्वापरौ लोक इवाम्बुराशी ॥ ३९ ॥

णिगुणिनोर्भेदादिति वामनः । विधेयमार्गे कर्तव्यान्वेषणे उत्सुकस्य प्रवृत्तस्य गां भु-
वं जिगीषोर्नायकस्य मतिः बुद्धिः नयः षाड्गुण्यं प्रयोगः उपायः तौ नयप्रयोगाविव
तूणौ निषङ्गौ सावेगं ससंभ्रमं । इष्टानिष्टागमाज्ञानमावेगश्चित्तसंभ्रमः इति शाश्व-
तः । गतागताभ्यां यातायाताभ्यां आवापोद्वापाभ्यां चाघट्टयामास । अन्यत्र तु वितर्क-
यामास । शरग्रहणात्पुनः पुनः तूणयोः पाणिं व्यापारयामासेत्यर्थः ॥ ३८ ॥ ✿
बभारेति । शून्याकृतिरिष्टनाशान्निस्तेजस्करूपोऽर्जुनः तौ वीतमहेषुजालौ वी-
तानि रिक्तानि महेषुजालानि ययोस्तौ महेषुधी महान्निषंगौ विजिह्मः शून्यो लोकः

दुगान्तेसंशुष्कजलौ। श्रुषः क इतिनिष्ठातकारस्य ककारः। पूर्वापरसमुद्रस्यै
समुद्राविवबभार ॥ ३९ ॥ * * * * * * * * * * * * * * ॥
तेनेति। पार्थस्तयोस्तूणयोः रिक्ततया हेतुनायथाअनुतेपेअनुशोच तथातेन अनि
मित्तेनबाणक्षयरूपेणादुर्निमित्तेननन्वशोच। तथाहि। सन्तः स्वामापदंप्रोज्झ्य
विसृज्यविपत्तिमग्नं उपकारिणांपक्षंवर्गशोचन्ति। स्वानांव्यसनात्परकीयव्यसन
मेवसतामुपकारकमित्यर्थः ॥ ४० ॥ * * * * * * * * * * * * * ॥
प्रतीति। प्रतिक्रियायैविधुरः प्रतिकर्तुमसमर्थः। तुमर्थाच्चभाववचनादितिचतुर्थी

तेनानिमित्तेनतथानपार्थस्तयोर्यथारिक्ततयानुतेपे। स्वामाप
दम्प्रोज्झ्यविपत्तिमग्नंशोचन्तिसन्तोह्युपकारिपक्षम् ॥ ४० ॥
प्रतिक्रियायैविधुरः सतस्मात्कृच्छ्रेणविश्लेषमियायहस्तः। प
राङ्मुखत्वेपिकृतोपकारान्तूणीमुखान्मित्रकुलादिवार्य्यः ॥ ४१ ॥
पश्चात्क्रियातूणयुगस्यभर्तुर्जज्ञेतदानीमुपकारिणीव। सम्भा
वनायांविफलीकृतायाम्पत्युः पुरःसाहसमासितव्यम् ॥ ४२ ॥

। अर्जुनस्यसहस्तः पाणिः पराङ्मुखत्वेपितत्कालवैमुख्येपिकृतोपकारान्तस्मात्तूणी
मुखान्मित्रकुलादार्यः साधुः कृतज्ञइव। आर्यः साधुकुलीनयोरितिविश्वः। महत्क
ष्टेनकृच्छ्रेणविश्लेषमियाय। गौरादित्वात्तूणीशब्दात्ङीप् ॥ ४१ ॥ * * ॥
पश्चादिति। तदानीम्भर्तुः स्वामिनः कर्त्तरिषष्ठी। पश्चात्क्रियापृष्ठतः करणंतू
णयुगस्योपकारिणीवउपकारिकेवजज्ञेजाता। तथाहि। सम्भावनायांस्वयोग्य
तायांअधरीकृतायामफलीकृतायाम्पत्युः स्वामिनः पुरोयेआसितव्यमासंस्थितं। व
ऊलयग्रहणाद्भावेतव्यप्रत्ययः। साहसंनक्षमंनयोग्यं। भर्त्रासंभावितस्यअवस्थ

अनेपकर्तुरनुजीविनःतत्सांन्मुख्यमनुचितमित्यर्थः ॥ ४२ ॥ * * * * ॥

तामिति । शम्भुराक्षिप्तानि आहतानि महेषुजालानि यस्य तं मुनिं तत्त्वविचारमध्ये वादमध्येऽर्जुनोऽन्तरं निरन्तरीकृतं विपक्षम्प्रतिवादिनं वक्ता वादी गुरुभिर्दोषैर्निग्रहस्थानैरिव लोहैर्लोहमयैः शरैर्मर्मसु निस्तुतोद व्यथयामास ॥ ४३ ॥ * * ॥

जहारेति । किञ्च । अस्मान्मुनेः अचिरेणाशीघ्रं ज्वलद्भिर्मणिभिर्दीप्तिताः हैम्यः सौवर्ण्यःलेखाः यस्य तत्तथोक्तं । वर्मकवचं गरुडःमरुत्पवनःपतङ्गात्सूर्यात् एकनीलं केवलं कृष्णवर्णम् । एको मुख्यान्यकेवलाइत्यमरः । तडित्वतस्तडिद्युक्तस्या

तं शम्भुराक्षिप्तमहेषुजालं लोहैः शरैर्मर्मसु निस्तुतोद । हृतो-
त्तरं तत्त्वविचारमध्ये वक्तेव दोषैर्गुरुभिर्विपक्षम् ॥ ४३ ॥
जहार चास्मादचिरेण वर्म ज्वलन्मणिद्योतितहैमलेखम् । च-
ण्डः पतङ्गान्मरुदेकनीलं तडित्वतः खण्डमिवाम्बुदस्य ॥ ४४ ॥
विकोषकनिर्धौततनोर्महासेः फणावतस्त्वचि विच्युतायाम् । प्र-
तिद्विपावद्धरुषः समक्षं नागस्य चाक्षिप्तमुखच्छदस्य ॥ ४५ ॥

म्बुदस्य खण्डमिव जहार । तदा भगवन्मायया मुक्तकञ्चुको मुनिर्मेघनिर्मुक्तः सूर्य इव दिदीप इति भावः ॥ ४४ ॥ * * * * * * * * * * * * ॥

अथ युग्मेनाह । विकोषेति । सोऽर्जुनः तनुं त्रायत इति तनुत्रं वर्म । अतोनुपसर्गे क इति कप्रत्ययः । तेन विना विकोषाः कोषात् कृतःनिर्धौततनुःशाणोल्लीढमूर्तिः । तेनेति विशेषणसमासः । तस्य विकोषनिर्धौततनोर्महासेः महाखड्गस्य तथात्वचि विच्युतायां सत्यां फणावतः अमुक्तकंचुकस्याहेश्च प्रतिद्विपे प्रतिगजे आबद्धरुषो बद्धकोपस्य तत्समक्षम्प्रतिगजस्याग्रे आक्षिप्तमुखच्छदस्य निरस्तमुखावरणस्य नागस्य गज

जाग्रथ ॥ ४५ ॥

विबोधितस्येति । घनानांध्वनिनागर्जितेनविबोधितस्यशैलरंध्रात् । कन्दरादपे
तस्य निष्क्रान्तस्य हरेः सिंहस्य च तथा निरस्तधूमस्य रात्रिवह्नेश्च रुचिं शोभां भोजे ।
एतेनास्य तीक्ष्णता वैरनिर्यातनत्वरणादुर्मदत्वमेनस्विच्च तेजस्वित्वान्युक्तानि । अ
रुचिमिव रुचिमिति सादृश्याक्षेपाद सम्भवद्वस्तुसंबन्धो निदर्शनालङ्कारो मा
...याम् । युग्मकम् ॥ ४६ ॥

अचिन्ततायामिति । तदानीङ्कवचपतनसमये महीङ्गतौ इषुधी निषङ्गौ । अचिन्तता

विबोधितस्यध्वनिनाघनानांहरेरपेतस्यचशैलरंध्रात् । निरस्त
धूमस्यचरात्रिवह्नेर्विनातनुत्रेणरुचिंसलेभे ॥ ४६ ॥ युग्मकं ॥
अचिन्ततायामपिनामयुक्तामनूर्द्धतांप्राप्यतदीयहस्ते । म
हीङ्गतौताविषुधीतदानींविवव्रतुश्चेतनयेवयोगम् ॥ ४७ ॥
स्थितंविशुद्धेनभसीवसत्वेधाम्नातपोवीर्य्यमयेनयन्तम् । शस्त्रा
भिघातैस्तमजस्रमीशस्त्वष्टाविवस्वन्तमिवोल्लिलेख ॥ ४८ ॥

यामपि अचेतनत्वेपि तदीयहस्ते स्वामिव्यसने युक्तां योग्याम् । नामकिल । अदि
ष्टिकरत्वादिति भावः । अनूर्द्धतामवाङ्मुखत्वम्प्राप्य चेतनया प्राणिसाधारणज्ञाने
नेव योगञ्चैतन्यसम्बन्धं विवव्रतुरिवेत्युत्प्रेक्षा । अचेतनत्वे अवाङ्मुखत्वादि चेतनधर्म
योगादिति भावः ॥ ४७ ॥

स्थितमिति । विशुद्धे निर्मलेनभसीव सत्वे सत्वगुणे स्थितन्तपोवीर्यमयेन तपोवी
र्याभ्याङ्कृतेन धाम्ना तेजसा युक्तं तमर्जुनमीशस्त्वष्टा विश्वकर्मा विवस्वन्तमिव रक्त
संघस्त्राभिघातैः शस्त्रकर्षणैरुल्लिलेख ततक्ष ॥ ४८ ॥

संरम्भेति। संरम्भवेगेनसम्भ्रमातिशयेनउज्झितवेदनेषुत्यक्तदुःखेषुगात्रेषु...
धैर्यं स्थैर्यमित्यर्थः उपागतेषुसत्सुनगणिताःइषुराशयोयेनतस्यअगणितेषुराशेःमुनेर
र्जुनस्यात्ममन्युःस्वकोपोलोहस्यविकारोलौहःकार्ष्णायसःतिरस्क्रियतेआच्छाद्यते
ऽनेनेतितिरस्कारःकञ्चुकइवबभूव। रोषवशात्नकिञ्चित्प्रहारदुःखमज्ञासीदि
त्यर्थः। क्रोधैकवर्मणांवीराणांकिमन्यैर्लौहभारैरित्यर्थः ॥ ४९ ॥ * * * ॥

अथयुग्मेनाह। ततइति। ततोऽनन्तरंअनुपूर्वौपूर्वमनुगतौगोपुच्छाकारौआय
तौदीर्घौवृत्तौवर्तुलौबाहूयस्यसःश्रीमान्शोभावान्क्षरल्लोहितदिग्धदेहःस्रवद्रुधि

संरम्भवेगोज्झितवेदनेषुगात्रेषुचाधैर्यमुपागतेषु। मुनेर्ब
भूवागणितेषुराशेर्लौहस्तिरस्कारइवात्ममन्युः ॥ ४९ ॥
ततोऽनुपूर्वायतवृत्तबाहुःश्रीमान्क्षरल्लोहितदिग्धदेहः। आ
स्कंद्यवेगेनविमुक्तनादःक्षितिंविधुन्वन्निवपार्ष्णिघातैः ॥ ५० ॥
साम्यङ्गतेनाशनिनामघोनःशशांकलेखाकृतिपाण्डुरेण। शंभुंवि
भित्सुर्धनुषाजघानस्तम्बंविषाणेनमहानिवेभः ॥ ५१ ॥ युग्मकं ॥

रल्लिप्तगात्रःपार्ष्णिघातैश्चरणतलाघातैः। तद्ग्रन्थीघुटिकेगुल्फौस्त्रियाम्पार्ष्णिरध
स्तयोरित्यमरः। क्षितिंविधुन्वन्प्रकम्पयन्निववेगेनास्कंद्याभिद्रुत्यविमुक्तनादःसो
ऽर्जुनः ॥ ५० ॥ ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ * ✿ ॥

साम्यमिति। मघोनःइन्द्रस्यअशनिनावज्रेणसहसाम्यंगतेनवज्रकल्पेनशशांक
स्यलेखाशकलंखण्डन्तस्येवआकृतिर्यस्यतद्वद्वक्रमित्यर्थः। पाण्डुरञ्चतद्वदेवेति
भावः। तेनशशाङ्कखण्डाकृतिपाण्डुरेणधनुषाशंभुंविभित्सुःभेत्तुमिच्छुःसन्महानि
भोगजःविषाणेनदन्तेनस्तम्बमिवजघान ॥ ५१ ॥ ✿✿~✿~✿~✿✿ ॥

रथेण वेगेन पतन्तीं शाचापयष्टिः भवस्य संसारस्य उद्भवः उत्पत्तिर्य्य
स्मात् तेन भवोद्भवेन ईश्वरेण परे श्रेष्ठे जसि परमे ज्योतिषि स्थितेन जह्नुना राजर्षि
णा समुद्धता अभ्युत्कटा अनेकमार्गा त्रिस्रोता सिन्धुर्गङ्गेव आत्मनि सन्निदधे सम्यक्
निहिता अन्तर्निर्वापेत्यर्थः ॥ ५२ ॥ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ॥

विकार्मुक इति । विकार्मुकः भग्नचापोऽत एव परिच्युतो दार्ढ्यौदानवर्जित उपचा
रः । सत्कार इव कर्म्मसु रणक्रियासु कृत्येषु शोचनीयः पूज्य अवष्टम्भनात्
मग्नचित्तत्वाच सोऽर्जुनः स्थूलभूतात् शिवेन सलीलं यथा तथा अदूरपातैरतिगाढप्रहारैः

रथेण सार्द्धं निदधे पतन्तीं भवोद्भवेनात्मनि चापयष्टिः । समु
द्धता सिन्धुरनेकमार्गा परे स्थितेनौजसि जह्नुनेव ॥ ५२ ॥
विकार्म्मुकः कर्म्मसु शोचनीयः परिच्युतो दार्ढ्य इवोपचारः ।
विचिक्षिपे स्थूलभृता सलीलं पत्रिभिर्दूरमदूरपातैः ॥ ५३ ॥
उपोढकल्याणफलोभिरक्षन्वीरव्रतं पुण्यरणाश्रमस्थः । व्र
तोपवासैरिव संयतात्मा तेपे मुनिस्तैरिषुभिः शिवस्य ॥ ५४ ॥

पत्रिभिः शरैः दूरं अत्यंतं विचिक्षिपे नुन्नः ॥ ५३ ॥ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ॥

उपोढेति । उपोढमासन्नं कल्याणफलं अस्त्रलाभरूपं स्वर्गादिकं च यस्य सः वीरव्र
तमाहवादनिवृत्तिरूपं तीव्रतपश्चाभिरक्षन् पालयन् पुण्योयोरणएवाश्रमः त
त्र तिष्ठतीति पुण्यरणाश्रमस्थः संयतात्मा नियमितचित्तः मुनिरर्जुनः कश्चित्तपस्वी
च तैः शिवस्य महादेवस्य इषुभिः शरैर्जपोपवासैरिव तेपे तप्तः । तपतेः कर्मणि लि
ट् ॥ ५४ ॥ * ○ ○ * * ○ ○ * * ○ ○ * * ○ ॥

तत इति । ततस्तापानन्तरं नानाजारं सोऽर्जुनः अयभूमिं विपदि गन्तव्य स्थानं दूर

ग्रमित्यर्थः । कुतः व्यवसायसिद्धेः सीमानमवधिं साधकतमित्यर्थः । अन्यैः परै

अतिदुस्तरं दुरतिक्रमं तेजःश्रियां प्रतापसंपदामाश्रयं हेतुमित्यर्थः । उत्तमासिं

महाखड्गं । सन्महदित्यादिना समासः साक्षादहङ्कारं सविग्रहमभिमानमिवा

वलम्बे जग्राह ॥ ५५ ॥ ✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿ ॥

शरानिति । अनवद्यकर्मा अगर्ह्यकर्मा । अवद्यपण्येत्यादिना निपातः शरान् अव

द्यान् । खण्डयन् वीरो निस्त्रिंशभृता खड्गयुक्तेन हस्तेन सार्कांशुना अर्कांशुसहितेन

ऊर्मिणा तरङ्गेण वारिधिरिव दीप्तोद्दीपितः सोऽर्जुनः प्रविचारमार्गैः खड्गिनाङ्गति

ततोऽग्रभूमिं व्यवसायसिद्धेः सीमानमन्यैरतिदुस्तरं सः । तेजः

श्रियामाश्रयमुत्तमासिं साक्षादहङ्कारमिवावलम्बे ॥ ५५ ॥

शरानवद्यानवद्यकर्मा चचार चित्रं प्रविचारमार्गैः । हस्ते

न निस्त्रिंशभृता सदीप्तः सार्कांशुना वारिधिरूर्मिणेव ॥ ५६ ॥

यथा निजे वर्त्मनि भाति भाभिश्छायामयश्चाप्सु सहस्ररश्मिः । त

था भ्रमंस्तासु रणस्थलीषु स्पष्टद्विमूर्तिर्ददृशे स भूतैः ॥ ५७ ॥ १

भेदैस्त्रिवर्त्मकथा तथा चचार ॥ ५८ ॥ ✿✿ ॥ ✿✿ ॥ ✿✿ ॥ ✿✿ ॥ ✿✿ ॥ ✿✿ ॥

यथेति । भाभिर्दीप्तिभिरुपलक्षितः । स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदी

प्तय इत्यमरः । सहस्ररश्मिरर्को यथा निजे वर्त्मनि नभसि च्छायामयः । प्रति

बिम्बरूपः सन् अप्सु च स्पष्टद्विमूर्तिः अप्सु रणस्थलीषु च स्पष्टे द्वे मूर्ती यस्य स स्पष्ट

द्विमूर्तिः सन् सोऽर्जुनः भाति तथाभूतैः गणैः ददृशे दृष्टः । यथैकोऽर्को नभस्यप्सु च

अनेक इव दृश्यते । तथा सोऽपि दिविभुवि चाप्सु सञ्चाराद्यौगपद्यभ्रमादेवैकोऽप्यनेक

इव गणैर्दृष्ट इत्युत्प्रेक्षा ॥ ५७ ॥ ✿✿ ॥

[illegible] शिवेनेति । शिवेन प्रणुन्नेन प्रेरितेन शिलीमुखेन बाणेन त्सरुप्रदेशात् । मुष्टिप्रदेशमवधिं कृत्वा । त्सरुः खड्गादिमुष्टौ स्यादित्यमरः । अपवर्जितमङ्गं लूनविग्रहः । असिः खड्गः तस्यार्जुनस्य पाणेः करात् घनस्य मेघस्य प्रान्तरात् । वैद्युतो विद्युत्सम्बन्धी अग्निरिव ज्वलन्नपपात ॥ ५८ ॥

आक्षिप्तेति । आक्षिप्तान्यपहृतानि चापावरणेषु जालानि धनुर्वर्म्मबाणसमूहाय स्य यः छिन्नोत्तमासिः लूनमहाखड्गः मृधे रणे । मृधमास्कन्दनं संख्यमित्यमरः । अवधूतो निरस्तः सोऽर्जुनः उत्सादितं उत्पाटितमुद्यानं यस्य सः भूमेः प्रदेशो भूमिभाग इ

शिवप्रणुन्नेन शिलीमुखेन त्सरुप्रदेशादपवर्जिताङ्गः । ज्वलन्नसिस्तस्य पपात पाणेर्घनस्य वप्रादिव वैद्युतोऽग्निः ॥ ५८ ॥
आक्षिप्तचापावरणेषुजालश्छिन्नोत्तमासिः स मृधेऽवधूतः । रिक्तः प्रकाशश्च बभूव भूमेरुत्सादितोद्यान इव प्रदेशः ॥ ५९ ॥
स खण्डनाम्याप्य परादमर्षवान् भुजद्वितीयोऽपि विजेतुमिच्छया । ससर्ज वृष्टिं परिरुग्णपादपां द्रवेतरेषां पयसामिवाश्मनां ॥ ६० ॥

व रिक्तः शून्यः प्रकाशो निःसम्बन्धश्च बभूव ॥ ५९ ॥

स इति । परात्परस्माच्छत्रोः पूर्वादिभ्यो नवभ्यो वेति विकल्पात् स्मादेशः खण्डनामङ्गम्याप्य अमर्षवान् सोऽर्जुनः भुजद्वितीयो भुजमात्रसहायः सन्नपि विजेतुमिच्छया द्रवेभ्यः इतराणि तेषां द्रवेतरेषां कठिनानां पयसामिव करकाणामिवेत्यर्थः । अश्मनां सम्बन्धिना परिरुग्णा भग्नाः पादपा यया सा तां वृष्टिं ससर्ज । अश्मभिर्जघानेत्यर्थः ॥ ६० ॥

नीरन्ध्रमिति । शिलावितानेः शिलाजालैर्भूतानामधिपतिना शिवेन पृषत्कैर्बाणैः

ध्रंगमितेनीतेसतिइन्द्रसूनुरर्जुनः । उच्छ्रायेणोत्सेधेनस्थगितंआच्छादितंनभो
दिशामन्तरालञ्चयेनतत्नीरंध्रंसान्द्रंरोहन्तीतिरुहाः । इगुपधलक्षणःकप्रत्य
यः । क्षितौरुहावृक्षास्तेषांजालञ्चिक्षेपप्रेरयामासउच्छ्रायङ्गमितवतीतिप्रामादि
कःपाठः ॥ ६१ ॥ ॥

निःशेषमिति । ईशानःशिवःशानच्प्रत्ययः । निःशेषंयथातथाशकलितानिवल्क
लानित्वचः । अङ्गानिशाखाःसारोमज्जाचयेषान्तैर्भुवमभितःकषायैर्योरागःस्वरा
गेनरञ्जनमितियावत् । रागेद्रव्येकषायोऽस्त्रीतिवैजयन्ती । तेनचित्रांविचित्रव

नीरंध्रम्परिगमितेक्षयम्पृषत्कैर्भूतानामधिपतिनाशिलाविताने । उच्छ्रा
यस्थगितनभोदिगन्तरालंचिक्षेपक्षितिरुहजालमिन्द्रसूनुः ॥ ६१ ॥
निःशेषंशकलितवल्कलाङ्गसारैःकुर्वद्भिर्भुवमभितःकषायचित्राम् । ई
शानःसकुसुमपल्लवैर्नगैस्तैरातेनेबलिमिवरङ्गदेवताभ्यः ॥ ६२ ॥
उन्मज्जन्मकरइवामरापगायाःवेगेनप्रतिमुखमेत्यबाणनद्याः । गाण्डी
वीकनकशिलानिभंभुजाभ्यामाजघ्नेविषमविलोचनस्यवक्षः ॥ ६३ ॥

र्णांकुर्वद्भिःसकुसुमपल्लवैःतैस्तैर्नगैर्वृक्षैरङ्गेरणरङ्गेयादेवतास्ताभ्योबलिम्पू
जामिवातेने ॥ ६२ ॥ ॥

उन्मज्जन्निति । गाण्डीवीअर्जुनउन्मज्जन्उत्तरन्मकरोजलग्राहविशेषःअ
मरापगायाइवबाणनद्याःबाणप्रवाहात्वेगेनप्रतिमुखमभिमुखमेत्यागत्यकनक
शिलानिभङ्कनकग्रहणङ्काठिन्यातिशयद्योतनार्थम् । विषमविलोचनस्यत्र्यम्बक
स्यवक्षोहृदयंभुजाभ्याआजघ्नेताडितवान् । अत्रात्मनेपदंविचार्य्यम् । आङोय
महनइत्यत्राकर्म्मकाधिकारात्स्वाङ्गकर्मकाच्चेतिवक्तव्यत्वात् । नचकनकशिला

निभङ्गनकनिकषतुल्यं श्यामं स्ववक्ष आजघ्ने इत्यर्थ इति वाच्यम् । अनौचित्याच्चरणैः
अनहि युद्धाय सन्नद्धास्तु निपुणा अपि मल्लाः स्ववक्षस्ताडनमाचरन्ति किन्तु स्वभु
जास्फालनम् । किञ्च । अनन्तरं वक्ष्यमाणभवकर्तृकाविनयसहनविशेषाच्च व
क्ष एवेत्यन्वयस्तु व्यवधानात् पूर्वैरेव दूषितः । तस्मात् व्याकरणान्तरान्द्रष्टव्यम्
। केचित्तु त्र्यम्बकस्य वक्षः प्राप्येत्यध्याहारं स्वीकृत्य अकर्मकत्वात् आत्मनेपदमाहुः
॥ ६३ ॥ ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ * ❁ ॥
अभिलषत इति । कीर्तिलक्ष्म्योरुपायं साधनभूतं अरिसैन्यैरसुगमं दुरासदं वि

अभिलषत उपायं विक्रमं कीर्तिलक्ष्म्योरसुगममरिसैन्यैरङ्कम
भ्यागतस्य । जनक इव शिशुत्वे सुप्रियस्यैकसूनोरविनयमपि से
हे पाण्डवस्य स्मरारिः ॥ ६४ ॥ ❁ ॥ इति महोपाध्यायश्रीभारवि
कृतौ किराताऽर्जुनीये महाकाव्ये सप्तदशः सर्गः ॥ १७ ॥ ❁ ॥

क्रममभिलषतः । सूनुपक्षे यत्किञ्चिन्महत्फलम्प्रार्थयमानस्येत्यर्थः । अत एव
अङ्कमन्तिकमभ्यागतस्य उत्सङ्गसमारूढस्य च पाण्डवस्य अविनयं स्मरारिरनेन भ
क्तवात्सल्यमेव सहनकारणमिति सूच्यते । शिशुत्वे शैशवे सुप्रियस्य प्रेमास्पदस्य
कुतः एक एव सूनुस्तस्यैकसूनोरविनयं जनक इव सेहे सोढवान् ॥ ६४ ॥ * ॥
इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किराताऽर्जुनीय
व्याख्यायां घण्टापथसमाख्यायां सप्तदशः सर्गः ॥ १७ ॥ ❁ * ❁ * ❁ * ❁ ॥

तत इति । ततो मुनिमुष्टियुद्धानन्तरं उदये महति द्विरदे गजे इव भीमे भुजावे
व आयुधे यस्य तथाभूते रणमुपेयुषि मुनौ शङ्करः स्वयमपि सबाणधिस तूणं धनुर
पास्य त्यक्त्वा मुष्टिभिर्घनैः लोहमुद्गरैरिव प्रतिजघान प्राक् मुनिकृताघातस्य प्रतिघातं
कृतवानित्यर्थः । घनाः कठिनसंघातमेघकाठिन्यमुद्गरा इति वैजयन्ती । घनस्तु
लोहमुद्गर इति विश्वः । यद्यपि मुष्टिशब्दो मुख्यानुवृत्त्या । सरत्निः स्यात्त्वरत्नि
स्तु निष्कनिष्ठेन मुष्टिना इत्यमरे उभयथा प्रयोगाद्द्विलिङ्गः । तथाप्यत्रोपमान
सारूप्यात्पुल्लिङ्गो ग्राह्यः । द्रुतविलम्बितवृत्तम् ॥ १ ॥ * ∼ ❁ ∼ ❁ ∼ * ॥

ततउदग्रइव द्विरदे मुनौ रणमुपेयुषि भीमभुजायुधे । धनु
रपास्य सबाणधि शङ्करः प्रतिजघान घनैरिव मुष्टिभिः ॥ १ ॥
हरपृथासुतयोर्ध्वनिरुत्पतन्नमृदुसंवलिताङ्गुलिपाणिजः । स्फु
टदनल्पशिलारवदारुणः प्रतिननाद दरीषु दरीभृतः ॥ २ ॥
शिवभुजाहतिभिन्नपृथुक्षतीः सुखमिवानुबभूव कपिध्वजः । क :
इं दनाभिवृहन्मनसाम्भवेदनुकृतेरपि सत्ववतां क्षमः ॥ ३ ॥

हरेति । हरपृथासुतयोरमृदु निविडं यथा तथा संवलिताः संघट्टिताः । अङ्गुलयो
येषां ते मुष्टिकृता इत्यर्थः । तेषु पाणिषु जातस्तथोक्तः स्फुटन्तीनां विदलन्तीनाम
नल्पशिलानामारव इव दारुणो भीषणो ध्वनिरुत्पतन्नुद्गच्छन् । दरीभृतो गिरेः
दरीषु गुहासु प्रतिननाद प्रतिदध्वान ॥ २ ॥ * ∼ * ∼ * ∼ * ∼ * ॥
शिवेति । कपिध्वजः शिवस्य भुजाहतिभिर्मुष्टिघातैर्भिन्ना विदीर्णाः याः पृथवो म
हान्तः क्षतयः प्रहाराः व्रणाः ताः सुखमिवानुबभूव दुःखकरा अपीति भावः । क्षतिदुःखन्ना
ज्ञीगणदित्यर्थः । ननु दुस्सहदुःखवेगेषु कथमगणनेत्यत्राह । क इति । क इ

वनामको नु खलु सत्ववतां संख्याधिकानां बृहन्मनसां तेजस्विनां अनुद्धतेरनुकेरग्
स्याभिभवस्यापि क्षमो भवेत् । मनस्विनां चरितं नटवदनुकर्तुमपि न कश्चिदीष्टे
तस्यां चरणमित्यर्थः । दूरापास्तरैरदूरसाविष्टमनसां मनस्विनां कुतः सुखदुःखे इ
ति भावः ॥ ३ ॥ * * * * * * * * * * * * * * * ॥

व्रणेति । व्रणमुखेभ्यश्च्युतस्य क्षरितस्य शोणितस्य सीकरैः स्थगितमावृतं शिलातटा
भं शिलाभं भुजान्तरं वक्षो यस्य स तथोक्तः उमापतिः अभिनवमौघसरागं संध्यारागं
विभर्त्तीति तथोक्तेन जलधरेण समानं तुल्यं यथा तथा बभावित्युपमा ॥ ४ ॥ * * ॥

व्रणमुखच्युतशोणितशीकरस्थगितशैलतटाभभुजान्तरः । अ
भिनवौघसरागभृता बभौ जलधरेण समानमुमापतिः ॥ ४ ॥
उरसि शूलभृतः प्रहिता मुहुः प्रतिहतिं ययुरर्जुनमुष्टयः । भृ
शरया इव सह्यमहीभृतः पृथुनि रोधसि सिन्धुमहोर्मयः ॥ ५ ॥
निपतितेऽधिशिरोधरमायते समम रत्नियुगेऽयुगचक्षुषः । त्रि
चतुरेषु पदेषु किरीटिना लुलितदृष्टि मदादिव चस्खले ॥ ६ ॥

उरसीति । शूलभृतः शिवस्योरसि प्रहिताः प्रयुक्ता अर्जुनस्य मुष्टयः पृथुनि विशा
ले सह्यमहीभृतः सह्याद्रेः रोधसि तटे भृशरयास्तीव्रवेगाः सिन्धोः समुद्रस्य महोर्मय
इव मुहुः प्रतिहतिं ययुः ॥ ५ ॥ * * * * * * * * * * * * * ॥

निपतित इति । अयुगानि चक्षूंषि यस्य तस्यायुगचक्षुषः त्रिलोचनस्य आयते दी
र्घे अरत्नियुगे अरत्न्योर्बद्धमुष्ट्योर्हस्तयोर्युगेन युग्मेन । हस्तो मुष्ट्या तु बद्धया ।
स रत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिनेत्यमरः । प्रकृते तु मुष्टिमात्रविवक्षया
प्रयोगः शिरोधरायामधीत्यधिशिरोधरमधिकंधरं समयुगे निपतिते सति । कि

शीटिनाऽर्जुनेनमदादिवर्त्तीणिचत्वारिवात्रिचतुराणि। संख्ययाव्ययासन्नेत्यादि
नासमासोबहुव्रीहिः। चतुरोऽच्प्रकरणेत्र्युपाभ्याञ्चतुरोऽजिष्यतेइतिसमासा
न्तोऽच्प्रत्ययः। त्रिचतुरेषुपदेषुलुलितदृष्टिघूर्णितनेत्रंयथातथाचस्खलेस्खलितन
म्भावेलिड् ॥ ६ ॥

अभिभवेति। अभिभवेनोक्तरूपेणोड्दितः अभिभवेनोत्थितःउत्पन्नोयोमन्युस्तेन
विदीपितःप्रज्वलितःसोऽर्जुनःभुजयुगेनभृशंत्र्ययंसमभिहत्यसमभिलक्ष्यओज
साबलेनशशिकलाभरणस्येन्दुमौलेःशिवस्यभुजद्वयंकरयुगेनविभज्यवियुज्यस
मादरेजग्राह ॥ ७ ॥

अभिभवोत्थितमन्युविदीपितःसमभिहत्यभृशंत्र्ययमोजसा। क
रयुगेनविभज्यसमाददेशशिकलाभरणस्यभुजद्वयम् ॥ ७ ॥
प्रववृतेऽथमहाहवमल्लयोरचलसञ्चलनाहरणोरणः। कर
णशृङ्खलसङ्कलनागुरुर्गुरुभुजायुधगर्वितयोस्तयोः ॥ ८ ॥

प्रववृतइति। अथमहाहवेमहारणेमल्लयोर्बलीयसोः। मल्लःपात्रेकपोलेचम
ल्लयभेदेबलीयसिइतिविश्वः। गुरुभुजावेवायुधन्तेनगर्वितयोस्तयोःशिवार्जुनयोः
करणानिकरचरणबन्धनान्येवशृङ्खलानियेषांतेषांसङ्कलनासंघट्टनातयागुरुःदु
स्तरःतथाऽचलस्यहिमाद्रेःसञ्चलनङ्कम्पःतस्याहरणःआरोपकःकर्त्तरिल्युट्। र
णःप्रववृतेप्रावर्त्तत ॥ ८ ॥

अयमिति। अयम्पुरोवर्त्तीपुमान्असौभगवान्प्रसिद्धोदेवःतदुक्तम्। इदमःप्र
त्यक्षरूपंसमीपतरवर्त्तिचैतदोरूपंअदसस्तुविप्रकृष्टन्तदितिपरोक्षेविजानीया
दिति। उतपाण्डवःअयंहितिष्ठदवस्थायांभ्रमइतिवेदितव्यम्। अथपतनात्

स्थामाह । मुनिना अवाक् अधःस्थितं कृतशशिमौलिना अजेन देवेन नु समधिरू
ढं उपरिस्थितं अथ जिष्णुना स्विदर्जुनेन वा समधिरूढमित्येवङ्गणैर्वेगवशान्मुमुहे
भ्रान्तंमुहवैचित्ये भावे लिट् ॥ ९ ॥ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ॥
प्रचलितेति । असहिष्णुनातयोर्भरमसहमानेन भूता शैलेन अभावभयाद्विना
श भयादिव मुक्तः वृषश्च कपिश्च ध्वजे ययोः तयोः वृषकपिध्वजयोः प्रचलिते चल
ने सति चलितं प्रचेले आस्थिते तूष्णीमवस्थाने स्थितं तथैव तस्थौ विनमिते सति सम्य
गाक्रमणे सति नतं नम्रीभूतं अनामीनियावत् । उन्नतावुन्नमने सति उन्नतमुद्गता

अयमसौ भगवानुत पाण्डवः स्थितमवाङ्मुनिना शशिमौलिना । स
मधिरूढमजेन नु जिष्णुना स्विदिति वेगवशान्मुमुहे गणैः ॥ ९ ॥
प्रचलिते चलितं स्थितमास्थिते विनमिते नतमुन्नतमुन्नतौ । वृष
कपिध्वजयोरसहिष्णुना मुहुरभावभयादिव भूभृता ॥ १० ॥
करणशृङ्खलनिःसृतयोस्तयोः कृतभुजध्वनिवल्गुविवल्गतोः । च
रणपातनिपातितरोधसः प्रससृपुः सरितः परितः स्थलीः ॥ ११ ॥

मि सर्वत्र भावे क्तः ॥ १० ॥ ❀ * ❀ * ❀ * ❀ * ❀ * ❀ ❀ * ❀ * ❀ ॥
करणेति । करणानि करचरणबन्धविशेषाः तान्येव शृङ्खलानि तेभ्यो निःसृतयो
र्मुक्तसकलबन्धयोरित्यर्थः । कृतो भुजध्वनिः भुजास्फोटनशब्दो यस्मिन् कर्मणि त
त्तथा वल्गु सुन्दरं च यथा तथा विवल्गतोः उत्प्लवमानयोस्तयोर्हरपार्थयोश्चरणपा
तैः पादक्षेपैर्निपातितानि रोधांसि याभिस्ताः । सरितो नद्यः परितः स्थलीः परि स्थ
लीषु प्रससृपुः प्रसृताः । अभितः परितः इत्यादिना द्वितीया । जानपदेत्यादिना
अकृत्रिमार्थे ङीष् । कूलपातक्षोभादुद्वेलसलिलाः सरितः स्थलानि प्रमज्जयन्ति

त्यर्थः । एतेन तयोर्विलक्षणः ॥ ११ ॥

वियतीति । वियत्यन्तरिक्षे वेगेन परिप्लुतमुत्पतितं तिसृणाम्पुराञ्जयिनं त्रिपुरान्तकं त्रिदृशीत्यादिना ङ्निप्रत्ययः । कपिध्वजोऽर्जुनश्चरणाभ्याम्पादाभ्यामानमितक्षितिः सन् रयेण वेगेन समभिसृत्य अभिद्रुत्य अन्तरा मध्यमार्गे चरणयोः पदयोर्निजगृहे निगृहीतवानित्यर्थः । उत्पतितस्य भगवतश्चरणौ स्वकराभ्यां जग्राहेत्यर्थः ॥ १२ ॥

विस्मित इति । तेन कर्मणा चरणग्रहणकर्मणा सपदि विस्मितः सविस्मयः कर्मणां

वियति वेगपरिप्लुतमन्तरा समभिसृत्य रयेण कपिध्वजः । चरण
योश्चरणानमितक्षितिर्निजगृहे तिसृणाञ्जयिनं पुराम् ॥ १२ ॥
विस्मितः सपदि तेन कर्मणा कर्मणां क्षयकरः परः पुमान् । क्षे
प्तुकाममवनौ तमक्षमं निष्पिपेष परिरभ्य वक्षसा ॥ १३ ॥
तपसा तथा न मुदमस्य ययौ भगवान्यथा विपुलसत्त्वतया । गु
णसंहतेः समतिरिक्तमहो निजमेव सत्त्वमुपकारि सताम् ॥ १४ ॥

क्षयकरो नाशप्रद इत्यर्थः । परः पुमान् हरः अवनौ क्षितौ क्षेप्तुकामो यस्य तम् । तुम्काममनसोरपीति मकारलोपः । अक्षमं अक्षान्तं तमर्जुनं वक्षसा परिरभ्य निष्पिपेष गाढमालिलिङ्गेत्यर्थः । रथोद्धतावृत्तम् ॥ १३ ॥

तपसेति । भगवान्देवोऽस्यार्जुनस्य यथा विपुलसत्त्वतया बहुसत्त्वसम्पदेत्यर्थः । धैर्यसम्पत्त्येति यावत् यथा मुदं ययौ तथा तपसा मुदं न ययौ । तथा हि सतां गुणसंहतेः तपःसेवादिगुणसंघातात् समतिरिक्तम् अतिशयितं निजं सत्त्वमेवोपकारि उपकारकम् अहो । प्रमिताक्षरावृत्तम् ॥ १४ ॥

अथेति । अथहिमशुचिना हिमशुभ्रेण भस्मना भूषितं शिरसीन्दुलेखया विराजितं शोभितं अतिमनोहरं सुन्दरं स्ववपुर्दधतम् । किरातरूपं विहाय निजविग्रहं दधानं हरमुदीक्ष्य पाण्डवोननाम प्रणतवान् । प्रमुदितवदनावृत्तम् । प्रमुदितवदना भवेन्नौ रराविति लक्षणात् ॥ १५ ॥

सहेति । वृषभस्येव गतिर्यस्य सोऽर्जुनः तस्मिन् समये सह शरधिभ्यां वर्तत इति सहशरधि । वोपसर्जनस्येति विकल्पात् सहशब्दस्य सभावः । निजं कार्मुकं गाण्डीवं तथैव पूर्ववदेव । संवर्मितं सम्यक् कवचितं अतनु महत् निजं वपुः । तथैव निहितं

अथ हिमशुचिभस्मभूषितं शिरसि विराजितमिन्दुलेखया । स्ववपुरतिमनोहरं हरं दधतमुदीक्ष्य ननाम पाण्डवः ॥ १५ ॥
सहशरधि निजं तथा कार्मुकं वपुरतनु तथैव संवर्मितं । निहितमपि तथैव पश्यन्नसिं वृषभगतिरुपाययौ सविस्मयम् ॥ १६ ॥
सिषिचुरवनिमम्बुवाहाः शनैः सुरकुसुममियाय चित्रं दिवः । विमलरुचि भृशं नभोदुन्दुभेर्ध्वनिरखिलमनाहतस्यानशे ॥ १७ ॥

यथापूर्वं स्थापितम् । असिमपि खड्गं च पश्यन् विस्मयमुपाययौ । क्वचित्तु वृषभगतिमिति पाठः तत्र वृषभगतिं शिवं च पश्यन् विस्मयं ययावित्यर्थः ॥ १६ ॥

सिषिचुरिति । अंबुवाहाः शनैरवनिं सिषिचुः उक्षांचक्रुः दिवोऽन्तरिक्षात् चित्रं विचित्रं सुरकुसुमं मन्दारकुसुमानि जातावेकवचनं इयाय आजगाम अनाहतस्य अताडितस्य दुन्दुभेः जातावेकवचनम् । ध्वनिः शब्दो विमलरुचि प्रसन्नमखिलं नभो भृशमानशे व्याप । अताडिता एव दुन्दुभयो नेदुरित्यर्थः । सर्वमिदमस्य सर्वलोकहितार्थत्वादिति वेदितव्यम् ॥ १७ ॥

आसेदुषामिति। गोत्रभिदः इन्द्रस्य अनुवृत्त्या अनुसरणेन आसेदुषामासन्नानाम्भुवनत्रयस्य गोपायकानां रक्षकाणां लोकपालादीनां। गुपधूपेत्यादिना आयप्रत्ययः तदन्तात् ण्वुल्। रोचिष्णवः प्रकाशनशीलाः रत्नावलयो येषान्तैः। अलंकृञित्यादिना इष्णुच् प्रत्ययः। विमानैः पुष्पकैः आचिता व्याप्ता द्यौः तारकिता सञ्जाततारकेव रेजे। उत्प्रेक्षालङ्कारः॥ १८॥ ❁❁❁❁❁❁❁❁❁❁❁❁ ॥

हंसा इति। बृहन्तः महान्तः सुरसद्मानि विमानानि वहन्तीति सुरसद्मवाहाः कर्मण्यण्। संह्रादीनि निह्रादीनि मुखराणि कण्ठाभरणानि किङ्किण्यो येषान्ते पतन्तो

आसेदुषां गोत्रभिदोऽनुवृत्त्या गोपायकानाम्भुवनत्रयस्य। रे-
चिष्णुरत्नावलिभिर्विमानैर्द्यौराचिता तारकितेव रेजे॥ १८॥
हंसा बृहन्तः सुरसद्मवाहाः संह्रादिकण्ठाभरणाः पतन्तः। च-
क्रुः प्रयानेन विकीर्यमाणैर्व्योम्नः परिष्वङ्गमिवाग्रपक्षैः॥ १९॥
मुदितमधुलिहो वितानीकृताः स्रज उपरि वितत्य सान्तानिकीः।
जलद इव निषेदिवांसं वृषे मरुदुपसुखयां बभूवेश्वरम्॥ २०॥

धावन्तो हंसाः प्रयानेन विकीर्यमाणैः विक्षिप्यमाणैः अग्रपक्षैः पक्षाग्रैः व्योम्नः परिष्वङ्गमालिङ्गनमकुर्वन् इवेत्युत्प्रेक्षा॥ १९॥ ❁ ॥ ❁❁ ॥ ❁❁ ॥ ❁❁ ॥ ❁❁ ॥ ❁❁ ॥

मुदितेति। अथ मरुद्वायुः जलदे मेघ इव वृषे निषेदिवांसमुपविष्टमीश्वरं मुदिता मधुलिहो भृङ्गा याभिस्ताः वितानीकृताः उल्लोचाकाराः कृताः। अस्त्री वितानमुल्लोचः इत्यमरः। सान्तानिकीः सन्तानकुसुमविकाराः स्रजो मन्दारमाला इत्यर्थः। सन्तानशब्दात् विकारार्थे ठक्। सन्तानः कल्पवृक्षः इत्यमरः। उपरि वितत्य विस्तार्य उपसुखयां बभूव प्रह्लादयामास॥ २०॥ *~❁~*~❁~* ॥

कृतेति । अभिन्नरोमोद्गमैरविरलरोमांचैर्गणपतिभिः प्रमथमुख्यैः उच्चकैः परिवन्दि तेन साधु साध्विति संस्तुतेन । वदि अभिवादिने स्तुत्योः कर्मणि क्तः । हरेः सूनुनार्जुनेन तपसि कृतफलम्भगवत्साक्षात्कारलक्षणं येन तस्मिन् कृतफले सतीत्यर्थः । कृतधृति कृतसन्तोषं यथा तथा फलज्यायसी फलाधिका इति वक्ष्यमाणा स्तुतिर्जगदे कथिता ॥ २१ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ॥

शरणमिति । हे अजित हे अपराजित हे भव । अतिकारुणिकं अतिदयालुम् । तदस्य प्रयोजनमिति ठक् । भक्तिगम्यं भक्तिमात्रसुलभम्भवन्तं शरणं रक्षकं अधिग

कृतधृतिपरिवन्दितेनोच्चकैर्गणपतिभिरभिन्नरोमोद्गमैः । तप
सि कृतफले फलज्यायसी स्तुतिरिति जगदे हरेः सूनुना ॥ २१ ॥
शरणं भवन्तमतिकारुणिकम्भव भक्तिगम्यमधिगम्य जनाः । जित
मृत्यवोऽजित भवन्ति भये ससुरासुरस्य जगतः शरणम् ॥ २२ ॥
विपदेति तावदवसादकरी न च कामसम्पदभिकामयते । न
नमन्ति चैकपुरुषम्पुरुषास्तव यावदीश न नतिः क्रियते ॥ २३ ॥

म्य जितमृत्यवो जनाः ससुरासुरस्य जगतः भये आपदि शरणं स्वयं रक्षितारो भवन्ति । शरणं गृहरक्षित्रोरिति विश्वः ॥ २२ ॥ ❁ ❁ ❁ ❁ ❁ ❁ ॥

विपदिति । हे ईश पुरुषेण जनेन यावत् तव नतिः प्रणामो न क्रियते तावदेव एकम्पुरुषं एकाकिनं सन्तमवसादकरी क्षयकरी विपदेति प्राप्नोति । कामसम्पत् मनोरथसम्पत् च नाभिकामयते नैच्छति पुरुषाश्चान्ये लोकाः तमेकम्पुरुषं तव स्तुतिमकुर्वाणं न नमन्ति न वशे वर्तन्ते तेनानिष्टनिवृत्तिर्नापीष्टप्राप्तिरित्यर्थः । यदा तु त्वां प्रणमन्ति तदैव सर्वं लभ्यत इति भावः । प्रमिताक्षरावृत्तम् ॥ २३ ॥ ❁ * ❁ * ❁ ॥

संसेवन्त इति । दानं शीलं स्वभावो निजधर्मो येषान्ते दानशीलाःत्वामेवोपदिश्य दानं कुर्वन्तीत्यर्थः । तस्माद्दानं परमं वदन्तीति श्रुतेरिति भावः । कुतो यतो जन्म दुःखं सम्पश्यन्तोऽनुभवन्तः पुमांसः विमुक्त्यै मोक्षाय संसेवन्ते भवन्तमिति शेषः । न च तच्चित्रं फलार्थित्वादिति भावः । किन्तु निःसङ्गो निःस्पृहस्त्वं ज्ञानतेभ्यः तेभ्यः फलसिफलं ददासीति यत्तत्केवलं निरुपाधिकं कारुण्यं करुणा । स्वार्थे ष्यञ् । कारुण्यं करुणा घृणेत्यमरः । तस्य कार्य्यैः एतदेव चित्रं केवलं परार्थत्वादिति भावः । मालिनीवृत्तम् ॥ २४ ॥

प्राप्यत इति । यत्तीर्थमिहास्मिन्लोके दूरं गत्वा प्राप्यते स्मृतिमात्रसुलभमित्यर्थः

संसेवन्ते दानशीला विमुक्त्यै संपश्यन्तो जन्मदुःखं पुमांसः । यन्निः
सङ्गस्त्वं फलस्यानतेभ्यः तत्कारुण्यं ते केवलं नस्वकार्यम् ॥ २४ ॥
प्राप्यते यदिह दूरमगत्वा यत्फलत्यमरलोकगताय । तीर्थमस्ति न भवार्णवबाह्यं सार्वकामिकमृते भवतस्तत् ॥ २५ ॥

। गङ्गादिकन्तु न तथेति भावः । यत्तीर्थममरलोकगताय फलति फलम्प्रयच्छति । अत्रापीति स्मरणमात्रादेवेति भावः । भवः संसारः स एवार्णवः ततो बाह्यं बहिर्भवं संसारातीतं मोक्षप्रदमित्यर्थः । बहिर्देवपञ्चजनेभ्य इति वक्तव्यमिति यञ्प्रत्ययः । सर्वे कामाः प्रयोजनमस्येति सार्वकामिकम् । तदस्य प्रयोजनमिति ठक् । तारकत्वन्त्यनेनेति तीर्थं तारकं भवतः त्वदृते । अन्यारादित्यादिना पञ्चमी । अन्यन्नास्ति । औपच्छन्दसिकं वृत्तम् ॥ २५ ॥

व्रजतीति । हे वरद त्वयि प्रीतिमान्नरः शुचिर्निर्मलं पदं कैवल्यं मुक्तिं व्रजति । मुक्तिः कैवल्यनिर्वाणेत्यमरः । प्रतिहतमतिरुपहतबुद्धिः त्वद्द्वेषीत्यर्थः । घोरां गतिं

न्नीत्वं नरकरोति प्राप्नोति । न चैतावता रागद्वेषकलङ्कशङ्केत्याह । इयमिति । हे ऽनघ निःकलङ्क इयम्भक्ताभक्तयोरविशेषः । विधेयप्राधान्यात्स्त्रीलिङ्गता । परादुत्तरा निमित्तशक्तिः निमित्तभूता शक्तिः चेष्टितमहिमा तव क्वचिद्भक्ते द्वेषिणि वा कुत्रापि चित्तभेदो बुद्धिवैषम्यं नास्ति स्वकर्मणैव जन्तुस्तरति पतति वा त्वं साक्षितया सर्वत्रसम इत्यर्थः ॥ २६ ॥ ० * ० * ० * * ० * ० * ० * ० * ० * ॥

दक्षिणामिति । हे भवहे प्रणतदक्षिण प्रणतेषु दाक्षिण्यसम्पन्न । दाक्षिण्यम्परच्छन्दानुवर्तित्वं । दक्षिणः सरलावामपरच्छन्दानुवर्तिष्विति विश्वः । शिवकरीं श्रे

व्रजति शुचि पदं त्वयि प्रीतिमान्प्रतिहतमतिरेति घोरां गतिम् । इ
यमनघ निमित्तशक्तिः परा तव वरद न चित्तभेदः क्वचित् ॥ २६ ॥
दक्षिणाम्प्रणतदक्षिण मूर्तिन्तत्त्वतः शिवकरीमविदित्वा । रागिणाऽ
पि विहिता तव भक्त्या संस्मृतिर्भव भवत्यभवाय ॥ २७ ॥ दृष्ट्वा दृश्या
न्याचरणीयानि विधाय प्रेक्षाकारी याति पदं मुक्तमपायैः । सम्यग्दृ
ष्टिस्तस्य परं पश्यति यस्त्वां यश्चोपास्ते साधु विधेयं स विधत्ते ॥ २८ ॥

यस्करीम् । कृञो हेताच्छील्यादिना टप्रत्यये ङीप् । तव दक्षिणां मूर्तिन्तत्त्वतो याथार्थ्येनाविदित्वापि रागिणा रागद्वेषवतापि भक्त्या विहिता तव संस्मृतिस्त्वत्स्मरणमभावाय संसारनिवृत्तये । प्रसज्यप्रतिषेधेपि नञ्समास इष्यते । भवति । तत्त्वज्ञानं विनापि भक्तिपूर्विका तव संस्मृतिरेव मुक्तिनिदानमित्यर्थः । स्वागतावृत्तम् ॥ २७ ॥ ० ॥

दृष्ट्वेति । प्रेक्षया बुद्ध्या करोतीति प्रेक्षाकारी विमृश्यकारी दृश्यानि द्रष्टव्यानि दृष्ट्वा ज्ञात्वा आचरणीयानि विधाय कर्तव्यानि च कृत्वा अपायैर्मुक्तम्पदं याति । अविद्यया मृत्युन्तीर्त्वा विद्ययामृतमश्नुत इति श्रुतिः । ज्ञानकर्मभ्यां मुक्तिरित्यर्थः । किन्तु ते

च पिज्ञानयाग्मेनी बुद्धिपर्यये एवमुक्तिसाधनेनान्यविषयइत्याशयेनाह । सम्य
गिति । यः परन्त्वाम्पश्यति स सम्यग्दृष्टिः सम्यग्ज्ञानम् । यश्चत्वांउपासे
वते । स एव साधुर्विधेयम्विधत्ते साधुकारीत्यर्थः । मनमयूरं वृत्तम् । लक्षणन्तूक्त
म् ॥ २८ ॥ ॥

युक्ता इति । मुनयो व्यासादयः स्वशक्त्या निजयोगमहिम्ना युक्ताः तथा हितोपदेशै
र्विधिनिषेधवाक्यैः स्मृतीतिहासपुराणमुखेन प्रजानामुपकारवन्तः । हितोपका
रस्य मोक्षप्रदस्तु तेषामन्येषाञ्च त्वमेवेत्याह । समिति । अचिन्त्यधामा अचिन्त्य
महिमा त्वमेनं गतस्य शरणमापन्नस्य प्रपन्नस्य सम्बन्धीनि दुरुत्तराणि सुदुस्तराणि

युक्ताः स्वशक्त्या मुनयः प्रजानां हितोपदेशैरुपकारवन्तः । समु
च्छिनत्सि त्वमचिन्त्यधामा कर्म्माण्युपेतस्य दुरुत्तराणि ॥ २९ ॥
सन्निबद्धमपहर्तुमहार्य्यम्भूरि दुर्गतिभयम्भुवनानाम् । अद्भु
ताकृतिमिमामतिमायस्त्वं बिभर्षि करुणामय मायाम् ॥ ३० ॥

कर्म्माणि बन्धकानि पुण्यपापानि समुच्छिनत्सि नाशयसि ते त्वन्न समर्था एवेति भा
वः ॥ २९ ॥ ॥
सन्निबद्धमिति । अतिक्रान्तो मायां बन्धरूपामतिमायः अत्यादयः क्रान्ताद्यर्थे द्वि
तीययेति समासः । हे करुणामय हे कृपालो सन्निबद्धं स्वकर्मणा दृढबद्धं अत एवा
हार्यं अन्यैरनुच्छेद्यम्भूरि प्रभूतम्भुवनानां दुर्गतिभयन्नरकभयम् । स्यान्नारक
स्तु नरको निरयो दुर्गतिः स्त्रियामित्यमरः । अपहर्तुमद्भुताकृतिं विचित्ररूपामि
मां मायां दृश्यमानां मायां लीलाविग्रहरूपां बिभर्षि । अन्येषाङ्कर्मानुबन्धिविग्रहप
रिग्रहः । भवतस्तु परोपकारार्थ इत्यर्थः ॥ ३० ॥ ॥

नरागीति । हे देव चेतस्तव चित्तं रागि रागयुक्तं न । परमयोगित्वादिति भावः । त
थापि परमा निरतिशया विलासिता शृङ्गारचेष्टाशीलता भिक्षाटनादिषु विहरणा
त्तैर्थिकव्यसनितया चेति भावः । किञ्च शरीरे अर्द्धाङ्गे वधूः प्रसिद्धा चैतदिति भा
वः । तथापि मन्मथः कामश्च नास्ति तस्य भस्मीकरणादिति भावः । उपसि संध्याया
न्धातुर्ब्रह्मणो नमस्क्रिया वन्दनं स्वयं जगद्वंद्यस्यापीत्यर्थः । इतीत्थं विरुद्धं इदमु
क्तं ईहितं चेष्टितं निसर्गतो दुर्बोधं दुराकलनीयं दुर्ग्रहत्वमित्यर्थः । अदृष्टपूर्वत्वा
दिति भावः । वंशस्थं वृत्तम् ॥ ३१ ॥ ॥
नवेति । हे देव तव साङ्गजं सलोमकं करिचर्म उत्तरीयं संव्यानम् । संव्यानमुत्तरी

न रागि चेतः परमा विलासिता वधूः शरीरेऽस्ति न चास्ति मन्मथः । न
मस्क्रिया चोपसि धातुरित्यहो निसर्गदुर्बोधमिदं तवेहितम् ॥ ३१ ॥
नवोत्तरीयं करिचर्म साङ्गजं ज्वलन्मणिः सारशनं महानहिः । स्र
गास्यपङ्क्तिः शवभस्म चन्दनं कला हिमांशोश्च समं चकासति ॥ ३२ ॥

यं चेत्यमरः । दुःस्पर्शमिति भावः । ज्वलन्मणिः ज्वलद्रत्नो महानहिः सारशनं क
टिभूषाविशेषः । योऽन्येषां प्राणहर इत्यर्थः । क्लीबे सारशनं चाथ पुंस्कट्यां शृ
ङ्खलं त्रिष्वित्यमरः । आस्यपङ्क्तिः कपालम् । स्रक् माल्यं शवभस्म चन्दनं उभयत्रा
पि यत्स्पर्शममङ्गलं चेति भावः । किञ्च एतानि वस्तूनि हिमांशोः कला च समं तुल्य
तया चकासति दीप्यन्ते त्वदाश्रयवशाद् रम्यस्यापि रम्यतेति किमशक्यं तवेति भा
वः ॥ ३२ ॥ ॥
अविग्रहस्येति । अविग्रहस्य वस्तुतोऽशरीरस्यापि सतः अतुलेन दुर्बोधत्वादसदृ
शेन हेतुना केनापि कारणेनेत्यर्थः । समेता सङ्गता भिन्ना विलक्षणा च द्वयी द्विविधा

स्त्रीपुंसात्मिकामूर्तिर्यैस्त्वित्कर्मणि तत्समेत्यभिन्नद्वयमूर्तिर्यथा तथा तिष्ठतोऽशरी
रेस्य शरीरमेव विरुद्धं तदपि नाशेन शान्तमिति किमतश्चित्रमस्तीति भावः । एव
म्विधस्य तवैव जगत्सु विरुद्धवेषाभरणे पूर्वोक्तेयस्य तस्य विरुद्धवेषाभरणस्यापि
सतः कान्ततारमणीयता दृश्यते अन्यस्य न दृश्यते तस्मादचिन्त्योऽसौ तव महिमेति
भावः ॥ ३३ ॥ *०*०*०*०*०*०*०*०*०*०* ॥
आत्मेति । हे देव त्वं भूतसंघट्टवशरीरादिसंघातइव आत्मलाभपरिणामनिरोधैर्ज
न्मजरामरणैरुपेतो युक्तो नासि । तेन कारणेन हे सर्वभुवनातिग सर्वलोकोत्तर उप

अविग्रहस्याप्यतुलेन हेतुना समेत्य भिन्नद्वयमूर्तितिष्ठतः । तवैव
नान्यस्य जगत्सु दृश्यते विरुद्धवेषाभरणस्य कान्तता ॥ ३३ ॥
आत्मलाभपरिणामनिरोधैर्भूतसंघइव न त्वमुपेतः । तेन स
र्वभुवनातिगलोकेनोपमानमसि नाप्युपमेयः ॥ ३४ ॥ त्व
मन्तकः स्थावरजङ्गमानान्त्वया जगत्प्राणिति देव विश्वम् । त्वं
योगिनां हेतुफले रुणत्सि त्वं कारणं कारणकारणानाम् ॥ ३५ ॥

मीयतेऽनेनेत्युपमानं नाऽसि । उपमीयते तदुपमेयमपि नासि न कश्चित्त्वादृशो
ऽस्ति त्वमपि नान्यसदृशः । अनन्यसाधारणत्वादित्यर्थः । वृत्तमुक्तम् ॥ ३४ ॥ *
त्वमिति । हे नाथ त्वं स्थावरजङ्गमानामन्तकः संहर्त्ता । त्वया हेतुना विश्वं सर्वं ज
गत्प्राणिति जीवति । त्वं योगिनां हेतुः प्रवर्तकं कर्मफलं भोगश्च ते हेतुफले रुणत्सि
निवर्तयसि । तेषां त्वमेव सम्बन्धविमोचक इत्यर्थः । किञ्च त्वं कारणानि भूतानि ते
षां कारणानि भूतसूक्ष्माणि परमाणवो वा तेषां कारणकारणानां कारणं प्रधाना
दिद्वारा उत्पत्तिस्थानं । अत्र सर्वत्र यतो वा इमानि भूतानि जायन्ते येन वा न्ति यदुपय

न्यभिसंविशन्तीइतिश्रुतेःप्रमाणमितिभावः ॥ ३५ ॥ ॥
रक्षोभिरिति । रक्षोभीराक्षसैःसुरास्चमनुजास्चतैर्दितेःसुतैर्दैत्यैर्वालोकेषुयद्वि
कलंसम्पूर्णमाधिपत्यमाप्तंप्राप्तन्तत्हेभवशरणगतानामार्तिहारिणोतेभवतेतुभ्यंन
मस्क्रियायाः । नमःस्वस्तीत्यादिनाचतुर्थी पावित्र्याःपापहारिण्याःमाहात्म्यंसामर्थ्यं
नकस्यचन्नत्यैभवतिशिरसस्लाघ्यवनतिरितिभावः । प्रहर्षिणीवृत्तम् ॥ ३६ ॥ *
अथाष्टमूर्तिषुकस्चित्तस्तुवन्वायुमूर्तित्वावदाह । तरसेति । यःपवनःतरसाबले
नभुवनानिबिभर्तिप्राणात्मनाधारयति । यतोयस्मेरणात्पवित्रम्परम्परमब्रह्म

रक्षोभिःसुरमनुजैर्दितेःसुतैर्वायल्लोकेष्वविकलमाप्तमाधिपत्य
म् । पावित्र्याःशरणगतार्तिहारिणोतेमाहात्म्यन्तवभवतत्नम
स्क्रियायाः ॥ ३६ ॥ तरसाभुवनानियोबिभर्तिध्वनतिब्रह्मयतःप
रम्पवित्रम् । परितोदुरितानियःपुनीतेशिवतस्मैपवनात्मनेनम
स्ते ॥ ३७ ॥ भवतःस्मरतांसदासनेजयिनिब्रह्मपदेनिषेदुषाम्
। दहतेभववीजसन्ततिंशिखिनेऽनेकशिखायतेनमः ॥ २८ ॥

वर्णात्मकंध्वनतिनदति । सोदीर्णोमूर्ध्न्यभिहतोवर्णमापद्यमारुतः । वर्णान्संज
नयतिइतिवचनात् । यःपवनःपरितोदुरितानिपातकानिपुनीतेशोधयतिनाशय
तीतियावत् । हेशिवतस्मैपावयतीतिपवनोवायुःसएवआत्मायस्यतस्मैपवनात्मने
तेतुभ्यन्नमः । वृत्तमुक्तम् ॥ ३७ ॥ ॥
अथाग्निमूर्तिंस्तौति । भवतइति । जयिनिविजयशीलेसर्वोत्कृष्टब्रह्ममयेब्रह्मप्र
धानेसदासनेसम्यगासनेयोगासनेइत्यर्थः । निषेदुषामुपविष्टानाम्भवतःस्मरता
म्भवन्तंध्यायताम् । अधिगर्थेत्यादिनाशेषेकर्मणिषष्ठी । भववीजसन्ततिंसंसार

निदानसमूहम्भवनिदानकर्म्मसंघातन्दहतेभस्मीकुर्वते अनेकशिखाय वक्रज्वा
लाय शिखिने वह्निमूर्त्तये ते तुभ्यन्नमः ॥ ३८ ॥ ✿ * ✿ * ✿ * ✿ * ✿ ॥
अथजलमूर्त्तिंस्तौति । आवाधेति । हेभववीजानाम्प्रभवकारणभूत । जीवाना
मितिपाठेतेषांतत्प्रतिविम्बत्वादितिभावः । आवाधा आध्यात्मिकादिदुःखंमरणम्प
सिद्धंताभ्याम्भयन्तदेवार्च्चिर्यस्यतेनमहताभवानलेनसंसाराग्निनाचिरायचिरंप्लुष्टे
भ्योदग्धेभ्यःसमुपगमेनसंसेवयानिर्वाणंसन्तापशान्तिंयच्छतेददतेजीवयतीति
जीवनन्तस्मैजीवनायजलात्मनेतेतुभ्यंनमः ॥ ३९ ॥ ✿ * ✿ * ✿ * ✿ * ॥
इदानींनभोमण्डलंस्तौति । यइति । भवेत्यनुवर्त्तते । भवत्यस्मादयंप्रपञ्चइति

आवाधामरणभयार्च्चिषाचिरायप्लुष्टेभ्यःशिवमहताम्भवानलेन । नि
र्वाणंसमुपगमेनयच्छतेतेवीजानांप्रभवनमोऽस्तुजीवनाय ॥ ३९
॥ यःसर्वेषामावरीतावरीयान्सर्वैर्भावैर्नावृतोनादिनिष्ठः । मार्गा
तीतायेन्द्रियाणांनमस्तेऽविज्ञेयायव्योमरूपायतस्मै ॥ ४० ॥

भवस्तत्सम्बुद्धौसकलजगज्जनकेतियावत् । वरीयान् उरुतरोविभुरित्यर्थः । प्रि
यस्थिरेत्यादिना उरुशब्दस्यवरादेशः । यस्त्वंसर्वेषांवस्तूनामावरीता आच्छाद
यिता । वृणोतेस्तृच्प्रत्ययः । सर्वैर्भावैःपदार्थैर्नावृतःकेनापिकदाचिदप्यनावृतः
स्वयंव्यापकत्वादितिभावः । अविद्यमाने आदिनिष्ठे उत्पत्तिनाशौयस्यासौऽनादि
निष्ठोनित्यः । निष्ठानिष्पत्तिनाशान्ताइत्यमरः । इन्द्रियाणांचक्षुरादीनांमार्गाती
ताय अतीन्द्रियाय । अतएवाविज्ञेयाय अपरिच्छेद्यायतस्मैव्योमरूपायतेतु
भ्यंनमः ॥ ४० ॥ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ✿ ॥
अणीयसइति । भवेत्यनुवर्त्ततेहेभव अणीयसेसूक्ष्मतराय । तथापि विश्वमूर्त्ति

शोजगद्धारकायतेतुभ्यंनमः । अन्तिकस्थायअन्तर्यामितयासन्निकृष्टायसते । त
थापिदवीयसेदुर्ग्रहायदूरतरायतेतुभ्यंनमः । वाचांमनसाञ्चगोचरंविषयमती
त्यस्थितायअवाङ्मानसगोचराय । तत्पतयेतेषांवाङ्मनसामध्यक्षाय । तदध्यक्षत्वे
ऽवनदृश्यतइतिविरोधःतेतुभ्यंनमोनमः । चापलेद्वेभवतइतिवक्तव्यमितिद्विरु
क्तिःसंभ्रमेणप्रवृत्तिश्चापलमितिकाशिका । भक्त्युद्रेकाच्चसंभ्रमोविरोधाभासोलङ्का
रः ॥ ४१ ॥ ** ~ ~ * ~ ~ * ~ ~ * ~ ~ ** ॥
असम्विदानस्येति । सम्विदांज्ञानानामीश । ईशानःसर्वविद्यानामितिश्रुतेरितिभा
वः । प्रेक्षोपलब्धिश्चित्संविदित्यमरः । असम्विदानस्यअज्ञानस्य । समोगमूढ

अणीयसेविश्वंविधायिनेनमोनमोऽन्तिकस्थायनमोदवीयसे ।
अतीत्यवाचांमनसाञ्चगोचरंस्थितायतेतत्पतयेनमोनमः ॥ ४१॥
असम्विदानस्यममेशसम्विदान्तितिक्षितुन्दुश्चरितन्त्वमर्हसि ।
विरुध्यमोहात्पुनरभ्युपेयुषाङ्गतिर्भवानेवदुरात्मनामपि ॥ ४२ ॥

पृच्छित्यादिनाविदेःसम्पूर्वादकर्मकाच्छानच्प्रत्ययः । ममदुश्चरितं[illegible]प्रयोगरू
पंदुश्चेष्टितंतितिक्षितुंसोढुन्तिजेःसन्नन्तात्तुमुन्प्रत्ययः । त्वमर्हसियोग्योऽसि । ननु
तवमहानपराधःकथंसोढव्यस्तत्राह । विरुध्येति । मोहादज्ञानाद्विरोध्यवैरमुत्पाद्य
पुनरभ्युपेयुषाम्पश्चाच्छरणागतानान्दुरात्मनामपिभवानेवगतिःत्वंहिशरणागता
नामपराधंनगणयसीत्यर्थः ॥ ४२ ॥ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ○ ॥
सम्प्रतिवरंयाचते । आस्तिक्येति । हेप्रियोधर्मोयस्येतिप्रियधर्म । समासान्तोवि
धिरनित्यइतिनसामासान्तोऽनिच्प्रत्ययः । परलोकेमतिरस्तीतिआस्तिकःपार
लौकिकःअस्तिनास्तिदिष्टमितिठक्तस्यभावःआस्तिक्यंविश्वासःतेनशुद्धंमिनव

न्धर्मं वैदिकाचारमवतः पालयतो धर्मात्मजस्य युधिष्ठिरस्य विहितागसि कृतापकारे शत्रुवर्गविषये हे ईश यया समृद्ध्यात्मा ऽस्त्रवैभवेन विजयं सम्प्राप्नुयां भजेयं हे भूतनाथ आहवेषु तां विभुतां विभूतिं शस्त्रविद्याम्वितर देहि ॥ ४३ ॥ ○ * ○ ॥

इतीति । इत्युच्चैर्निगदितवन्तं प्रणतशिरसं मघोनः इन्द्रस्य सूनुमर्जुनं ईशः महादेवः सादरं यथा तथा शान्तयित्वा उपालभ्य अस्मै अर्जुनाय ज्वलतानलेन तेजसा दीप्त्या परीतं व्याप्तं रौद्रं रुद्रदेवताकम्पाशुपतमस्त्रं न्दधानं धनुरुपपदं धनुःशब्दोपपदं वेदं धनुर्वेदमित्यर्थः । अभ्यादिदेश अध्यापयामासेत्यर्थः । धनुरुपपदं वेद

आस्तिक्यशुद्धमवतः प्रियधर्म धर्मं धर्मात्मजस्य विहितागसि शत्रुवर्गे ।
संप्राप्नुयां विजयमीश यया समृद्ध्या तां भूतनाथ विभुतां वितराहवेषु ॥ ४३ ॥
इति निगदितवन्तं सूनुमुच्चैर्मघोनः प्रणतशिरसमीशः सादरं शान्त्वयित्वा ।
ज्वलदनलपरीतं रौद्रमस्त्रं दधानं धनुरुपपदमस्मै वेदमभ्यादिदेश ॥ ४४ ॥
स पिङ्गाक्षः श्रीमान्भुवनमहनीयेन महसा तनुं भीमां बिभ्रत्त्रिगुणपरिवारप्रहरणः ।
परीत्येशानं त्रिः स्तुतिभिरुपगीतं सुरगणैः सुतं पाण्डोर्वीरं जलदमिव भास्वानभिययौ ॥ ४५ ॥

मित्यत्र धनुरुपपदत्वं वेदशब्दस्य न तु संज्ञिनः तदर्थस्येति । संज्ञायाः संज्ञिगतत्वाभावात् । अवाच्यवचनदोषमाहुरालंकारिकाः । तदुक्तम् । यदवाच्यस्य वचनं स्यात्तद्वाच्यवचनं दूषितमिति । समाधाने तु धनुःशब्दविशेषितेन वेदशब्देन शास्त्रपरेणे त्यर्थः । परोपदेशयोग्यो धनुर्वेदो लक्ष्यः ॥ ४४ ॥ ○ * ○ * ○ * ○ * ○ ॥

स इति । पिङ्गाक्षः पिङ्गलाक्षः श्रीमान् शोभावान् भुवनमहनीयेन लोकपूज्येन महसा तेजसा भीमां तनुं बिभ्रत् । त्रिगुणः त्रिशिखः परिवार आकारो यस्य तत् त्रिगुणं च

वारं त्रिशूलं तदेव प्रहरणमायुधं यस्य स तथोक्तः। सूर्यपक्षे तु गुणत्रयपरिवारः त्रय्या-
त्मक इति योज्यं। स धनुर्वेदः सुरगणैः स्तुतिभिरुपगीतः सन् ईशानं देवं त्रिःत्रि-
वारम्। त्रिचतुर्भ्यः सुजिति सुच् प्रत्ययः। परीत्य प्रदक्षिणीकृत्य वीरं पाण्डोः सुतं
अर्जुनं भास्वान् सूर्यो जलदमिवाभिययौ। शिखरिणीवृत्तम्॥ ४५॥ ०० ॥

अथेति। अथ शशधरवरप्रदानानन्तरं त्रिदशपतिपुरोगाः इन्द्रादयो लोकपालाः
शशधरमौलेः शम्भोः अभ्यनुज्ञामवाप्य पूर्णकामाय तस्मै पाण्डवाय अवितथफल-
ममोघफलं आशीर्वादमारोपयन्तः प्रयुञ्जानाः विजयि जयशीलं विविधं नानाविधं अ-
स्त्रं ऐन्द्रादिकं वितेरुः ददुः॥ ४६॥ ००००००००००००००० ॥

अथ शशधरमौलेरभ्यनुज्ञामवाप्य त्रिदशपतिपुरोगाः पूर्णकामाय त-
स्मै। अवितथफलमाशीर्वादमारोपयन्तो विजयि विविधमस्त्रं लोकपा-
ला वितेरुः॥ ४६॥ असंहार्योत्साहं जयिनमुदयं प्राप्य तरसा धुरं
गुर्वीं वोढुं स्थितमनवसादाय जगतः। स्वधाम्ना लोकानामुपरि कृ-
तस्थानममरास्तपोलक्ष्म्या दीप्तं दिनकृतमिवोच्चैरुपजगुः॥ ४७॥

असंहार्येति। तरसा बलवेगेन जयिनं जयशीलं उदयं स्वलाभरूपं अभ्युदयं
अन्यत्र उदयाद्रिं च प्राप्य असंहार्योत्साहं संहर्तुमशक्योत्साहं जगतो अनवसादाय
क्षेमाय गुर्वीं धुरं दुष्टनिग्रहणात्मोपसंहाररूपं च भारं वोढुं स्थितं। स्वधाम्ना स्वते-
जसा लोकानामुपरि स्थितास्तं कृतस्थितिं कृतपदमन्यत्र उपरि वर्तमानं तपोलक्ष्म्या दी-
प्तं तं पाण्डवं च अमराः इन्द्रादयः। दिनकृतं सूर्यमिवोच्चैरुपजगुः साधु महाभागो-
ऽसीति तुष्टुवुः। शिखरिणीवृत्तम्॥ ४७॥ *—०*०—०*०—* ॥

व्रजेति। शिवेन व्रज स्वपुरं गच्छ अरिलोकं जयेति गदितः उक्तः यतः पादपद्मानतः

…नगादिदपद्दज्ञाननःमन। तथादेवसंघैस्त्रापितस्तुतोऽनरवधृतगुर्वी जयल
क्ष्मीर्यंनसमपागतपुत्रोऽर्जुनःनिजगृहंसाश्रमङ्गत्वाप्राप्यायसादरंयथातथाधर्म
सूनुंराजानन्ननामननमनस्कार ॥ ४८ ॥ * ॥ इतिश्रीपदवाक्यप्रमाणपारावा

व्रजजयरिपुलोकम्पादपद्मानतःसन्नगदितइतिभवेनश्लाघितोदे
वसंघैः। निजगृहमुपगत्वासादरम्पाण्डुपुत्रोधृतगुरुजयल
क्ष्मीर्धर्मसूनुन्ननाम ॥ ४८ ॥ * ॥ इतिमहोपाध्यायश्रीभारवि
कृतौकिरातार्जुनीयेमहाकाव्येधनञ्जयास्त्रलाभोनामाष्टादशःस
र्गः ॥ १८ ॥ * ॥ इतिमहोपाध्यायश्रीभारविविरचितङ्किराता
र्जुनीयंमहाकाव्यंसमाप्तिमगमत् ॥ शुभमस्तु ॥ श्रीरस्तु ॥ * ॥

टीकामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायांकिरातार्जुनीयव्याख्या
याङ्घण्टापथसमाख्यायांश्रीअर्जुनवरप्रदानोनामाष्टादशःसर्गः ॥ १८ ॥ * ॥
इतिमहोपाध्यायश्रीमल्लिनाथविरचितोघण्टापथःसमाप्तः ॥ श्रीरस्तु ॥ * ॥

॥ अथसर्गसूची ॥




| सर्गसमाप्ति | पत्र | पृष्ठ |
|---|---|---|
| प्रथमसर्गसमाप्ति | १५ | २ |
| द्वितीयसर्गसमाप्ति | २७ | २ |
| तृतीयसर्गसमाप्ति | ४३ | १ |
| चतुर्थसर्गसमाप्ति | ५१ | २ |
| पञ्चमसर्गसमाप्ति | ६३ | २ |
| षष्ठसर्गसमाप्ति | ७२ | २ |
| सप्तमसर्गसमाप्ति | ८० | २ |
| अष्टमसर्गसमाप्ति | ९२ | १ |
| नवमसर्गसमाप्ति | १०८ | २ |
| दशमसर्गसमाप्ति | १२२ | १ |
| एकादशसर्गसमाप्ति | १३८ | १ |
| द्वादशसर्गसमाप्ति | १४८ | १ |
| त्रयोदशसर्गसमाप्ति | १६३ | १ |
| चतुर्दशसर्गसमाप्ति | १७९ | २ |
| पञ्चदशसर्गसमाप्ति | १८७ | १ |
| षोडशसर्गसमाप्ति | १९८ | १ |
| सप्तदशसर्गसमाप्ति | २०७ | २ |
| अष्टादशसर्गसमाप्ति | २१७ | १ |


॥ इतिसर्गसूची ॥

॥ अथप्रतिसर्गश्लोकसंख्या ॥

| सर्ग | श्लोकसंख्या | सर्ग | श्लोकसंख्या |
|---|---|---|---|
| १ प्रथमसर्ग | ४६ | १० दशमसर्ग | ६३ |
| २ द्वितीयसर्ग | ५९ | ११ एकादशसर्ग | ८१ |
| ३ तृतीयसर्ग | ६० | १२ द्वादशसर्ग | ५५ |
| ४ चतुर्थसर्ग | ३८ | १३ त्रयोदशसर्ग | ७१ |
| ५ पञ्चमसर्ग | ५२ | १४ चतुर्दशसर्ग | ६१ |
| ६ षष्ठसर्ग | ४७ | १५ पञ्चदशसर्ग | ५३ |
| ७ सप्तमसर्ग | ४० | १६ षोडशसर्ग | ६४ |
| ८ अष्टमसर्ग | ५७ | १७ सप्तदशसर्ग | ६४ |
| ९ नवमसर्ग | ७८ | १८ अष्टादशसर्ग | ४८ |

॥ इतिप्रतिसर्गश्लोकसंख्या ॥

॥ [illegible] ॥

॥ अथटीकायांपाणिनिव्याकरणानुयायिन्यांप्रमापकाः ॥

| | | | |
|---|---|---|---|
| अमरकोषः | १ | शाकटायन | १३ |
| हेमचन्द्रकोषः | २ | न्यासोद्योतः | १४ |
| विश्वप्रकाशकोषः | ३ | काशिका | १५ |
| हलायुधकोषः | ४ | वामनः | १६ |
| शाश्वतकोषः | ५ | दण्डी | १७ |
| वैजयन्तीकोषः | ६ | सज्जनः | १८ |
| शब्दार्णवकोषः | ७ | क्षीरस्वामी | १९ |
| यादवकोषः | ८ | काव्यप्रकाशः | २० |
| केशवकोषः | ९ | नीतिवाक्यामृतम् | २१ |
| मनुः | १० | अलङ्कारसर्वस्वं | २२ |
| भाष्यकारः | ११ | वृत्तरत्नाकरः | २३ |
| कैय्यटः | १२ | कामन्दकः | २४ |

॥ इतिटीकाप्रमापकाः ॥

## ॥ अथप्रथमसर्गस्यसूची ॥

द्वैताख्येतपोवनेयुधिष्ठिरस्यचरदर्शनम् । श्रियरित्यादिना । १ । तस्यवनेचर
स्ययुधिष्ठिरस्यनिकटागमनम् । कृतेत्यादिना । १ । युधिष्ठिरनिकटेदुर्य्योधनक
र्तृकप्रजापालनस्यप्रशंसाकरणेवनेचरजनस्यनिश्चयः । द्विषामित्यादिना । १ ।
युधिष्ठिरंप्रतिवनेचरस्यकथनारम्भः । क्रियास्वित्यादिभिस्त्रिभिः । ३ । युधिष्ठि
रस्याग्रेदुर्य्योधनस्यगुणकथनायदूतस्यविज्ञप्तिः ॥ पञ्चदशभिःश्लोकैःविशङ्के
त्यादिभिः । १५ । युधिष्ठिरम्प्रतिदूतेनदुर्य्योधनस्यराजनीतिकथनम् । सइत्या
दिना । १ । दुःशासनस्ययौवराज्याभिषेककथनम् । प्रलीनेत्यादिश्लोकद्वयैः ।
२ । युधिष्ठिरतःदुर्य्योधनस्यभयकथनम् । तदेत्यादिना । १ । दुर्य्योधनस्यद
मनार्थेयुधिष्ठिरंप्रतिवनेचरस्यकथनम् । इतीत्यादिना । १ । वनेचरेगतेसति
द्रौपदीगृहंगत्वाभीमंप्रतियुधिष्ठिरेणतद्वृत्तान्तकथनम् । निशम्येत्यादिना ।
१ । तद्वाक्यंश्रुत्वायुधिष्ठिरम्प्रतिद्रौपद्याःकथनारम्भः । भवेत्यादिभिःऊनविं
शतिश्लोकैःद्रौपद्याःकथनम् । १९ ॥

॥ इतिप्रथमसर्गस्यतात्पर्य्यार्थः ॥

---

## ॥ अथद्वितीयसर्गस्यसूचीपत्रं ॥

द्रौपदीकथनानन्तरंयुधिष्ठिरम्प्रतिभीमसेनस्यकथनारम्भः । विहितामित्यादि
भ्यांद्वाभ्यांश्लोकाभ्यां । २ । विषमइत्यादिभिःभीमसेनेनद्रौपदीकथितवाक्यप्र
शंसनपूर्वकंस्वाभिप्रायकथनंद्वाविंशतिभिःश्लोकैः । २२ । शत्रुनिग्रहावश्यकर्त्त
व्यताकथनञ्च । १ । क्रुद्धस्यभीमस्यसान्त्वनपूर्वकंयुधिष्ठिरस्यकथनारम्भः । अ
पवर्जितेत्यादिलघुवृत्तितयेत्यन्तैरष्टाविंशतिभिः । २८ । भीमम्प्रतियुधिष्ठिर
स्यनानानीतिदर्शनपूर्वकम्प्रबोधवाक्यं । अनुशासतमित्यादिना । १ । युधिष्ठिर

निकटेव्यासदेवस्यसमागमनम्। मधुरैरित्यादिना।१। व्यासदेवस्यशान्तिगुणवर्णनन्तेजोवर्णनञ्च। सहसेत्यादिना।१। युधिष्ठिरेणव्यासदेवदर्शनम्। अथेत्यादिना।१। व्यासंदृष्ट्वायुधिष्ठिरस्यासनादुत्थानम्। अवहितइत्यादिना।१। व्यासम्पूजयित्वातमासनेउपवेश्ययुधिष्ठिरस्योपवेशनम्। व्यक्तेत्यादिना।१। व्याससन्मुखस्थायिनोनृपस्यशोभावर्णनम्॥

॥ इतिद्वितीयसर्गस्यतात्पर्य्यार्थः ॥

॥ अथतृतीयसर्गस्यसूची ॥

ततइत्यादिनाअनुद्धतेत्यन्तैस्त्रिभिः। अथव्यासदेवस्यस्वरूपवर्णनम्।३। तंमुनिंप्रतियुधिष्ठिरवाक्यं। धर्म्मेत्यादिना।१। व्यासस्यागमनप्रयोजनज्ञानार्थेयुधिष्ठिरस्यतंप्रतिकथनारम्भः। अनाप्तेत्यादिश्रोतरित्यन्तैश्चतुर्भिः।४। युधिष्ठिरकर्तृकव्यासस्तुतिः। निरास्पदमित्यादिना।१। व्यासंप्रतियुधिष्ठिरस्यतदागमनप्रयोजनजिज्ञासा। इतीत्यादिना।१। युधिष्ठिरंप्रतिव्यासस्यकथनारम्भः। चिचीषतामित्यादि तथापीत्यन्ताभ्यां।२। युधिष्ठिरंप्रतिव्यासस्यप्रेमाधिक्यकथनं। तुनाइत्यादिनाविधायेत्यादिभिश्चतुर्भिः।४। व्यासेनदुर्य्योधनस्यदुर्ज्जयकथनम्। लभ्येत्यादिना।१। व्यासेनतंप्रतिभाविराज्यलाभकथनंदुर्य्योधनादिनिग्रहकथनंयुद्धार्थमुत्कृष्टास्त्राद्याहरणार्थंकथनञ्च। त्रिरित्यादियस्मिन्नित्यन्ताभ्यां।२। व्यासेनभीष्मशौर्य्यवर्णनम्। सुजन्मामित्यादिना।१। तेनद्रोणाचार्य्यस्यशौर्य्यवर्णनम्। निरीक्ष्येत्यादिना।१। कर्णस्यशौर्य्यवर्णनम्। ययेत्यादिमहत्त्वेत्यन्ताभ्याम्। व्यासेनभीष्मादिजयार्थंअर्ज्जुनायप्रकृष्टविद्यादानार्थंस्वकीयागमनस्यविज्ञापनं। इतीत्यादिना।१। युधिष्ठिराज्ञयाअर्ज्जुनस्यव्यासनिकटेउपवेशनम्। निर्य्यायेत्यादिना।१। व्यासेनअर्ज्जुनायवि

र्थागदानं। योगमित्यादिना। १। व्यासेनतस्मैयोगशिक्षणं। आकारमित्यादिना। १। अर्जुनंप्रतितस्यकथनारम्भः अनेनेत्यादिना। १। अर्जुनाययोगंदत्वातपस्याकरणार्थंव्यासस्यादेशः। करिष्यसेइत्यादिना। १। इन्द्रस्याराधनार्थंतपस्याकरणायार्जुनंप्रतिव्यासेनस्थानकथनम्। इतीत्यादिना। १। एवमुपदेशंकृत्वा ततस्थानाद्व्यासस्यप्रस्थानम्। कुवेरानुचरस्यकस्यचिद्गुह्यकस्यार्जुननिकटागमनञ्च। ततेत्यादिना। १। तस्यगुह्यकस्यार्जुनम्प्रतिप्रसन्नताकथनम्। अथेत्यादिना। १। अर्जुनस्यप्रस्थानेनयुधिष्ठिरादीनांम्लानतावर्णनम्। असंशयेत्यादिना। पञ्चभिःभ्रातृभिःसमंविभज्यदुःखभोगादर्जुनस्यदुःखाल्पत्वज्ञानदर्शनम्। धैर्य्येणेत्यादिना। १। शत्रून्प्रतिक्रोधेनार्जुनस्योत्साहाधिक्यवर्णनम्। अर्जुनस्यगमनेनभ्रातृणांशोकाधिक्यवर्णनञ्च। तानित्यादिना। अर्जुनस्यद्रौपदीनिकटागमनं। तुषारेत्यादि अक्षत्विमेत्यन्ताभ्याम्। २। प्रस्थानकालेअर्जुनंप्रति द्रौपद्याःप्रेमवर्णनम्। धैर्य्येत्यादिना। १। अर्जुनंप्रतिद्रौपद्याःकथनारम्भः। मग्नामित्यादि तदेत्यन्तैःषोडशभिः। १६। अर्जुनंप्रतिनानानीतिदर्शनपूर्वकं द्रौपद्याःशिक्षावचनं। उरीतामित्यादिना। १। द्रौपद्याःशिक्षावाक्यंश्रुत्वा अर्जुनस्योत्साहवृद्धिः। अथेत्यादिना। १। अर्जुनस्यशत्रुभयानकशरीरवर्णनम्। अविलङ्घ्येत्यादि अलकेत्यन्तैस्त्रिभिः। ३। धनुर्बाणखड्गादीनगृहीत्वाकवचंपरिधायच कुवेरानुचरेणगुह्यकेनसहार्जुनस्यप्रस्थानं। अनुजगुरित्यादिना। १। आकाशेदुन्दुभिशब्दपुष्पवृष्ट्यादिवर्णनम्॥

॥ इतीतृतीयसर्गस्यतात्पर्य्यार्थः॥

---

॥ अथचतुर्थसर्गस्यसूची॥

अर्जुनेनहिमालयपर्वतदर्शनञ्च। ततइत्यादिना। १। शरत्कालीनशोभायु

न्तदेशेऽर्जुनस्यगमनं । विनम्रेत्यादिना । १। तद्देशंदृष्ट्वा ऽर्जुनस्यहर्षः । निरी क्ष्येत्यादिना । १। निर्मलजलेमत्स्यस्यशोभावर्णनं। तुतोयेत्यादिनुनोदेत्यन्ताभ्यां शरत्कालीनशोभावर्णनं । १। हृतेत्यादिना । १। शरन्नदीवर्णनम्। मनोर मभित्यादित्रिभिः। ३। गोपस्त्रीस्वभाववर्णनं। उपारताइत्यादिना। १। अधोभा रेणासमर्थायागोवर्णनम्। परीतमित्यादिना । १। वृषवर्णनम्। विमुच्येत्यादि ना। १। गोसमूहयुक्तशरन्नदीतीरवर्णनम्। परीत्यादिचतुर्भिः। ४। गोष्ठेदधि मन्थनकालेगोपस्त्रीणांवर्णनम्। पपातेत्यादिना । १। शरत्कालीनपथवर्णनम् । जनैरित्यादिना । १। शरत्कालीनशोभायुक्तगृहवर्णनम्। ततइत्यादिना । १। शरत्कालस्यशोभादर्शनार्थमर्जुनम्प्रतिगुह्यकस्यकथनम्। इयमित्यादिना । १। अर्जुनम्प्रतिगुह्यकेनमङ्गलहृद्यचकत्वेनशरत्कालवर्णनम्। उपैतीत्यादिना । १। नद्यादीनांनिर्मलतादिवर्णनम्। पतन्तीत्यादिना । १। आकाशशोभावर्ण नम्। विपाण्डुभिरित्यादिना। १। विद्युद्रहितैर्मेघैर्दिशांस्थूलतावर्णनम्। विहा येत्यादिना । १। हंसध्वनिवर्णनम्। अमीइत्यादिना । १। पक्वशालिवर्णनम्। मृणालिनीत्यादिना। १। ~~सितेत्यादिचतुर्भिः । ४।~~ शरत्कालीनदिशावर्णनम्। विहारेत्यादिद्वाभ्याम्। २। गृहम्प्रत्यागच्छन्तीनांगवांशोभावर्णनम्। हृतेत्यादि ना। १। गोपस्त्रीगीताशक्तमृगीवर्णनम्। असावित्यादिना । १। धान्यविशेष वर्णनम्। अमीइत्यादिना। भ्रमरवर्णनम्। मुखैरित्यादिना। १। शुकपक्षि श्रेणीवर्णनम्। इतीत्यादिना। १। हिमालयदर्शनम्। तमित्यादिना । १। अ र्जुनेनतस्यशोभादर्शनम्॥

॥ इतिचतुर्थसर्गस्यतात्पर्य्यार्थः ॥

---

॥ अथपञ्चमसर्गस्यसूची ॥

ग्रथेयादिना । १। अर्जुनस्यहिमालयपर्वतनिकटगमनम् । तपनेत्यादिवितते त्यन्तैश्चतुर्दशभिःश्लोकैः । १४ । हिमालयस्यस्वरूपवर्णनम् । अनुचरेणेत्यादि ना । १ । अर्जुनम्प्रतिकुवेरानुचरस्यकथनारम्भः । अलमित्यादित्रयोदशभिः । १३ । अर्जुनंसम्बोध्यकुवेरानुचरेणहिमालयवर्णनम् । येनेत्यादिक्षामन्ति रित्यन्तैःपञ्चभिः । ५ । अर्जुनम्प्रतिमन्दरनामपर्वतन्दर्शयित्वाकुवेरभृत्येनतत्प र्वतस्यवर्णनम् । व्यधत्तेत्यादिस्त्रापितेत्यन्तैर्दशभिः । १० । अर्जुनम्प्रतिकैलास पर्वतंदर्शयित्वागुह्यकेनतत्पर्वतस्यवर्णनम् । क्षिपतीत्यादिजलदेत्यन्तैश्चतुर्भिः । ४ । इन्द्रकीलपर्वतमर्जुनायदर्शयित्वागुह्यकेनतत्पर्वतस्यवर्णनम् । भव्यइत्या दिना । १ । तपस्याकरणविषयेअर्जुनम्प्रतिगुह्यकस्यशिक्षावचनम् । १ । माभू वन्नित्यादिना । १ । अर्जुनम्प्रतिगुह्यकस्याशीर्वादः । इतीत्यादिना । १ । एवमुपदे शंकृत्वागुह्यकेस्वस्थानंगतेसतिअर्जुनस्यतद्विरहादुत्कण्ठा । तमित्यादिना । १ । अर्जुनस्येन्द्रकीलपर्वताभिगमनम् ॥

॥ इतिपञ्चमसर्गस्यसूच्यर्थः ॥

॥ अथषष्ठसर्गस्यसूची ॥

रुचिरेत्यादिना । १ । अर्जुनेनेन्द्रकीलपर्वतारोहणम् । तमित्यादिना । १ । अर्जु नोपरिपतत्पुष्पवर्णनम् । अवेत्यादिना । १ । वायुवर्णनम् । उदितेत्यादिनामृदु कुक्षयस्वादुरसेनजलशब्दवर्णनम् । अवेत्यादिना । १ । वेतसवनस्यनम्रतावर्णन म् । प्रवभूवेत्यादिना । १ । नद्याराजहंसानांवर्णनम् । दधतीत्यादिना । १ । नदीतीरवर्णनम् । अनुहेमइत्यादिना । १ । नदीतीरस्थितचक्रवाकीवर्णनम् । सितेत्यादिना । १ । नद्याजलगतमणिवर्णनम् । उपलेत्यादिना । १ । नदीफेण वर्णनम् । वहितेत्यादिना । १ । जलमग्नानांहस्तिनांशरीरतमःदवर्णनम् । प्रतीत्या

दिना । १। नद्याः शुक्तिवर्णनम् । शुचिरित्यादिना । १। जलपतितप्रवालशोभा
वर्णनम् । उपेत्यादिना । १। जलचरवर्णनम् । सइत्यादिना । १। सर्पनिःश्वास
वातेननदीजलस्यचाञ्चल्यवर्णनम् । सइत्यादिना । १। अर्जुनेननदीनामुत्तरणं
। अधीत्यादिना । १। अर्जुनस्येन्द्रकीलपर्वतोपरिवनेगमनम् । अनुसाइत्यादि
ना । १। तत्स्थानस्यसौष्ठवंदृष्ट्वा अर्जुनस्यतत्स्थानेतपस्याकरणनिश्चयः । प्र
णीत्यादिना । १। अर्जुनस्यतपस्यारम्भः । शमयन्नित्यादिना । १। तपस्यया अ
र्जुनतेजोवृद्धिः । अधरीत्यादिना । १। अर्जुनप्रशान्ततावर्णनम् । मनसेत्यादि
ना । १। अर्जुनस्यक्षत्रियतपस्तोजसोवर्णनम् । शिरसेत्यादिना । १। तस्यमस्तके
जटाशोभावर्णनम् । धृतेत्यादिना । १। तस्यचरित्रवर्णनम् । अनुकुलेत्यादित्रि
भिः । ३। अर्जुनस्यतपस्यावर्णनम् । महतइत्यादिना । १। तस्यधैर्य्यवर्णनम् ।
नदित्यादिना । १। अर्जुनस्यतपःस्थानेइन्द्राचरेणागमनम् । विदितेत्यादिना ।
१। तस्यकठोरतपस्यांदृष्ट्वा इन्द्रानुचरेणइन्द्रनिकटेतद्वृत्तान्तकथनारम्भः । शुची
त्यादिनाविगणय्येत्यन्तैःसप्तभिः । ७। इन्द्रानुचराणामिन्द्रनिकटे अर्जुनस्यवृत्ता
न्तकथनम् । अधीत्यादिना । १। स्वपुत्रस्य अर्जुनस्यतपोवृत्तान्तंश्रुत्वातेनस्वीयहर्ष
गोपनम् । प्रणीत्यादिना । १। इन्द्रस्याप्सरसःप्रतिकथनम् । सुकुमारमित्या
दिनापृथुधाम्नीत्यन्तैःषड्भिः । ६। स्त्रीणांस्वरूपंवर्णयित्वा अर्जुनस्यतपोभङ्गाय
ताःप्रतीन्द्रस्यादेशः । आशंसितेत्यादिना । १। इन्द्रस्याज्ञांप्राप्याप्सरसांसैन्द
र्य्यप्रकाशः । प्रणतीत्यादिना । १। इन्द्रंप्रणम्यार्जुनस्यतपोभङ्गायाप्सरसा
म्प्रस्थानम् ॥

॥ इतिषष्ठसर्गस्यतात्पर्य्यार्थः ॥

॥ अथसप्तमसर्गस्यसूची ॥

श्रीमद्भिरित्यादिना । १। इन्द्रसैन्यैः सहाप्सरसां प्रस्थानकाले मृदङ्गशब्दवर्ण
नम् । सोत्कण्ठैरित्यादिना । १। तासामाकाशपथेन गमनम् । धूतानामित्यादिना
। १। अप्सरसां श्रमजन्यकपोलशोभावर्णनम् । तिष्ठद्भिरित्यादिना । तासां र
थसमुहस्य गतिवर्णनम् । कान्तानामित्यादिना । १। अप्सरसां घर्म्मजलवर्णन
म् । राजद्भिरित्यादिना । १। तासां रथपताकावर्णनम् । रामाणामित्यादिना । १
। तासान्दर्शनेन गन्धर्वाणां विस्मयज्ञानम् । सिन्दूरैरित्यादिना । १। ताभिः सह ग
तानामिन्द्रहस्तिनां वर्णनम् । अत्यर्थमित्यादिना । १। इन्द्रसैन्यानां स्वर्गगङ्गातीर
गमनम् । आमत्तेत्यादिना । १। स्वर्गगङ्गावायुवर्णनम् । सम्भिन्नैरित्यादिना । १
। हस्तिघोटकादीनां गङ्गाजलप्रवेशेन जलस्योच्छलतावर्णनम् । कान्तानामित्या
दिना । १। रथचक्राणां निःशब्दतावर्णनम् । तप्तानामित्यादिना । १ । मेघज
लेन हस्तिनां तापदूरीकरणम् । संवातेत्यादिना । १। अप्सरसां काञ्चीमणिशोभा
वर्णनम् । प्रतीत्यादिना । १। मेघजलबिन्दुभिरप्सरसां श्रमदूरीकरणम् । या
तस्येत्यादिना । १। अप्सरसामाभरणमणिशोभावर्णनम् । संसिद्धावित्यादिना
। १। इन्द्रसैन्यस्येन्द्रकीलपर्वतागमनं । आकीर्णेत्यादिना । १। इन्द्रकीलस्थि
तस्याकाशस्थनदीसादृश्येन वर्णनम् । सेतुत्वमित्यादिना । १। अतिश्रमेणाका
शात्पृथिव्यां घोटकै रथानयनम् । माहेन्द्रमित्यादिना । १। आकाशाद्देवहस्ति
नां भूमावतरणं । उत्सङ्ग इत्यादिना । १। इन्द्रकीलस्थितनदीतीरेषु घोटका
नां खुरचिह्नवर्णनम् । सध्वानमित्यादिना । १। तत्र मयुरैरथशब्दश्रवणं । सं
भिन्नामित्यादिना । १। पर्वतोपरिस्थितक्षुद्रनदीतो जलनिर्गमस्य वर्णनम् । आ
सन्नित्यादिना । १। हस्तिनीं दृष्ट्वा हस्तिनां चाञ्चल्यं । नीरंध्रमित्यादिना । १।
सैन्यधूलिवर्णनम् । सम्भोगेत्यादिना । १। गङ्गानिकटभूमाविन्द्रसैन्यस्यावस्था
नम् । भूभर्तुरित्यादिना । १। सैन्यावस्थानेनेन्द्रकीलपर्वतस्य शोभातिशयवर्णनम्

॥नि०र०॥ । सामोदा इत्यादिना । १ । अप्सरोभिः सुगन्धिपुष्पादीनामुपभोगः । क्लान्त इत्या-
।म०प०॥ दिना । सर्पभयेनाप्सरसां चूर्णनवनगमनम् । उत्कृष्टेत्यादिना । १ । ह-
॥२२४॥ स्तिपकैः पर्वतात् पृथिव्यां हस्तिनामानयनम् । प्रस्थानेत्यादिना । १ । हस्तिनां
वीचिस्पृष्टकुलवर्णनम् । आयत इत्यादिभिस्त्रिभिः । ३ । जले क्रीडतां हस्तिनां
वर्णनम् । प्रस्रोतदित्यादिना । १ । हस्तिनां जलादुत्थानम् । आकीर्णमित्या-
दिना । १ । सैन्यधूलिनिर्हीलमदजलैर्युक्तस्य नदीजलस्य वर्णनम् । आम-
द्रिरित्यादिना । १ । हस्तिनां गण्डस्थलस्य शोभावर्णनम् । निःशेषमित्यादिना
। १ । हस्तिमदगन्धयुक्तस्य वायोर्वर्णनम् । घाटूग्रमित्यादिना । १ । हस्तिशब्द-
वर्णनम् । आस्थेत्यादिना । १ । अपारोगलवुनस्य वनस्य शोभावर्णनम् ॥

॥ इति सप्तमसर्गस्य तात्पर्यार्थः ॥

---

॥ अथाष्टमसर्गारम्भोपक्रम् ॥

अथेत्यादिभ्यां । २ । गन्धर्वैस्तद्वनप्रवेशं कुर्वतीनामप्सरसां रूपवर्णनम् । नि-
वृत्तेत्यादिना । १ । आकाशगमनापेक्षयाऽप्सरसां पृथिव्यां गमनस्य मनोहरत्वव-
र्णनम् । घनानीत्यादिना । १ । अप्सरसां पुष्पवनेषु स्वच्छन्देन गमनम् । तनूरि-
त्यादिना । १ । लतासादृश्येन स्त्रीणां बाह्वोर्वर्णनम् । निपीयेत्यादिना । १ । अ-
प्सरोभिरशोकपुष्पशोभावर्णनम् । करावित्यादि जहीतीत्यन्ताभ्याम् । २ ।
मानिनीवर्णनम् । समुन्नतैरित्यादिना । १ । वनस्थनदीवर्णनम् । विदूरेत्यादि-
ना । १ । जलबिन्दुवर्णनम् । ससीत्यादिना । १ । लतावर्णनम् । उपेत्यादिना
। १ । वनशोभां दृष्ट्वाऽप्सरसां मनोहरणम् । खगोचर इत्यादिना । १ । गन्धर्वा-
न्प्रति अप्सरसां फलपुष्पादियाचनम् । प्रयच्छतेत्यादिना । १ । मानिनीवर्णन-
म् । प्रियेत्यादिभिः पञ्चभिः । ५ । गन्धर्वैः सहाप्सरसां शृङ्गारक्रीडावर्णनम् ।

इम'नीत्यादिभ्यां । २ । वनशोभासादृश्येनाप्सरोगणशोभावर्णनम् । वरोरुभिरि
त्यादिना । १ । अप्सरसाञ्चरणवर्णनम् । विसारीत्यादिना । १ । तासांजघनवर्ण
नम् । समुच्छ्वसदित्यादिना । १ । तासांमध्यदेशवर्णनम् । समानेत्यादिना । १
। तासांमुखवर्णनम् । विनिर्य्यतीनामित्यादिना । १ । तासांदर्शनेनगन्धर्वाणांह
र्षः । अथेत्यादिना । १ । गङ्गाजलावगाहनार्थमप्सरसामाह्वानस्योत्प्रेक्षा । प्रशा
न्तेत्यादिगतैरित्यन्ताभ्यां । २ । गङ्गायाःपद्मादिसादृश्येनाप्सरसांमुखादिवर्णन
म् । विभिन्नेत्यादिना । १ । गन्धर्वाणांगङ्गाजलावगाहनानन्तरमप्सरसांजल
प्रवेशः । विगाढेत्यादिभ्यांद्वाभ्यां । २ । गन्धर्वाणामप्सरसाञ्चजलप्रवेशेनजल
स्योच्छलनावर्णनम् । विधूतेत्यादिना । १ । गङ्गातरङ्गस्यकम्पस्यवर्णनम् । विप
क्षेत्यादिस्त्रस्तंस्वयमित्यन्तैःपञ्चभिः । ५ । अप्सरसांवक्षसिनखचिह्नादिवर्णनम्
। द्युतिमित्यादिना । १ । अप्सरसांजलक्रीडाश्रमेणभूषणानांस्वस्वस्थानात्स्ख
लनम् । विपत्रेत्यादिना । १ । अप्सरसांचक्षुरञ्जनादिक्षरणम् । तथेत्यादिना
। १ । जलार्द्रतयातासांशोभावर्णनम् । शुभेत्यादिना । १ । गङ्गातरङ्गसादृश्ये
नअप्सरसांसौन्दर्य्यवर्णनम् । हृदेत्यादिना । १ । जलेकराग्राघातेनस्तनद्व
यास्फालनम् । श्रियेत्यादिना । १ । जलेप्रतिबिम्बितानामप्सरसांमुखानांवर्णनम् ।
परीत्यादिभ्यां । २ । जलेमत्स्यस्यस्पर्शाङ्कितायाःकस्याश्चिन्नायकालिङ्गनम् । ति
रइत्यादिना । १ । अलकानामितस्ततःपतनान्मुखस्यशोभावर्णनम् ॥ कराबि
त्यादिना । १ । अगाधजलपतनाशङ्कयाकस्याश्चिन्नायकालिङ्गनम् । प्रियैरि
त्यादिभिस्त्रिभिः । ३ । गन्धर्वैस्सहाप्सरसांजलक्रीडावर्णनम् । निरञ्जनेइ
त्यादिना । १ । अप्सरसांकटाक्षादिवर्णनम् । निमिलदमित्यादिना । १ । ए
वञ्जलविहारंकृत्वातीरमागच्छन्तीनामप्सरसांवेगेनजलस्यतीरगमनवर्णनम् ।
प्रियेणेत्यादिना । १ । सपत्न्याःपश्चान्नूजलसेकेनकस्याश्चिन्नायकम्प्रतिमानः । तो

रेत्यादिना। १। तासांजलातीरप्राप्तिः। संक्रान्तेत्यादिना। १। अप्सरसांविहा
रेणजलशोभावर्णनम्॥

॥ इत्यष्टमसर्गस्यतात्पर्य्यार्थः ॥

## ॥ अथनवमसर्गस्यसूची ॥

वीक्ष्येत्यादिना। १। अस्तगमनार्थंसूर्य्यसमुद्रनिकटगमनम्। मध्येत्यादिना। १। सूर्य्याकालेआकाशस्यशोभावर्णनम्। अंशुभिरित्यादिना। १। अस्तकालीनसूर्य्यस्वरूपवर्णनम्। गम्यतामित्यादिना। १। चक्रवाकपक्षिणोर्मनस्तापवर्णनम्। मुक्तेत्यादिकान्तेत्यन्ताभ्याम्। २। अर्द्धास्तमितस्यसूर्य्यस्यरश्मिवर्णनम्। अग्रेत्यादिना। १। सूर्य्यास्तवर्णनम्। आकुलइत्यादिप्राप्तशान्तिरित्यन्तैस्त्रिभिः। ३। संध्याकालवर्णनम्। औषसाइत्यादिरक्तामित्यन्ताभ्याम्। २। संध्यापगमवर्णनम्। इच्छतामित्यादियच्छतीत्यन्ताभ्याम्। २। रात्रिविरहिणाम्प्रधिगांवर्णनम्। रञ्जिताइत्यादिना। १। सायंकालीना[illegible]वर्णनम्। रात्रीत्यादिना। १। ना[illegible]काशशोभावर्णनम्। व्यानशइत्यादिना। १। पूर्वदिशिचन्द्ररश्मीनाम्प्रकाशः। उज्झतीत्यादिना। पूर्वदिशःप्रसन्नतावर्णनम्। नीलेत्यादिना। १। चन्द्ररश्मीनांशोभावर्णनम्। द्यामित्यादिना। १। चन्द्ररश्मिनाऽन्धकारनाशनम्। अन्तिकेत्यादिना। १। दिगन्तशोभावर्णनम्। लेखयेत्यादिना। चन्द्रोदयप्राक्कालवर्णनम्। दीपयन्नित्यादिना। १। चन्द्रोदयः। उद्गतेत्यादिनेत्यन्ताभ्याम्। २। चन्द्रोदयेसतिरात्रिवर्णनम्। मानिनीत्यादिना। १। उदितस्यचन्द्रस्याकाशेमन्दमन्दगमनम्। स्निग्धनइत्यादिना। १। चन्द्रस्यरक्तवर्णतावर्णनम्। प्रेरितइत्यादिना। १। चन्द्ररश्मिभिरन्धकारनाशवर्णनम्। शारतामित्यादिना। १। ज्योत्स्

पुनरत्रैवृक्षाणांछायावर्णनम्। आतपइत्यादिना। १। चक्रवाकपक्षिभिश्चन्द्र
कीरणानांदुःसहतावर्णनम्। गन्धमित्यादिना। १। रात्रिवायुवर्णनम्। स
न्निधातुमित्यादिश्रोजसेत्यन्ताभ्याम्। २। चन्द्रस्यवर्णनम्। सद्मनामित्यादि
ना। १। अप्सरसामाभरणधारणेच्छा। नखजइत्यादिना। १। अप्सरसांर
मणेच्छयास्वस्वनायकमेलनेच्छा। प्रस्थितेत्यादिश्राम्बिन्यन्तैस्त्रिभिः। ३। अभि
सारिकावर्णनम्। उच्चतामित्यादिकिमित्यन्ताभ्याम्। २। सखीनायिकयोरन्यो
न्यंसम्वादःनायकागमनञ्च। योषितइत्यादिना। १। नायकसङ्गमेनायिकानांध
र्म्मोद्गमः। शीध्वित्यादिना। १। नायिकानांकामवर्णनम्। द्वारीत्यादिना। १।
कलहान्तरितावर्णनम्। साचीत्यादिना। १। नायकसङ्गमेनायिकायालज्जाल्प
त्वकथनम्। सव्यलीकमित्यादिना। १। क्रोधेनगमनोन्मुखस्यनायकस्यनायिका
याशेदनेननिवारणं। शङ्कितेत्यादिना। १। नायिकायानिविडप्रेमोद्गमान्नायकेन
तस्यामानज्ञानम्। लोलेत्यादिपातुमित्यन्तैःपञ्चभिः। ५। नायिकानांशृङ्गारक्रीडा
वर्णनम्। कान्तेत्यादिना। १। धनुषिकन्दर्पकर्तृकवाणसन्धानवैयर्थ्यवर्णनम्।
कुप्यतेत्यादिभिस्त्रिभिः। ३। नायिकानांमधुपानम्। भुइत्यादिना। १। म
धुपानकालेपानपात्रपतितानांनायिकानयनप्रतिबिम्बानांवर्णनम्। ओष्ठेत्यादि
ना। १। नायिकामुखरूपपानपात्रेणनायकानाम्मधुपानम्। प्राप्यत्रइत्यादि
ना। १। नायिकामुखसम्बन्धेनमधुनोऽतिशयमाधुर्य्यम्। वीक्ष्येयदिना। १।
नायकैःसहनायिकानांमधुपानम्। लोचनेत्यादिवद्धेत्यन्तैःपञ्चभिः। ५। मधु
पानेनाप्सरसांनयनादिरक्ततावर्णनम्। वामसामित्यादिशीधुपानेत्यन्तैर्नवभिः।
९। अप्सरसांमधुपानमत्ततयाशृङ्गारचेष्टावर्णनम्। अन्योन्येत्यादिना। १।
एवम्विहारंकुर्वतीनामप्सरसांसम्बन्धेरात्रिप्रभातः। निद्रेत्यादिना। १। गन्ध
र्वाणांनिद्रात्यागेसतिरात्रिविहारस्मरणम्। कान्तेत्यादिना। १। प्रातःकालीन

वायुनाऽप्सरसां सुखानुभवः। आमोदेत्यादिना।१। अप्सरसां मुखेषु पीतमद-
स्वेदस्य शोभावर्णनम्। गतेत्यादिना।१। अप्सरसां रमणचिह्नस्य शोभावर्णनं॥

॥ इति नवमसर्गस्य तात्पर्यार्थः॥

---

॥ अथ दशमसर्गस्य सूचीपत्रम्॥

अथेत्यादिना।१। अर्ज्जुनप्रलोभनार्थमप्सरसां गमनम्। द्रुतेत्यादिना।१।
नितम्बभारेणाप्सरसां भूमौ शीघ्रगमनासामर्थ्यम्। निहितेत्यादिना।१। भूमाव
प्सरसाञ्चरणतलशोभावर्णनम्। ध्वनिरित्यादिना।१। तासां नूपुरशब्दवर्णन
म्। अवेत्यादिना।१। अर्जुनस्याश्रमे व्याघ्रादिहिंस्रजन्तून्दृष्ट्वा गन्धर्वाप्सरसा
म्भयम्। नृपेत्यादिना।१। अर्जुनाश्रमे तासान्तेजोहरणम्। सचकितमि
त्यादिना।१। अप्सरोभिर्भूमावर्जुनस्य पदचिह्नदर्शनम्। अतीत्यादिना।१
। आश्रमे फलपुष्पसमृद्धिदर्शनेनाप्सरोभिरर्जुनप्रभावज्ञानम्। मृदितेत्यादि
ना।१। अर्ज्जुनतपःस्थानस्याशोकवृक्षवर्णनम्। यमेत्यादि चिरेत्यन्तैः पञ्च
भिः।५। अप्सरोभिरर्ज्जुनस्य दर्शनं अर्जुनस्वरूपवर्णनञ्च। ननुमित्यादिना
।१। अर्जुनं दृष्ट्वा तासान्तद्विलोभनार्थं कृतयत्नवैफल्यज्ञानम्। मुनीत्यादिना।
१। अर्जुनविलोभनरूपस्येन्द्रनिदेशस्याप्सरोभिर्वैक्लभावज्ञानम्। अथेत्यादि
ना।१। अर्जुनस्य सौन्दर्यं दृष्ट्वाऽप्सरसां कामोद्भवः। सपदीत्यादिना।१।
गन्धर्वैरर्जुनस्य मोहनाय युगपत्सर्वेषामृतूनां प्रकाशनम्। सजलेत्यादि व्यथितमि
त्यन्तैश्चतुर्भिः।४। वर्षाकालवर्णनम्। अभीत्यादिना।१। अर्जुनचित्तस्या
विकारवर्णनम्। धृतेत्यादि मुकुलितेत्यन्तैश्चतुर्भिः।४। शरत्कालवर्णनम्।
अविरलेत्यादि निचयिनीत्यन्ताभ्याम्।२। हेमन्तकालवर्णनम्। कतीत्यादि
ना।१। शिशिरकालवर्णनम्। कुसुमेत्यादि श्वसनइत्यन्तैश्चतुर्भिः।४। वस-

न्ताकालवर्णनम् । प्रभवतीत्यादिना । १। अर्जुनस्य जितेन्द्रियत्ववर्णनम् । कायमित्यादिना । १। ग्रीष्मकालवर्णनम् । वलेत्यादिश्रुतीत्यन्ताभ्यां । २। ऋतूनामर्जुनविषये वैफल्यवर्णनम् । नदतीत्यादिना । १। अप्सरोभिरर्जुनस्य सौन्दर्य्यदर्शनम् । मुनिमित्यादिना । १। अर्जुनं दृष्ट्वाप्सरसां शृङ्गारभावः । प्रफुल्लमित्यादि अभिनयइत्यन्ताभ्याम् । २। तासाञ्चरणेषु पद्मभ्रमेण भ्रमराणाम्पतनम् । अविरलेत्यादिना । १। तासाञ्चरणालक्तकस्य वर्णनम् । न्यपेत्यादिना । १। अर्जुनम्प्रति तासां मनोऽभिलाषस्य व्यक्तताकरणम् । अभीत्यादिधृतेत्यन्ताभ्यां । २। अप्सरोभिरर्जुनं प्रति शृङ्गारचेष्टाव्यञ्जनम् । सखीत्यादिनहीहीत्यन्तैः षड्भिः । ६। कयाचिदप्सरसा सहरमणार्थमर्जुनम्प्रति कस्याश्चिदप्सरसो वचनम् । सललितेत्यादि असकलेत्यन्तैरष्टाभिः । ८। अर्जुनस्य मोहनार्थमप्सरसां नानाप्रकारकटाक्षपातादिरूपकामभावप्रकाशनम् । अलममित्यादि रुचिकरेत्यन्तैस्त्रिभिः । ३। अप्सरसामर्जुनमोहनासामर्थ्येन स्वीयस्वीयकटाक्षपातादीनां वैफल्यवर्णनम् । स्वयमित्यादिना । १। इन्द्राराधनार्थमर्जुनस्य तपस्या गन्धर्वैः सहाप्सरसाञ्च स्वस्थानगमनम् ॥

॥ इति दशमसर्गस्य तात्पर्य्यार्थः ॥

॥ अथ एकादशसर्गस्य सूचीपत्रं ॥

अत्र सर्गे अर्जुनेनेन्द्रस्य दर्शनम् । अथेत्यादिना । १। अर्जुनस्याश्रमे वृद्धमुनिवेषेणेन्द्रस्यागमनम् । मुनीत्यादि जरतीमीत्यन्तैः षड्भिः । ६। इन्द्रस्य वृद्धमुनिवेषवर्णनम् । अभितइत्यादिना । १। इन्द्रं दृष्ट्वा अर्जुनस्य महाहर्षः । आतिथेयीमित्यादिना । १। अर्जुनस्य पूजनेन परितुष्टस्येन्द्रस्यार्जुनम्प्रति कथनारम्भः । त्वयेत्यादिना । १। इन्द्रेणार्जुनस्य तपस्याप्रशंसा । प्रेयसीत्यादिना । १। इ

न्द्रेणार्जुनस्याकृतिप्रशंसा । शरदित्यादि अन्तकइत्यन्ताभ्याम् । २ । अर्जुनस
मोघमहेन्द्रेणसंसारनिन्दनम् । चित्तेत्यादिजयमित्यन्तैश्चतुर्भिः । ४ । अर्जुन
स्यतपस्विवेषंक्षत्रियवेषञ्च दृष्ट्वाइन्द्रस्यब्राह्मणक्षत्रियोभयसन्देहः । यइत्यादि
विविक्तमित्यन्तैरुनविंशतिभिः । १९ । अर्जुनम्प्रतिऐहिकयुद्धादिरूपफलार्थेत
पस्यादिकरणस्यनिन्दापूर्वकमिन्द्रेणयोगकथनम् । व्याहृत्येत्यादिना । १ । इ
न्द्रस्यकथनानन्तरंतम्प्रतिअर्जुनस्योत्तरकथनारम्भः । प्रसादेत्यादिइदमित्यन्तै
स्त्रिभिः । ३ । विशेषतोज्ञात्वाकथितवतइन्द्रस्यवाक्येऽर्जुनेनस्वस्यानस्थाकथन
म् । क्षत्रियइत्यादिना । १ । अर्जुनेनेन्द्रंप्रतिस्वनामजातिपितृनामादिकथनम्
। कच्चेत्यादिना । १ । व्यासस्यादेशात्स्वकीयतपस्याकरणकथनम् । दुरक्षानि
त्यादिउपाधत्तेत्यन्तैस्त्रिभिः । ३ । अर्जुनेनदुर्य्योधनादिकृतानांस्वीयापमाना
नांकथनम् । तामित्यादिअयथेत्यन्ताभ्याम् । २ । द्रौपद्याःदुःखवर्णनम् । सो
ढेत्यादिना । १ । युधिष्ठिरस्यसुस्वभावकथनम् । स्थितौत्यादिना । १ । सामा
न्यतोमानिजनानांचरित्रवर्णनम् । धात्रैत्यादिना । १ । दुर्य्योधनादीनांदुष्टता
कथनम् । अपेत्यादिना । १ । दुर्जनानांचरित्रकथनम् । [illegible]त्यादिअवेत्यन्ता
भ्याम् । २ । अर्जुनेनस्वकीयदुःखविज्ञापनम् । शक्तीत्यादिना । १ । मानहीन
स्यदुर्दशाकथनम् । अलंघ्यमित्यादिउदाहरणमित्यन्तैःषड्भिः । ६ । मानिज
नानांसर्वोत्कृष्टतावर्णनम् । नसुखमित्यादिना । १ । अर्जुनस्यधनादिषुस्वस्या
स्पृहाकथनम् । प्रमार्ष्टुमित्यादिना । १ । शत्रुनिग्रहमात्रेनिजस्पृहाकथनम् । अ
पेत्यादिवंशेत्यन्ताभ्याम् । २ । शत्रुनिग्रहस्यावश्यकत्वकथनम् । अजन्मेत्या
दिकृतमित्यन्तैस्त्रिभिः । ३ । शत्रुनिग्रहकरणाक्षमाणान्दोषकथनम् । ग्रसेत्या
दिना । १ । तेजस्विपुरुषस्यगुणकथनम् । यथेत्यादिना । १ । युधिष्ठिरस्य
स्वस्मिन्दुर्य्योधनादिजयस्याशाकथनम् । सइत्यादिना । १ । इन्द्रंप्रत्यर्जुनेन

भर्तुराक्लेशस्याकरणेदोषकथनम् । कथमित्यादिना । १। यौवनकाले शत्रुनिग्रहस्यावश्यकर्त्तव्यताकथनम् । आशङ्केत्यादिना । १। स्वमातुः कुन्त्या भ्रातुर्युधिष्ठिरस्य च शत्रुनिग्रहमकृत्वा धर्म्ममात्रकरणेऽननुमतिकथनम् । स्वधर्म्ममित्यादिना । १। क्षत्रियाणां स्वधर्म्मादेव शत्रूणां भयजननकथनम् । विच्छिन्नेत्यादिना । १। इन्द्राराधनं कृत्वा दुर्य्योधनादीनां निपातनरूपनिजमनोभिलाषस्य कथनम् । इतीत्यादिना । १। एवमर्ज्जुनस्य वाक्यं श्रुत्वा परितुष्टेनेन्द्रेणार्ज्जुनमालिङ्ग्य तं प्रति शिवाराधनार्थमुपदेशकथनम् । प्रीतइत्यादिना । १। शिवाराधनस्य फलं कथयित्वा इन्द्रस्यान्तर्द्धानम् ॥

॥ इत्येकादशसर्गस्य तात्पर्य्यार्थः ॥

---

॥ अथ द्वादशसर्गस्य सूची ॥

अथेत्यादिना । १। इन्द्रस्यादेशं प्राप्य शिवस्याराधनार्थमर्ज्जुनस्य तपस्याकरणारम्भः । अभीत्यादि तपसेत्यन्तैः पञ्चभिः । ५। तस्य तपस्यावर्णनम् । ज्वलतइत्यादिजपतइत्यन्ताभ्यां । २। तस्य तपस्यया तेजोवृद्धिवर्णनम् । कवचमित्यादिना । १। तस्य तपस्याकालीनावस्थावर्णनम् । प्रविवेशेत्यादिना । १। तेजसा तस्य शैरववर्णनम् । परीत्यादि तमुदीत्यन्तैश्चतुर्भिः । ४। अर्ज्जुनस्य तेजोवर्णनम् । महतामित्यादि नददाहेत्यन्ताभ्यां । २। अन्यतापसैरतितेजस्विनोऽर्ज्जुनस्य दर्शनम् । विनयइत्यादिना । १। मुनीनां शिवनिकटगमनम् । परीत्यादिना । १। शिवस्यातितेजोमयत्वात्तस्य दर्शने मुनीनां प्रथमतोऽसामर्थ्यम् । अथेत्यादिना । १। शिवस्य स्तवं कृत्वा मुनिभिस्तेजोमध्यवर्त्तिशिवदर्शनम् । ककुदेइत्यादिस्तुतेत्यन्तैः पञ्चभिः । ५। शिवस्य स्वरूपवर्णनम् । वज्रभिरित्यादि मुखयइत्यन्ताभ्यां । २। मुनिभिः शिवं प्रत्यर्ज्जुनस्य तपस्यावृत्तान्तकथनारम्भः । तरसेत्यादि किमित्य

न्तैःषड्भिः । ६ । शिवंप्रतिमुनिभिरर्जुनस्यतपस्यास्वरूपतेजसांकथनम् । इतीत्यादिना । १ । मुनीनांवाक्यानन्तरन्तान्प्रतिशिवस्यकथनारम्भः । बदरीत्यादिश्लोकमित्यन्तैस्त्रिभिः । ३ । मुनीन्प्रतिशिवेनकृष्णार्जुनयोःस्वरूपकथनम् । सुरेत्यादितपसेत्यन्तैश्चतुर्भिः । ४ । किरातरूपेणार्जुनस्यनिकटङ्गत्वातस्यविक्रमदर्शनार्थंमुनीन्प्रतिशिवस्योक्तिकरणम् । इतीत्यादिवृहद्दिव्यन्तैस्त्रिभिः । ३ । शिवेनगृहीतस्यकिरातवेषस्यवर्णनम् । अन्वित्यादिना । १ । शिवगणैःसैन्यवेषधारणंतस्यवर्णनं । विरचय्येत्यादिना । १ । किरातरूपिणाशिवेनसहसैन्यवेषधारिणांगणानांमृगयाचरणार्थंप्रस्थानम् । क्षुभितेत्यादिना । १ । सैन्यभयेनमृगपक्षिणांशब्दवर्णनम् । नेत्यादिना । १ । मृगपक्षिणामतिशयभीतिवर्णनम् । चमरीत्यादिना । १ । चमरीनामपशुविशेषाणाम्भयेनधृतितावर्णनम् । हरेत्यादिना । १ । सिंहैःसभयंशिवसैन्यदर्शनम् । विमर्दमित्यादिना । १ । शिवसैन्यगणेननदीनांजलस्यसौगंध्यवर्णनम् । महिषेत्यादिना । १ । सैन्यमहिषादिभग्नतमालादिगन्धयुक्तवायुवर्णनम् । मथितेत्यादिना । १ । सैन्यैःसरोवरादीनांलोडनम् । इतीत्यादिना । १ । एवंप्रकारेणसैन्यैः[illegible]वर्णनम् । शिवस्यार्जुनतपःस्थानगमनञ्च । सन्नमित्यादिना । १ । शूकररूपधारिणोदानवस्यपश्चात्किरातरूपिणःशिवस्यगमनम् । कच्छान्तइत्यादिना । १ । गङ्गातीरेसैन्यगणान्स्थापयित्वाकतिपयकिरातैःसहकिरातरूपिणःशिवस्यशूकरस्यपश्चादर्जुनस्यसन्मुखेउपस्थितिः ॥

॥ इतिद्वादशसर्गस्यतात्पर्यार्थः ॥

॥ अथत्रयोदशसर्गस्यसूचीपत्रं ॥

वपुरित्यादिना । १ । अर्जुनेनतस्यशूकरस्यदर्शनम् । स्फुटेत्यादिना । १ । म

ञ्चभयानकशूकरं दृष्ट्वा सभयस्यार्ज्जुनस्य वितर्ककरणारम्भः। घनेत्यादिकुर्विन्त्यं
तैरेकादशभिः। ११। भयानकमूर्त्तिं किरातरूपिणं शिवं दृष्ट्वाऽतिदुर्वृत्तं शूकर
ञ्च दृष्ट्वाऽर्जुनस्य वितर्कः। इतीत्यादिना। १। तस्य हननार्थमर्ज्जुनेन धनुर्वाण
ग्रहणम्। अनुभावेत्यादिभ्यां। २। अर्ज्जुनेन धनुर्विवाणयोगे सति इन्द्रकीलस्य
लोकानां भयम्। ददृश इत्यादिना। १। सविस्मयेन शिवेनार्जुनदर्शनम्। वि
चकर्षेत्यादिना। १। किरातरूपिणा शिवेन धनुराकर्षणम्। स इत्यादिना। १
। ससज्जयोः शिवार्जुनयोर्मध्ये शूकरस्योपस्थितिः। अथेत्यादिना। १। शि
वधनुषो वाणपतनम्। व्रजत इत्यादिना। १। वाणशब्दस्य वर्णनम्। अपयन्नि
त्यादिना। १। शूकरशरीरं प्रविशतो वाणस्य लोकैर्द्दर्शनम्। स इत्यादिना। १
तस्य वाणस्य पृथिवीप्रवेशः। सपदीत्यादिना। १। अर्ज्जुनवाणस्याकाशगमन
म्। १। परमेत्यादिना। १। शब्दं कृत्वा अर्ज्जुनवाणस्य पुनःपतनम्। अविभा
वितेत्यादिना। १। तद्वाणेन शूकरशरीरवेधः। स इत्यादिना। १। महादे
वेन विद्धस्य शूकरस्यार्ज्जुनवाणेन वेधः। अविवेकेत्यादिना। १। शिवार्ज्जुनयो
र्वाणाभ्यां शूकरस्यावसादः। अथेत्यादिना। १। अवसन्नस्य शूकरस्य भूमौ पत
नम्। स इत्यादिना। १। शूकरस्य प्राणत्यागः। स्फुटेत्यादिना। १। विद्धवा
णस्य ग्रहणार्थमर्जुनस्य शूकरनिकटागमनम्। उपकार इत्यादिना। १। वार
णस्यादर्शनम्। स इत्यादिना। १। अर्जुनेन स्वकीयवाणदर्शनम्। तत्रेत्यादि
ना। १। शिवानुचरस्य धनुर्वाणहस्तस्य कस्यचित्किरातस्यार्जुनेन दर्शनम्। स
इत्यादिना। १। शिववाणविद्धस्य शूकरस्य वेधेन मनसि क्रुद्धस्य शिवानुचरकि
रातस्यार्ज्जुनं प्रति सान्त्वपूर्वकं कथनारम्भः। शान्तेत्यादिसह्यमित्यन्तैः षट्त्रिंश
द्भिः। ३६। अर्ज्जुनं प्रति शिवानुचरकिरातस्य स्तुतिपूर्वकम्भाषणम्॥

॥ इति त्रयोदशसर्गस्य तात्पर्य्यार्थः॥

K 5

## ॥ अथचतुर्द्दशसर्गस्यसूची ॥

ततइत्यादिना।१। किरातस्योद्धतवाक्यंश्रुत्वाऽर्जुनस्यक्रोधवर्णनम्। अशे-
षमित्यादिना।१। किरातम्प्रत्यर्जुनस्यकथनारम्भः। विविक्तेत्यादिस्तुवन्तीत्य-
न्तैस्त्रिभिः।३। गुणवतांवाक्यवर्णनम्। समस्येत्यादिना।१। शिवदूतंकिरातंप्र-
त्यर्जुनेनतस्यवाक्यप्रशंसाकरणम्। प्रयुज्येत्यादिमयेत्यन्तैरेकोनविंशतिभिः।१९।
तम्प्रत्यर्जुनस्यसाहङ्कारवाक्यम्। इतीत्यादिना।१। अर्जुनस्यैवंप्रगल्भवाक्यंश्रु-
त्वाशिवदूतस्यशिवनिकटगमनम्। ततइत्यादिना।१। शिवस्याज्ञयासैन्यानां
गमनम्। रणायेत्यादिना।१। सैन्यवायुवर्णनम्। जयेत्यादिना।१। धनुर्गु-
णशब्दवर्णनम्। निशातेत्यादिना।१। सैन्यानामक्षोभावर्णनम्। उदूढेत्या-
दिना।१। सैन्यमध्येशिवशरीरवर्णनम्। सुगेषुइत्यादिना।१। सैन्यव्याप्तस्यव-
नस्यवर्णनम्। तिरोहितेत्यादिना।१। किरातसैन्यभारेणपृथिव्यानम्रतावर्ण-
नम्। पृथ्वित्यादिना।१। सैन्यवाहुल्यवर्णनम्। ततइत्यादिगुर्वित्यन्तैरष्टाभिः
।८। अर्जुनस्यतात्कालीनरूपवर्णनम्। किरातसैन्यानामर्जुननिकटगमनञ्च।
यथेत्यादिना।१। अर्जुनतेजसाकिरातानांतेजोहरणम्। ततइत्यादिना।१
अर्जुनम्प्रतिकिरातसैन्यानांयुगपदस्त्रक्षेपः। किरतेत्यादिविधूनयन्नित्यन्तैस्त्रिभिः
।३। किरातसैन्यक्षिप्तानांवाणानामर्जुनोपरिसमकालीनपतनम्। त्रयीमित्या-
दिना।१। अर्जुनस्ययुद्धोद्योगः। पतदित्यादिना।१। किरातसैन्यम्प्रतिक्रो-
धेनार्जुनस्यदृष्टिपातः। दिशइत्यादिना।१। क्रुद्धस्यार्जुनस्ययुद्धार्थंगमन-
म्। विमुक्तमित्यादिद्विषामित्यन्तैःपञ्चभिः।५। किरातसैन्यानिप्रतिअर्जुनस्य
नानाप्रकारवाणक्षेपप्रकारवर्णनम्। समुज्झितेत्यादिअजिह्ममित्यन्ताभ्यां।२
अर्जुनवाणघातेनकिरातसैन्यानामवसन्नतावर्णनम्। शिवेत्यादिना।१। किरा-

नसैन्यैः सभार्यायुद्धे भयानकस्यार्जुनस्य दर्शनम् । मुनेरित्यादिना । १ । अर्जुनस्य बाणवेगेन किरातसैन्यानां मण्डनाकारभ्रमणम् । तपइत्यादि जयेनेत्यन्तैस्त्रिभिः । ३ । किरातसैन्यानामर्जुनं प्रति वितर्कः । अमर्षिणेत्यादिना । १ । किरातसैन्यानां युद्धे निरस्ततावर्णनम् । प्रतीत्यादिना । १ । किरातसैन्यानां म्लाननतावर्णनम् । प्रविततइत्यादिना । १ । जयलक्ष्म्याः किरातसैन्येषु पक्षपातत्यागः ॥

॥ इति चतुर्दशसर्गस्य तात्पर्य्यार्थः ॥

॥ अथ पञ्चदशसर्गस्य सूचीपत्रं ॥

अथेत्यादिना । १ । अर्जुनस्य बाणसन्धाने प्राणिनां भयोत्पत्तिः । शिवसैन्यानां पलायनञ्च । अपश्यद्भिरित्यादिना । १ । शिवसैन्यानां युद्धान्निवृत्तिवर्णनम् । खण्डितेत्यादिना । १ । युद्धात्पलायितेषु अर्ज्जुनस्य दयाप्रकाशः । आस्थामित्यादिना । १ । दयाद्वारं महतां महत्त्वस्य प्रकाशवर्णनम् । सइत्यादिना । १ । धनुर्बाणहस्तस्यार्जुनस्य युद्धस्थले क्रीडावर्णनम् । त्रासेत्यादिना । १ । भीतानां किरातसैन्यानां हननार्थमर्ज्जुनस्य मन्दोद्योगवर्णनम् । अथेत्यादिना । १ । अतिभीतान् सैन्यगणान् प्रत्याश्वासार्थं कार्त्तिकेयस्य कथनारम्भः । मेत्यादिना । १ । भययुक्तांस्तान् प्रति युद्धकरणार्थं कार्त्तिकेयस्यादेशः । विवस्वदित्यादिना । १ । कार्त्तिकेयेन किरातानां युद्धोत्साहवर्द्धनम् । वनइत्यादिना । १ । कार्त्तिकेयेन तान् प्रति वीराणां युद्धकरणं विना अकीर्त्तिप्रकाशस्य विज्ञापनम् । पातित्येत्यादिना । १ । किरातान् प्रति कार्त्तिकेयेन युद्धनिवृत्तिदोषकथनम् । नासुरइत्यादिभ्याम् । २ । तान् प्रति कार्त्तिकेयेन अर्ज्जुनेनावज्ञया किरातानां हननकथनम् । नूनमित्यादिना । १ । क्षुद्रशत्रुतो भीतस्य कापुरुषताकथनम् । स्वामिनि जनेयुद्धे वर्त्तमाने सति तत्सहचराणां युद्धात्पलायमानस्यानौचित्यकथनञ्च ।

यरमित्यादिना । १ । कार्त्तिकेयेन किरातान्प्रति गुणहीनपुरुषस्य दोषकथनम्
। स्यन्दनाइत्यादिना । १ । रथघोटकगजादीनन दृष्ट्वा कार्त्तिकेयेन किरातान्प्रतिक
थनं । भवद्भिरित्यादिना । १ । युद्धात्पलायमानेन किरातान्प्रति कार्त्तिकेन निन्दा
करणम् । वेनेत्यादिना । १ । तान्प्रति कार्त्तिकेयस्य युद्धकरणार्थमादेशः । त्रय
मित्यादिना । १ । सैन्यरक्षणार्थं शिवस्य वाञ्छाकथनम् । नन्वित्यादिना । १ । कि
रातान्प्रति वीराणां युद्धकरणादात्मशुद्धिकथनम् । किमित्यादिना । १ । किरातान्प्र
ति कार्त्तिकेयस्याक्षेपोक्तिः । निशितारिरित्यादिनानुवेत्यन्ताभ्याम् । २ । कार्त्तिकेये
न किरातान्प्रति अर्ज्जुनस्य सारूप्यकथनम् । विभिन्नेत्यादिससन्वेत्यन्तैश्चतुर्भिः । ४
। युद्धस्थलवर्णनम् । आसुरेइत्यादिना । १ । युद्धपराङ्मुखान्किरातान्प्रति का
र्त्तिकेयस्य भर्त्सनम् । इतीत्यादिना । १ । एवंप्रकारेण किरातान्प्रति कार्त्तिकेयेशास
नं कुर्वति सति शिवस्य हास्यम् । मुनीत्यादिना । १ । भीतानां किरातानां शिवेन तोषण
म् । दूनाइत्यादिना । १ । शिवं प्रति कल्याणकरत्वेन तेषां ज्ञानम् । महेष्वित्यादिं
ना । १ । शिवम्प्राप्य किरातसैन्यानामाश्वासः । सबभारेत्यादिना । १ । स्वपक्षात्सै
न्यानि स्थापयित्वा शिवस्य युद्धस्थलेऽवस्थितिः । मुनीत्यादिना । १ । महादेव
नार्ज्जुनोपरि बाणवर्षणं कालेन तस्य शब्दवर्णनम् । तद्गणाइत्यादिना । १ । विस्मया
पन्नैः शिवगणैः शिवार्ज्जुनयोर्युद्धदर्शनम् । परीत्यादिभ्यां । २ । शिवेनार्ज्जुनस्य बा
णच्छेदनम् । चारेत्यादिना । १ । शिवस्य वर्णनम् । स्फुरदित्यादिना । १ ।
धनुर्बाणेन शिवशोभावर्णनम् । पार्थेत्यादिना । १ । अर्ज्जुनबाणैः शिवबाणानामा
च्छादनम् । शरेत्यादिना । १ । शिवेन बाणैः सूर्य्यपथरोधनम् । तेनेत्यादिना ।
१ । शिवेनार्ज्जुनस्य बाणनिवारणम् । दुर्विषदित्यादिना । १ । बाणाग्रेणाग्निदी
प्तिवर्णनम् । विलंघ्येत्यादिना । १ । अर्ज्जुनस्य शौर्य्यवर्णनम् । जगतीत्यादि
ना । १ । सुमेरुवर्णनं वासुकिवर्णनमर्ज्जुनवर्णनञ्च । तिपतीत्यादिसइत्यन्ता

–  भ्यम् । २ । शिवेऽस्त्रवैफल्येनार्जुनस्यक्रोधवर्णनम् । अनघइत्यादिना । १ ।
अर्जुनंप्रतिशिवेनबाणप्रेरणम् । शम्भोरित्यादिना । १ । शिववाणनिवारणा
र्थमर्जुनेननिजबाणश्रेणीक्षेपणम् । घनमित्यादिना । १ । शिववाणेनार्ज्जुनवा
णस्यनिवारणम् । रुजन्नित्यादिना । १ । मुनिभिरर्जुनस्यविक्रमदर्शनम् ।
विकार्शमित्यादिना । १ । शिववाणानाम्प्रकाशेनप्रमथादिगणानामानन्दः । संप
श्यतामित्यादिना । १ । परमेश्वरेणशिवेनसहयुद्ध्यमानमर्जुनंदृष्ट्वामुनिनांवि
स्मयेनरोमोद्गमः ॥

॥ इतिपञ्चदशसर्गस्यनानार्थ्यार्थः ॥

---

॥ अथषोडशसर्गस्यसूची ॥

ततइत्यादिना १ । किरातरूपिणःशिवस्यातिशयदुःसहयुद्धंदृष्ट्वाविस्मितस्यार्जु
नस्यमनसिवि तर्कारम्भः । मदेइत्यादिइयमित्यन्तैःपञ्चदशभिः । १५ ।
अर्जुनस्यनानाप्रकारवितर्कः । मायेत्यादिपरस्येत्यन्तैःपञ्चभिः । ५ । किराता
नांयुद्धेनैपुण्यंसकौयगाण्डीवनाम्नोधनुषःकुण्ठितत्वञ्चदृष्ट्वामहाबलस्यार्जुन
स्यसंशयः । अप्राकृतस्येत्यादिसइत्यन्ताभ्याम् । २ । प्रस्वापननाम्नाऽस्त्रेणकि
रातानांनिपातनम् । मनसिविचिन्त्यार्जुनेनप्रतिसापनास्त्रस्यक्षेपः । प्रसक्तेत्यादि
ना । १ । प्रस्वापनास्त्रजनितयाश्यामवर्णयाच्छाययाकिरातसैन्यानामाच्छादन
म् । आसादितेत्यादिध्वंसस्यैरित्यन्तैश्चतुर्भिः । ४ । प्रस्वापनास्त्रेणकिरातानांनि
द्राविह्वलत्ववर्णनम् । तिरोहितेत्यादिना । १ । शिवस्यमस्तकात्तेजःप्रकाशः ।
छायामित्यादिना । १ । तामन्धकारमयीञ्छायांदूरीकर्त्तुंशिवशिरस्तेजसःप्रका
शः । त्विषामित्यादिभ्यां । २ । तत्तेजसाकिरातानाम्पुनःशस्त्रग्रहणम् । द्यौरित्या
दिना । १ । दिगादीनाम्प्रसन्नतावर्णनं । महेत्यादिना । १ । तेषांवन्धनायरज्जु

स्वरूपभुजङ्गपाशनामास्त्रस्यार्जुनेनप्रक्षेपणम् । निह्नुत्यादिदिगित्यन्ताभ्यां । २ भुजङ्गपाशनामास्त्राणामाकाशेशोभावर्णनम् । निःश्वासेत्यादिना । १ । भुजङ्गपाशैःसूर्य्यपथाक्रमवर्णनम् । प्रतप्तेत्यादिना । १ । तदस्त्रतेजसादिशांशोभावर्णनम् । आक्षिप्तेत्यादिना । १ । तदस्त्रव्याप्तस्याकाशवर्णनम् । तमित्यादिना । १ । गरुडास्त्रद्वाराशिवेनभुजङ्गपाशस्यनिवारणं । प्रतीत्यादिप्रवृत्तेत्यन्तैःपञ्चभिः । ५ । गरुडास्त्राणाम्प्रभाववर्णनम् । स इत्यादिना । १ । शिवगरुडास्त्रेणार्जुनास्त्रभुजङ्गपाशनामास्त्रस्यनाशनम् । साफल्यमित्यादिना । १ । भुजङ्गपाशेव्यर्थेसतिअर्जुनेनपुनःपावकास्त्रस्यग्रहणम् । ऊर्द्धमित्यादिना । १ । अर्जुनक्षिप्तपावकास्त्रस्यशत्रुसैन्येषुपतनम् । भित्त्वेत्यादिमुक्तैरित्यन्तैस्त्रिभिः । ३ । पावकास्त्रस्यतेजःप्रभावादिवर्णनम् । विलिक्षतीत्यादिना । १ । पावकास्त्रनिवारणार्थेशिवेनवारुणास्त्रप्रक्षेपणम् । ततइत्यादिना । १ । वारुणास्त्रप्रक्षेपणमेघानांवृष्टिकरणम् । परस्हतेत्यादिउपेतीत्यन्तैःषड्भिः । ६ । वारुणास्त्रजनितवामेघवृष्ट्यावह्निरूपास्त्राणांनिर्वाणतावर्णनम् । अथेत्यादिना । १ । आकाशेनीलोत्पलसमूहदृष्टान्तेनमेघशोभावर्णनम् । इतीत्यादिना । १ । अर्जुनेनक्रमशःक्षिप्तानामस्त्राणांशिवेनैवंप्रकारेणनिवारणम् । वीतेत्यादिना । १ । निजास्त्रेषुएवंशिवेननाशितेषुसत्सुपुनरर्जुनस्ययुद्धेजयार्थमाकांक्षावर्णनम् ॥

॥ इतिषोडशसर्गस्यतात्पर्य्यार्थः ॥

॥ अथसप्तदशसर्गस्यसूची ॥

अथेत्यादिसंस्कारैरित्यन्तैःषड्भिः । ६ । शिवेनमाययाऽर्जुनस्यान्येषुअस्त्रेषुअपहृतेषुसत्सुअर्जुनस्यकेवलंबाणेषुजयाशावर्णनम् । भूयइत्यादिना । १ । क्रोधेनार्जुनस्याश्रुपातः । तस्येत्यादिना । १ । युद्धश्रमेणार्जुनस्याङ्गात्घर्म्मजलपत

नम्। क्रोधेत्यादिना। १। तस्यक्रोधेनभ्रुविकारवर्णनम्। सइत्यादिना। १।
बाणद्वाराऽर्जुनेनकिरातसैन्यपातनम्। सइत्यादिउभेत्यन्ताभ्याम्। २। शिवश
रीरेअर्ज्जुनबाणानांवैफल्यवर्णनम्। संप्रीयमाणइत्यादितस्मैइत्यन्ताभ्यां। २
। शिवेनप्रीतिपूर्वकमर्जुनस्यपराक्रमसहनम्। प्रत्याहतेत्यादिएवमित्यन्तैश्च
तुर्भिः। ४। अर्जुनस्ययुद्धनैपुण्यशिक्षार्थंतेनसहशिवस्ययुद्धकरणम्। मुले
रित्यादिवित्रस्तइत्यन्ताभ्याम्। २। अर्जुनबाणैःकिरातसैन्यानांव्यसनावर्णनम्
। सइत्यादिना। १। किरातसैन्यैःसभयमर्जुनदर्शनम्। क्षोभेणेत्यादिना। १।
शिवस्याकारवैरूप्यवर्णनम्। प्रऐदिवांसमित्यादिना। १। अर्जुनप्रतिशिव
स्यक्रोधवर्णनम्। विस्फार्य्येत्यादिना। १। शिवेनधनुषिगुणारोपणम्। सव्ये
त्यादिना। १। शिवधनुषःशब्दवर्णनम्। निजघ्निरेइत्यादिसोढेत्यन्तैस्त्रिभिः
। ३। शिवबाणाघातेनछिन्नानामर्जुनबाणानांभूमौपतनम्। अलंकृतानामित्या
दिना। १। स्वबाणच्छेदेनार्जुनस्यक्रोधः। बाणेत्यादिना। १। अर्जुनबाणान्
छित्वाशिवबाणानांभूमौपतनम्। चित्रीयेत्यादिना। १। अर्जुनेनकिरातानांहृ
दयेषुबाणखननम्। नसेत्यादिना। १। शिवेनस्वबाणद्वाराऽर्जुनबाणानांवा
रणम्। अनामृशन्तइत्यादिना। १। शिवबाणाघातेनार्जुनस्यसुखज्ञानम्।
अस्त्रैरित्यादिना। १। अर्जुनस्यबाहुबलंज्ञात्वाशिवेनस्वसैन्यावलम्बनम्। त
तइत्यादिना। १। युद्धसमापनार्थंशिवेनार्जुनस्यतूणाद्बाणानामपहरणम्
। रिक्तेइत्यादितेनेत्यन्तैःपञ्चभिः। ५। बाणग्रहणार्थंशून्यतूणेहस्तमर्पयित्वाबा
णानप्राप्यअर्जुनस्यविषण्णतावर्णनम्। प्रतीत्यादिना। १। अर्जुनेनदुःखात्
तूणाद्धस्तोत्तोलनम्। पश्चादित्यादिना। १। अर्जुनेनबाणानामपहरणज्ञा
नम्। तमित्यादिना। १। अर्जुनोपरिशिवस्यबाणाघातः। जहारेत्यादिना।
१। शिवेनबाणद्वारातस्यशरीरात्कवचापहरणम्। कोपेनादिविरोधीत्यन्ता

म्यामु। २। कवचहीनार्जुनशरीरस्यतेजोवर्णनम्। अचिन्तितेत्यादिना। १। शून्यतूणद्वयस्यभूमिपतनम्। स्थितमित्यादिना। १। शिवस्यशस्त्राघातेनार्जुनस्यशरीरखननम्। संरम्भेत्यादिना। १। स्वशरीरेशत्रुवाणपातादर्जुनस्यक्रोधवृद्धिः। ततइत्यादिसार्धमित्यन्ताभ्यां। २। अतिक्रुद्धेनार्जुनेनशिवशरीरेधनुराघातः। रयेणेत्यादिना। १। शिवपुत्रेणकार्तिकेयेनस्ववक्षसितद्धनुषोधारणम्। विकार्मुकइत्यादिना। १। शिवेनार्जुनोपरिवाणक्षेपणम्। कपोढेत्यादिना। १। शिवबाणेनार्जुनस्यपरितापवर्णनम्। ततइत्यादिना। १। तदनन्तरमर्जुनेनखड्गग्रहणम्। शरानित्यादिना। १। अर्जुनेनखड्गद्वाराशिवबाणानांछेदनम्। यशेत्यादिना। १। युद्धेअर्जुनस्यतेजोवर्णनम्। शिवेत्यादिना। १। शिवस्यवाणाघातेनार्जुनहस्तात्खड्गस्यपतनम्। आक्षिप्तेत्यादिना। १। भूमिपतितस्यखड्गस्यशोभावर्णनम्। सइत्यादिना। १। अर्जुनेनशिवोपरिकरकावृष्टिकरणम्। नीरंध्रेइत्यादिना। १। शिवंप्रतिअर्जुनेनवृक्षादिक्षेपणम्। निश्शेषमित्यादिना। १। शिवेनार्जुनक्षिप्तवृक्षादीनांदशदिक्षुप्रक्षेपणम्। कन्यजजञ्जलिमित्यादिना। १। अतिक्रुद्धेनार्जुनेनशिवस्यशिरोभुजयोराघातकरणम्। ग्लौरित्यादिना। १। भक्तवत्सलतयाशिवेनार्जुनस्यदुर्णयसहनम्॥

॥ इतिसप्तदशसर्गस्यतात्पर्यार्थः॥

---

॥ अथाष्टादशसर्गस्यसूची॥

ततइत्यादिनिपतितइत्यन्तैःषड्भिः। ६। शिवार्जुनयोर्मुष्टियुद्धवर्णनम्। अभीत्यादिवियतीत्यन्तैःषड्भिः। ६। शिवार्जुनयोर्मल्लयुद्धवर्णनम्। विस्मितइत्यादिना। १। अर्जुनस्यवाक्ष्वीर्यंदृष्ट्वाशिवस्यानिस्मयः। त्रपत्रेत्यादिना।

१। अर्जुनंप्रतिशिवस्यतोषणम्। अथेत्यादिना। १। शिवंज्ञात्वातम्प्रतिअर्जुनस्यप्रणामः। महेत्यादिना। १। शिवंदृष्ट्वाऽर्जुनस्यविस्मयः। सुषिचुरित्यादिना। १। आकाशात्पुष्पादिवृष्टिः। आसेदुषामित्यादिद्वंद्वाइत्यन्ताभ्यां। २। आकाशपथेनेन्द्रादिदेवगणानामागमनम्। मुदितेत्यादिना। १। वायुनायुद्धश्रान्तस्यशिवस्यसेवनम्। कृतेत्यादिना। १। अर्जुनेनशिवस्यस्तवकरणारम्भः। शरणमित्यादिअसम्विदामित्यन्तैर्विंशतिभिः। २०। अर्जुनकर्तृकशिवस्यस्तवः। आक्षिप्येत्यादिना। १। शत्रुजयकरणार्थेशिवंप्रत्यर्जुनस्यप्रार्थना। इतीत्यादिना। १। अतितुष्टेनमहादेवेनार्जुनायपाशुपतास्त्रस्यदानम्। धनुर्विद्याशिक्षणञ्च। सपिङ्गाक्षेइत्यादिना। १। शिवंस्तुत्वास्तूयैणार्जुननिकटगमनम्। अथेत्यादिना। १। शिवस्याज्ञांप्राप्यइन्द्रादिदिक्पालैरर्जुनायास्त्रसमूहदानम्। असंहार्य्यैरित्यादिना। १। देवगणैरर्जुनस्यप्रशंसनम्॥

॥ इत्यष्टादशसर्गस्यतात्पर्य्यार्थः ॥

॥ इतिकिरातार्जुनीयनामग्रन्थस्यस्थूलतात्पर्य्यार्थःसमाप्तः ॥

॥ सन १८१४ ता० ३० अगस्त ॥

## ॥ अथकिरातार्ज्जुनीयकाव्यस्याशुद्धशुद्धिपत्रम् ॥

| पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|
| ४ | २ | ४ | सत्संर्ग | सत्संसर्ग |
| ५ | २ | ४ | मुपसंख्यान् | ङुपसंख्यान् |
| ५ | २ | ११ | बन्धुता | बन्धुताम् |
| ६ | १ | २० | शङ्क्याह्न | शङ्क्याह |
| ७ | १ | ३ | न्मत्र | न्मन्त्र |
| ७ | २ | ९ | जिरे | जिरम् |
| ८ | १ | १० | वाधे | वाधं |
| ८ | २ | ११ | सञ्चरिते | सञ्चरितै |
| ८ | २ | १७ | सञ्चरितेः | सञ्चरितैः |
| ९ | १ | ९ | मानने | माननम् |
| ९ | १ | १७ | कर्माणि | कर्म्मणि |
| ९ | २ | ८ | स्फुट | स्फुटः |
| १० | १ | ३ | यावान् | यावत् |
| १० | २ | १० | तिशम्य | निशम्य |
| १२ | १ | १७ | पदाजाति | पदाज्याति |
| १२ | २ | १२ | न्युत्सहसे | नुत्सहसे |
| १४ | १ | १० | शान्ति | शान्तिं |
| १५ | १ | ११ | स्योद्दीप | स्योदीय |
| १५ | १ | १३ | स्योद्दीप | स्योदीय |
| १५ | १ | १७ | प्रथते | प्रथन्ते |

॥ कि० का० ॥
॥ शु० पं० ॥
॥ १ ॥

| पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|
| १७ | १ | ९ | दर्पीच्छा | टपीच्छां |
| १७ | १ | ८ | यदा | पटा |
| १८ | [illegible] | ६ | स्वगता | समगता |
| २१ | १ | ८ | मनिनते | नभियान् |
| २१ | १ | ११ | मिमपेक्ष | क्रिमवेक्षः |
| २१ | १ | १५ | वृ[illegible] | वृद्धिं |
| २१ | २ | ६ | [illegible]० [illegible] | लिङ्० लिङ् |
| २१ | २ | १८ | [illegible] | लिगग्रहेन |
| २२ | २ | ३ | ग्रनमा | नग्नपा |
| २३ | १ | १ | इत्य | इत्यं |
| २३ | १ | ८ | ग्रविग्रम | ग्रमिग्रत्र |
| २४ | २ | २ | [illegible]गमः | [illegible] |
| २४ | २ | ५ | श्रोत्य | [illegible] |
| २४ | २ | १३ | [illegible] | [illegible] |
| २४ | २ | २० | [illegible] | [illegible] |
| २५ | १ | १५ | [illegible] | [illegible] |
| २५ | २ | १२ | [illegible]० [illegible] | रक्षा० [illegible] |
| २५ | २ | १७ | [illegible] | रक्षा |
| २६ | १ | ७ | दाग्नरीरे | चाग्नरीरे |
| २६ | २ | ५ | ग्रापाद्यो | ग्रपाद्यो |
| २६ | २ | ७ | निम्रान | निम्रामन |

| पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|
| ३० | २ | १४ | उधामा | उपधामि |
| ३१ | २ | ७ | प्रयोन | प्रयोजन |
| ३१ | २ | २० | द्वैयापनेन | द्वैपायनेन |
| ३२ | १ | २ | वक्षमाण | वक्ष्यमाण |
| ३२ | १ | ७ | वेतो ० ङीप् | वीतो ० ङीष् |
| ३२ | १ | ८ | समाधय | समाधाय |
| ३२ | २ | ४ | राज्ञा | राज्ञः |
| ३२ | २ | ६ | मगुणाल्व | मगुणाल्व |
| ३२ | २ | ११ | कार्या | कर्या |
| ३२ | २ | २० | अप्रकाश | अप्रकाशन |
| ३३ | २ | २ | चेति | वेति |
| ३४ | १ | १४ | घेस ० घस्ना | घस्लृ ० घस्लृश्वा |
| ३४ | २ | १ | मृत्यु | मृत्युर |
| ३४ | २ | ७ | ग्रेमंथि | रोमंथ |
| ३४ | २ | ८ | क्यप् | क्यङ् |
| ३५ | १ | ३ | ञ्जन | ञ्जन |
| ३५ | १ | ६ | सदस | सदवस |
| ३५ | २ | १८ | सम्प्रसयः ० वङ्ग | शत्रादेशः ० वस्य |
| ३६ | १ | ३ | प्रसन्नये | प्रसनये |
| ३६ | १ | १० | प्रसन्नये | प्रसनये |
| ३६ | २ | ११ | हृथो | ऋथो |

| पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|
| ३६ | २ | १७ | घ्राभ्यो | घ्राह्लीभ्यो |
| ३७ | १ | १७ | स्यानं | स्थानं |
| ३७ | २ | १ | शाकटानः | शाकटायनः |
| ४३ | २ | २ | कलहंह | कलहंस |
| ४३ | २ | १३ | दन | दनः |
| ४३ | २ | १५ | स्थाली | स्थली |
| ४३ | २ | १६ | डीप् | ङीष् |
| ४३ | २ | २० | शैाभा | शोभा |
| ४४ | २ | १९ | पायेधरौ | पयोधरौ |
| ४४ | २ | २० | निकयाह्नात्तैं | निकयाह्ना |
| ४६ | १ | १८ | पाल्लवाः | पल्लवाः |
| ४६ | २ | १६ | ङीप् | ङीष् |
| ४८ | २ | ४ | गुणाइति | गुणाइति |
| ४८ | २ | १३ | पारिणामेन | परिणामेन |
| ४९ | १ | ४ | न्यसमासेऽ | न्यंसमासेऽनु |
| ४९ | २ | १२ | विघोष | भिघोष |
| ५० | १ | ३ | प्राययन्ति | प्रापयन्ति |
| ५० | १ | ६ | वेति | चेति |
| ५१ | १ | २ | भिड् | भिद् |
| ५१ | १ | ५ | यक्ष | पक्ष |
| ५३ | २ | १ | योयो | पोयो |

| पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|
| ५५ | १ | ६ | भाभाषित्व | भाषित्व |
| ५६ | १ | ४ | म्भवनानां | म्भुवनानां |
| ५६ | १ | १५ | मिनांस्था | मिनास्था |
| ५६ | १ | १६ | डौवि | डैवि |
| ५८ | १ | १ | नेट्रै | नैद्रै |
| ५८ | १ | ११ | नति | वति |
| ५८ | २ | १८ | क्षयानु | क्षचानु |
| ५८ | २ | १७ | रिखन् | लिखन् |
| ५९ | १ | ७ | दनुनाल्हो | दनुदानो |
| ६१ | २ | ८ | ममूख | मयूख |
| ६२ | १ | १७ | दखिड | दाखिड |
| ६२ | २ | १७ | कप् | कड् |
| ६५ | २ | १८ | विशदे | विशद |
| ६६ | २ | ७ | दरिद्राभ्यः | दरिद्राभ्यः |
| ६६ | २ | १४ | स्वसितै | श्वसितैः |
| ६७ | १ | ३ | डागमः | ड्डागमः |
| ६८ | १ | ८ | प्रणभिः | प्रणतिभिः |
| ६८ | २ | ३ | शोच्ये | शोचे |
| ६८ | २ | १६ | मृदुमितृणै | मृदुमितृणैः |
| ६९ | १ | ११ | शास्थिन | शाह्मिन |
| [illegible] | [illegible] | ३ | वर्चश्च्य | वर्चश्चेदङ् |

B

| पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|
| ७१ | २ | ७ | दतिति | दति |
| ७२ | १ | ५ | पथाःस्व | पथास्व |
| ७२ | १ | २० | म्भुर्तुः | म्भर्तुः |
| ७२ | २ | ४ | ङीप् | ङीष् |
| ७३ | १ | ३ | सुङ्गनानां | सुराङ्गनानां |
| ७३ | १ | ९ | संमभि | समभि |
| ७३ | १ | १४ | सैात्कण्ठै | सोत्कण्ठै |
| ७३ | १ | १७ | अतप | आतप |
| ७४ | १ | ७ | सध्वी | साध्वी |
| ७५ | २ | १५ | न्नसमासान्तः | न्नसमासान्तः |
| ७७ | २ | ९ | हणांम्वहन्ती | हणांवहन्ती |
| ७८ | १ | ५ | स्त्वन्याथा | स्त्वन्यथा |
| ७९ | १ | ३ | अरोढु | आरोढु |
| ७९ | १ | १६ | चमूअदने | चमुअदने |
| ७९ | १ | १९ | लाक्षिताः | लक्षिताः |
| ७९ | २ | ५ | कारोनीति | करोतीति |
| ७९ | २ | ६ | विष्टवड्वावा | विष्ठवड्वावा |
| ८० | १ | ६ | र्म्मैघघोषै | र्म्मैघघोषै |
| ८० | १ | १९ | च्छायते | च्छाद्यते |
| ८१ | १ | ९ | ज्वलं | ज्ज्वलं |
| ८१ | २ | ४ | अह्वये | क[illegible] |

| पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|
| ८२ | १ | १ | चत्रारा | चक्रावाल |
| ८२ | १ | ८ | मानिमीति | मानिनीति |
| ८२ | १ | १३ | क्रियादि | क्र्यादि |
| ८२ | २ | ३ | श्रावहा० दियितो | श्रावहा० दयितो |
| ८३ | १ | १० | छैनाः ० उपेषु | लैनाः ० उपेयु |
| ८३ | १ | १९ | खकपर | खकर |
| ८३ | २ | ३ | कुसमानि | कुसुमानि |
| ८३ | २ | १५ | आतृप्रत्ययः | क्तप्रत्ययः |
| ८४ | १ | ४ | तृतीयं | तृतीय |
| ८४ | १ | २० | कर्मीण | कर्मणि |
| ८४ | २ | ५ | ङीप् | ङीष् |
| ८४ | २ | १७ | प्रागाना | प्राणिना |
| ८६ | १ | ११ | हस | हंस |
| ८७ | १ | १ | शौर्य्ये | शौर्य्ये |
| ८७ | १ | १० | नटान्त | नटाभि |
| ८७ | १ | १६ | चन्द्राना | चन्दना |
| ८८ | १ | १५ | मुपान्ध | मुपान्त |
| ९० | १ | १८ | क्रियादि | क्र्यादि |
| ९१ | १ | १७ | आदन्त | अयन्त |
| ९१ | २ | ७ | लोपश्चि | लोपश्च |
| ९१ | २ | १७ | उदविदे | नुदविदे |

| पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|
| ९१ | २ | २० | लक्षणास्त | लक्षणास्तु |
| ९२ | १ | ९ | प्रकंराम्सु | प्रकरांम्सु |
| ९२ | २ | ३ | कर्त्तृषु | कर्त्तृकेषु |
| ९२ | २ | ५ | दर्शन | दर्शनं |
| ९२ | २ | १४ | एकस्मिम्भा | एकस्मिन्भा |
| ९२ | २ | १७ | सूर्य्यौं | सूर्य्यौ |
| ९२ | २ | १८ | सन्नता | सन्नन्ता |
| ९३ | [illegible] | १२ | धारत्रीं | धरित्रीं |
| ९३ | २ | ७ | दृशिरेद | ददृशिरे |
| ९४ | १ | १९ | वाच्योत्त | वाचोत्त |
| ९४ | २ | १८ | त्कस्यचिक | कस्यचित्क |
| ९५ | १ | ८ | पाक्षिणि | पक्षिणि |
| ९५ | १ | १७ | नाङ्क्षि | नाङ्क्षि |
| ९६ | २ | २ | शुभ्रामासो | शुभ्राभासो |
| ९७ | २ | २ | स्यारपरि | स्यापरि |
| ९८ | १ | ६ | स्रतपङ्क्ति | स्रानपङ्क्ति |
| ९८ | २ | ४ | तस्यामिषे | तस्याभिषे |
| ९८ | २ | ६ | रजतकुभ | रजतकुम्भ |
| १०२ | १ | ६ | वत्पुसा | वत्पुंसा |
| १०२ | १ | ११ | पुनक्त | पुनरुक्त |
| १०२ | २ | ३ | वैयर्थ्या | वैयर्थ्यं |

| पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|
| १०२ | २ | १२ | प्राणय | प्रणय |
| १०३ | २ | १ | भूलास | भूविलास |
| १०४ | १ | ८ | विशेषाय | विशेषण |
| १०५ | १ | १३ | आंर्यो | आर्यो |
| १०७ | १ | १७ | तेषांछ्वन्धनि | तेषांध्वनि |
| १०७ | १ | २० | विरतिमियाप | विवृतिमियाय |
| १०७ | २ | २ | भवद्भिदो | भवद्भिर्दी |
| १०९ | १ | १० | पृथमुनी | पृथुमुनी |
| १११ | १ | १३ | अर्च्चयम् | अर्च्चयत् |
| १११ | २ | १६ | अवरूप | अनरूप |
| ११२ | २ | ६ | गुरुमि | गुरुभि |
| ११३ | २ | ६ | कुमुदघन | कुमुदवन |
| ११४ | १ | २० | प्रायुः | प्रापुः |
| ११४ | २ | [illegible] | पगो | ययौ |
| ११५ | १ | १३ | कुल्लोवेति | कुल्लोर्वेति |
| ११५ | २ | १५ | नुमागमः | नुगागमः |
| ११६ | १ | १९ | अरुर्मन | अनुन्मन |
| ११६ | २ | ७ | क्षतियै | क्षतियैँ |
| ११९ | १ | १६ | मुनेर्मीन | मुनेर्म्मौन |
| १२१ | २ | २ | अनवा | अनव |
| १२३ | २ | १५ | आविज्ञाते | अविज्ञाते |
| १२३ | २ | २० | वृक्षास | हृक्षास |

| पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|
| १२४ | २ | १८ | योद्धुमि | योद्धुमि |
| १२५ | २ | ७ | न्निःनिश्चरांश्रेय | न्निश्चितंश्रेयोनिः |
| १२५ | २ | ८ | समासो | समासान्तो |
| १२५ | २ | १२ | यम्यन्यपः | यन्यपः |
| १२६ | २ | १७ | चेति | वेति |
| १२६ | २ | ५ | पदात्वा | पदत्वा |
| १२७ | २ | ८ | वादित्कर्त्ते | वादिकाल्कर्त्ते |
| १२७ | २ | २ | द्वित्वमभ्या० स्त्रागा | द्वित्वमचाकचा० स्त्राकचा |
| १२८ | १ | १९ | शत्रवःस्त | शत्रवस्त |
| १२८ | २ | १४ | स्मारणीया | स्मरणीया |
| १२९ | १ | १० | कन्याया | कन्यया |
| १२९ | १ | १८ | प्राक्षदो | प्रसादो |
| १२९ | २ | १६ | यम्मिन्प्र | यस्मिन्प्र |
| १३१ | १ | ९ | प्रयत्न | प्रयत्न |
| १३१ | २ | १९ | केषा | केशा |
| १३२ | १ | ९ | प्रति | प्रती |
| १३२ | १ | १८ | मिनित्त० रक्षङ्गिः | निमित्त० रक्षङ्गि |
| १३३ | २ | ९ | दुःखैःक | दुःखैक |
| १३३ | २ | २० | तर्क्कयित्वे | तर्क्कयित्वे |
| १३४ | २ | १५ | रङ्कारः | लङ्कारः |
| १३६ | १ | १५ | द्विषोप्यिभ | द्विषोप्यभि |
| १३७ | १ | ५ | मुहनीर्थः | म[illegible]ीयर्थः |

| पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|
| १३७ | १ | ८ | अन्यथा | अन्यन |
| १२८ | १ | २ | ज्ञाति | ज्ञप्ति |
| १४० | १ | १६ | यच्चादस्य | पुच्छनस्ये |
| १४० | १ | २० | तेजोभिभि | तेजोभिर्भि |
| १४० | २ | ३ | लिङ् | विद्द |
| १४१ | १ | ७ | व्याम्पक | व्यापक |
| १४२ | १ | ६ | वर्वत | वर्तत |
| १४२ | २ | ७ | त्यपसां | त्ययसां |
| १४२ | २ | ९ | ह्ला | तु |
| १४२ | २ | १४ | रप्पेणा | सर्पेणां |
| १४३ | २ | २ | नाक्षत्रादी | नक्षत्रादी |
| १४३ | २ | १४ | यावन्तु | यावत्तु |
| १४३ | २ | १८ | युगप | युगपत् |
| १४४ | २ | २० | तीर्थ्यर्थः | तीथ्यर्थः |
| १४५ | १ | ८ | मभिमवि | जभिमवि |
| १४५ | १ | १६ | पीडिपे | पीडितो |
| १४५ | २ | २ | श्वशातः | शाश्वतः |
| १४५ | २ | १३ | मौक्तिकनां | मौक्तिकानां |
| १४७ | २ | १० | मैद्रस्तूवीं | मैन्द्रस्तूनवीं |
| १४८ | १ | १ | स्तू कयोः | स्तूकरयोः |
| १४९ | १ | १३ | अजहति | अहति |
| १४९ | २ | ५ | सनिति | सनीति |

| ॥कि०स०॥ | पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|---|
| ॥शु०प०॥ | १४९ | २ | १० | कथन्ये | कथयन्ये |
| ॥ ६ ॥ | १५० | २ | १ | षडिति | षडीति |
| | १५१ | १ | ३ | इदिना | इत्यादिना |
| | १५२ | १ | ३ | अथा | अथ |
| | १५२ | १ | १५ | वैराहः | वैराहः |
| | १५२ | २ | ४ | महातो | महतो |
| | १५३ | १ | २ | अमयन्ति | अपयन्ति |
| | १५३ | १ | १३ | खेचरैः | खेचरैः |
| | १५४ | २ | १३ | किरिष्य | करिष्य |
| | १५५ | १ | १३ | वाप | चाप |
| | १५५ | २ | १९ | एश्वर्य्यं | ऐश्वर्य्यं |
| | १५७ | २ | १५ | फियां | प्रियां |
| | १५९ | १ | १५ | परिपरिणाम | विपरिणाम |
| | १६१ | १ | १८ | प्रमार्ज्यतां | प्रमाद्यतां |
| | १६१ | १ | १६ | असमान्त्वा | असमन्त्वा |
| | १६१ | १ | १७ | तथापिः०कारिण | तथापि०कारिण्व |
| | १६२ | १ | १ | किवङ्क | किंवङ्क |
| | १६३ | २ | १८ | सुखा | सुखा |
| | १६४ | १ | १४ | कशिकायां | ०काशिकायां |
| | १६८ | २ | ५ | यथादा | यदा |
| | १६८ | २ | ६ | तदो | तदा |
| | १६९ | १ | ६ | कुर्यतो | कु[illegible] |

| पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|
| [illegible] | १ | ७ | केचो | कैचो |
| १७० | २ | २० | न्यनः | न्यूनः |
| १७२ | २ | २ | भूपका ० दारिव | भूयका ० दरित्वं |
| १७३ | २ | १५ | लघ | लघु |
| १७५ | १ | ५ | ~~आमन~~ | अयत |
| १७५ | १ | २० | अमघ्य | अमुघ्य |
| १७६ | १ | १ | सामर्थे | सामर्थै |
| १७६ | १ | ८ | संहिति | संहति |
| १७७ | २ | २ | शत्रपु | शत्रुपु |
| १७७ | २ | १० | अस्या | अस्य |
| १७७ | २ | १७ | अतो | अतो |
| १७९ | १ | ६ | आभोगो ० वलया | आभोगो ० वलयो |
| १७९ | २ | २० | अद्रव | पद्रव |
| १८३ | २ | ५ | तस्मापद | तस्मादप |
| १८४ | १ | ३ | आत्मन | आत्मने |
| १८५ | २ | ८ | अपय | अद्यय |
| १८७ | २ | ६ | केपोले | कपोले |
| १८९ | १ | १० | मनै | मानै |
| १९१ | १ | १ | शङ्को | शङ्को |
| १९० | २ | ७ | सर्गात् | सर्गाद् |
| १९३ | ५ | ४ | आत्मस्वि | आत्मस्विति |
| १९४ | २ | १७ | वयरागोदरीति | दरीति |

| ॥कि०स०॥ | पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|---|
| ॥शु०प०॥ | १९४ | २ | १८ | आसर | आसवस्यरागोर |
| ॥ ७ ॥ | १९५ | १ | १८ | साफलल्यं | साफल्यं |
| | १९५ | २ | ५ | सहारं | संहारं |
| | १९५ | २ | ८ | ज्वाला | ज्वाला |
| | १९५ | २ | १२ | हिरगमयीनि | हिरगमयानि |
| | १९५ | २ | १७ | हिलगमया | हिरगमया |
| | १९६ | १ | १९ | नडिल्लता | तडिल्लता |
| | १९७ | २ | ३ | विनानैः | वितानैः |
| | १९७ | २ | ६ | अतोनु | आतोनु |
| | १९८ | २ | २० | धैर्व्यै | धैर्य्यै |
| | १९९ | १ | १७ | संस्कारेदिति | संस्कारेति |
| | २०३ | २ | ७ | विद्वान्या | विद्वाइन्या |
| | २०५ | १ | ३ | व्यग्गयेर्ध | [illegible] |
| | २०५ | २ | १ | ततकार | तकार |
| | २०६ | १ | ४ | शरे | शरै |
| | २०८ | २ | १७ | पयसांमिव | पयसामिव |
| | २०८ | २ | १८ | सर्ज | ससर्ज |
| | २१४ | १ | १ | यैयां | येयं |
| | २१४ | २ | १४ | त्विंन्यादि | वित्यादि |
| | २१६ | २ | १० | भुववानि | भुवनानि |

॥ इतिकिरातार्ज्जुनीयकाव्यस्यशुद्धिपत्रम्॥

00044464

1 MAY 1994

Digitized with financial assistance from the
Government of Maharashtra
on 06 February, 2016